श्रिणीभुवोऽनु॰	३ । ३ । २४	पू॰	२६५	पू.	०
श्रीग्रामण्योश्छ॰	७ । १ । ५६	उ॰	३५५	उ.	७२२
श्रुवः शृ च	३ । १ । ७४	पू.	२००	पू.	०
श्रुशृणुपृकृवृ॰	६ । ४ । १०२	उ॰	३२०	उ॰	६७६
श्रेण्यादयः कृता॰	२ । १ । ५९	पू॰	१२१	पू.	३८०
श्रोत्रियंश्छन्दो॰	५ । २ । ८४	उ.	५९	उ.	३१२
श्र्युकः किति	७ । २ । ११	उ॰	३७५	उ॰	७५५
श्लाघह्नुङ्स्थाश॰	१ । ४ । ३४	पू॰	८५	पू.	२९३
श्लिष आलिङ्गने	३ । १ । ४६	पू॰	१९५	पू.	५५९
श्लौ	६ । १ । १०	उ॰	१४४	उ.	४२६
श्वगणाट्ठञ्च	४ । ४ । ११	पू॰	४६३	उ॰	२०२
श्वयतेरः	७ । ४ । १८	उ॰	४४५	उ॰	८५३
श्वयुवमघोनामत॰	६ । ४ । १३३	उ॰	३२८	उ.	६८७
श्वशुरः श्वश्र्वा	१ । २ । ७१	पू	५२	पू॰	२०६
श्वसस्तुट् च	४ । ३ । १५	पू.	४२५	उ॰	१६४
श्वसोवसीयः श्रे॰	५ । ४ । ८०	उ.	१२२	उ॰	३९९
श्वादेरिञि	७ । ३ । ८	उ॰	४०६	उ॰	८०५
श्वीदितो निष्ठायाम्	७ । २ । १४	उ॰	३७६	उ॰	७६०
षः प्रत्ययस्य	१ । ३ । ६	पू॰	५४	पू॰	२१७

Digitized by Google

		काशिका		पदमञ्जरी	
	अ. पा. सू.		पृ.		पृ.
षट्कतिकतिप०	५ । २ । ५१	उ०	५१	उ०	३०३
षट् च काण्डादीनि	६ । २ । १३५	उ०	२४३	उ०	०
षट्चतुर्भ्यश्च	७ । १ । ५५	उ०	३५४	उ०	७२१
षट्त्रिचतुर्भ्यो०	६ । १ । १७९	उ०	१९४	उ०	५१४
षड्भ्यो लुक्	७ । १ । २२	उ.	३४६	उ०	७०९
षढोः कः सि०	८ । २ । ४१	उ०	५०६	उ०	०
षण्मासाण्ण्यच्च	५ । १ । ८३	उ.	२३	उ०	२६०
षत्वतुकोरसि०	६ । १ । ८६	उ०	१६७	उ०	४६५
षपूर्वहन्धृत०	६ । ४ । १३५	उ०	३२९	उ०	६८७
षष्टिकाः षष्टिरा०	५ । १ । ९०	उ०	२४	उ०	२६१
षष्ठ्यादेश्चासंख्यादेः	५ । २ । ५८	उ०	५३	उ०	३०६
षष्ठाष्टमाभ्यां ञ च	५ । ३ । ५०	उ०	८४	उ०	३४३
षष्ठी	२ । २ । ८	पू.	१२७	पू०	३९३
षष्ठी चानादरे	२ । ३ । ३८	पू०	१४८	पू०	४३९
षष्ठी प्रत्येनसि	६ । २ । ६०	उ०	२२५	उ०	५४६
षष्ठीयुक्तश्छन्दसि वा	१ । ४ । ९	पू.	८०	पू.	२७०
षष्ठी शेषे	२ । ३ । ५०	पू०	१५१	पू०	४४६
षष्ठी स्थानेयोगा	१ । १ । ४९	पू०	३०	पू०	९४
षष्ठीहेतुप्रयोगे	२ । ३ । २६	पू०	१४४	पू०	४३३
षष्ठ्यतसर्थप्रत्य०	२ । ३ । ३०	पू.	१४६	पू०	४३५
षष्ठ्याः पतिपुत्र०	८ । ३ । ५३	उ०	५४०	उ०	९९४
षष्ठ्या रूप्य च	५ । ३ । ५४	उ०	८५	उ०	३४४
षष्ठ्या व्याश्रये	५ । ४ । ४८	उ०	११३	उ०	३८७
षात्पदान्तात्	८ । ४ । ३५	उ०	५६७	उ०	१०२९
षिद्गौरादिभ्यश्च	४ । १ । ४१	पू.	३४१	उ०	४३
षिद्भिदादिभ्योऽङ्	३ । ३ । १०४	पू०	२८१	पू०	६८८
ष्टुना ष्टुः	८ । ४ । ४१	उ०	५६९	उ०	१०३१
ष्ठिवुक्लमुचमां शि०	७ । ३ । ७५	उ.	४३०	उ०	८२८
ष्णान्ता षट्	१ । १ । २४	पू०	१२	पू०	७४
ष्यङः संप्रसारणं०	६ । १ । १३	उ.	१४५	उ	४२८
स उत्तमस्य	३ । ४ । ९८	पू.	३२५	पू.	७५०
स एषां ग्रामणीः	५ । २ । ७८	उ.	५७	उ.	३११
सः स्यार्द्धधातुके	७ । ४ । ४९	उ.	४५१	उ.	८६१
सः स्विदिस्वदिस०	८ । ३ । ६२	उ.	५४३	उ.	१०००
संयसश्च	३ । १ । ७२	पू.	२००	पू.	५६७
संयोगादिश्च	६ । ४ । १६६	उ.	३३७	उ.	६९६
संयोगादेरातो धा०	८ । २ । ४३	उ.	५०७	उ०	९४९

Digitized by Google

		काशिका		पदमञ्जरी	
	अ॰ पा॰ सू॰		पृ॰		पृ॰
संयोगान्तस्य लो०	८ । २ । २३	उ.	५०१	उ॰	६४०
संयोगे गुरु	१ । ४ । ११	पू.	८०	पू॰	०
संवत्सराग्रहा०	४ । ३ । ५०	पू.	४३२	उ॰	१७२
संशयमापन्नः	५ । १ । ७३	उ.	२१	उ॰	२५८
संसृष्टे	४ । ४ । २२	पू.	४६५	उ॰	२०३
संस्कृतम्	४ । ४ । ३	पू.	४६२	उ॰	२०१
संस्कृतं भक्षाः	४ । २ । १६	पू.	३८५	उ॰	१२६
संहितशफल०	४ । १ । ७०	पू.	३४६	उ॰	६१
संहितायाम्	६ । १ । ७२	उ.	१६४	उ॰	४५४
संहितायाम्	६ । ३ । ११४	उ.	२८६	उ॰	६२१
सक्थं चाक्रां०	६ । २ । १९८	उ.	२६०	उ.	५७६
सख्यशिश्वीति०	४ । १ । ६२	पू.	३४७	उ॰	५७
सख्युरसंबुद्धौ	७ । १ । ९२	उ.	३६५	उ॰	७३६
सख्युर्यः	५ । १ । १२६	उ.	३४	उ॰	०
सगतिरपि तिङ्	८ । १ । ६८	उ.	४८६	उ॰	९१४
सगर्भसयूथस०	४ । ४ । ११४	पू.	४८३	उ॰	२२०
संकलादिभ्यश्च	४ । २ । ७५	पू.	४०१	उ॰	०
संख्ययाव्ययासन्ना०	२ । २ । २५	पू.	१३३	पू॰	४०८
संख्या	६ । २ । ३५	उ.	२१७	उ॰	५३६
संख्यापूर्वो द्विगुः	२ । १ । ५२	पू.	११९	पू॰	३७५
संख्याया अति०	५ । १ । २२	उ.	८	उ॰	२४१
संख्याया अवयवे०	५ । २ । ४२	उ.	४८	उ॰	२९७
संख्यायाः क्रियाभ्या०	५ । ४ । १७	उ.	१०५	उ॰	३७७
संख्यायाः संवत्सर०	७ । ३ । १५	उ.	४११	उ॰	८०८
संख्यायाः संज्ञासंघ०	५ । १ । ५८	उ.	१७	उ॰	२५०
संख्यायाः स्तनः	६ । २ । १६३	उ.	२५२	उ॰	०
संख्याया गुणस्य०	५ । २ । ४७	उ.	५०	उ॰	३००
संख्याया विधार्थे०	५ । ३ । ४२	उ.	८२	उ॰	३४१
संख्यायाश्च गुणान्ता०	५ । ४ । ५९	उ.	११६	उ॰	३९३
संख्या वंश्येन	२ । १ । १९	पू.	११०	पू॰	३६०
संख्याविसायपूर्व०	६ । ३ । ११०	उ.	२८८	उ॰	६१९
संख्याव्ययादेर्ङीप्	४ । १ । २६	पू.	३३७	उ॰	३६
संख्यासुपूर्वस्य	५ । ४ । १४०	उ.	१३६	उ॰	०
संख्यैकवचना०	५ । ४ । ४३	उ.	१११	उ॰	३८५
संग्रामेप्रयोजन०	४ । २ । ५६	पू.	३९५	उ॰	१४०
संघाङ्कलक्षणे०	४ । ३ । १२७	पू.	४५२	उ॰	१८८
संघे चानौत्तरा०	३ । ३ । ४२	पू.	२६९	पू॰	६७६

Digitized by Google

	अ॰ पा॰ सू॰	काशिका	पृ॰	पदमञ्जरी	पृ॰
संघोद्घौ गणप्र०	३ । ३ । ८६	पू.	२७७	पू॰	६८३
संज्ञापूरण्योश्च	६ । ३ । ३८	उ.	२७०	उ॰	५६६
संज्ञायाम्	२ । १ । ४४	पू.	११६	पू॰	०
संज्ञायाम्	३ । ३ । १०९	पू.	२८२	पू॰	६९१
संज्ञायाम्	३ । ४ । ४२	पू.	३११	पू॰	७३२
संज्ञायाम्	४ । २ । ७२	पू.	३५०	उ॰	०
संज्ञायाम्	४ । ३ । ११७	पू.	४४९	उ॰	१८७
संज्ञायाम्	६ । २ । १५९	उ.	२५१	उ॰	५६८
संज्ञायाम्	८ । २ । ११	उ.	४९७	उ॰	९३५
संज्ञायां लला०	४ । ४ । ४६	पू.	४७०	उ॰	२०७
संज्ञायां शरदो०	४ । ३ । २७	पू.	४२७	उ॰	१६८
संज्ञायां श्रवणा०	४ । २ । ५	पू.	३८२	उ॰	१२६
संज्ञायां समजनि०	३ । ३ । ९९	पू.	२८०	पू॰	६८६
संज्ञायां कन्	४ । ३ । १४७	पू.	४५६	उ॰	०
संज्ञायां कन्	५ । ३ । ७५	उ.	९०	उ॰	०
संज्ञायां कन्	५ । ३ । ८७	उ.	९३	उ॰	०
संज्ञायां कन्थोशीनरेषु	२ । ४ । २०	पू.	१६४	पू॰	४७२
संज्ञायां गिरिनि०	६ । २ । ९४	उ.	२३३	उ॰	५५३
संज्ञायां च	५ । ३ । ९७	उ.	९५	उ॰	०
संज्ञायां च	६ । २ । ७७	उ.	२२९	उ॰	०
संज्ञायां जन्या	४ । ४ । ८२	पू.	४७७	उ॰	२१४
संज्ञायां धेनुष्या	४ । ४ । ८९	पू.	४७८	उ॰	२१६
संज्ञायामनाचिता०	६ । २ । १४६	उ.	२४६	उ॰	५६५
संज्ञायामुपमानम्	६ । १ । २०४	उ.	२००	उ॰	५२२
संज्ञायां भृतृवृजिधा०	३ । २ । ४६	पू.	२२८	पू॰	६२०
संज्ञायां मन्माभ्याम्	५ । २ । १३७	उ.	७३	उ॰	३३१
संज्ञायां मित्राजिनयोः	६ । २ । १६५	उ.	२५२	उ॰	५६९
संज्ञो ऽन्यतरस्यां०	२ । ३ । २२	पू.	१४४	पू॰	४३२
संज्ञौपम्ययोश्च	६ । २ । ११३	उ॰	२३७	उ॰	०
सत्यं प्रश्ने	८ । १ । ३२	उ.	४७६	उ॰	०
सत्यादशपथे	५ । ४ । ६६	उ.	११८	उ॰	३९४
सत्यापपाशरूपवीो०	३ । १ । २५	पू.	१८९	पू॰	५३१
सत्सूद्विषद्रुह०	३ । २ । ६१	पू.	२३२	पू॰	६२५
सदिरप्रतेः	८ । ३ । ६६	उ॰	५४४	उ॰	१००२
सदृशप्रतिरूपयोः०	६ । २ । ११	उ.	२०९	उ॰	५३१
सदिस्वञ्जोः परस्य लिटि	८ । ३ । ११८	उ.	५५६	उ॰	१०१४
सद्यःपरुत्परार्यैषमः०	५ । ३ । २२	उ.	७८	उ.	३३६

	अ॰ पा॰ सू॰	काशिका	पृ॰	पदमञ्जरी	पृ॰
सधमादस्थयोश्छ०	६ । ३ । ९६	उ.	२८५	उ.	६१९
सनः क्तिचि लो०	६ । ४ । ४५	उ.	३०७	उ.	६५५
स नपुंसकम्	२ । ४ । १७	पू॰	१६३	पू.	४७०
सनाद्यन्ता धातवः	३ । १ । ३२	पू.	१९२	पू.	५४४
सनाशंसभिक्ष उः	३ । २ । १६८	पू.	२५४	पू.	६५८
सनिंससनिवांसम्	७ । २ । ६९	उ.	३९४	उ.	७८२
सनि ग्रहगुहोश्च	७ । २ । १२	उ.	३७५	उ.	७५८
सनि च	२ । ४ । ४७	पू.	१७२	पू.	०
सनि मीमाघुरभल०	७ । ४ । ५४	उ.	४५२	उ.	८६१
सनीवन्तर्धभ्रस्जद०	७ । २ । ४९	उ.	३८७	उ.	७७५
सनोतेरनः	८ । ३ । १०८	उ.	५५४	उ॰	१०१२
संधिवेलाद्यृतुनक्षत्रे०	४ । ३ । १६	पू.	४२५	उ.	१६५
सन्महत्परमोत्तमो०	२ । १ । ६१	पू.	१२१	पू.	३८२
सन्यङोः	६ । १ । ९	उ.	१४३	उ.	४२६
सन्यतः	७ । ४ । ७९	उ.	४५८	उ.	८६९
सन्लिटोर्जेः	७ । ३ । ५७	उ.	४२६	उ.	८२४
सन्वल्लघुनि चङ्परे०	७ । ४ । ९३	उ.	४६२	उ.	८७२
सपत्रनिष्पत्रादति०	५ । ४ । ६१	उ.	११७	उ.	३६४
सपूर्वाच्च	५ । २ । ८७	उ.	६०	उ.	३१३
सपूर्वायाः प्रथमाया०	८ । १ । २६	उ.	४७३	उ.	९००
सप्तनोऽञ्छन्दसि	५ । १ । ६१	उ.	१८	उ.	०
सप्तमीपञ्चम्यौ कार०	२ । ३ । ७	पू.	१३९	पू.	४२२
सप्तमी विशेषणे बहु०	२ । २ । ३५	पू.	१३६	पू.	४१६
सप्तमी शौण्डैः	२ । १ । ४०	पू.	११५	पू.	३६९
सप्तमी सिद्धशुष्कप०	६ । २ । ३२	उ.	२१५	उ.	५३४
सप्तमी हारिणौ धर्म्ये०	६ । २ । ६५	उ.	२२६	उ.	५४७
सप्तम्यधिकरणे च	२ । ३ । ३६	पू.	१४७	पू.	४३७
सप्तम्याः पुण्यम्	६ । २ । १५२	उ.	२४९	उ.	५६७
सप्तम्यां चोपपीड०	३ । ४ । ४९	पू॰	३१३	पू.	७३२
सप्तम्यां जनेर्डः	३ । २ । ९७	पू.	२३९	पू.	६३४
सप्तम्यास्त्रल्	५ । ३ । १०	उ.	७६	उ.	०
सभायां नपुंसके	६ । २ । ९८	उ.	२३४	उ.	५५४
सभाया यः	४ । ४ । १०५	पू.	४८२	उ.	०
सभाराजामनुष्यपूर्वा	२ । ४ । २३	पू.	१६५	पू.	४७३
समः क्ष्णुवः	१ । ३ । ६५	पू.	७०	पू.	२४६
समः प्रतिज्ञाने	१ । ३ । ५२	पू.	६६	पू.	२४०
समः समि	६ । ३ । ९३	उ.	२६४	उ.	०

		काशिका		पदमञ्जरी	
	अ. पा. सू.		पृ.		पृ.
समः सुठि	८ । ३ । ५	उ.	५२७	उ.	६७४
समयस्तदस्य०	५ । १ । १०४	उ.	२८	उ.	२६४
समयाच्चयापना०	५ । ४ । ६०	उ.	११७	उ.	३६३
समर्थः पदविधिः	२ । १ । १	पू.	१०३	पू.	३४३
समर्थानां प्रथ०	४ । १ । ८२	पू.	३५२	उ.	७०
समवप्रविभ्यः स्थः	१ । ३ । २२	पू.	५८	पू.	२३१
समवायान्समवैति	४ । ४ । ४३	पू.	४६९	उ.	२०७
समवाये च	६ । १ । १३८	उ.	१८२	उ.	४६४
समस्तृतीयायुक्तात्	१ । ३ । ५४	पू.	६७	पू.	२४०
समांसमां विजायते	५ । २ । १२	उ.	४०	उ.	२८५
समानकर्तृकयोः पूर्व०	३ । ४ । २१	पू.	३०७	पू.	७२३
समानकर्तृकेषु तुमुन्	३ । ३ । १५८	पू.	२९६	पू.	७०८
समानतीर्थे वासी	४ । ४ । १०७	पू.	४८२	उ.	२१९
समानस्य छन्द०	६ । ३ । ८४	उ.	२८२	उ.	६१४
समानोदरे श०	४ । ४ । १०८	पू.	४८२	उ.	२२०
समापनात्सपूर्व०	५ । १ । ११२	उ.	३०	उ.	०
समायाः खः	५ । १ । ८५	उ.	२३	उ.	२६०
समासत्तौ	३ । ४ । ५०	पू.	३१३	पू.	७३३
समासस्य	६ । १ । २२३	उ.	२०४	उ.	५२५
समासाच्च तद्वि०	५ । ३ । १०६	उ.	९७	उ.	३६७
समासान्ताः	५ । ४ । ६८	उ.	११८	उ.	३६५
समासेऽङ्गुलेः सङ्गः	८ । ३ । ८०	उ.	५४८	उ.	१००५
समासेऽनञ्पूर्वे०	७ । १ । ३७	उ.	३४९	उ.	७१५
समाहारः स्वरितः	१ । २ । ३१	पू.	३९	पू.	१७०
समि ख्यः	३ । २ । ७	पू.	२२०	पू.	०
समि मुष्टौ	३ । ३ । ३६	पू.	२६७	पू.	६७५
समि युद्रुवः	३ । ३ । २३	पू.	२६५	पू.	६७३
समुच्चयेऽन्यतरस्याम्	३ । ४ । ३	पू.	३०२	पू.	७१८
समुच्चये सामान्यव०	३ । ४ । ५	पू.	३०३	पू.	७१९
समुदाङ्भ्यो०	१ । ३ । ७५	पू.	७२	पू.	२५६
समुदो रजः पशुषु	३ । ३ । ६९	पू.	२७४	पू.	०
समुद्राभ्राद् घः	४ । ४ । ११८	पू.	४८४	उ.	२२१
समूलाकृतजीवे०	३ । ४ । ३६	पू.	३१०	पू.	७३१
समूहवच्च बहुषु	५ । ४ । २२	उ.	१०७	उ.	३८०
समो गम्यृच्छिप्रच्छि०	१ । ३ । २९	पू.	६०	पू.	२३३
संपरिपूर्वात्ख च	५ । १ । ९२	उ.	२५	उ.	०
संपर्युपेभ्यः करोतौ भू०	६ । १ । १३७	उ.	१८१	उ.	४६४

Digitized by Google

		काशिका		पदमञ्जरी	
	अ. पा. सू.		पृ.		पृ.
संपादिनि	५ । १ । ९९	उ.	२७	उ.	२६४
संपृचानुरुधा०	३ । २ । १४२	पू.	२४९	पू.	६५३
संप्रतिभ्यामना०	१ । ३ । ४६	पू.	६५	पू.	२३८
संप्रसारणस्य	६ । ३ । १३९	उ.	२९४	उ.	६२४
संप्रसारणाच्च	६ । १ । १०८	उ.	१७४	उ.	४७९
संप्रोदश्च कटच्	५ । २ । २९	उ.	४४	उ.	२९०
संबुद्धौ च	७ । ३ । १०६	उ.	४३७	उ.	०
संबुद्धौ शाक०	१ । १ । १६	पू.	१०	पू.	६७
संबोधने च	२ । ३ । ४७	पू.	१५१	पू.	४४५
संबोधने च	३ । २ । १२५	पू.	२४५	पू.	अशु. ६६३ / शु. ६४७
संभवत्यवहर०	५ । १ । ५२	उ.	१५	उ.	२४९
संभावनेऽलमिति०	३ । ३ । १५४	पू.	२९५	पू.	७०६
संभूते	४ । ३ । ४१	पू.	४३०	उ.	१७१
संमाननोत्संजना०	१ । ३ । ३६	पू.	६२	पू.	२३५
संयसश्च	३ । १ । ७२	पू.	२००	पू.	५६७
संयोगादिश्च	६ । ४ । १६६	उ.	३३७	उ.	६९६
सरूपाणामेकशे०	१ । २ । ६४	पू.	५०	पू.	२००
सर्तिशास्त्यर्तिभ्य०	३ । १ । ५६	पू.	१६७	पू.	५६२
सर्वकूलाभ्रकरीषेषु०	३ । २ । ४२	पू.	२२७	पू.	०
सर्व गुणकार्त्स्न्ये	६ । २ । ९३	उ.	२३३	उ.	५५३
सर्वचर्मणः कृतः०	५ । २ । ५	उ.	३८	उ.	२८२
सर्वत्र लोहितादि०	४ । १ । १८	पू.	३३४	उ.	३१
सर्वत्र विभाषा गोः	६ । १ । १२२	उ.	१७७	उ.	४८४
सर्वत्र शाकल्यस्य	८ । ४ । ५१	उ.	५७१	उ.	१०३३
सर्वत्राण् च त०	४ । ३ । २२	पू.	४२६	उ.	१६५
सर्वदेवात्तातिल्	४ । ४ । १४२	पू.	४८९	उ.	०
सर्वनामस्थाने चासं०	६ । ४ । ८	उ.	२६६	उ.	६३०
सर्वनाम्नः स्मै	७ । १ । १४	उ.	३४४	उ.	७०६
सर्वनाम्नः स्याड्०	७ । ३ । ११४	उ.	४३९	उ.	८४२
सर्वनाम्नस्तृतीया०	२ । ३ । २७	पू.	१४५	पू.	४३३
सर्वपूरुषाभ्यां णढ०	५ । १ । १०	उ.	४	उ.	२३३
सर्वभूमिपृथि०	५ । १ । ४१	उ.	१२	उ.	२४७
सर्वस्य द्वे	८ । १ । १	उ.	४६३	उ.	८७५
सर्वस्य सुपि	६ । १ । १९१	उ.	१९७	उ.	५१९
सर्वस्य सोऽन्यत०	५ । ३ । ६	उ.	७५	उ.	३३४
सर्वादीनि सर्वना०	१ । १ । २७	पू.	१३	पू.	७५

Digitized by Google

	अ· पा· सू·	काशिका		पदमञ्जरी	
			पृ·		पृ·
सर्वैकान्यकिंयत्तदः०	५ । ३ । १५	उ·	७६	उ.	३३६
सवाभ्यां वामौ०	३ । ४ । ९१	पू·	३२३	पू·	०
सविधसनीडसमर्याद०	६ । २ । २३	उ·	२१२	उ.	५३३
ससजुषोरुः	८ । २ । ६६	उ·	५१३	उ.	९५५
सस्वेति निगमे	७ । ४ । ७४	उ·	४५७	उ.	८६८
सस्नौ प्रशंसायाम्	५ । ४ । ४०	उ·	१११	उ.	३८४
सः स्यार्द्धधातुके	७ । ४ । ४९	उ·	४५१	उ.	८६१
सस्येन परिजातः	५ । २ । ६८	उ·	५५	उ.	३०८
सहनञ्विद्यमानपूर्व०	४ । १ । ५७	पू·	३४६	उ.	५५
सहयुक्तेऽप्रधाने	२ । ३ । १९	पू·	१४३	पू.	४२९
सह सुपा	२ । १ । ४	पू·	१०५	पू.	३५१
सहस्य सः संज्ञायां	६ । ३ । ७८	उ·	२८१	उ.	६१३
सहस्य सध्रिः	६ । ३ । ९५	उ.	२८५	उ.	०
सहस्रेण संमितौ घः	४ । ४ । १३५	पू.	४८७	उ.	२२५
सह्विवहोरोदवर्णस्य	६ । ३ । ११२	उ.	२८९	उ.	६२०
सहेः पृतनर्ताभ्यां च	८ । ३ । १०९	उ.	५५४	उ.	१०१२
सहेः साडः सः	८ । ३ । ५६	उ.	५४१	उ.	९९४
सहे च०	३ । २ । ९६	पू.	२३९	पू.	६३४
साक्षात्प्रभृतीनि च०	१ । ४ । ७४	पू.	९६	पू.	३२३
साक्षाद् द्रष्टरि संज्ञायाम्	५ । २ । ९१	उ.	६१	उ.	३१४
साढ्यै साढ्वा साढेति०	६ । ३ । ११३	उ.	२८९	उ.	६२१
सात्पदाद्योः	८ । ३ । १११	उ.	५५५	उ.	१०१३
साधकतमं करणम्	१ । ४ । ४२	पू.	८७	पू.	२९६
साधुनिपुणाभ्याम०	२ । ३ । ४३	पू.	१४९	पू.	४३९
सान्तमहतः संयोगस्य	६ । ४ । १०	उ.	२९६	उ.	६३०
साप्तपदीनं सख्यम्	५ । २ । २२	उ.	४२	उ.	२८८
साम आकम्०	७ । १ । ३३	उ.	३४८	उ.	७१२
सा ऽऽमन्त्रितम्	२ । ३ । ४८	पू.	१५१	पू.	४४६
सामि०	२ । १ । २७	पू.	१११	पू.	३६२
सायंचिरंप्राह्णेप्रगे	४ । ३ । २३	पू.	४२६	उ.	१६६
सार्वधातुकमपित्	१ । २ । ४	पू.	३२	पू.	१५०
सार्वधातुकार्द्धधातु०	७ । ३ । ८४	उ.	४३२	उ.	८३१
सार्वधातुके यक्	३ । १ । ६७	पू·	१९९	पू.	५६५
साल्वावयवप्रत्यग्र०	४ । १ । १७३	पू.	३७९	उ.	१२१
साल्वेयगान्धारि०	४ । १ । १६९	पू.	३७८	उ.	०
सावनडुहः	७ । १ । ८२	उ.	३६३	उ.	७३५
सावेकाचस्तृतीया०	६ । १ । १६८	उ.	१९०	उ.	५१०

	अ. पा. सू.	काशिका	पृ.	पदमञ्जरी पृ.
सास्मिन्पौर्णमासीति०	४ । २ । २१	पू.	३८६	उ. १३०
सास्य देवता	४ । २ । २४	पू.	३८६	उ. १३१
सिकताशर्कराभ्यां च	५ । २ । १०४	उ.	६५	उ. ३२३
सिचि च परस्मैपदेषु	७ । २ । ४०	उ.	३८५	उ. ७७३
सिचि वृद्धिः परस्मै०	७ । २ । १	उ.	३६८	उ. ७४६
सिचो यङि	८ । ३ । ११२	उ.	५५५	उ. १०१३
सिजभ्यस्तविदि०	३ । ४ । १०६	पू.	३२६	पू. ७५२
सिति च	१ । ४ । १६	पू.	८१	पू. २७४
सिद्धशुष्कपक्वबन्धैश्च	२ । १ । ४१	पू.	११५	पू. ३७०
सिध्मादिभ्यश्च	५ । २ । ९७	उ.	६३	उ. ३१९
सिध्यतेरपारलौकिके	६ । १ । ४९	उ.	१५६	उ. ४४१
सिन्धुतक्षशिलादि०	४ । ३ । ९३	पू.	४४२	उ. १८२
सिन्ध्वपकराभ्यां कन्	४ । ३ । ३२	पू.	४२८	उ. ०
सिपि धातोरुर्वा	८ । २ । ७४	उ.	५१५	उ. ९५७
सिब्बहुलं लेटि	३ । १ । ३४	पू.	१९२	पू. ५४७
सिवादीनां वाड्व्य०	८ । ३ । ७१	उ.	५४६	उ. १००३
सुः पूजायाम्	१ । ४ । ९४	पू.	१००	पू. ३३२
सुकर्मपापमन्त्रपुण्येषु०	३ । २ । ८९	पू.	२३८	पू. ६३२
सुखप्रिययोर्हिते	६ । २ । १५	उ.	२१०	उ. ५३२
सुखप्रियादानुलोम्ये	५ । ४ । ६३	उ.	११७	उ. ३९४
सुखादिभ्यः कर्तृवे०	३ । १ । १८	पू.	१८७	पू. ५२४
सुखादिभ्यश्च	५ । २ । १३१	उ.	७२	उ. ३२९
सुजः	८ । ३ । १०७	उ.	५५४	उ. १०१२
सुञो यज्ञसंयोगे	३ । २ । १३२	पू.	२४६	पू. ६५०
सुट्कात्पूर्वः	६ । १ । १३५	उ.	१८१	उ. ४८०
सुट् तिथोः	३ । ४ । १०७	पू.	३२६	पू. ७५२
सुडनपुंसकस्य	१ । १ । ४३	पू.	१९	पू. ८९
सुधातुरकङ् च	४ । १ । ९७	पू.	३५९	उ. ६६
सुधितवसुधितनेम०	७ । ४ । ४५	उ.	४४९	उ. ८५९
सुनोतेः स्यसनोः	८ । ३ । ११७	उ.	५५६	उ. १०१४
सुप आत्मनः क्यच्	३ । १ । ८	पू.	१८४	पू. ५१३
सुपः	१ । ४ । १०३	पू.	१०२	पू. ३३६
सुपां सुलुक्पूर्वसव०	७ । १ । ३९	उ.	३५०	उ. ७१७
सुपि च	७ । ३ । १०२	उ.	४३७	उ. ८४०
सुपि स्थः	३ । २ । ४	पू.	२१९	पू. ६१२
सुपो धातुप्रातिप०	२ । ४ । ७१	पू.	१७९	पू. ४९१
सुप्तिङन्तं पदम्	१ । ४ । १४	पू.	८१	पू. २७३

	अ॰ पा॰ सू॰	काशिका	पृ॰	पदमञ्जरी	पृ॰
सुप्प्रतिना मात्रार्थे	२ । १ । ९	पू.	१०७	पू॰	३५५
सुप्यजातौ णिनिस्ता॰	३ । २ । ७८	पू.	२३६	पू॰	६२८
सुप्रातसुश्वसुदिवशा॰	५ । ४ । १२०	उ.	१३१	उ॰	४०६
सुबामन्त्रिते पराङ्गव॰	२ । १ । २	पू.	१०४	पू॰	३४७
सुपजोर्ङ्वनिप्	३ । २ । १०३	पू.	२४०	पू॰	६३५
सुवास्त्वादिभ्योऽण्	४ । २ । ७७	पू॰	४०१	उ॰	१४६
सुविनिर्दुर्भ्यः सुपि॰	८ । ३ । ८८	उ.	५४६	उ॰	१००७
सुषामादिषु च	८ । ३ । ९८	उ.	५५२	उ॰	१०१०
सुसर्वार्धाज्जनपदस्य	७ । ३ । १२	उ.	४१०	उ.	८०६
सुहृद्दुर्हृदौ मित्रा॰	५ । ४ । १५०	उ.	१३८	उ॰	०
सूत्रं प्रतिष्णातम्	८ । ३ । ९०	उ.	५५०	उ॰	१००८
सूत्राच्च कोपधात्	४ । २ । ६५	पू॰	३९८	उ॰	१४३
सूददीपदीक्षश्च	३ । २ । १५३	पू.	२५१	पू॰	६५५
सूपमानात्क्तः	६ । २ । १४५	उ.	२४६	उ॰	५६५
सूर्यतिष्यागस्त्यम॰	६ । ४ । १४९	उ.	३३२	उ॰	६९१
सृघस्यदः क्मरच्	३ । २ । १६०	पू.	२५३	पू॰	६५७
सृजिदृशोर्झल्यमकिति	६ । १ । ५८	उ.	१५८	उ॰	४४३
सृपितृदोः कसुन्	३ । ४ । १७	पू.	३०६	पू॰	०
सृ स्थिरे	३ । ३ । १७	पू॰	२६३	पू॰	६६६
सेधतेर्गतौ	८ । ३ । ११३	उ॰	५५५	उ॰	१०१३
सेनान्तलक्षणका॰	४ । १ । १५२	पू॰	३७३	उ॰	११२
सेनाया वा	४ । ४ । ४५	पू॰	४६६	उ॰	०
सेर्ह्यपिच्च	३ । ४ । ८७	पू॰	३२३	पू॰	७४८
से ऽसिचि कृतचृतच्छृ॰	७ । २ । ५७	उ.	३८६	उ॰	७७६
सो ऽचि लोपे चेत्पा॰	६ । १ । १३४	उ॰	१८०	उ॰	४९०
सोढः	८ । ३ । ११५	उ॰	५५६	उ॰	१०१३
सोदराद्यः	४ । ४ । १०९	पू॰	४८२	उ॰	२२०
सोपदादौ	८ । ३ । ३८	उ॰	५३५	उ॰	९८६
सोममर्हति यः	४ । ४ । १३७	पू॰	४८८	उ॰	२२५
सोमाट्ट्यण्	४ । २ । ३०	पू॰	३८८	उ॰	१३२
सोमे सुञः	३ । २ । ९०	पू॰	२३८	पू॰	६३३
सोमे ह्वरितः	७ । २ । ३३	उ.	३८२	उ.	७६६
सोरवक्षेपणे	६ । २ । १९५	उ॰	२५६	उ.	५७५
सोर्मनसी अलोमो॰	६ । २ । ११७	उ॰	२३८	उ॰	५५७
सोऽस्य निवासः	४ । ३ । ८९	पू॰	४४१	उ.	१८१
सोऽस्यांशवस्नभृतयः	५ । १ । ५६	उ॰	१६	उ.	२५०
सोऽस्यादिरिति छं॰	४ । २ । ५५	पू॰	३९५	उ.	१३९

	अ॰ पा॰ सू॰	काशिका	पृ॰	पदमञ्जरी	पृ॰
सो च	६ । ४ । १३	उ॰	२६८	उ.	०
स्कोः संयोगाद्योरन्ते०	८ । २ । २९	उ॰	५०३	उ.	९४३
स्तन्भेः	८ । ३ । ६७	उ॰	५४५	उ.	१००२
स्तम्भुस्तुम्भुस्कम्भु०	३ । १ । ८२	पू॰	२०१	पू.	५७०
स्तम्बकर्णयोरमिजपोः	३ । २ । १३	पू॰	२२१	पू.	६१४
स्तम्बशकृतोरिन्	३ । २ । २४	पू॰	२२४	पू.	६१७
स्तम्बे क च	३ । ३ । ८३	पू॰	२७७	पू.	६८३
स्तम्भुसिवुसहां०	८ । ३ । ११६	उ॰	५५६	उ.	१०१३
स्तुतस्तोमयोश्छन्दसि	८ । ३ । १०५	उ॰	५५३	उ.	१०११
स्तुसुधूञ्भ्यः परस्मै०	७ । २ । ७२	उ॰	३६४	उ॰	०
स्तेनाद्यन्नलोपश्च	५ । १ । १२५	उ॰	३४	उ॰	२७८
स्तोःश्चुना श्चुः	८ । ४ । ४०	उ॰	५६८	उ.	१०३०
स्तोकान्तिकदूरार्थ०	२ । १ । ३९	पू॰	११५	पू.	०
स्तौतिण्योरेव षण्य०	८ । ३ । ६१	उ॰	५४२	उ.	९९८
स्त्यः प्रपूर्वस्य	६ । १ । २३	उ.	१४६	उ॰	४३२
स्त्रियाः	६ । ४ । ७९	उ॰	३१५	उ॰	६७०
स्त्रियाः पुंवद्भाषित०	६ । ३ । ३४	उ॰	२६८	उ॰	५८८
स्त्रियाम्	४ । १ । ३	पू॰	३३०	उ॰	१२
स्त्रियां संज्ञायाम्	५ । ४ । १४३	उ॰	१३६	उ॰	४१०
स्त्रियां क्तिन्	३ । ३ । ९४	पू॰	२७८	पू॰	६८४
स्त्रियां च	७ । १ । ९६	उ॰	३६६	उ॰	७४२
स्त्रियामवन्तिकु०	४ । १ । १७६	पू.	३८०	उ.	१२२
स्त्रीपुंवच्च	१ । २ । ६६	पू.	५१	पू.	२०७
स्त्रीपुंसाभ्यां नञ्स्नञ०	४ । १ । ८७	पू.	३५४	उ.	७८
स्त्रीभ्यो ढक्	४ । १ । १२०	पू.	३६६	उ.	१०५
स्त्रीषु सौवीरसाल्व०	४ । २ । ७६	पू.	४०१	उ.	०
स्थः क च	३ । २ । ७७	पू.	२३५	पू.	६२८
स्थण्डिलाच्छयि०	४ । २ । १५	पू.	३८५	उ.	१२९
स्थागापापचो भावे	३ । ३ । ९५	पू.	२७९	पू.	६८५
स्थाघ्वोरिच्च	१ । २ । १७	पू.	३५	पू.	१६०
स्थादिष्वभ्यासेन०	८ । ३ । ६४	उ.	५४३	उ.	१०००
स्थानान्तगोशाल०	४ । ३ । ३५	पू.	४२९	उ.	१६९
स्थानान्ताद्विभाषा	५ । ४ । १०	उ.	२०४	उ.	३७४
स्थानिवदादेशोन०	१ । १ । ५६	पू.	२२	पू.	१०३
स्थानेऽन्तरतमः	१ । १ । ५०	पू.	२०	पू.	९४
स्थालीबिलात्	५ । १ । ७०	उ.	२०	उ.	२५७
स्थूलदूरयुवह्रस्व०	६ । ४ । १५६	उ.	३३४	उ.	६९४

Digitized by Google

		काशिका		पदमञ्जरी	
	अ॰ पा॰ सू.		पृ॰		पृ॰
स्थूलादिभ्यः प्रकार॰	५ । ४ । ३	उ.	१०२	उ.	३७०
स्थे च भाषायाम्	६ । ३ । २०	उ.	२६५	उ.	५८६
स्थेशभासपिसक॰	३ । २ । १७५	पू	२५५	पू.	६५६
स्नात्व्यादयश्च	७ । १ । ४६	उ.	३५३	उ.	०
स्नुक्रमोरनात्मनेपद॰	७ । २ । ३६	उ.	३८३	उ.	७६८
स्नेहने पिषः	३ । ४ । ३८	पू.	३११	पू.	७३१
स्पर्धायामाङः	१ । ३ । ३१	पू.	६१	पू.	२३४
स्पृशोनुदके क्विन्	३ । २ । १५८	पू.	२३१	पू.	६२३
स्पृहिगृहिपतिद॰	३ । २ । ५८	पू.	२५२	पू.	६५६
स्पृहेरीप्सितः	१ । ४ । ३६	पू.	८५	पू.	२६५
स्फायः स्फी निष्ठायाम्	६ । १ । २२	उ.	१४६	उ.	०
स्फायो वः	७ । ३ । ४१	उ.	४२०	उ.	०
स्फिगपूतवीणाञ्जो॰	६ । २ । १८७	उ.	२५७	उ.	५७४
स्फुरतिस्फुलत्योर्घञि	६ । १ । ४७	उ.	१५६	उ.	०
स्फुरतिस्फुलत्योर्नि॰	८ । ३ । ७६	उ.	५४७	उ.	०
स्मिपूङ्रञ्ज्वशां॰	७ । २ । ७४	उ.	३९५	उ.	७८३
स्मे लोट्	३ । ३ । १६५	पू.	२९८	पू.	७११
स्मोत्तरे लङ् च	३ । ३ । १७६	पू.	३०१	पू.	७१३
स्यतासी लृलुटोः	३ । १ । ३३	पू.	१६२	पू.	५४५
स्यदो जवे	६ । ४ । २८	उ.	३०३	उ.	६५१
स्यश्छन्दसि बहुलम्	६ । १ । १३३	उ.	१८०	उ.	४६०
स्यसिच्सीयुट्तासिषु॰	६ । ४ । ६२	उ.	३१०	उ.	६६२
स्रवतिशृणोतिद्रवति॰	७ । ४ । ८१	उ.	४५६	उ.	८७०
स्रोतसो विभाषा॰	४ । ४ । ११३	पू.	४८३	उ.	२२०
स्वं रूपं शब्दस्याश॰	१ । १ । ६८	पू.	२८	पू.	१३६
स्वं स्वामिनि	६ । २ । १७	उ.	२११	उ.	०
स्वतन्त्रः कर्ता	१ । ४ । ५४	पू.	६०	पू.	३१३
स्वतवान्पायौ	८ । ३ । ११	उ.	५२६	उ.	६७६
स्वनहसोर्वा	३ । ३ । ६२	पू.	२७३	पू.	०
स्वपादिर्हिंसामच्य॰	६ । १ । १८८	उ.	१९६	उ.	५१८
स्वपितृषोर्नजिङ्	३ । २ । १७२	पू.	२५५	पू.	०
स्वपिस्यमिव्येञां॰	६ । १ । १९	उ.	१४८	उ.	४३२
स्वपो नन्	३ । ३ । ९१	पू.	२७८	पू.	०
स्वमज्ञातिधनाख्या॰	१ । १ । ३५	पू.	१६	पू.	८२
स्वमोर्नपुंसकात्	७ । १ । २३	उ.	३४६	उ.	७०६
स्वयं क्तेन	२ । १ । २५	पू.	१११	पू.	३६२

Digitized by Google

		काशिका		पदमञ्जरी	
	अ॰ पा॰ सू॰		पृ॰		पृ॰
स्वरतिसूतिसूयति०	७ । २ । ४४	उ.	३८६	उ.	७७३
स्वरादिनिपातमव्ययम्	१ । १ । ३७	पू.	१६	पू.	८३
स्वरितञितः कर्त्र०	१ । ३ । ७२	पू.	७२	पू.	२५४
स्वरितमाम्रेडिते०	८ । २ । १०३	उ.	५२३	उ.	९६९
स्वरितात्संहितायाम्०	१ । २ । ३९	ए.	४२	पू.	१७६
स्वरितेनाधिकारः	१ । ३ । ११	पू.	५५	पू.	२२१
स्वरितो वानुदात्ते०	८ । २ । ६	उ.	४९५	उ.	९३२
स्वसुश्छः	४ । १ । १४३	पू.	३७०	उ.	०
स्वागतादीनां च	७ । ३ । ७	उ.	४०९	उ.	८०५
स्वाङ्गाच्चेतोऽमानिनि	६ । ३ । ४०	उ.	२७१	उ.	५९७
स्वाङ्गाच्चोपसर्जनादसं०	४ । १ । ५४	पू.	३४५	उ.	५४
स्वाङ्गे तस्प्रत्यये कृभ्वोः	३ । ४ । ६१	पू.	३१६	पू.	७३६
स्वाङ्गेऽध्रुवे	३ । ४ । ५४	पू.	३१४	पू.	७३३
स्वाङ्गेभ्यः प्रसिते	५ । २ । ६६	उ.	५५	उ.	३०८
स्वादिभ्यः श्नुः	३ । १ । ७३	पू.	२००	पू.	५[illegible]७
स्वादिष्वसर्वनाम०	१ । ४ । १७	पू.	८१	पू.	२७५
स्वादुमि णमुल्	३ । ४ । २६	पू.	३०८	पू.	७२६
स्वापेश्चङि०	६ । १ । १८	उ.	१४८	उ.	४३१
स्वामिन्नैश्वर्ये	५ । २ । १२६	उ.	७०	उ.	३२८
स्वामीश्वराधिपति०	२ । ३ । ३९	पू.	१४९	पू.	४३९
स्वे पुषः	३ । ४ । ४०	पू.	३११	पू.	७३१
स्वौजसमौट्छष्टाभ्यां०	४ । १ । २	पू.	३२६	उ.	११
ह एति	७ । ४ । ५२	उ.	४५१	उ.	८६१
हनः सिच्	१ । २ । १४	पू.	३४	पू.	१५९
हनश्च वधः	३ । ३ । ७६	पू.	२७५	पू.	६८२
हनस्त च	३ । १ । १०८	पू.	२०८	पू.	५९५
हनस्तोऽचिण्णलोः	७ । ३ । ३२	उ.	४१७	उ.	८१३
हनो वध लिङि	२ । ४ । ४२	पू.	१७१	पू.	४८२
हन्त च	८ । १ । ५४	उ.	४८१	उ.	९०९
हन्तेरत्पूर्वस्य	८ । ४ । २२	उ.	५६४	उ.	१०२६
हन्तेर्जः	६ । ४ । ३६	उ.	३०४	उ.	६५३
हरतेरनुद्यमनेऽच्	३ । २ । ९	पू.	२२१	पू.	६१३
हरतेर्दृतिनाथयोः०	३ । २ । २५	पू.	२२४	पू.	६१७
हरत्युत्सङ्गादिभ्यः	४ । ४ । १५	पू.	४६४	उ.	२०२
हरितादिभ्योऽञः	४ । १ । १००	पू.	३६०	उ.	९८
हरीतक्यादिभ्यश्च	४ । ३ । १६७	पू.	४६०	उ.	१९९
हलः	६ । ४ । २	उ.	२९५	उ.	६२७

Digitized by Google

		काशिका		पदमञ्जरी	
	अ॰ पा॰ सू॰		पृ॰		पृ॰
हलः श्नः शानज्झौ	३ । १ । ८३	पू.	२०२	पू.	५७०
हलदन्तात्सप्तम्याः सं०	६ । ३ । ६	उ.	२६३	उ.	५८२
हलन्ताच्च	१ । २ । १०	पू.	३३	पू.	१५७
हलन्त्यम्	१ । ३ । ३	पू.	५३	पू.	२१४
हलश्च	३ । ३ । १२१	पू.	२८५	पू.	६६४
हलश्चेजुपधात्	८ । ४ । ३१	उ.	५६६	उ.	१०२८
हलसीराट्ठक्	४ । ३ । १२४	पू.	४५१	उ.	२१४
हलसीराट्ठक्	४ । ४ । ८१	पू.	४७७	उ.	२१४
हलसूकरयोः पुवः	३ । २ । १८३	पू.	२५८	पू.	६६१
हलस्तद्धितस्य	६ । ४ । १५०	उ.	३३३	उ.	६६२
हलादिः शेषः	७ । ४ । ६०	उ.	४५३	उ.	८६३
हलि च	८ । २ । ७७	उ.	५१५	उ.	०
हलि लोपः	७ । २ । ११३	उ.	४०६	उ.	७६८
हलि सर्वेषाम्	८ । ३ । २२	उ.	५३२	उ.	९८०
हलोऽनन्तराः संयोगः	१ । १ । ७	पू.	७	पू.	५३
हलो यमां यमि लोपः	८ । ४ । ६४	उ.	५७४	उ.	१०३४
हल्ङ्याब्भ्यो दीर्घा०	६ । १ । ६८	उ.	१६२	उ.	४४६
हव्येऽनन्तः पादम्	३ । २ । ६६	पू.	२३३	पू.	०
हशश्वतोर्लङ् च	३ । २ । ११६	पू.	२४३	पू.	०
हशि च	६ । १ । ११४	उ.	१७५	उ.	४८१
हश्च व्रीहिकालयोः	३ । १ । १४८	पू.	२१८	पू.	६०८
हस्ताज्जातौ	५ । २ । १३३	उ.	७२	उ.	३३०
हस्तादाने चेरस्तेये	३ । ३ । ४०	पू.	२६८	पू.	६७६
हस्ते वर्तिग्रहोः	३ । ४ । ३६	पू.	३११	पू.	७३१
हायनान्तयुवा०	५ । १ । १३०	उ.	३५	उ.	२७६
हिंसायां प्रतेश्च	६ । १ । १४१	उ.	१८२	उ.	४६५
हिंसार्थानां च समा०	३ । ४ । ४८	पू.	३१३	पू.	७३२
हि च	८ । १ । ३४	उ.	४७६	उ.	९०४
हितं भक्षाः	४ । ४ । ६५	पू.	४७४	उ.	२११
हिनुमीना	८ । ४ । १५	उ.	५६१	उ.	१०२३
हिमकाषिहतिषु च	६ । ३ । ५४	उ.	२७५	उ.	६०४
हिरण्यपरिमाणं धने	६ । २ । ५५	उ.	२२४	उ.	५४६
हीने	१ । ४ । ८६	पू.	६८	पू.	३२६
हीयमानपापयोगाच्च	५ । ४ । ४७	उ.	११३	उ.	३८७
हुझल्भ्यो हेर्धिः	६ । ४ । १०१	उ.	३२०	उ.	६७६
हुश्नुवोः सार्वधातुके	६ । ४ । ८७	उ.	३१७	उ.	६७१
हृक्रोरन्यतरस्याम्	१ । ४ । ५३	पू.	९०	उ.	३१२

	अ॰ पा॰ सू॰	काशिका पृ॰		पदमञ्जरी पृ॰	
हृदयस्य प्रियः	४ । ४ । ९५	पू.	४८०	उ.	२१८
हृदयस्य हृल्लेखयदण्०	६ । ३ । ५०	उ.	२७४	उ.	६७३
हृद्भगसिन्ध्वन्ते पूर्वप०	७ । ३ । १९	उ.	४१३	उ.	८०६
हृषेर्लोमसु	७ । २ । २९	उ.	३८१	उ.	७६६
हेति क्षियायाम्	८ । १ । ६०	उ.	४८३	उ.	९११
हेतुमति च	३ । १ । २६	पू.	१६०	पू.	५३२
हेतुमनुष्येभ्योऽन्यत०	४ । ३ । ८१	पू.	४३९	उ.	१८०
हेतुहेतुमतोर्लिङ्	३ । ३ । १५६	पू.	२९६	पू.	७०७
हेतौ	२ । ३ । २३	पू.	१४४	पू.	४३२
हेमन्तशिशिरावह०	२ । ४ । २८	पू.	१६६	पू.	४७६
हेमन्ताच्च	४ । ३ । २१	पू.	४२६	उ.	०
हे मपरे वा	८ । ३ । २६	उ.	५३२	उ.	९८१
हेरचङि	७ । ३ । ५६	उ.	४२६	उ.	८२४
हैयङ्गवीनं संज्ञायाम्	५ । २ । २३	उ.	४३	उ.	२८६
हैहेप्रयोगे हैहयोः	८ । २ । ८५	उ.	५१६	उ.	९६३
हो ढः	८ । २ । ३१	उ.	५०३	उ.	९४५
होत्राभ्यश्छः	५ । १ । १३५	उ.	३७	उ.	२८१
हो हन्तेर्ञ्णिन्नेषु	७ । ३ । ५४	उ.	४२५	उ.	८२३
ह्म्यन्तक्षणश्वसजा०	७ । २ । ५	उ.	३६९	उ.	७५०
ह्रस्वः	७ । ४ । ५९	उ.	४५३	उ.	८६३
ह्रस्वं लघु	१ । ४ । १०	पू.	८०	पू.	२५०
ह्रस्वनद्यापो नुट्	७ । १ । ५४	उ.	३५४	उ.	७२१
ह्रस्वनुड्भ्यां मतुप्	६ । १ । १७६	उ.	१९३	उ.	५१३
ह्रस्वस्य गुणः	७ । ३ । १०८	उ.	४३८	उ.	८४१
ह्रस्वस्य पिति कृति०	६ । १ । ७१	उ.	१६४	उ.	४५४
ह्रस्वाच्चन्द्रोत्तर०	६ । १ । १५१	उ.	१८५	उ.	४९८
ह्रस्वात्तादौ तद्धिते	८ । ३ । १०१	उ.	५५७	उ.	१०११
ह्रस्वादङ्गात्	८ । २ । २७	उ.	५०२	उ.	९४३
ह्रस्वान्तेऽन्त्यात्पूर्वम्	६ । २ । १७४	उ.	२५५	उ.	५७१
ह्रस्वे	५ । ३ । ८६	उ.	९३	उ.	३६४
ह्रस्वो नपुंसके०	१ । २ । ४७	पू.	४४	पू.	१८७
ह्रुह्वरेश्छन्दसि	७ । २ । ३१	उ.	३८२	उ.	७६६
ह्रादो निष्ठायाम्	६ । ४ । ९५	उ.	३१९	उ.	६७५
ह्वः संप्रसारणम्	६ । १ । ३२	उ.	१५२	उ.	४३६
ह्वः संप्रसारणं च न्य०	३ । ३ । ७२	पू.	२७५	पू.	६८२
ह्वावामश्च	३ । २ । २	पू.	२१९	पू.	६११

समाप्तं चेदं काशिकापदमञ्जर्योः सूचीपत्रम् ॥ शुभं भवतु ॥

Digitized by Google

Digitized by Google

"कस्कादिषु च" ॥ कुप्वो ≍क≍पौ चेत्यस्यापवादः । 'यथायोगमिति' । इणः परस्य षत्वमन्यस्य सत्वमित्येष यथायोगार्थः । 'कस्क इति'। स्वन्तस्य किमो वीप्सायां द्विर्वचनम् । 'कौतस्कुत इति'। कुतःशब्दस्य पूर्ववद् द्विर्वचनं, तस्मात्तत आगत इत्यण् । अव्ययानां भमात्रे टिलोपः। 'भ्रातुष्पुत्र इति'। ऋतो विद्यायोनिसंबन्धेभ्य इत्यलुक् । 'शुनस्कर्ण इति'। षष्ठ्या आक्रोशइत्यलुक्, पारायणेन दीव्यन्ति व्यवहरन्तीति पारायणिकाः । पारायणं द्विविधं धातुपारायणं नामपारायणमिति, भाष्ये वृत्तावित्यादिनाऽनन्तरोक्तमर्थं निराकरोति । अविहितलक्षणइत्यादिना ऽऽकृति गणोऽयमिति दर्शयति, विसर्जनीयस्थानिकयोः सकारषकारयोरुपचार इति संज्ञा ॥

"छन्दसि वाऽप्राम्रेडितयोः" ॥ 'अयस्पात्रमिति'। असमासोऽयं, समासे ह्यतः कृकमीत्यादिना नित्यं सत्वं प्राप्नोति, अस्य विकल्पस्यासिद्धत्वात्, असमासे चास्य विकल्पस्य चरितार्थत्वात्, यदि वा प्रकरणे प्रकरणमसिद्धमिति पक्षे समासेप्युदाहरणं किन्त्वनेन मुक्ते तेन नित्यं प्राप्नोति, तस्मादसमास एवायं, समासे तु यदि विकल्पो दृश्यते स छान्दसत्वेनोपपाद्यः । 'विश्वतस्पात्रमिति' । अत्राव्ययत्वादतः कृकमीत्यस्याप्रसङ्गः । 'उरुणस्कार इति'। अस्मदो नसादेशः, नश्च धातुस्थोरुषुभ्य इति णत्वं, कारशब्दो घञन्तः, अत्रासमासत्वादप्रसङ्गः । 'अग्निः प्रविद्वानिति'। अत्र षत्वप्रसङ्गः, उभयक्रमे तु सकार आदेश इत्युपलक्षणम् । 'परुषःपरुष इति'। वीप्सायां द्विर्वचनम् । अङ्गमङ्गं परुष्परु, चतुष्पुष्पा विशस्ते इत्यादयस्तु कस्कादिषु द्रष्टव्याः, हरिकेशः पुरस्तादित्यादेरत्रोपयोगं न पश्यामः, कथमत्रैव सूत्रे वायहणात्सत्वषत्वयोर्भावाभावौ प्रतिपादितौ, किमत्र, सर्वे विधयश्छन्दसि विकल्प्यन्त इत्यनेन ॥

"कःकरत्करतिकृधिकृतेष्वनदितेः" ॥ 'करति' । कृञो लुङ्, मन्त्रे घसेत्यादिना च्लेर्लुक्, तिपि गुणः, तिपो हल्ङ्यादिलोपः, बहुलं छन्दस्यमाङ्योगेपीत्यडभावः । 'करदिति'। कृञ एव लुङ्, कृमृदृरुहिभ्य-

श्छन्दसीति श्लुरह् । 'करतीति' । लट्, व्यत्ययेन शप् । 'कृधीति' । कृञो लोट्, सेर्हिः, बहुलं छन्दसीति शपो लुक्, श्रुशृणुपॄकृवृभ्यश्छन्दसीति हेर्धिरादेशः । 'कृतमिति' । कृञ एव क्तः । 'सकार आदेश इति' । षत्वस्याप्युपलक्षणमेतत्[1] । 'विश्वतस्करिति' । अव्ययत्वादसमासत्वाच्चातः कृकमीत्यस्याप्रसङ्गः, इतरेषु त्वसमासत्वादप्रसङ्गः, शत्र करत् यथा नः श्रेयसः करदित्यादौ छान्दसत्वात्सत्वाभावः, तथा कृधीत्यत्र सकारषकारकशब्देषु परतस्तैत्तिरीयके सत्वं न भवति, तन्न आमनसः कृधि स्वाहा, उरुक्षयाय नः कृधि घृतमन्यासे, शं च नः कृधि क्रत्वे ॥

"पञ्चम्याः परावध्यर्थे" ॥ 'अध्यर्थइति' । परेरिदं विशेषणं, हिमवतस्परि, हिमवत उपरीत्यर्थः । व्यत्ययेन षष्ठ्याः स्थाने पञ्चम्याः प्रयोगः । 'पर्यांज उद्भृतमिति' । अत्र परिः सर्वतोभावे वर्त्तते ॥

"पातौ च बहुलम्" ॥ क्वचित्पठ्यते पाताविति धातुनिर्द्देश इति । अन्ये तूदाहरणपर्यालोचनया लोडन्तानुकरणं मन्यन्ते ॥

"षष्ठ्याः पतिपुत्रपृष्ठपारपदपयस्पोषेषु" । 'वाचस्पतिरिति' । तत्पुरुषे कृति बहुलमित्यलुक् ॥

"अपदान्तस्य मूर्धन्यः" ॥ मूर्ध्नि भवो मूर्द्धन्यः, शरीरावयवाद्यत्, ये चाभावकर्मणोरिति प्रकृतिभावाच्चस्तद्धितइति टिलोपाभावः । 'सुष्वापेति' । लिट्यभ्यासस्योभयेषामिति संप्रसारणं, मूर्धन्यग्रहणमनर्थकम्, ष इत्येव सिद्धमत आह । 'षइत्येवसिद्धे इति' । षइत्युच्यमाने इणः षोढ्वमित्यत्रापि षत्वं प्रसज्येत, ढत्वं चेष्यते, अथात्रैव मूर्धन्यग्रहणं क्रियते, उत्तरेषु योगेषु पुनः षग्रहणं कर्त्तव्यं, मूर्धन्यग्रहणे तु क्रियमाणे न दोषो भवति ॥

"सहेः साडः सः" ॥ 'साड्रूपस्येति' । साडिति रूपं प्राप्तस्येत्यर्थः । 'जलाषाडिति' । भजो ण्विः, छन्दसि सहः, उपधावृद्धिः, ढत्वं,

१ षत्वस्याप्युपलक्षणमेतदित्यस्याग्रे सत्यावादिति प्रतिषेध इति पाठो बहुषु पुस्तकेषूपलभ्यते ।

जश्त्वचर्त्वे, अन्येषामपि दृश्यतइत्युपपदस्य दीर्घः, सकारस्यान्तरतमो मूर्द्धन्यः षकारः । 'सहेरिति किमिति' । अन्यत्र साड्शब्दस्यासंभवं मन्यमानस्य प्रश्नः । 'सह डेनेति' । अडो वृश्चिकलाङ्गूलं, तस्यापत्यं साडिरिति, साडइत्यत्र तु साडशब्दस्यानर्थकत्वादप्रसङ्गं मत्वा तद्धितान्तः प्रत्युदाहृतः, तत्र हि यस्येति लोपे कृते साड्शब्दोऽर्थवान्भवति, न च यस्येति लोपस्य स्थानिवत्त्वं, पूर्वत्रासिद्धे न स्थानिवदितिवचनात्, एवमपि षत्वतुकोरसिद्ध इत्येकादेशस्यासिद्धत्वात्साड्शब्दस्याभावः, तस्मात्सह डेन वर्त्ततइति सड इति पाठः, यस्य नाम्नि डशब्दो वर्त्तते स सडः, यथा मृड इति, तस्यापत्यं साडिः । नन्वत्रापि बहिर्भूततद्धितापेक्षत्वाद्बहिरङ्गा वृद्धिः, क्व तर्हि स्याज्जलाषाडिति, नन्वत्रापि बहिर्भूतण्व्यपेक्षया बहिरङ्गैव वृद्धिः, अथ तत्र वचनाद्भवति, इहापि प्राप्नोति तुरासाहमिति, तुरासाहं पुरोधायेत्यादौ तु ण्विरेव दुर्लभः, प्रागेव षत्वम् । 'आकारस्य मा भूदिति' । अन्त्यस्य[1] मा भूदिति तु नोक्तं, डकारस्य डकारवचने प्रयोजनाभावात्, अथाप्यनन्तरतममूर्धन्यार्थं वचनं स्यादेवमप्यपदान्तस्येत्यन्त्यस्य न भविष्यति । नन्वेवमप्यलोन्त्यस्येत्यस्मिन्बाधिते सर्वादेशो मूर्द्धन्यः प्राप्नोति तत्किमुच्यते आकारस्य माभूदिति । उच्यते । अनन्त्यविकारेन्त्यसदेशस्येत्याकारस्य मूर्धन्यः प्राप्नोति ॥

"इण्कोः" ॥ इणिति परेण णकारेण प्रत्याहारः । कुइति कवर्गस्य ग्रहणं, तयोः समाहारद्वन्द्वे एकवचनं, नुमागमस्तु सत्यपि नपुंसकत्वे न कृतः, अनित्यमागमशास्त्रमिति कृत्वा । 'वाक्षिति'। चोः कुरिति कुत्वे कृते कवर्गात्परः सकारः, वर्गग्रहणं शासिवसिघसीनां चेत्यत्र घकारस्यापि ग्रहणार्थं, जक्षतुरिति, अन्यथा चर्त्वस्यासिद्धत्वान्न स्यात्, अथ वचनसामर्थ्याच्चर्त्वस्य सिद्धत्वमाश्रीयेत चिन्त्यं वर्गग्रहणस्य प्रयोजनम् । 'दास्यतीति'। ननु च नाज्झलावित्यत्रागृहीतसवर्णानामचां ग्रहणमित्यसकृदुक्तं, ततश्च यथा कुमारी शेतइत्यत्रेकारशकारयोः सावर्ण्यमप्र-

१ डकारस्य माभूदिति इं॰ पु॰ पाठः ।

तिषिद्धं तथा आकारहकारयोरपि, ततः किं, हकारेणाकारस्य ग्रहणा-त्षत्वप्रसङ्गः । नैष दोषः । हकारो विवृतः, आकारो विवृततरः, एवं हि पठन्ति विवृतकरणाः स्वरास्तेभ्य एचौ विवृततरौ ताभ्यामैचौ ताभ्या-मप्याकारः संवृतोकार इति, एवं च कृत्वा इष्टकासु वयस्यास्वित्यादयो निर्देशा उपपद्यन्ते । 'असाविति' । अदस औ सुलोपश्च, तदोः सः सावित्यादेशसकारोयं न त्विण्कोः परः ।

"नुम्विसर्जनीयशर्व्यवायेऽपि" ॥ इण्कोरिति पञ्चमीनिर्देशात् व्यवाये षत्वं न प्राप्नोतीत्ययमारम्भः । नुम्ग्रहणमनुस्वारोपलक्षणं नुमा व्यवायासम्भवात्, नश्चापदान्तस्य झलीत्यनुस्वारस्य विधानात्, अनु-स्वारग्रहणमेव तु न कृतं, नुम्स्थानिकेनैवानुस्वारेण व्यवधाने यथा स्यादिह मा भूत् पुंस्विति, पुंस्शब्दात्सुपि संयोगान्तस्य लोपः, मकारस्यानु-स्वारः । 'सर्पींषीति' । नपुंसकस्य झलच इति नुम्, सान्तमहतः संयो-गस्येति दीर्घः । 'सर्पिःष्विति' । वा शरीति पक्षे विसर्जनीयः । 'सर्पिष्-ष्विति' । पक्षे सत्वं, तेनैव व्यवाये षत्वं, सकारस्य ष्टुत्वं, सकारग्रहणे कर्त्तव्ये शरिति प्रत्याहारग्रहणं चिन्त्यप्रयोजनम्, इह यथा वृषलैर्न प्रवे-ष्टव्यमिति वृषलनिवृत्तिपरायां चोदनायां प्रत्येकं संहतानाञ्च प्रवेशो न भवति, तथा नुमादीनां षत्वाप्रतिबन्ध[1]हेतुत्वपरायाञ्चोदनायां प्रत्येकं समुदायेन च व्यवाये षत्वं प्राप्नोतीति तत्र सर्वव्यवायस्य क्वचिदसंभवा-त्क्वचित्प्रत्येकं क्वचिद् द्वाभ्यां व्यवाये षत्वप्रसङ्ग इत्यत आह । 'नुमादिभिः प्रत्येकं व्यवायइति' । एवं मन्यते, व्यवायशब्दः प्रत्येकमभिसंबध्यते, नुम्व्यवाये विसर्जनीयव्यवाये शर्व्यवायइति, यथादर्शितमुपक्रमे, तत्रेण्को-रिति पञ्चमीनिर्देशेनानन्तर्ये षत्वप्रतिपादनादनेन च वाक्यत्रयेणैकैकव्य-वाये षत्वाभ्यनुज्ञानाद्येन नाव्यवधानमितिन्यायेन अधिकव्यवाये षत्वा-भाव इति । 'निंस्सइति' । णिसि चुम्बने, अदादिरनुदात्तेत् । 'निंस्स्वे-ति' । लोट्, सवाभ्यां वामौ ॥

[1] बोधनपरायामिति पाठः इं॰ पु॰ ।

Digitized by Google

"आदेशप्रत्यययो:" ॥ किमवयवषष्ठी आदेशस्य यः सकारः प्रत्ययस्य च यः सकार इति आहोस्वित्समानाधिकरणा आदेशो यः सकारः प्रत्ययो यः सकार इति, तत्राद्ये पक्षे स इत्यस्यानुवृत्तस्येह वचनविपरिणामो न कर्त्तव्यो भवति, कार्येण त्वादेशप्रत्यययोः साक्षात् श्रुतयोरसंबन्धः सकारविशेषणत्वात्, द्वितीये त्वादेशप्रत्यययोः सकारयोरिति द्विवचनं विपरिणाम्यं कार्येण तु साक्षाच्छ्रुतयोः संबन्ध इति वचनदोषसाम्याच्च युक्तितः पक्षविशेषनिर्णयः, तत्रावयवषष्ठी चेद् द्विर्वचने दोषः, विसंविसं मुसलंमुसलम्, आष्टमिके हि द्विर्वचने स्थाने द्विर्वचनपक्षोऽपि स्थापितः, ततश्च नित्यवीप्सयोरित्येकस्य विसमित्येतस्य स्थाने विसंविसमित्येतस्मिन्नादेशे कृते तस्यावयवः सकार इति षत्वप्रसङ्गः । अथ द्वितीयः पक्षः करिष्यति हरिष्यत्यत्र न प्राप्नोति, समुदायो ह्यत्र प्रत्ययो न सकारमात्रं, क्व तर्हि स्यात् यत्र सकारमात्रं प्रत्ययः, इन्द्रो मावक्षत् स देवान्यक्षत्, वचियजिभ्यां लेट्, तिप्, इतश्च लोप इत्यादिनेकारलोपः, लेटोऽडाटावित्यट्, सिब्बहुलं लेटीति सिप्, वचेः कुत्वं, यजेः षत्वकत्वे, अथापरौ द्वौ पक्षौ आदेशस्य यः सकारः प्रत्ययो यः सकार इति, विपर्ययो वा आदेशो यः सकारः प्रत्ययस्य यः सकार इति, तत्राद्ये पक्षे तावेव दोषौ यौ पूर्वयोः पक्षयोः विसंविसमित्यादौ प्रसङ्गः, करिष्यतीत्यादौ चाप्रसङ्ग इति, तस्मादन्त्यः पक्ष आश्रीयते, यदाह । 'आदेशप्रत्यययोरिति षष्ठी भेदेन संबध्यतइत्यादि' । अत्र च ज्ञापकं यदयमुत्तरसूत्रे घसिग्रहणं करोति तज्ज्ञापयत्यादेशे समानाधिकरणा षष्ठी न व्यधिकरणेति, अन्यथा घसेरादेशत्वादेव तस्य सकारस्यानेनैव षत्वसिद्धेरनर्थकं तत्स्यात्, यच्च सात्पदाद्योरिति सातिप्रतिषेधं शास्ति तज्ज्ञापयति प्रत्ययेऽवयवषष्ठी न सामानाधिकरण्येति, अन्यथा सातिसकारस्याप्रत्ययत्वात् षत्वस्य प्राप्त्यभावादनर्थकं तत्स्यात्, ननु चादेशस्येति षत्वापेक्षया स्थानषष्ठी, प्रत्ययस्येति सकारापेक्षयावयवषष्ठीति सहविवक्षाभावाद् द्वन्द्वानुपपत्तिः । नैष दोषः । पूर्वोक्तात् ज्ञापकद्वयात्सहविवक्षाया अभावेऽपि द्वन्द्वो भविष्यति, यदि प्रत्ययावयवस्य षत्वमुच्यते इन्द्रो मावक्षत् स देवान्यक्षदित्यत्र षत्वं न

Digitized by Google

प्राप्नोति, प्रत्यय एवात्र सकारो न तु प्रत्ययस्यावयवोऽत आह । 'इन्द्रो-मावक्षदित्यादि' । इहाग्रे: सरन्, अक्षरमित्यत्र षत्वं भवति, तस्यैव तु कृधूमादिभ्यः क्सिदिति विहितस्य षत्वं न भवति, कृसरं धूसरं तथा वृतृव-दीत्यादिना विहितस्य[1]क्सरमित्यत्र भवति वर्समित्यत्र न भवति, बहु-लवचनात्प्रत्ययसंज्ञाया अभावात् ॥

"शासिवसिघसीनां च" ॥ 'अन्वशिषदिति' । सर्तिशास्ती-त्यादिना च्लेरङ्, शास इदङ्हलोरितीत्वम् । "उषित इति' । यजादि-त्वात्सम्प्रसारणं, वसतिक्षुधोरिट् । 'जक्षतुः जक्षुरिति' । लिट्यन्यतरस्या-मित्यदेर्घस्लादेशः, गमहनेत्युपधालोपः । 'अक्षादिति' । अदेर्लुङ्, लुङ्-सनोर्घस्लृ,मन्त्रे घसेत्यादिना च्लेर्लुक्, तत्र युक्तं शासिवस्योरनादेशार्थं वच-नमिति, घसेस्त्वयुक्तमादेशत्वादित्यत आह । 'घसिर्यद्यप्यादेश इति' । 'आदेशइति' । आदेशो यः सकारस्तत्र स्थितमिति भावः । यस्त्वना-देशो घसिस्तस्येह ग्रहणं न भवति विरलप्रयोगत्वात् ॥

"स्तौतिण्योरेव षण्यभ्यासात्" ॥ 'षत्वभूतइति' । षत्वं प्राप्ते कृतषत्वइत्यर्थः । 'आदेशसकारस्येति' । प्रत्ययसकारस्त्वसंभवान्न संबध्यते । 'सुष्वापयिषतीति' । स्रुतिस्वाप्योरित्यभ्यासस्य संप्रसारणम् । 'सिसिक्षतीति' । सिचि क्षरणे । 'सुसूषत इति' । षूङ् प्राणिप्रसवे । परस्मैपदपाठे तु षू प्रेरणइत्यस्य रूपं, यदि सिद्धे सत्यारम्भो नियमार्थः, एवकारस्तर्हि किमर्थस्तत्राह । 'एवकारकरणमिति' । अथ विपरीते ऽवधारणे को दोष इत्यत आह । 'स्तौतिण्योःषण्येवेति' । 'इह च स्यादेवेति' । षण्येवेत्यनेन ह्यवधारणेन प्रत्ययान्तरे स्तौतिण्योः षत्वं व्यवच्छिन्नं न तु धात्वन्तरस्य षणि, ततश्चाभिहितदोषद्वयप्रसङ्गः । 'सिषेचेति' । षणीत्यनुच्यमाने प्रत्ययमात्रे नियमः स्यादभ्यासात्परस्य यदि षत्वं भवति स्तौतिण्योरेवेति, ततश्च सिषेचेत्यादौ न स्यात् । 'को विनतेनुरोध इति' । विनतमिति षत्वणत्वयोः प्रातिशाख्येषु

१ तस्येत्यधिकम् इं॰ पु॰ ।

Digitized by Google

प्रसिद्धिः, एकवर्णमनोकारं विनते सुस्मेति, नः पर इति यथा, अनु-रुध्यते आनुकूल्येन प्राप्यतइत्यनुरोधः प्रयोजनं, कृतषत्वस्य निर्देशे किं प्रयोजनमित्यर्थः । 'सुषुप्सतीति' । रुदविदेत्यादिना सनः कित्त्वं, वचिस्वपीत्यादिना संप्रसारणं, सनीत्युच्यमाने सन्मात्रे नियमः स्यात्, ततश्च यथा षत्वभूते सनि धात्वन्तरस्य षत्वं न भवति एवमिहाषत्वभूतेपि न स्यात् । 'कः सानुबन्धेनुरोध इति' । नकारोत्रानुबन्धः, नकारानुबन्धवतो ग्रहणे किं प्रयोजनमित्यर्थः । षत्वस्य तु प्रयोजनं न पृच्छति, तस्य लक्षणप्राप्तत्वात् । 'सुषुपिषइन्द्रमिति' । स्वपेर्लिट्, छान्दसत्वाद्व्यत्ययो बहुलमिति थास्, थासः से, असंयोगाल्लिट् किदिति लिटः कित्वात्पूर्ववत्सम्प्रसारणं, द्विर्वचनं, क्रादिनियमादिट्, इन्द्रशब्दे परतो यादेशः, लोपः शाकल्यस्येति यलोपः, अत्र नियमाभावादभ्यासात्परस्य षत्वं भवत्येव, षइत्युच्यमाने तु यावान्कश्चित्षशब्दस्तत्र सर्वत्र नियमः स्यात्, तस्मात्सानुबन्धकग्रहणम् । 'अभ्यासादिति किमिति' । अभ्यासाद्या प्राप्तिस्तस्या नियमो यथा स्यादुपसर्गाद्या प्राप्तिस्तस्या नियमो मा भूत्, अभिषिषिक्षतीत्येतत्तावदप्रयोजनं, कथम्, असिद्धमुपसर्गात्षत्वं, तस्यासिद्धत्वान्नियमो न भविष्यति । स्यादेतत् । यथाऽत एकहल्मध्यइत्यत्र लिटा आदेशो विशेष्यते तथेह सनाभ्यासः सनि यो ऽभ्यासस्तस्मात् स्तौतिण्योरेवेति, तेन यङि योभ्यासस्तस्मात्षणि धात्वन्तरस्यापि षत्वं भवति, स्वपेर्यङ्, स्वपिस्यमिव्येञां यङीति संप्रसारणं, सोषुप्यतेः सन्, इट्, अतो लोपः, यस्य हलः, सोषुपिषते, । तदेतद्भवति प्रयोजनमिति । तच्च । अन्तरङ्गमत्र षत्वं बहिरङ्गो नियमस्तस्मादनर्थकमभ्यासग्रहणमिति प्रश्नः । परिहरति । 'प्रतीषिषतीति' । इणो बोधनार्थत्वाद्गम्यादेशाभावोऽजादेरिति सशब्दस्य द्विर्वचनं, सन्यत इतीत्वं, तत्राभ्यासाश्रये प्रत्यस्य षत्वे कृते ऽस्य नियमस्याभावाद्धात्वाश्रयं षत्वमभ्यासस्य प्रवर्तते । ननु षणीति परसप्तमी, ततश्च षणि परे स्तौतिण्योरेवेति षत्वनियमः, क्रियमाणस्तुल्यजातीयस्य षणपरस्य सिसिक्षतीत्यादेः षत्वं निवर्तयति, प्रतीषिषतीत्यत्र तु सनि एव द्विर्वचनमिति षणपर-

त्वाभावादयं नियमो न प्रवर्तिष्यते, सन्यत इतीत्त्वमपि तर्हि न प्राप्नोति, समुदायस्य सन्रूपत्वात्तस्य च, सन्यत्वाभावात्तस्मात्सन्प्रदेशेषु सत्सप्तमी विज्ञेया,[1] ततश्च यथेत्वं प्रवर्तते तथा षत्वनियमोपि स्यादित्यभ्यासग्रहणम् ॥

“सः स्विदिस्वदिसहीनां च” ॥ स इत्यविभक्तिको निर्देशः । ‘ण्यन्तानामिति’ । षत्वप्राप्तौ सत्वमुच्यते, षत्वप्राप्तिश्च ण्यन्तानामिति सामर्थ्यलभ्यमेतत्, किमर्थं पुनः सकारस्य सकार उच्यते ऽत आह । ‘सकार इति’ । नेति प्रतिषेधएव वक्तव्ये सकारवचनं लाघवे विशेषाभावात् ॥

“प्राक् सितादड्व्यवायेऽपि” ॥ इण्कोरिति पञ्चमीनिर्देशाद्व्यवाये न प्राप्नोतीति वचनम् । अडित्यागमस्य ग्रहणं न प्रत्याहारस्य, एतच्च हयवरडित्यत्रोपपादितम् । ‘प्राक् सितसंशब्दनादिति’ । परिनिविभ्यः सेवसितेत्यतः । अपि ग्रहणं किम् । अव्यवधानेपि यथा स्यात्, अन्यथा विशेषवचनाद्व्यवायएव स्यात् । ‘अभ्यषुणोदिति’ । षुञ् अभिषवे, लङ्, स्वादिभ्यः श्नुः, अडागमः, प्रागेव णत्वादेशात्षत्वं, कृते वा णत्वे णकारमेवैणमाश्रित्य षत्वम् ॥

“स्यादिष्वभ्यासेन चाभ्यासस्य” ॥ द्वे एते वाक्ये, स्यादिष्वभ्यासेन व्यवाये षत्वं भवति, अभ्यासस्य च षत्वं भवति तेष्वेव स्यादिष्विति, तत्राद्यं विध्यर्थं, द्वितीयं नियमार्थम् । ‘अषोपदेशार्थमिति’ । षोपदेशे तु परितिष्ठासतीत्यादौ सामान्यलक्षणेनैव सिद्धम् । ‘अभिषिषेणयिषतीति’ । सेनयाऽभियातुमिच्छतीति विगृह्य सत्यापपाशेत्यादिना णिच्, टिलोपस्ततः सन्, द्विर्वचनं, ह्रस्वः, एच इग्घ्रस्वादेशे, अव्युत्पन्नः सेनाशब्दः, यद्वा सहेनेन वर्त्तत इति सेना, सहस्य सः संज्ञायामिति सादेशः, यदा तु सिनोतेर्नप्रत्यये सेनेति व्युत्पाद्यते तदास्त्येवाभिषोपदेशत्वमेति । ‘अभितष्ठा[2]विति’ । आदेशसकारस्याप्यस्य

---

१ विज्ञायते ई॰ पु॰ पा॰ ।

२ ‘षणि प्रतिषेधार्थं चेति’ । इण्कोरिति सिद्धं षत्वं नियमेन व्यावर्त्यते, तदप्युपसर्गमाश्रित्य भवति । ३ पु॰ पा॰ ।

Digitized by Google

षत्वं न सिद्ध्यति इण्कोरभावात् । 'अभिषिषिक्षतीति' । यद्यप्ययमादेशसकार इणश्च परस्तथाप्यभ्यासमपेक्ष्य षत्वं न सिद्ध्यति । स्तौतिण्योरेव षणीति नियमात्, अतः षणि यत्प्रतिषिद्धं षत्वं नियमेन व्यावर्तितं तदप्युपसर्गमाश्रित्य भवति । अथाभ्यासस्येति किमर्थं, यावताभ्यासेनेत्यत्र क्रियापेक्षायां प्रकरणाद्व्यवायइति संबन्ध्यते, तच्चापिशब्दसंनिहितमेव प्रकृतमिति अव्यवायेऽपि षत्वं भविष्यति पूर्वसूत्रवत्, नार्थोऽभ्यासस्येत्यनेनात आह । 'अभ्यासस्येति वचनं नियमार्थमिति' । नियमस्य स्वरूपं दर्शयति । 'स्थादिष्वेवेति' । विपरीतस्तु नियमो न भवति स्थादिष्वभ्यासस्यैवेति, यदि स्यादभ्यासेन व्यवाये षत्वविधानमनुपपन्नं स्यात् । 'अभिसुसूषतीति' । षू प्रेरणे, सन्, सनि ग्रहगुहोश्चेतीड्निषेधः, अत्र धातुसकारस्य स्तौतिण्योरेवेति नियमादषत्वम्, अभ्याससकारस्य त्वस्मान्नियमात्षत्वाभावः ॥

"उपसर्गात्सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनयसेधसिचसञ्जस्वञ्जाम्" ॥ षुञभिषवे स्वादिः, षु प्रेरणे तुदादिः, षोऽन्तकर्मणि दिवादिः, ओतः श्यनीति लोपः, ष्टुञ् स्तुतौ अदादिः, उतो वृद्धिर्लुकि हलि, ष्टुभ स्तम्भे, अनुदात्तेत्, एतेषां श्तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः । 'अभिसोषवातीत्यादि' । ष्ठा गतिनिवृत्तौ, सेनयतिर्ण्यन्तः, शपा निर्देशेन नार्थः, यङोऽसम्भवात्, षिधू गत्यां, षिधू शास्त्रे माङ्गल्ये च भौवादिकौ, तत्र सेधतेर्गताविति प्रतिषेधादन्यत्र षत्वं, शपा निर्देशो यङ्लुङ्निवृत्त्यर्थः, दैवादिकनिवृत्त्यर्थश्च षिधू संराद्धाविति । षिच क्षरणे, तुदादिर्मुचादिः, षञ्ज सङ्गे, ष्वञ्ज परिष्वङ्गे, अनुदात्तेत्, दंशसञ्जस्वञ्जां शपीति नलोपः, सिवादीनां यङ्लुक्यपि भवति, अभिषेषिचीतीत्यादि, एतेषामड्व्यवायेऽभ्यासव्यवाये च यथा संभवं षत्वम्, इण्कोरिति वर्तते, तच्च कवर्गस्यासंभवादिणइति संबध्यते, तत्र यदीणा उपसर्गो विशेष्येत इणन्तादुपसर्गादिति, इह न स्यात् निष्षुणोति दुष्षुणोतीति, तस्मादुपसर्गेणोऽविशेषणीयः, उपसर्गस्थेण इति, ननूपसर्गादिति पञ्चमी तत्कथमिण्विशेष्यते, न ब्रूमो वैयधिकरण्येन विशेष्यतइति, किं तर्हि तात्स्थ्यात्ता-

च्छब्दम्, उपसर्गादिणः, उपसर्गस्थादिण इति, तत्र शब्व्यवायस्याश्रितत्वा-
च्चिसोऽपि परस्य षत्वं भवति, तदिदमुक्तम् । 'उपसर्गस्थान्निमित्तादिति' ।
'दधि सिञ्चतीति' । सात्पदाद्योरिति प्रतिषेध एवात्र भवति, तदपवादो
ह्ययम् । 'निःसेचक इति' । निरयमुपसर्ग एव तत्कथमिदं प्रत्युदाहरण-
मत आह । 'नायं सिचेरुपसर्ग इति' । यत्क्रियायुक्ताः प्रादयस्तं प्रति
गत्युपसर्गसंज्ञे भवतः । 'अभिसावकीयतीति' । सावकशब्दात् ण्वुल-
न्तात्क्यच्, तस्याभिना योगः, सुनोतिना योगे तु भवत्येव, अभिषावक-
मिच्छति अभिषावकीयतीति, ण्यन्तेऽपि तर्हि णिजर्थेन प्रैषादिनोपस-
र्गस्य योगो न प्रकृत्यर्थेनेति षत्वाप्रसङ्ग इत्यत आह । 'अभिषावयतीत्य-
त्रेति' । अभिषवविषया प्रयुक्तिर्न तु प्रयुक्तेरभिना योग इत्यर्थः । यदा तु
प्रयुक्तेरभिना योगस्तदा नैव षत्वं भवति, किं तु प्रकृत्यर्थेनासंसृष्टस्य
प्रयुक्तिमात्रस्याभिना योगः कीदृश इति चिन्त्यम् ॥

"सदिरप्रतेः" ॥ सदिरिति षष्ठ्यर्थे प्रथमा । 'निषसादेति' ।
सदिस्वञ्ज्योः परस्य लिटीति प्रतिषेधादभ्यासात्परस्य न भवति ॥

"स्तम्भेः" ॥ स्तम्भिः सौत्रो धातुः । 'अभिष्टभ्नातीति' ।
स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यः श्नुश्चेति श्नाप्रत्ययः । अनिदितामिति न
लोपः । 'अप्रतेरित्येतदिह नानुवर्त्तत इति' । यद्यनुवर्त्तेत पूर्वसूत्र एव
स्तम्भिग्रहणं कुर्यात्किं योगविभागेन, अस्ति प्रयोजनं, किम्, अवाच्चालम्ब-
नाविदूर्ययोरिति वक्ष्यति तत्स्तम्भेर्यथा स्यात् सदेर्माभूत् । नैतदस्ति । एक-
स्मिन्नपि योगे यस्यालम्बनाविदूर्ये स्तः स एवानुवर्तिष्यते, स्तम्भेरेव च ते
संभवतः ॥

"अवाच्चालम्बनाविदूर्ययोः" ॥ आलम्बनमाश्रयणं, विदूरं विप्र-
कृष्टं, तदन्यदविदूरं, तस्य भाव आविदूर्यम्, अत एव निपातनान्नञ्पूर्वा-
दपि तत्पुरुषाद्भावप्रत्ययः । 'अवष्टभ्येति' । यष्ट्यादिकमवलम्ब्येत्यर्थः ।
'अवष्टब्धेति' । आसन्नेत्यर्थः । 'अवस्तब्ध इति' । अभ्यर्हितइत्यर्थः ॥

"वेश्च स्वनो भोजने" ॥ उदाहरणेषु स्वार्थपरित्यागेन भोजन-
मात्रे स्वनिर्वर्त्तत इति शङ्कामपनयति । 'अभ्यवहारक्रियाविशेष इति' ।

Digitized by Google

तमेव विशेषं दर्शयति । 'यत्रेति' । 'विष्वणतीति' । सशब्दं भुङ्क्त इत्यर्थः ॥

"परिनिविभ्यः सेवसितसयसिवुसहसुट्स्तुस्वञ्जाम्" ॥ सेवति भ्वादिष्वनुदात्तेत् । 'सित इति' । षिञ् बन्धने क्तान्तः । 'सय इति' । स एवैरजन्तः, षिवु तन्तुसन्ताने दिवादिः, षह मर्षणेऽनुदात्तेत् । 'सुडिति' । सुट् कात्पूर्व इत्यस्य ग्रहणं, स्तुस्वञ्जी उक्तार्थौ, तयोरुपसर्गात्सुनोतीत्यादिनैव सिद्धे पर्यादिपूर्वयोरुत्तरसूत्रेणाड्व्यवाये विकल्पार्थं वचनम् ॥

"सिवादीनां वाऽड्व्यवायेऽपि" ॥ सिवादयः प्रत्यासत्तेः पूर्वसूत्रे संनिविष्टा गृह्यन्ते, उभयत्र विभाषेयम्, स्तुस्वञ्ज्योः प्राक् सितादिति प्राप्ते इतरेषामप्राप्ते ॥

"अनुविपर्यभिनिभ्यः स्यन्दतेरप्राणिषु" ॥ स्यन्दू प्रस्रवणे अनुदात्तेत् । 'अनुस्यन्दते मत्स्योदकेइति' । मत्स्यश्चोदकञ्च, मत्स्योदके, जातिरप्राणिनामित्यनेन यत्र सर्वाण्यवयवपदान्यप्राणिवाचीनि तत्रैकवद्भावः, इह तु मत्स्यशब्दस्य प्राणिवाचित्वादेकवद्भावाभावः, अत्राप्राणिष्विति प्रसज्यप्रतिषेधः, तेन प्राण्यप्राणिसमुदायेऽपि प्राण्यस्तीति प्रतिषेधो भवति, अन्ये तु पर्युदासं मन्यमाना भवितव्यमेवात्र षत्वेनेत्याहुः । इह पर्यादिग्रहणं शक्यमकर्तुम्, एवं वक्ष्यामि, अन्वभिभ्यां चेति, चकारात्परिनिविभ्यश्चेति ॥

"परेश्च" ॥ 'पृथग्योगकरणसामर्थ्यादिति' । अन्यथा विपरिभ्यां स्कन्देरनिष्ठायामित्येव ब्रूयात् ॥

"वेः स्कभ्नातेर्नित्यम्" ॥ स्कम्भिः सौत्रो धातुः ॥

"इणः षीध्वंलुङ्लिटां धोऽङ्गात्" ॥ इणन्तादङ्गादुत्तरेषामित्यादिना इणन्तमङ्गं षीध्वमादीनां विशेषणं तेऽपि धकारस्येति दर्शयति, धकारस्य त्विणन्तमङ्गं विशेषणं न भवति, इणन्तादङ्गादुत्तरस्य धस्य स चेत् षीध्वमादीनामिति, तथा हि सति योषिढ्ढुमित्यादौ वचनसामर्थ्यात्षीशब्देन व्यवाय आश्रयणीयः स्यात् । 'अच्योढ्ढुमिति' ।

Digitized by Google

धि चेति सलोपः । 'इण्ग्रहणं कवर्गनिवृत्त्यर्थमिति' । प्रकृतं ह्रीण्य-हणं कवर्गेण संबद्धमिति तदनुवृत्तौ तस्याप्यनुवृत्तिः स्यात् । 'पक्षीध्व-मिति' । चोः कुरिति कुत्वे कृते ढत्वप्रसङ्गः । 'यक्षीध्वमिति' । व्रश्चादिना षत्वे कृते षढोः कः सीति कत्वम् । 'स्तुध्वेऽरति' । टेरे-त्वम् । 'अधुध्वमिति' । लङ् । 'परिवेविषीध्वमिति' । विष्लृ व्याप्तौ जुहोत्यादिः स्वरितेत्, निजां त्रयाणां गुणः श्लावित्यभ्यासस्य गुणः, लिङः सलोपोऽनन्त्यस्येति सीयुटः सकारलोपः, अत्र धातुषकारस्य ईध्वं-शब्दस्य च यः समुदायस्तदात्मकः षीध्वंशब्दोऽस्ति न त्वसावङ्गादु-त्तरः, षकारान्तं ह्यत्राङ्गं न तु वेवीत्येतावत् । चोदयति । 'अर्थवद्ग्रह-णादपीति' । परिहरति । 'एतस्त्विति' । एतदर्थवतो ग्रहणमत्र नाश्रि-तम् । किं कारणं, न किञ्चिन्नाश्रितमित्येव ॥

"विभाषेटः" ॥ अत्रेण्ग्रहणमिटो विशेषणं सोऽपि षीध्वमा-दीनां, तेऽपि धकारस्येति दर्शयन्नाह । 'इणः परस्मादिट इत्यादि' । तत्र षीध्वमो लिटश्च श्रुतिकृतमानन्तर्यं शास्त्रकृतं तु न संभवति, इटस्तद्भक्तत्वात्तद्ग्रहणेन ग्रहणात्, अत एवानयोः प्राप्तविभाषेयम् ।

तथैव लुङ्यप्यलविढ्मादौ धि चेति लुप्ते सति सिचः सकारे ।
इणान्तमङ्गं ध्वमि जातमातः पूर्वस्य नित्यस्य विधेः प्रसङ्गः ॥
एवञ्च धातावनिणान्तरष्टमेधिढ्मित्यादिषु नित्यं ढत्वम् ।
यदि त्विणान्ताद्विहितस्य ढत्वं तथा न ते ढत्वमधिढ्मि स्यात् ॥

तथा

लिहिदोग्धिनहां ढत्वघत्वधत्वेषु सत्स्वपि ।
इणान्ताद्विहितः षीध्वमिति ढत्वं प्रसज्यते ॥
तथेणो लुङि गादेशे विहिते ध्वमि कर्मणि ।
अगाध्वं यूयमेतेनेत्यत्र ढत्वं प्रसज्यते ॥

एवं ब्रुवो वचिर्वक्षीध्वमिति ।
इष्यते सर्वमेवैतदिति चेन्नाप्तवागिह ।
तस्मात्प्राप्तविभाषैव सर्वत्रेयमिति स्थितम् ॥

तथा च तैत्तिरीयके तान् दृष्ट्वा अब्रुवन्मयूयमजनिढ्वमिति ढत्वं प्रयुक्तम्[1], लविषीढ्वं[2], लविषीध्वमिति । अन्ये त्विटो विभाषाया वक्ष्यमाणत्वाद्गोबलीवर्दन्यायेन तद्व्यतिरिक्तमिणन्तमङ्गमिह गृह्यतइति वदन्त एधिध्वमित्यादौ ढत्वं नेच्छन्ति, तेषामप्यधिढ्वमित्यत्र भवत्येव नत्सीध्वमित्यादौ च न भवति । 'आसिषीध्वमिति' । आस उपवेशने । 'कथं भवितव्यमिति' । किमत्रानेन विकल्पेन भवितव्यमुत नेति प्रश्नार्थः । 'उपदिदीयिध्वइति' । दीङ् क्षये, लिट्, ध्वमि क्रादिनियमादिट्, दीङो युडचि क्ङितीति युट् । 'युटा व्यवहितमिति' । समुदायभक्तो हि युट् तमेव न व्यवदध्यात् इटन्तु व्यवदधात्येव । 'न भवितव्यं ढत्वेनेति' । अनेन विकल्पेनेति भावः, पूर्वेण तु नित्यं प्राप्नोत्येव । 'अपरेषामिति' । अस्मिन्मते विकल्प एव भवति ॥

"समासेऽङ्गुलेः सङ्गः" ॥ सङ्ग इति षष्ठ्याः स्थाने प्रथमा, एवमुत्तरेष्वपि योगेषु, सज्जनं सङ्गः भावे घञ्, अङ्गुलीषु संगोयस्याः साऽङ्गुलिषङ्गा । 'अङ्गुलेः सङ्ग इति' । अत्र शर्व्यवायइत्यधिकारात्षसङ्गः । अन्ये त्वङ्गुले संगइति संबुध्यन्तमुदाहरन्ति ॥

"भीरोः स्थानम्" ॥ 'भीरोः स्थानमिति' । पूर्ववत्संबुद्ध्यन्तं षष्ठ्यन्तं वा, समासेऽङ्गुलिभीरुभ्यां सङ्गस्थानइत्युच्यमाने भ्यामित्यधिकं प्राप्नोति, तस्माद्योगविभागः ॥

"अग्नेः स्तुत्स्तोमसोमाः" ॥ 'अग्निष्टुदिति' । संपदादित्वादधिकरणे क्विप्, यत्राग्निः स्तूयते सोऽग्निष्टुत्, क्रतुविशेषः, तत्रेदं भवति, [3]अपि वा सर्वेषु देवताशब्देष्वग्निमेवाभिसंनमेदिति । 'अग्निष्टोम इति' । सोमयागस्य सप्तसंस्थाः, तत्राद्या संस्थोच्यते । 'अग्नेर्दीर्घादिति' । देवताद्वन्द्वे षत्वमित्यर्थः, तत्रैव दीर्घस्य विधानात् । 'अग्निसोमौ माणवका-

---

१ प्रयुक्तमित्यनन्तरं तथा यद्वामां विहितमार्येयिढ्वमिति इं॰ पु॰ पाठः ।

२ लविषीढ्वम् लविषीध्वमिति नास्ति इं॰ पु॰ ।

३ अपि वा सर्वेषु देवताशब्देष्वग्निमेवाभिसन्नमेदिति । 'अग्निष्टोम इति' । सोम यागस्य सप्तसंस्थेत्यादि पाठ इं॰ पु॰ नास्ति,

Digitized by Google

विति'। अत्र मात्वक्के संज्ञात्वेन विनियुक्तावग्निसोमशब्दाविति दीर्घाभावात्षत्वाभावः। ज्योतिर्लतयोरपि देवतात्वाभावाद्दीर्घाभावात् षत्वाभावः। 'अग्निसोमौ तिष्ठत इति'। आश्वलायनस्तु तत्रापि दीर्घषत्वे प्रायुङ्क्त। अग्नीषोमौ प्रणेष्यामीति॥

"ज्योतिरायुषः स्तोमः"॥ 'ज्योतिष्टोम इति'। अत्र शर्व्यवायेऽपीत्यधिकारात् षत्वम्। एवमायुष्टोमेऽपि॥

"मातुःपितुर्भ्यामन्यतरस्याम्"॥ एकदेशविकृतस्यानन्यत्वाद्विसर्जनीयशर्व्यवायइत्यधिकाराच्च पूर्वेण नित्ये प्राप्ते विकल्पः। 'मातुःष्वसेति'। विभाषा स्वसृपत्योरिति षष्ठ्या अलुक्। 'रेफान्तयोरिदं ग्रहणमिति'। तच्चोत्तरपदे स्पष्टं पूर्वपदमपि तत्साहचर्याद्रेफान्तमेव, यद्येवं रेफस्य विसर्जनीये कृते तस्य वा शरीति पक्षे सत्वे कृते ऽरेफान्तत्वाच्च प्राप्नोति, अत आह। 'एकदेशविकृतस्यानन्यत्वादिति'। यदि तु सकारान्तयोर्ग्रहणं क्रियेत विसर्जनीयान्तयोर्न स्यात्, विसर्जनीयान्तयोस्तु ग्रहणे भ्यामि परतो निर्देशो दुर्घटः स्यात्॥

"अभिनिसस्तनः शब्दसंज्ञायाम्"॥ 'अभिनिसृत्येतस्मादिति'। एतेन समुदायो निमित्तं न प्रत्येकमिति दर्शयति। 'अभिनिष्टानो विसर्जनीय इति'। तथा चापस्तम्बः, द्व्यक्षरं चतुरक्षरं वा नाम पूर्वमाख्यातोत्तरं दीर्घाभिनिष्टान्तं घोषवदाद्यन्तरन्तस्थमिति, द्व्यक्षरं चतुरक्षरं वा नाम कर्तव्यं, कीदृशं नामपूर्वं, नाम प्रातिपदिकमक्रियावाचि तत्पूर्वपदमाख्यातोत्तरं क्रियावाच्युत्तरपदं दीर्घात्परो योऽभिनिष्टानो विसर्जनीयस्तदन्तं दीर्घान्तं विसर्जनीयान्तं चेत्यन्ये, घोषवान्वर्ण आदिर्यस्य तद्घोषवदादि, अन्तरन्तस्थं यरलवानामन्यतमं मध्ये यस्य तत्तथोक्तमेवंभूतं नाम कर्तव्यं, द्रविणोदा वरिवोदा इत्याद्युदाहरणम्॥

"उपसर्गप्रादुर्भ्यामस्तिर्यच्परः"॥ य च अच्च यचौ, तौ परौ यस्मात्स यच्परः, यचोरिति सप्तमीनिर्देशेनैव सिद्धे परग्रहणं चिन्त्यप्रयोजनम्। 'अभिषन्तीति'। अदादित्वाच्छपो लुक्, श्नसोरल्लोपः। 'अनुसूतमिति'। कथं पुनरत्र प्रसङ्गो यावता सकारस्य प्रकृतत्वात्तमेव

Digitized by Google

प्रत्युपसर्गत्वमाश्रयिष्यते, न चात्र सकारं प्रत्युपसर्गत्वमस्ति, तावन्मात्रस्या-क्रियावचनत्वात्, तत्किमस्तिग्रहणेन, न च प्रादुःशब्दार्थमस्तिग्रहणं कृतं, तस्य कृभ्वस्तिविषयत्वेन नियतत्वात्, तदेतदाशङ्कते तावत् । 'तथा-पीति' । अनुसुशब्दः शुभादिः चतुष्पादुचन इत्यन्ये, ततो ठक्ठञोर-न्यतरः, ठे लोपोकद्रुवा इत्युकारलोपे सकारमात्रस्य क्रियावाचित्वात् षत्व-प्रसङ्गः ॥

"सुविनिर्दुर्भ्यः सुपिसूतिसमाः" ॥ सुपीत्यागन्तुक इकारो न पुन-रिका निर्देशः, तत्र वचिस्वपीति लक्षणप्राप्तेन संप्रसारणेन धातोरेवायं निर्देशः स्यात्ततश्च यत्रास्येतद्रूपं तत्र षत्वमित्ययमर्थो न लभ्येत तस्मा-दागन्तुकेनेकारेण प्रयोगस्थस्य कृतसंप्रसारणस्य रूपस्येदमनुकरणं, तदाह । 'सुपीति स्वपिः कृतसंप्रसारणो गृह्यतइति' । एतच्च सुपीति निर्दे-शादेव लभ्यते, अन्यथा वचिस्वपीतिवन्निर्दिशेत् । 'सूतीति स्वरूपग्र-हणमिति' । सूतेः क्तिचन्तस्य ग्रहणमित्यर्थः, समेत्यपि स्वरूपग्रहणमेव न षम ष्टम वैक्लव्यइति धातोर्ग्रहणम् । इकृशितपोरन्यतरस्याभावात्, अथ किमर्थं स्वपेः सुपि भूतस्य षत्वमुच्यते, 'सुपेः षत्वं स्वपेर्माभूत्,' सुपेःषत्व-मुच्यते स्वपेर्माभूदिति, विस्वप्ना विस्वप्नमिति । 'विसुष्वापेति' । अथ क्रिय-माणेऽपि विकृतग्रहणे 'विसुष्वापेति केन न' हेतुना केन विसुष्वापेत्यत्रा-भ्यासस्य षत्वं न भवति, लिट्यभ्यासस्योभयेषामिति संप्रसारणे कृते सुपिरूपस्य भावात् प्रागेव हलादिशेषात्कृते वा तस्मिन्नेकदेशविकृतस्या-नन्यत्वादस्ति प्रसङ्गः, 'हलादिशेषाच्च सुपिः,' द्विर्वचने कृते परत्वाद्धलादिः शेषेण यकारे निवृत्ते वकारस्य सम्प्रसारणम्, ततश्च सुपिरूपस्य कदा-चिदप्यभावात्षत्वाभावः, 'दृष्टं पूर्वं प्रसारणम्,' उक्तं तत्रोभयेषां ग्रहणस्य प्रयोजनं परमपि हलादिशेषं बाधित्वा उभयेषां सम्प्रसारणमेव यथा स्यादिति, तेन सम्प्रसारणमेव पूर्वमिष्टं, विशेषतश्चाक्लिष्टम्, अन्यथा यकारवद्वकारोऽपि निवर्त्तेत, नह्यत्र हेतुरस्ति, यकारो निवर्त्तते वकारो ऽवतिष्ठतइति, एवं तर्हि स्थादिष्वेवाभ्यासस्येत्येतस्मादेव नियमादत्र षत्वं न भविष्यति, 'स्थादीनां नियमो नात्र,' किं कारणं, 'प्राक्सितादुत्तरः

सुषिः,’ प्राक्सितादिति तत्र वर्त्तते, तेन प्राक्सिता ये धातवस्तेषां मध्ये स्यादिष्वेवाभ्यासस्य षत्वमिति नियमेन सुनोतिसुवतिस्यतिस्तोभतय एव निवर्त्यन्ते सुषिस्त्वयं ततोऽवधेरुत्तरः, एवं तर्ह्यर्थवद्ग्रहणे नानर्थकस्येत्येवमेतस्य न भविष्यति, स्थाने हि द्विर्वचनेन समुदायोऽर्थवान् अवयवौ त्वनर्थकौ द्विःप्रयोगेऽर्थप्रत्यायनास्यानावर्त्तनाद् द्वाभ्यामर्थः प्रत्याय्यत इत्येकस्यानर्थक्यमेव तदेतदाह। ‘अनर्थको विषुपुः,’ यद्यनर्थकस्य ग्रहणं न भवति, विषुपुपुरिति न सिध्यति, नैषः दोषः। सुपिभूतो द्विरुच्यते। अयमभिप्रायः। पूर्वं धातुरुपसर्गेण युज्यते तत्र द्विर्वचनात्परत्वात्सम्प्रसारणं, परत्वादेव षत्वं कृतषत्वस्यैव तस्य द्विर्वचनमिति। ननु षत्वस्यासिद्धत्वात्पूर्वं द्विर्वचनमेव प्राप्नोत्यत आह। ‘पूर्वत्रासिद्धीयमद्विर्वचनइति’॥

“निनदीभ्यां स्नातेः कौशले”॥ ‘निष्णातः कटकरणइति’। तत्र कुशल इत्यर्थः। ‘नदीष्णइति’। नदीस्नाने कुशल इत्यर्थः। कवयस्तु कुशलमात्रे प्रयुञ्जते। ‘नदीष्णात इति’। सप्तमीति योगविभागात्समासः॥

“सूत्रं प्रतिष्णातम्”॥ सूत्रं प्रतेरिति वक्तव्ये निपातनाश्रयणं प्रत्ययान्तरे मा भूत्॥

“कापिष्ठलो गोत्रे”॥ गोत्रमिह प्रवराध्यायपठितं गृह्यते, तत्र च स्वसन्तानस्य व्यपदेशहेतुराद्यः पुरुषो गोत्रमित्युच्यते, पारिभाषिकग्रहणे तु कापिष्ठलिरित्यत्रैव स्याद्यत्र गोत्राभिधायी प्रत्ययः, यदि तु गोत्रं न षत्वस्य विषयेन निर्दिष्टं, किं तर्हि दर्शनस्य गोत्रे यो दृष्टः कपिष्ठलशब्दः स साधुर्भवति, क्व यत्र तत्रेत्याश्रीयते, पारिभाषिकेऽपि गोत्रे न दोषः॥

“प्रष्ठोऽग्रगामिनि”॥ ‘प्रस्थे हिमवत इति’। घञर्थे कविधानमित्यधिकरणे कः॥

“वृत्तासनयोर्विष्टरः”॥ विस्तीर्यतइति विष्टरः, ग्रथने वाऽवशब्दइति घञि प्राप्ते अस्मादेव निपातनादप्, रुढिशब्दत्वाद्वा पचा-

त्यपि व्युत्पाद्यः, उलपेन कृता टीका औलपी सा वाक्यस्य विस्तरः, अशब्दइति प्रतिषेधादण् ॥

"छन्दोनाम्नि च" ॥ 'विष्टारइति निपात्यतइति'। ननु च विष्टर इति प्रकृतं तत्कथं विष्टार इति निपात्यतेऽत आह। 'विपूर्वादिति'। यदि त्विह छन्दोनाम्नि विष्टारइत्यात्वं क्रियेत घञ् विधौ छन्दोनाम्नि चेति शक्यमकर्त्तुम्, इह वा विष्टारइत्युच्येत तत्र वा छन्दोनाम्नीति, कोन्वत्र विशेषः, अपर आह। घञ्विधौ वाविति नानुवर्त्तते, तेन प्रस्तारपङ्क्तिः संस्तारपङ्क्तिरित्यपि भवतीति ॥

"गवियुधिभ्यां स्थिरः" ॥ 'गविष्ठिरः युधिष्ठिर इति'। संज्ञायामिति सप्तमीसमासः,। 'गोशब्दादहलन्तादप्राप्ते'। यद्यप्यवादेशे कृते सम्प्रति हलन्तो भवति तथापि उत्पत्तिवेलायामहलन्तत्वान्निपातनमाश्रितम् ॥

"विकुशमिपरिभ्यः स्थलम्" ॥ विकुपरिइत्येतेषां कुगतिप्रादय इति समासः, शमिशब्दस्य तु षष्ठीसमासः, ङ्यापोः संज्ञाछन्दसोर्बहुलमिति ह्रस्वत्वं, सूत्रे ह्रस्वोच्चारणे ह्रस्वपक्षएव षत्वं यथा स्यात्तेन प्रयोगे बहुलवचनाद्यदा ह्रस्वत्वं न भवति तदा षत्वमपि न भवति ॥

"अम्बाम्बगोभूमिसव्यापद्वित्रिकुशेकुशङ्क्वङ्गुमञ्जिपुञ्जिपरमेबर्हिर्दिव्यग्निभ्यः स्थः" ॥ 'स्थशब्दसकारस्येति'। एतेन स्थ इति सूत्रे स्वरूपग्रहणं प्रथमान्तमिति दर्शयति। यदि त्वातो धातोरिति तिष्ठतेराकारलोपं कृत्वा षष्ठ्या निर्द्देशः स्यात्तदा गोस्थानं भूमिस्थानमित्यत्रापि षत्वं स्यादिति भावः, अम्बे तिष्ठत्यम्बष्ठः, सुपि स्थ इति कप्रत्ययः, ङ्यापोरिति ह्रस्वत्वम्। 'आम्बष्ठ इति'। संज्ञेयं जनपदविशेषस्य। 'गोष्ठ इति'। घञर्थे कविधानमित्याधिकरणे कप्रत्ययः, भूमिष्ठादौ सुपि स्थः। 'सव्येष्ठ इति'। हलदन्तात्सप्तम्या इत्यलुक्, यदि स्थ इति स्वरूपग्रहणं स्थास्थिन्स्थॄणां न प्राप्नोतीतीदमाह। 'स्थास्थिन्चिति'। स्थाशब्दः क्विबन्तः। 'सव्येष्ठा इति'। इत्वे वकारप्रतिषेध इति वचनात्प्रत्ययलक्षणेनेत्वं न भवति, गर्मेरिनिरिति वर्त्तमाने परमेस्थः

क्विब्वेति क्विदिनिप्रत्ययः, परमेष्ठीशब्द ईप्रत्ययान्तः बाहुलकादाकारलोपः । सव्ये तिष्ठति सव्येष्ठा सारथिः ॥

"सुषामादिषु च" ॥ क्वचित्सात्पदाद्योरिति प्रतिषेधे प्राप्ते क्वचिच्चादित एवाप्राप्ते षत्वे सुषामादिषु मूर्द्धन्यो विधीयते । 'दुष्षामेति' । विसर्जनीयशर्च्छशषसेपीत्यधिकारादत्र षत्वम् । 'सुशब्दस्येत्यादि' । अत्रैवमभिसंबन्धः, सुदुप्शब्दयोस्तु क्रियाविशेषविषयत्वादनुपसर्गत्वे सति निषेधः । 'दुःषेधइति' । 'पाठोर्यमिति' । तत्र सुशब्दस्य सुः पूजायामिति कर्मप्रवचनीयसंज्ञा, सा चोपसर्गसंज्ञाया बाधिका, आकडाराधिकारात्, निर्दुरोरप्युपसर्गत्वाभावः, क्रियान्तरविषयत्वात्, गमिक्रियाविषयौ हि तौ, निर्गतः सेधो निःषेधः, दुर्गतः सेधो दुःषेध इति । तेनोपसर्गात्सुनोतीत्यादिना नैतेषु षत्वप्राप्तिः, एवं तावत् षिधू हिंसासंराद्ध्योरित्यस्य घञि सेध इति रूपमित्याश्रित्योक्तम्, यदा तु षिध गत्यामित्यस्य घञन्तस्य रूपं तदाप्याह । 'सेधतेर्गताविति प्रतिषेधबाधनार्थं चेति' । सुषन्धिरित्यादावुपसर्गे घोः किः, समः षत्वम् । 'उणादिष्वेताविति' । पृभिदिव्यधिगृधिधृषिभ्यः कुरिति वर्तमाने अपदुःसुषु स्थ इति कुप्रत्ययः । 'गोरिषक्थ इति' । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् । 'प्रतिष्णिकेति' । प्रतिपूर्वात्स्नातेरातश्चोपसर्गइत्यङ् तदन्ताट्टाप्, ततोऽज्ञातादिषु कः । केऽण इति ह्रस्वत्वं, प्रत्ययस्थादितीत्वम् । 'नौषेचनमिति' । सिचेर्ल्युट् । 'दुन्दुभिषेवणमिति' । सेवतेः सीव्यतेर्वा ल्युट्, [१]एतिसंज्ञायामगादितिगणसूत्रम् तद्व्याचष्टे । 'एकारपरस्येति' । हरयः सेना अस्य हरिषेणः, परितः सेना अस्य परिषेणः । 'पृथ्वी सेना यस्येति' । स्त्रियाः पुंवदिति पूर्वपदस्य पुंवद्भावः । 'नक्षत्राद्वेति' । पूर्वेण नित्ये प्राप्ते विकल्पः, चकारोऽनुक्तसमुच्चयार्थः, आकृतिगणतामस्य सूचयति, तदाह । 'अविहितलक्षणइति' ॥

---

१ मु० मू० एति संज्ञायामगात्, नक्षत्राद्वा, एतयोः सूत्ररूपेण उपन्यासः स पदमञ्जर्यसंमतः ।

"ह्रस्वात्तादौ तद्धिते" ॥ अपदान्तस्येत्यधिकारादप्राप्तं षत्वं विधीयते, तरबादय एव तावत्तद्धिताः संभवन्तीत्याह । 'त[1]रप्तम-बिति' । 'सर्पिष्टरमिति' । स[2]र्पिर्जातेः प्रकर्षाभावेऽपि सहचारिणो गुणस्य गन्धादेः प्रकर्षे प्रत्ययः । 'चतुष्टयइति' । जसः शी । 'सर्पिष्ट्वइति' । प्रतिप्रयोगे पञ्चम्यास्तसिः । 'आविष्ट्य इति' । अव्ययात्त्यबित्यत्राविः-शब्दाच्छन्दसीतिवचनात्त्यप् । 'सर्पिःसादिति' । विभाषा सातिःकात्स्न्यें, ननु च सात्पदाद्योरिति प्रतिषेधादेवात्र षत्वं न भविष्यतीत्यत आह । 'प्रत्ययसकारस्येति' । 'भिन्द्युस्तरां छिन्द्युस्तरामिति' । भिदिछिदिभ्यां लिङ्, झेर्जुसि यासुट्, तिङश्चेति तरप्, किमेत्तिङव्ययघादिति आमु-प्रत्ययः, आदिग्रहणं शक्यमकर्तुं, तीत्येव यस्मिन्विधिस्तदादावल्ग्रहणे, पुंसः प्रतिषेधः, पुंस्त्वं पुंस्ता ॥

"निसस्तपतावनासेवने" ॥ 'निस्तप्तं रक्षो निष्टप्ता अरातय इत्यत्रेति' । एवमपि कस्यां चिच्छाखायां पाठमुपलभ्य परिहार उच्यते तैत्तिरीयकास्तु षत्वमेव पठन्ति ॥

युष्मत्ततत्क्षुःष्वन्तःपादम्" ॥ ततक्षुःष्विति सकारान्तानुकर-णात्परस्य सुप्सकारस्य नुम्विसर्जनीयशर्व्यवायेऽपीति षत्वम् । 'तकारादि-ष्विति' । एतद्युष्मद एव विशेषणमितरयोरव्यभिचारात् । 'त्वं त्वा इत्यादि' । एतेषामेव संभव इत्यर्थः । 'अग्निष्टत्पुनराहेति' । अग्नि-रित्ययं पूर्वस्य पादस्यान्तः यन्मआत्मनो मिन्दाभूदग्निरिति, तेनायं पादान्ते सकारो न पादमध्ये ॥

"स्तुतस्तोमयोश्छन्दसि" ॥ 'पूर्वपदादित्येव सिद्धइति' । पूर्वपदमिति सामान्येन तत्राश्रीते न तु समासावयव एवेति वाक्येऽपि तेनैव सिद्धं षत्वमिति भावः, ततश्च स्तुतस्तोमग्रहणं प्रपञ्चार्थम्, छन्दोग्रहणं तूत्तरार्थं कर्त्तव्यमेव ॥

१ मु॰ मू॰ तर तमेति पाठः ।
२ सर्पिरिति नास्ति ई॰ पु॰ ।

Digitized by Google

"पूर्वपदात्" ॥ 'असमासेऽपीति'। एतच्च सवनादिषु सवने-सवनइत्यादीनां पाठादेवावसीयते ॥

"सुञः" ॥ 'अभीषुणा इति'। इकः सुञीति दीर्घत्वं, नश्च धातुस्थोरुषुभ्य इति णत्वं, क्वचित्तु वृत्तावेवैतत्पठ्यते ॥

"सनोतेरनः" ॥ 'गोषा इति'। जनसनखनक्रमगमो विट्, विड्वनोरनुनासिकस्यात्, क्वचित्त्विदमपि वृत्तावेवास्ति। 'गोसनिमिति'। छन्दसि वनसनरक्षिमथामितीन्प्रत्ययः। 'सिसानयिषतीति'। यद्यप्यणयन्तः सूत्रउपात्तस्तथाप्यणयन्तस्य प्रतिषेधवचने प्रयोजनं नास्तीति कृत्वा णय[1]र्थो विज्ञास्यते, इह तु सिसनियतीति स्तौतिण्योरेव षणीत्येतस्मान्नियमादप्रसङ्गः षत्वस्य। 'सिसनीरिति'। क्विप्यतो लोपः, ततः सुः, हल्ङ्याब्भ्यो दीर्घादिलोपः, सनः सकारस्य षत्वं प्राप्नोति रुत्वं च, तत्र षत्वस्यासिद्धत्वाद्रुत्वं र्वोरुपधाया दीर्घ इति दीर्घत्वम्, अत्र सन् षत्वभूतो न भवतीति स्तौतिण्योरेवेत्यस्य नियमस्यायमविषय इति षत्वं प्रसक्तमस्मान्नियमाच्च भवति, एतस्मिंश्च प्रयोजने सति सामर्थ्याभावाद् णयन्तस्य नियमाभावात्सिषाणयिषतीति षत्वं भवत्येव ॥

"सहेः पृतनर्ताभ्यां च" ॥ 'योगविभागमिति'। तत्र द्वितीयो योगः पूर्वयोगस्यासर्वविषयत्वज्ञापनार्थः। 'संहितायामेवेति'। उभयत्रापि संहिताधिकारादयं विशेषो लभ्यते, महिवृतिवृषेत्यादिना दीर्घत्वम्।

"नपरसृपिसृजिस्पृशिस्पृहिसवनादीनाम्" । 'विसंसिकाया इति'। संज्ञायामिति ण्वुल्। 'विस्रब्धमिति'। स्रम्भु विश्वासे उक्तः, यस्य विभाषेतीट्प्रतिषेधः, अनिदितामिति नलोपः। 'विसृप इति'। सृपितृदोः कसुन्, सवनेसवनइत्यादौ वीप्सायां द्विर्वचनं, किंसइत्यत्रायोगवाहानामट्सु णत्वं शर्षु जश्भावषत्वे इति वचनात्कुव्यवाये इति षत्वप्रसङ्गः, यथा तु शर्षूपदेशो न कर्तव्यस्तथा हयवरडित्यत्रोक्तम्, अश्वसनिग्रहणमनर्थकमणिणन्तत्वादत आह। 'अश्वसनिग्रहणमिति'। ज्ञापनस्य प्रयोजनमाह। 'जलाषाहमिति' ॥

[1] णयन्तइति इं· पु· पा·।

Digitized by Google

"सात्पदाद्योः" ॥ आदिग्रहणं श[1]क्यमकर्तुं, पदादिति पञ्चमी-निर्द्देशः कर्त्तव्यः, पदात्परस्य सकारस्य नेति, इहापि तर्हि न प्राप्नोति, अग्निषु वायुषु त्वक्षु, सातिप्रतिषेधो ज्ञापयति स्वादौ षत्वं न तस्मात्प्रतिषेध इति, तत्रायमप्यर्थः, दधिसिङ्मधुसिगित्यादौ प्रतिषेधः सिद्धो भवति, नह्ययं सकारः पदादिः, गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचनात्पदात्परस्तु भवति, तत्रापि पूर्व-पदस्य सुबन्तत्वात्, बहुच[2]स्तु प्रतिषेधः, बहुचस्तु परस्य प्रतिषेधो वक्तव्यः बहुसेक्ता, नह्यत्र पदात्परः सकारः ॥

"सिचो यङि" ॥ 'परिसेसिच्यतइति' । अत्राभ्याससकारस्य उपसर्गात्सुनोतीत्यादिना प्राप्तिः, धातुसकारस्य त्वादेशसकारत्वात्स्था-दिष्वभ्यासेन चेत्येतस्माच्च, ननु चोपसर्गात्प्रतिषेधविषये षत्वमारभ्यते तद्यथैव पदादिप्रतिषेधं बाधते एवं सिचो यङीत्येतमपि बाधेतात आह । 'उपसर्गाद्वा प्राप्तिरिति' । येन नाप्राप्ते तस्य बाधनं भवति, नाप्राप्ते च पदादिलक्षणे प्रतिषेधे उपसर्गात्षत्वमारभ्यते सिचो यङीत्येतस्मिंस्तु प्राप्ते चाप्राप्ते च, अथ वा पुरस्तादपवादा अनन्तरान्विधान्बाधन्ते न परानिति, अनेनैतदपि निरस्तं स्यादिष्वभ्यासेन चेत्यनेन यथाभिषिषि-क्षतीत्यत्र स्तौतिण्योरेवेतिनियमं बाधित्वा षत्वं भवति तथैनमपि प्रति-षेधं बाधित्वा धातुसकारस्य प्रसङ्ग इति ॥

"सेधतेर्गतौ" ॥ उपसर्गादिति प्राप्तिः प्रतिषिध्यते ॥

"प्रतिस्तब्धनिस्तब्धौ च" ॥ स्तन्भेरिति प्राप्तिः प्रतिषिध्यते ॥

"सोढः" ॥ 'सोढ्भूतो सहइति' । निष्ठान्तस्य प्रथमया निर्द्देशशङ्कामपाकरोति । 'परिसोढेति' । परिनिविभ्य इति प्राप्ते प्रतिषेधः ॥

"स्तम्भुसिवुसहां चङि" ॥ अत्राद्यस्य स्तम्भेरिति प्राप्तिः, इत-रयोस्तु परिनिविभ्यः सेवसितेति । 'अभ्यतस्तम्भदिति' । प्राक्सितादड्-

१ आदिग्रहणं मनर्थकमिति पा॰ ई॰ पु॰ ।
२ अयं पाठो नास्ति ई॰ पु॰ ।

व्यवायेपीति स्थादिष्वभ्यासेन चेति प्राप्तिः, परसीषिवदित्यत्रापि सिवादीनां वाड्व्यवायेपीति प्राप्तिः । 'उपसर्गादिति वक्तव्यमिति' । किमर्थमित्याह । 'उपसर्गाद्या प्राप्तिरिति' ॥

"सुनोतेः स्यसनोः" ॥ 'अत्रेत्यादि' । इतिकरणो हेतौ, यस्मात् स्तौतिण्योरेवेति नियमादभ्यासादप्राप्तिः स्थादिष्वेवाभ्यासस्येति नियमादुपसर्गादप्यप्राप्तिः, तस्मादभिसुसूरित्युदाहरन्ति, अथ वा कथं षत्वप्रसङ्गात आह । 'अत्र हीति' । यथा चात्र सन्षत्वभूतो न भवति तथा सनोतेरन इत्यत्रोक्तम् । 'अभ्यासात्प्रातिरिति' । अभ्यासग्रहणमुपसर्गात्प्राप्तेरसंभवादभ्यासेन व्यवहिताच धातुसकारस्य प्रसङ्गः, नाप्यभ्याससकारस्य, स्थादिनियमेन व्यावर्तितत्वात्, एवं चात्राभिग्रहणमतन्त्रं सुसूरित्येवोदाहर्तव्यम् ॥

"सदिस्वञ्ज्योः परस्य लिटि" ॥ लिटि द्विर्वचने कृते द्वौ सकारौ भवतः, तत्र सदेः स्थादिष्वभ्यासेन चेति वचनात्सदिरप्रतेरिति षत्वप्रसङ्गः, स्वञ्जेरप्युपसर्गात्सुनोतीत्यादिना । 'परिषस्वजइति' । कथं पुनरत्र नलोपः, यावता संयोगान्तत्वाचात्र लिटः कित्त्वमस्ति, अत आह । 'स्वञ्जेरिति' । एतच्चोन्थिभवतिभ्यां चेत्यत्र व्याख्यातं, स्वञ्जिग्रहणञ्च वार्त्तिके दर्शनात्सूत्रे प्रक्षिप्तं, यथाह सदेर्लिटि प्रनिषेधे स्वञ्जेरुपसंख्यानमिति ॥

"निव्यभिभ्योड्व्यवाये वा छन्दसि" ॥ प्रकरणेन प्राप्तस्य सत्वमात्रस्य प्रतिषेधः । 'न्यष्टौदिति' । उतो वृद्धिर्लुकि हलीति वृद्धिः, अभ्यस्थाद्विषोः पृतना अरातीरित्यप्युदाहरणम् ॥

इति श्रीहरदत्तमिश्रविरचितायां पदमञ्जर्यामष्टमस्याध्यायस्य तृतीयः पादः ॥

"रषाभ्यां नो णः समानपदे" ॥ निमित्तयोरादेशे चाकार उच्चारणार्थः, समानञ्च तत्पदं, समानपदं, निमित्तनिमित्तिनोश्चायमाधारनिर्देशः, तदाह । 'समानपदस्थौ चेदिति' । एकपर्यायः समा-

नशब्दः। निमित्ते रषौ, निमित्ती नकारः, यद्यप्यसौ प्रागेव सिद्धस्वरूपस्तथापि तत्स्थाने भवतो णकारस्य यन्निमित्तं तस्यापि तेन संबन्धोऽस्त्येव, णकार एव वा निमित्ती तस्य तु विधानोत्तरकालं समानपदस्थत्वम्। 'पग्रहणमुत्तरार्थमिति'। अडादिव्यवाये णत्वं वक्ष्यति तदस्मादपि यथा स्यात्, अथेहार्थमपि कस्मान्न भवति अत आह। 'ष्टुत्वेनैव सिद्धमेतदिति'। 'ऋवर्णाच्चेति वक्तव्यमिति'। रषाभ्यां णत्वमुच्यमानमृकारान्न प्राप्नोतीति वचनं, न च शक्यं वक्तुमृवर्णस्याद्रेफाद्भविष्यतीति। वर्णो ह्यत्र रेफः सूत्रउपात्तः, षकारेण साहचर्यात्। न च वर्णैकदेशा वर्णग्रहणेन गृह्यन्ते। 'तिसृणामिति'। न तिसृचतसृ इति प्रतिषेधान्नामीतिदीर्घत्वाभावः, तर्हि वक्तव्यं नेत्याह। 'रश्रुतिसामान्यनिर्देशात्सिद्धमिति'। र इति श्रुतिः श्रोत्रेणोपलब्धिर्ययोस्ते रश्रुती वर्णात्मिका चावर्णात्मिका च व्यक्तिस्तयोर्यत्सामान्यं तन्निर्दिश्यते न तु वर्णात्मिकैव व्यक्तिरित्यर्थः। नन्वेवमपि ऋकारे त्रयो भागा अभितोऽज्भक्तिर्मध्ये रेफभक्तिर्मात्रा चतुर्भागात्मका। ततश्च परयाऽज्भक्त्या व्यवधानान्न प्राप्नोति। अड्व्यवायइत्येवं भविष्यति। न पराऽज्भक्तिरट्संनिविष्टा, सा ह्यर्द्धमात्रा चतुर्भागात्मिका ऋकारभक्तिः। न च तस्याः सवर्णग्रहणेन नाप्यड्ग्रहणेन ग्रहणमसवर्णत्वात्, नहि तस्याः स्थानं प्रयत्नो वा पृथगस्ति। तस्मात्सामान्यनिर्द्देशेपि नैव णत्वं सिध्यति, अत आह। 'वर्णैकत्या चेति'। वर्णस्य समुदायस्यावयवभूता या पराऽज्भक्तिस्तयेत्यर्थः। ननु च नृनमनग्रहणं वृद्ध्यर्थं स्यात् नृनमनस्यापत्यं नार्नमनिरिति, नैतदस्ति। बहिरङ्गा वृद्धिरन्तरङ्गं णत्वम् असिद्धं बहिरङ्गमन्तरङ्गे। 'अथ वेति'। व्यक्तिनिर्द्देशेपि न दोष इत्यर्थः। अपरः प्रकारोऽभितोऽज्भक्ती चतुर्भागात्मिके मध्ये शुद्धो रेफोऽर्द्धमात्रात्मकस्तेन व्यक्तिनिर्द्देशेप्यदोष इत्यर्थः। ननु च परयाऽज्भक्त्यां व्यवधानम्। एवं तर्ह्युत्तरसूत्रे योगविभागः करिष्यते। व्यवायेऽपीति। व्यवायेऽपि णत्वं भवति, ततोऽट्कुप्वाङ्नुम्भिरिति। इदमिदानीं किमर्थं नियमार्थं वर्णात्मकैर्व्यवाये यदि भवति अडादिभिरेवेति, अपदान्तस्य मूर्द्धन्य इत्यधिकारादत्र णग्रहणं शक्यमकर्तुम्। उत्तरत्र च पदान्तस्येति प्रतिषेधः॥

“अट्कुप्वाङ्नुम्व्यवायेऽपि” ॥ रषाभ्यामिति पञ्चमीनिर्देशा द्व्यवाये न प्राप्नोतीत्ययमारम्भः । ‘पर्याणद्धमिति’ । नह बन्धने, पर्याङ्पूर्वः निष्ठा, नहो धः । ननु चाङ्व्यवाय इत्येवात्र णत्वं सिद्धं तत्किमर्थमाङ्ग्रहणमित्यत आह । ‘आङ्व्यवाय इत्येव सिद्धमिति’ । क्वचित्तु आङ्ग्रहणं पदव्यवायेपीत्यस्य बाधनार्थमित्येतावत्पठ्यते । ‘बृंहणमिति’ । बृहि वृद्धौ, इदितो नुम्, नश्चापदान्तस्य झलीत्यनुस्वारः । यद्येवमनुस्वारेणात्र व्यवायो न नुमात आह । ‘नुम्ग्रहणमनुस्वारोपलक्षणार्थमिति’ । झल्परस्य नुमोऽनुस्वारविधानात्स्थानिना नुमानुस्वार उपलक्ष्यते, एवमपि योऽनुस्वारो नुम्स्थानिको न भवति तद्व्यवाये न प्राप्नोति तृंह स्तृंह हिंसार्थौ,। तृंहणमिति, अत आह । ‘तेनेति’ । नात्र नुम्स्थानिकोनुस्वार उपलक्ष्यते किं तर्ह्यनुस्वारमात्रं तेनात्रापि भवतीत्यर्थः । यत्र तर्हि नुम एव श्रवणं नानुस्वारस्य तत्र णत्वं भवति वा न वात आह । ‘सत्यपि चेति’ । यथा नक्षत्रं दृष्ट्वा वाचं विसृजेदिति कालविशेषोपलक्षणपरायां चोदनायां सत्यपि दिवा नक्षत्रदर्शने वाग् न विसृज्यते उपलक्षितस्य कालस्याभावात् । असत्यपि नक्षत्रदर्शने रात्रौ विसृज्यते, तस्य कालस्य भावात्तथेहापि द्रष्टव्यम् । ‘प्रेन्वनमिति’ । इवि: प्रीणनार्थः । ‘इदितो नुम्, अचेजादेः सनुम इति णत्वप्रसङ्गः, इह समुदाये वाक्यपरिसमाप्तिर्दृष्टा, यथा गर्गाः शतं दण्ड्यन्तामिति अर्थिनश्च राजानो हिरण्येन भवन्ति, न च प्रत्येकं दण्डयन्ति । प्रत्येकमपि दृष्टा, यथा वृद्धिगुणसंज्ञे प्रत्येकं भवतः, तत्रेह यदि पूर्वः कल्प आश्रीयते न क्वचित्स्याच्च हि समस्तैरड्डादिभिर्व्यवायः क्वचिदपि संभवति, द्वितीये तु अर्हणेत्यादौ न स्यात्, अटा कवर्गेण च व्यवायात्, अत आह । ‘व्यवायोपलक्षणार्थत्वादिति’ । इह ये यदुपलक्षणायोपादीयन्ते तेषामेकेन द्वाभ्यां बहुरभिरप्युपलक्षितः स गृह्यते, तद्यथा गर्गैः सह न भोक्तव्यमित्युक्ते प्रत्येकं च सह न भुज्यते, समुदितैरपि, तथेहापि शक्नुवन्त्यड्डादयः समस्ता व्यस्ताश्च व्यवायमुपलक्षयितुमिति सर्वत्र भवति, अड्डादिव्यवाये णत्वे ऽन्यवाये प्रतिषेधः, आदर्शेन स्पर्शेन, यद्यप्यत्रान्येनापि व्यवायो यस्त्वटा व्यवायस्तदाश्रयं णत्वं प्रा-

Digitized by Google

ष्णोति, यत्र त्वनिर्द्दिष्टैरेव व्यवायस्तत्रैव न स्यात् कृत्स्नं मृष्णोतीति, नैष दोषः, रषाभ्यामित्यत्र तस्मादिति परिभाषोपस्थानादव्यवाये णत्वासङ्गात्सूत्रमिदमारभ्यमाणमड्डादिव्यवायएव णत्वमनुजानाति नान्यव्यवाये, तस्य निर्द्दिष्टग्रहणेन निवर्तितत्वात्, यदि च निर्द्दिष्टव्यतिरिक्तैरपि व्यवाये णत्वं स्यात्, नुम्ग्रहणमनर्थकं स्यात् केवलेन नुमा व्यवायासम्भवात् ॥

"पूर्वपदात्संज्ञायामगः" ॥ रषाभ्यामिति वर्त्तते, न च तयोः पूर्वपदत्वं सम्भवतीति सामर्थ्यात्पूर्वपदस्थान्निमित्तादुत्तरस्येत्येषोऽर्थो विज्ञायतइत्याह । 'पूर्वपदस्थादिति'। रेफषकारान्तात्पूर्वपदादित्ययं त्वर्थो न भवति व्याख्यानात्। 'द्रुणसइति'। द्रुरिव नासिका यस्येति बहुव्रीहिः, अञ्नासिकाया इत्यच्प्रत्ययो नसादेशश्च । 'वाध्रीणस इति'। वध्र्या विकारो वाध्री रज्जुः, वाध्रीव नासिका यस्य स वाध्रीणसो मृगविशेषः, तत्र पूर्वपदस्योपमाननिष्ठत्वाद्व्यधिकरणत्वात्पुंवद्भावाभावः, नस्शब्दः प्रियादिषु वा द्रष्टव्यः। 'शूर्पणखेति'। नखमुखात्संज्ञायामिति प्रतिषेधः, यदा तु योगो विवक्ष्यते न संज्ञा शूर्पाकाराणि नखानि यस्या इति तदा ङीष् भवति, णत्वं तु न भवति, शूर्पनखी, एवञ्च णत्वङीषौ न समवेतः । ततः शूर्पनखीवाक्यादिति । अगइति शक्यमवक्तुम्[1], कस्मान्न भवति ऋचामयनमृगयनमिति । निपातनादेतत्सिद्धम् । अणृगयनादिभ्य इति । यथान्यत्रोक्तं सर्वनामसंज्ञायां निपातनाण्णत्वाभाव इति। 'पूर्वपदात्संज्ञायामेवेति'। विपरीतस्तु नियमो न भवति पूर्वपदादेव संज्ञायामिति, शिवादिषु सुषेणशब्दस्य पाठात्, सिद्धे सत्यारम्भो नियमाय भवति, कथमत्र सिद्धिरित्याह । 'समानपदेऽपि हीति'। यद्यपि पूर्वपदस्थं निमित्तमुत्तरपदस्थो निमित्तीति भिन्नपदस्थत्वमप्यस्ति तथापि समासे कृते ततो या विभक्तिरुत्पद्यते तया समुदायस्य पदसंज्ञायां सत्यां तस्मिन्समानेऽपि पदे भावादस्त्येव पूर्वेण प्राप्तिः, समानपदत्वं हि तत्राश्रितं न भिन्नपदत्वं प्रतिषिद्धं, तस्मादुपपन्नं

१ अवक्तुमिति पा॰ ई॰ पु॰ ।

Digitized by Google

नियमार्थत्वं, यद्येवं यथोत्तरपदस्थस्य नकारस्य णत्वं नियमेन व्यावर्त्यते चर्मनासिक इति तथा तद्धितपूर्वपदस्थस्यापि व्यावर्त्येत खरपस्यापत्यं नडादिभ्यः फक्,खारपायणः, मातृभोगाय हितः भोगोत्तरपदात्खः। मातृभोगीणः, कथं प्रियमस्य करणप्रिय इत्याह। 'स'चेति'। संबन्धिशब्दो नियतमेव प्रतियोगिनमुपस्थापयति, तद्यथा मातरि वर्त्तितव्यं पितरि शुश्रूषितव्यमिति, न चोच्यते स्वस्यां मातरि स्वस्मिन्पितरीति,अथ च संबन्धादेतद्गम्यते यस्य या माता तस्यामिति। यो यस्य पिता तस्मिन्निति,पूर्वपदमुत्तरपदमिति च संबन्धिशब्दावेतौ पूर्वपदमपेक्ष्योत्तरपदं भवति उत्तरपदं चापेक्ष्य पूर्वपदं तत्र संबन्धादेतदवगन्तव्यं, यत्प्रति पूर्वपदमित्येतद्भवति तत्स्थस्य नियम इति। किञ्च प्रत्येतद्भवति उत्तरपदम्, अयं तर्हि दोषः,अग इति नियमस्यैव प्रतिषेधः प्राप्नोति, तेनैकवाक्यत्वात् न णत्वस्य, ततश्च संज्ञायाञ्च गान्तरे णत्वं प्राप्नोति अत आह। 'अग इति'। अग इति योयं प्रतिषेधः स णत्वस्य न नियमस्य, अत्र हेतुः। 'योगविभागेनेति'। पूर्वपदात्संज्ञायामित्येको योगः, अग इति द्वितीयः,अनेन च या च यावती च णत्वप्राप्तिः सा सर्वा प्रतिषिध्यते, योगविभागसामर्थ्यात्। 'अपरे त्वित्यादि'। कथं पुनः समानमेवेत्यवधारणं लभ्यते ऽत आह। 'समानग्रहणादिति'। पदइत्येव वक्तव्यं, तत्रापदस्ययोर्निमित्तनिमित्तनोरसंभवात्पदग्रहणमेकत्वविवक्षार्थं विज्ञायते, एवं सिद्धे यत्समानग्रहणं क्रियते तस्यैतत्प्रयोजनं यथैवं विज्ञायेत समानमेव यत्पदमिति, तेषामेवं ब्रुवतां विध्यर्थमेतद्विज्ञायतइत्याह। 'तेषामिति'। विध्यर्थत्वमेवोपपादयति। 'समासे हीति'। अथास्मिन्पक्षे खारपायण इत्यत्र कथं णत्वं, यावता खरपशब्दे खरशब्दस्यापि पदत्वमस्ति तत्स्थत्वाद्रेफस्य समानपदस्थत्वमेव न भवति, नैष दोषः, यत्र द्वावपि निमित्तनिमित्तिनौसमानपदस्थत्वं व्यभिचरतस्तत्र णत्वाभावः, इह रेफस्य व्यभिचारेऽपि नकारस्य समानपदस्थत्वाव्यभिचाराण्णत्वं प्रवर्त्तते,

"वनं पुरगामिश्रकासिध्रकासारिकाकोटराग्रेभ्यः"॥ वनमिति षष्ठ्याः स्थाने प्रथमा, उदाहरणे वनगिर्योः संज्ञायामिति पूर्वपदस्य

Digitized by Google

दीर्घत्वम् । 'अग्रेवणमिति' । षष्ठीसमासे राजदन्तादित्वाद्वनशब्दस्य परनिपातः, हलदन्तादिति सप्तम्या अलुक्, अथ न संज्ञा ततो राजदन्तादिषु निपातनादलुक् । 'सिद्धे सतीत्यादि' । पुरगादिष्वेतदुच्यते, अग्रेशब्दे त्वसंज्ञायां विध्यर्थमित्याहुः । 'एतेभ्य एव वननकारस्येति' । एतेभ्यो वननकारस्यैवेत्ययं तु नियमो न भवति दीर्घाच्चाख्यात्तद्धि दीर्घान्तेष्वयं नियमो भवेदिति, न च वनादन्यत्रोत्तरपदे दीर्घान्तत्वमेषां संभवति यत्रास्य णत्वं दीर्घान्तेषु व्यावर्त्येत ॥

"प्रनिरन्तःशरेक्षुप्लक्षाम्रकार्ष्यखदिरपीयूक्षाभ्योऽसंज्ञायामपि" ॥ अत्रादितस्त्रिषु संज्ञायामसंज्ञायामप्राप्तं णत्वं विधीयते, कथं, संज्ञायां तावत्पूर्वपदात्संज्ञायामित्येतदत्रापि नियमार्थमथापि विध्यर्थमुभयथापि अवश्यं वनं पुरगेत्यादिसूत्रं नियमार्थं पुरगादिष्वेव वननकारस्येति, ततश्च प्रादिष्वप्राप्तिः, असंज्ञायामपि नियमे तावदप्राप्तिः संज्ञायामेवेति नियमात्, विधावपि संज्ञायां विधानादन्यत्राप्राप्तिरेव, शरादिषु त्वोषधिवनस्पतिवाचिषु संज्ञायामसंज्ञायां चोत्तरसूत्रेण प्राप्तस्य विकल्पस्यापवादः, असंज्ञायामपीत्यनुच्यमाने संज्ञायामित्यधिकारात्तत्रैव स्यात् । निवर्तिष्यतेसंज्ञायामिति । यदि निवर्तते संज्ञायां न प्राप्नोति पुरगादिभ्य एव वननकारस्येति नियमात्, अयं तु विधिरसंज्ञायां सावकाशः, संज्ञायामपि परत्वादयमेव विधिर्भविष्यति, पूर्वत्रासिद्धे नास्ति विप्रतिषेधः, तस्मादसंज्ञायामपीति वक्तव्यम् । 'प्रवणं निर्वणमिति' । प्रादिसमासो । 'अन्तर्वणमिति' । विभक्त्यर्थे ऽव्ययीभावः, शरवणादयः षष्ठीसमासाः ॥

"विभाषौषधिवनस्पतिभ्यः" ॥ असंज्ञायामपीत्यनुवर्तते, तेन संज्ञाऽसंज्ञयोर्द्वयोरयं विकल्पः, अन्ये तु वृत्तावनुक्तत्वात्तस्याधिकारं नेच्छन्ति, तेषां संज्ञाविषये पुरगादिभ्य इति नियमत्वेन भवितव्यं, यदि त्विष्यते यत्नान्तरमास्थेयम्, इह ये पुष्यन्ति फलन्ति च ते वानस्पत्याः, ये फलन्त्येव न पुष्यन्ति ते वनस्पतयः, उभयेपि ते वृक्षा इत्यभिधानविदः, ततश्च वनस्पतिशब्दोपादनेन णत्वं विकल्प्यमानं

शिरीषवणमित्यत्रैव स्यात्, शिरीषादयो हि पुष्यन्ति फलन्ति च, तस्माद्ग्रहणं कर्त्तव्यं तदिदमाशङ्कते तावत्। 'फलीवनस्पतिरित्यादि'। फलमेव यस्य न पुष्पं स वनस्पतिरुदुम्बरादिः, पुष्पोपगा वेतसादयः, फलोपगा उदुम्बरादयः, उभयोपगा आम्रादयश्च वृक्षाः, अन्तात्यन्तादिसूत्रे ङोऽन्यत्रापि[1] दृश्यतइतिवचनाड्डुः, फलपाकेन विनाशो यासान्ता ओषध्यः शाल्यादयः, लताप्रतानवत्यो मालत्यादयः गुल्म, ह्रस्वस्कन्धास्तरवः, बहुकाण्ड[2]पत्राः वीरुध इति,यद्यपि वृक्षवनस्पत्योर्भेदः स्मर्यतइति शङ्कां परिहरति। 'इहाभेदेन ग्रहणं द्रष्टव्यमिति'। अत्र च लुपि युक्तवद्व्यक्तिवचनइत्यत्र भाष्यकारवचनं लिङ्गम्, उक्तं हि तत्र व्यक्तिवचनइति किं, शिरीषाणामदूरभवो ग्रामः शिरीषाः तस्य वनं शिरीषवनमिति, वनस्पतित्वं नातिदिश्यते, यद्यतिदिश्येत विभाषौषधिवनस्पतिभ्य इति णत्वं प्रसज्येतेति, यदि चोक्तो भेद इहाश्रितः स्यात्, शिरीषाणामवनस्पतित्वाद्वनस्पतित्वणत्वयोः प्रसञ्जनं नोपपद्येत॥

अह्नोऽदन्तात्" ॥ 'पूर्वाह्णइति'। अह्नः पूर्वो भाग इति पूर्वापरेत्यादिसूत्रेण समासः, राजाहःसखिभ्यष्टच्, अह्नोऽह्न एतेभ्य इत्यह्नादेशः। 'निरह्णइति'। निर्गतोऽह्न इति प्रादिसमासः, शेषं पूर्ववत्। 'दीर्घाह्नी शरदिति'। बहुव्रीहिरयं तेन टच्न भवति, टज्विधौ तत्पुरुषाधिकारात्। अन उपधालोपिनोऽन्यतरस्यामिति ङीप्, अल्लोपोऽनः, अकारान्तस्य ग्रहणादत्र णत्वं न भवति, यदि तु नकारस्यायं षष्ठ्या निर्देशः स्यात् अत्रापि णत्वं स्यात्, अकारान्तस्य तु[3] ग्रहणं प्रकरणाद्विज्ञायते, सर्वत्र प्रकरणे स्थानी प्रथमया निर्दिश्यते, वनं, वाहनं, यानमिति, यद्वा यु[4]भ्रादिषु पाठादस्य णत्वाभावः, अवश्यकर्तव्यश्च यु[5]भ्रादिषु पाठः, प्रातिपदिकान्तेतिविकल्पेन णत्वं माभूदिति, अन्तग्रहणं ज्ञापकमत्र प्रकरणे न यत्न-

१ अन्यत्रापीति ना॰ ई॰ पु॰।
२ बहुकाण्डप्राग्भारायास्ता विरुध इति पा॰ ई॰ पु॰।
३ त्विति ना॰ ई॰ पु॰।
४ क्षुभ्नादिष्विति पा॰ ई॰ पु॰।
५ क्षुभ्नादिष्विति पा॰ ई॰ पु॰।

Digitized by Google

मन्तरेण वर्णेनापि तदन्तविधिर्भवतीति, तेन रषाभ्यामित्यत्र तदन्तविधिर्न भवति ॥

"वाहनमाहितात्" ॥ 'उह्यतेऽनेनेति'। वाहनं शकटादि, करणे ल्युट्, अस्मादेव निपातनादुपधावृद्धिः। आहितमारोपितमुच्यते, यदा बाह्यं नारोपितं केवलं संनिहितं तदा न प्राप्नोति तदापीष्यते यदाह। 'आहितोपस्थितयोरिति वक्तव्यमिति'। न वा भूतकालस्याविवक्षितत्वात्, स्वामिभावनिवृत्तिपरायां चोदनायामाहितमिति भूतकालो न विवक्ष्यते तेनाहितादाधायिष्यमाणाच्च भविष्यति, केवलं स्वस्वामिभावविवक्षायामेव न भवति, यथा प्रत्युदाहरणे उक्तं दाक्षिस्वामिकमित्यर्थ इति, दाक्षादयोऽपि यदा बाह्यत्वेन विवक्ष्यन्ते न स्वामित्वेन तदा णत्वं भवत्येव ॥

"पानं देशे" ॥ 'क्षीरं पानं येषामिति'। कर्तरि षष्ठी, उशीनरादयः शब्दा देशद्वारेण पुरुषेषु वर्तन्त इति देशाभिधायिनो भवन्ति। 'दाक्षीणां पानमिति'। अत्रापि कर्मसाधन एव पानशब्दः ॥

"वा भावकरणयोः" ॥ 'गिरिनद्यादीनामिति'। संज्ञायां प्राप्ते ऽसंज्ञायामप्राप्त इत्युभयत्रविभाषेयमित्याहुः ॥

"प्रातिपदिकान्तनुम्विभक्तिषु च" ॥ 'माषवापिणाविति'। बहुलमभीक्ष्ण्य इति णिनिः। 'माषवापाणीति'। माषान्वपन्तीति कर्मण्यण्, जश्शसोः शि, नपुंसकस्य झलच इति नुम्, इह कस्मान्न भवति गर्गाणां भगिनी गर्गभगिनीति। भगिन्नित्यस्य प्रातिपदिकस्यान्तो नकार इत्यस्ति प्राप्तिरित्यत आह। 'पूर्वपदाधिकारादिति'। एतच्च पूर्वपदात्संज्ञायामित्यत्रैव व्याख्यातं, किमिदानीं नैव भवति गर्गभगिणीति, भवति विवक्षान्तरे शास्त्रान्तरेण नित्यं न त्वनेनेत्याह। 'यदा त्विति'। 'मातृभोगीणवदिति'। एतदपि तत्रैव व्याख्यातं, यद्युत्तरपदं प्रातिपदिकं गृह्यते माषवापिणीत्यत्र णत्वं न प्राप्नोति यदुत्तरपदं वापिनीति न तस्यान्तो नकारः, यस्य चान्तो नकारो वापिन्निति न तदुत्तरपदमत आह। 'माषवापिणीत्यादि'। उपपदमति ङित्यत्रैतद्व्याख्यातम्। उत्त-

रपदभूतं प्रातिपदिकं गृह्यतइत्यत्र ज्ञापकमाह । 'तथा चेति' । कथमेतज्ज्ञापकमित्याह । 'स हीति' । अङ्गस्य नुम्विधीयते, ततश्च तदङ्गो नुम् तद्ग्रहणेनैव गृह्यते नोत्तरपदग्रहणेन, यदि च यत्किं च न प्रातिपदिकं गृह्येत नोत्तरपदमेव, ततो नुम्ग्रहणमकर्त्तव्यमेव स्यात्, समासप्रातिपदिकान्त इत्येव सिद्धत्वात् । 'आर्ययूनेति' । विशेषणसमासः । श्वयुवमघोनामतद्धितइति संप्रसारणम् । 'प्रपक्वानीति' । गतिसमासः । अत्र कुमति चेति नित्यं णत्वं प्राप्नोति, दीर्घाह्नी शरदित्ययमपि यवादिषु द्रष्टव्य इत्युक्तम् ॥

"एकाजुत्तरपदे णः" ॥ 'विकल्पाधिकारनिवृत्तेर्विस्पष्टीकरणार्थमिति' । अन्यथा यद्यप्यत्रारम्भसामर्थ्यान्नित्यो विधिः शक्यो विज्ञातुम्, उत्तरत्र त्वनुवृत्तिः संभाव्येत ॥

"कुमति च" ॥ अनेकाजुत्तरपदार्थोयमारम्भः । 'वस्त्रयुगिणाविति' । युगशब्दादिनि कृते पश्चादिवन्तेन समासः कर्त्तव्यः, एवं तदुत्तरपदस्य प्रातिपदिकस्यान्तो नकारो भवति, अन्यथा मातृभोगीणवल्लक्षणान्तरेणैव णत्वं सिद्धं स्यात्, कावित्युच्यमानेपि कवर्गमात्रस्योत्तरपदस्यासंभवान्मतुबर्थो लभ्यते नार्थो मतुपा, सत्यं, कावित्युच्यमाने तदादिविधिर्विज्ञायेत कवर्गादावुत्तरपदइति ॥

"उपसर्गादसमासेपि णोपदेशस्य" ॥ ण उपदेशे यस्य स णोपदेशः । 'प्रणायको देश इति' । अत्र गतिक्रियायोगमात्रमेव प्रतिप्रस्योपसर्गत्वं न नमतिं प्रति । 'असमासेपीति किमिति' । विशेषानुपादानादेव समासासमासयोर्द्वयोरपि भविष्यतीति प्रश्नः । 'पूर्वपदाधिकारादिति' । सर्वत्रैवात्र प्रकरणे पूर्वपदादिति वर्तते, समासे एव पूर्वपदं भवति, तेन समासएव स्यात् । 'तदधिकारनिवृत्तिद्योतनार्थमिति' । नानेन विस्पष्टार्थमसमासेपिग्रहणमित्युच्यते । तथाहि । यद्यप्यस्वरितत्वात्पूर्वपदादिति निवर्त्तते तथाप्यसमासेपिग्रहणं कर्त्तव्यमन्यथा ऽसंज्ञायां समासे न स्यात्, पूर्वपदात्संज्ञायामेवेतिनियमादस्य च विधेरसमासे चरितार्थत्वात्तस्मात्पूर्वपदाधिकारनिवृत्तिद्योतनमुखेन समासासमासयोर्द्व-

योरपि यथा स्यादित्यसमासेपिग्रहणमित्ययमर्थो द्रष्टव्यः । नन्वसिद्धमुपसर्गणत्वं, तस्यासिद्धत्वान्नियमो न भविष्यति, तेन पूर्वपदादित्यस्मिंश्चिवृत्ते न कर्तव्यमसमासेपिग्रहणम् । एवं तर्ह्येतज्ज्ञापयति न योगे योगोऽसिद्धोपि तु प्रकरणे प्रकरणमसिद्धमिति, यदा तु पूर्वपदात्संज्ञायामिति सूत्रं नियमार्थमिति पक्षस्तदैतदुच्यते, यदा तु विध्यर्थं तदा नैतदुपपद्यते ॥

"हिनुमीना" ॥ हि गतौ स्वादिः, मीञ् हिंसायां क्र्यादिः दीर्घान्तः, हिनुमीनाग्रहणे विकृतस्योपसंख्यानम्, इहापि यथा स्यात्, प्रहिणोति प्रमिणीतः, सिद्धं वा स्थानिवत्त्वात्, इत्वगुणयोः स्थानिवद्भावे सति उपात्तमेव रूपमिति णत्वं भविष्यति । ननु पूर्वत्रासिद्धे न स्थानिवत्, दोष एवायमस्याः परिभाषायास्तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति ॥

"आनि लोट्" ॥ 'प्रवपाणीति' । वपेर्लोट्, मेनिः । आडुत्तमस्य पिच्च,प्रयाणीतियाते रूपम् । 'प्रवपानीति' । प्रकृष्टा वपा येषु तानि प्रवपानि, आनिलोड्ग्रहणमनर्थकमर्थवद्ग्रहणात्, अर्थवत आनिशब्दस्य ग्रहणं, न चैषोर्थवान्, अनुपसर्गाद्वा, यत् क्रियायुक्ताः प्रादयस्तं प्रति गत्युपसर्गसंज्ञे भवतः, न[1]चैतमानिशब्दं प्रति क्रियायोगः, तदन्तं तु प्रति भवति, कथं नैवं विज्ञायते यस्य क्रिया यत्क्रिया, यत्क्रियायुक्ता इति, कथं तर्हि या क्रिया यत्क्रिया यत्क्रियायुक्ता इति, प्रयोगविषया च क्रिया न क्व चिदसंसृष्टास्तीति समुदायस्याश्रीयतइति आनिशब्दान्तं समुदायं प्रति क्रियायोगः, तत्रायं च सूत्रार्थः, उपसर्गात्परस्यावयवो य आनिशब्दस्तत्रकारस्य णत्वमिति, तदेवं प्रत्याख्यातं लोड्ग्रहणम् ॥

"नेर्गदनदपतपदघुमास्यतिहन्तियातिवातिद्रातिप्सातिवपतिवहतिशाम्यतिचिनोतिदेग्धिषु च" ॥ गामादाग्रहणेष्वविशेष इति वचनान्मीनातिमिनोतिदीङामित्यात्वे कृते यन्माङ्रूपं यच्च मा मानइति तेषामपि ग्रहणप्रसङ्ग इत्याशङ्क्याह । 'माङ्ङोर्ग्रहणमिष्यतइति' । इष्टि-

१ न चैतमानिशब्दमिति पा॰ इ॰ पु॰ ।

Digitized by Google

रेवेयम् । 'प्रणिष्यतीति'। ओतः श्यनि, उपसर्गात्सुनोतीत्यादिना षत्वं, हन्तिप्रभृतयः प्सातिपर्यन्ता अदादयः, मा माने च । 'प्रणिशाम्यतीति'। शमामष्टानां दीर्घः श्यनि, स्यत्यादिषु तिपा निर्देशो यङ्लुङ्निवृत्त्यर्थः। 'अड्व्यवायेपीति'। अन्यथाङ्गस्याडुच्यते, विकरणान्तं चाङ्गं, सोसौ संघातभक्तो ऽशक्यो गदादिग्रहणेन ग्रहीतुमिति न स्यात्, आडा चेति वक्तव्यम्, प्रण्यागददिति। तर्हि वक्तव्यं, न वक्तव्यम्, अट्कुप्वाङ्नुम्व्यवायइति वर्त्तते, तेन नेर्गदादीनां चाड्व्यवाये आड्व्यवाये च भविष्यति, प्रन्युपमदतीत्यादौ तु पदव्यवायेपीति प्रतिषेधादप्रसङ्गः ॥

"शेषे विभाषा ऽकखादावषान्तउपदेशे" ॥ अकखादावषान्तइति चोपसर्गसन्निधापितस्य धातोर्विशेषणमित्याह । 'अकखादिरषान्त उपदेशे यो धातुरिति'। आदिग्रहणं शक्यमकर्तुम्, अकखइति वक्तव्यं, यस्मिन्विधिस्तदादावल्ग्रहणे, अन्तग्रहणं तु कर्त्तव्यम्, असति हि तस्मिन्न ज्ञायेत केन तदादिविधिः, केन वा तदन्तविधिरिति, शेषग्रहणं किं, गदादिषु माभूत् । यदि तेष्वपि स्यात्पूर्वयोगो निर्विषयः स्यात्तस्माच्छेषइति शक्यमवक्तुम् । 'प्रनिपेक्ष्यतीति'। षढोः कः सीति कत्वे कृते सम्प्रत्यषान्तो भवति । 'प्रनिचकारेति'। कुहोश्चुरित्यभ्यासस्य चुत्वे कृते सम्प्रत्ययं न ककारादिर्भवति । 'प्रणिवेष्टेति'। व्रश्चेत्यादिषत्वे कृते सम्प्रति षान्तो भवति, उपदेशे त्वषान्तत्वाण्णत्वं भवति ॥

"अनितेः" ॥ 'प्राणितीति' । श्वस प्राणने अन च,रुदादिभ्यस्सार्वधातुकइतीट् ॥

"अन्तः" ॥ 'अनितेरन्तस्येति'। अनितेः संबन्धिनः पदान्तस्य नकारस्येत्यर्थः । 'हे प्राणिति'। क्विबन्तात्संबुद्धिः, न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः, अन्यत्र तु पदान्तस्य नकारस्य लोपेन भवितव्यमिति संबुद्ध्यन्तमुदाहृतम् । 'अन्तश्च पदापेक्षो गृह्यतइति'। नानित्यपेक्षः, व्यभिचाराभावात् । 'केचित्त्वित्यादि'। अनितेरन्तइत्येकमेव योगं पठन्ति, समीपवचनं चान्तशब्दमाश्रयन्तीत्यर्थः, किमर्थमित्याह । 'निमित्तसमीपस्येति'। ननु च नास्त्येव स विषयो यत्र निमित्तस्य समीपभूतो ऽनि-

तेनेकारः, प्राणितीत्यादावेकादेशे कृते आकारेण व्यवायः, निरणितीत्यत्राकारेण तत्कथं निमित्तसमीपस्थस्येत्युच्यते ऽत आह । 'एकवर्णव्यवहितस्येति' । सामर्थ्यादेकवर्णेन[1]व्यवधानमाश्रीतमित्यर्थः । न च प्राणितीत्यत्रैकादेशस्य पूर्वस्माद्विधौ स्थानिवद्भावाद्वर्णद्वयव्य[2]वायः शङ्कनीयः, पूर्वत्रासिद्धे स्थानिवत्त्वनिषेधात् । ननु चोक्तं तस्य दोषः संयोगादिलोपलत्वणत्वेष्विति, एवं तर्ह्यनित्यः पूर्वस्माद्विधौ स्थानिवद्भावः, निष्ठायां सेटीति सेड्ग्रहणात्, एतच्च स्थानिवत्प्रकरणएव व्याख्यातम् । 'तैरित्यादि' । एकं ह्यन्तग्रहणं तच्च सामीप्यार्थं पर्यनितीत्यत्र णत्वव्यावृत्त्या चरितार्थं, ततश्च हे प्राणित्यत्र पदान्तस्येति प्रतिषेधः प्राप्नोति, तस्मात्तैर्द्वितीयमप्यन्तग्रहणमावृत्त्या तन्त्रेण वा ऽऽश्रयितव्यम् । ननु च येपि योगविभागं कुर्वन्ति अवयववचनं चान्तशब्दमाश्रयन्ति तैरपि पूर्वसूत्रे सामीप्यवाच्यन्तशब्दः पठितव्य एव, अन्यथा पर्यनितीत्यत्रापि स्यात्, अत आह । 'येषां त्विति' । ते नैकवर्णव्यवहितस्यापि णत्वमिच्छन्त्येव, तस्मान्नार्थस्तेषां पूर्वसूत्रेन्तग्रहणेनेत्यर्थः ॥

"उभौ साभ्यासस्य" ॥ 'प्राणिणिषतीति' । सनि अजादेर्द्वितीयस्येति निशब्दस्य द्विर्वचनम् । 'प्राणिणदिति' । ण्यन्ताल्लुङ्, च्लेश्चङ्, णिलोपः, द्विर्वचनेचीतिस्थानिवद्भावान्निशब्दस्य द्विर्वचनम् । 'पूर्वत्रासिद्धीयमित्यादि' । पूर्वत्रासिद्धीयमद्विर्वचनइत्यस्मिन्नसति प्रानिसतीति स्थिते द्विर्वचनं च प्राप्नोति णत्वं च, तत्र णत्वस्यासिद्धत्वात्पूर्वं द्विर्वचने कृते ऽभ्यासणकारेण व्यवायाद्धातुनकारस्य णत्वं न स्यात्, अस्मिंस्तु सति परत्वाण्णत्वे कृते कृतणत्वस्यैव द्विर्वचने अन्तरेणाप्येतद्वचनं प्राणिणिषतीत्यादि सिद्धं भवति, यद्येवं किमर्थमिदमारभ्यतइत्याह । 'एतत्त्विति' । शक्यार्थे कृत्यः, इतिकरणो हेतौ, तुशब्दोवधारणे, यस्मादेतदपवादवचनमेतदर्थे नैव शक्यमाश्रयितुं, तस्मादेतदारभ्यते, अयमभिप्रायः । अस्य वचनस्यानित्यत्वज्ञापनार्थमिदमारभ्यतइति, तेनोजढदित्यत्र ढत्वादीना-

१ व्यवाय इति पा० ई० पु० ।
२ वर्णद्वयव्यवायेन व्यवाय इति पा० ई० पु० ।

मसिद्धत्वात् हत इत्येतद् द्विरुच्यते इत्युपपन्नं भवति, अथोभावितिकिमर्थं, यावताभ्यासनकारस्य पूर्वाणेव णत्वं सिद्धत्यारम्भसामर्थ्याद्धातुनकारस्य व्यवायेप्यनेन भविष्यति, सत्यं, व्यवहितस्य सिद्ध्यति, अनन्तरस्य तु तक्रकौण्डिन्यन्यायाच्च स्यादित्युभावित्युच्यते ॥

"हन्तेरत्पूर्वस्य" ॥ हन्तेरित्यवयवषष्ठी, अत्पूर्वा यस्मादिति बहुव्रीहिः, नकारोन्यपदार्थः, यद्यपि नकारविशेषणानि प्रथमया निर्दिश्यन्ते, अन्तः, उभाविति, तथा पीह षष्ठ्या निर्देशः कृतः, इदं हि न्याय्यं व्यतिक्रमोल्पः । 'प्रहण्यतइति' । भावे कर्मणि वा लट् । 'प्रघ्नन्तीति' । गमहनेत्युपधालोपः, हो हन्तेरिति कुत्वम्, अत्र कुव्यवायइति प्रसंगः । 'प्राघानीति'। चिण् भावकर्मणोरिति चिण् । श्तिपा निर्देशो धातुनिर्देशार्थ एव न यङ्लुङ्निवृत्त्यर्थः, प्रजङ्घ्नीति, अत्र हि चुत्वे कृते जकारेण व्यवायादेव न भविष्यति ॥

"वमोर्वा" ॥ पूर्वेण नित्ये प्राप्ते विकल्पः ॥

"अन्तरदेशे" ॥ अन्तःशब्दस्याङ्किविधिणत्वेषूपसंख्यानमित्युपसर्गसंज्ञाया भावाद्धन्तेरत्पूर्वस्येति सिद्धे देशप्रतिषेधार्थं वचनम् । 'अन्तर्हननो देश इति' । अधिकरणे ल्युट् ॥

"अयनं च" ॥ 'अन्तरयणमिति' । अयेरिणो वा ल्युटि रूपं, कृत्यच इति सिद्धे इदमपि देशप्रतिषेधार्थं वचनम् ॥

"छन्दस्यृदवग्रहात्" ॥ अवगृह्यते विच्छिद्य पठ्यते इत्यवग्रहः, ऋच्चासाववग्रहश्च ऋदवग्रहः, ऋकारादवग्रहात्पूर्वपदादिति, तिस्रोपि समानाधिकरणाः पञ्चम्यः, तत्र ऋकारमात्रस्य पूर्वपदस्यासंभवादृकारेण तदन्तविधिः, अवग्रहणभूतो य ऋकारः तदन्तादिति, संहिताधिकाराच्च संहिताकालएतेषां णत्वं, पदकाले चावग्रहः क्रियते, तेनावग्रहयोग्यत्वादृकारोवग्रह इत्युक्तः, न तु तद्व्यापन्नः, तथा चावग्रहं दर्शयता णत्वं न प्रयुक्तम् । 'अनवगृह्यमाणादिति' । अनवग्रहयोग्यादित्यर्थः । 'अपदादिति' । पदे ह्यवग्रहः क्रियते पदमत्र विच्छिद्यतइति दर्शनाय ॥

"नश्च धातुस्थोरुषुभ्यः" ॥ धातौ तिष्ठतीति धातुस्थो रेफः षकारश्च, उरु इति स्वरूपग्रहणं, षु इति कृतषत्वस्य सुञो ग्रहणं न सप्तमीबहुवचनस्य, तेन इन्द्रो धता गृहेषु न इत्यत्र न भवति, नसिति नासिकादेशस्यास्मदादेशस्य च सामान्येन ग्रहणं, ततोऽत्रास्मदादेश एव कार्यी, तस्यैव धातुस्थादिभ्यः परस्य संभवात्, उत्तरसूत्रे तूभयोः कार्यित्वम् । 'रक्षाण इति' । रक्षेति लोण्मध्यमपुरुषैकवचनान्तं, द्व्यचोतस्तिङ इति दीर्घः । 'शिक्षाणइति' । शिक्षतिर्दानकर्मा छन्दसि । 'उरुणस्कृधीति' । कृञो लोट्, सेर्हिः, श्रुशृणुपॄकृवृभ्यश्छन्दसीति हेर्धिरादेशः, कः करदित्यादिना विसर्जनीयस्य सत्वम् । 'अभीषुणइति' । इकः सुञीति दीर्घः, एवमूषुण इत्यत्रापि ॥

"उपसर्गाद्बहुलम्" ॥ न संप्रति क्रियायोगाभावात्प्रादिरुपलक्षणमुपसर्गग्रहणं, प्रण इत्यस्मदो नसादेशः, प्रणस इति बहुव्रीहिः, उपसर्गाच्चेत्यच् समासान्तः, नासिकायाश्च नस्भावः, उपसर्गादनोत्पर इति पाठान्तरम्, उपसर्गात्परस्य नसो नकारस्य णत्वं भवति, ओतः परस्य ओकारे वा न भवतीत्यर्थः । उभयथाप्यतिव्याप्त्यव्याप्तिसंभवाद्व्याख्यात एव पाठो वृत्तिकारेणाश्रितः ॥

"कृत्यचः" ॥ कृत्स्थो यो नकार अच उत्तर इत्यनेनाच इति नकारस्येदं विशेषणं न कृत इति दर्शयति, यदि हि कृत एतद्विशेषणं स्यात् प्रापणमित्यादौ न स्यात्, न भाभूपूकमिगमिप्यायिवेपामित्यत्र च कम्यादीनां प्रतिषेधोऽनर्थकः स्यात् । 'अनमानेत्यादि' । संभवोदाहरणप्रदर्शनपरं न परिगणनमन्यस्यासंभवात् । 'अन इति'। योरनादेशः, मानइत्याग[1]तमुक्,शानजादिः, तव्यदादिसूत्रविहितोऽनीयः, आक्रोशे नञ्यनिः, सुप्यजातौ णिनिः, आवश्यके णिनिः, निष्ठादेशो रदाभ्यामितिविहितः । 'प्रहीण इति' । घुमास्थेत्यादिना ईत्वम् । 'प्रमग्नः प्रभुग्न इति' । ओदितश्चेति निष्ठानत्वम् । 'निर्विण्णस्येति' । अचः परः कृत्स्थो नकारो न भवतीति वचनं, तत्र परस्य नस्य णत्वं पूर्वस्य ष्टुत्वम् ॥

1 आने मुगिति २ । ३ पु॰ पा॰ ।

Digitized by Google

"णेर्विभाषा" ॥ 'एयन्ताद्यो विहित इति'। एतेन णेरित्यस्य विहितविशेषणत्वन्दर्शयति, प्रयोजनं वृत्तावेव वक्ष्यते, अपरः प्रकारः, अड्व्यवायइति वर्त्तते, तेन एयन्तस्य कृतश्चाड्व्यवायेपि णत्वस्याभ्यनुज्ञानात् एयन्तात्परः कृदित्येवमाश्रीमाणेपि प्रयाप्यमाणमित्यादौ यकारव्यवायेपि णत्वसिद्धिरिति ॥

"हलश्चेजुपधात्" ॥ 'प्रकोपणमिति'। कुप क्रोधने। 'प्रेहणं, प्रोहणमिति'। ईह चेष्टायाम्, ऊह वितर्क्के, ¹अत्र कृत्यच इति णत्वं नित्यमेव भवति, कथं पुनरसत्यादिग्रहणे हलादिरिति लभ्यतेत आह। 'इजुपधस्येति'। इजुपधस्य हलन्तत्वाव्यभिचारात्सामर्थ्यादादिविशेषणं हल्ग्रहणमित्यर्थः ॥

"इजादेः सनुमः" ॥ 'हल इति वर्त्ततइति'। प्रयोजनमुत्तरत्र वक्ष्यति, ननु तत्रादिविशेषणं हल्ग्रहणमन्तविशेषणेन चेहार्थः, अत आह। 'तेनेति'। इजादेर्हलादित्वासंभवात् सामर्थ्यम्। 'प्रेङ्खणमिति'। इखि गत्यर्थः, इदित्त्वान्नुम्। ननु चात्रानुस्वारे कृते नायं सनुम्को भवति, काममत्र स्थानिवद्भावात्सिद्ध्यति प्रोम्भणमिति, अत्र त्वादित एव नुम् भवतीत्यत्र न सिद्ध्यति, औत्पत्तिको हि तत्र नकारः, प्रेन्वनमित्यत्र च प्राप्नोति, यत्र नुमेवाविकृतः श्रूयते, तस्मादिहापि नुम्ग्रहणमनुस्वारोपलक्षणार्थं व्याख्येयं, नक्षत्रदर्शनन्यायेनेष्टविषये सर्वत्र भविष्यति, अनिष्टे च न भविष्यति, एवं च कृत्वा नियमार्थतोपपद्यते, अन्यथा प्रेन्वनमित्यत्र विध्यर्थता संभाव्येत, न चाट्कुप्वाङ्नुम्व्यवायेपीत्येतेन सिद्धिः, तत्रापि नुम्ग्रहणस्यानुस्वारोपलक्षणत्वात्। ननु कृत्यच इत्यनेनैव सिद्धे नार्थोनेनात आह। 'सिद्धे सतीति'।'प्रमङ्गनमिति'। मगिरपि गत्यर्थ एव, प्रमङ्गनमिति पाठे मण्डनार्थः। ननु च कैमर्थ्यान्नियमो भवति, विधेयं नास्तीति कृत्वा, इह चास्ति विधेयं किं एयन्ताद्विभाषा प्राप्ता, तत्र नित्यं णत्वं विधेयमत आह। 'हल इत्यधिकारादिति'। ननु च णिलोपे कृते

१ अत्रेत्यारभ्योत्तरसूत्रे इदित्त्वान्नुमित्यन्तः पा॰ इं॰ पु॰ त्रुटितः।

ण्यन्तोऽपि हलन्तो भवति ततः[1] किं, सत्यपि हलधिकारे विध्यर्थता संभवति, नैतदस्ति, विहितविशेषणस्याश्रयणात्, एतदेव अभिप्रेत्य वृत्तिकारेणोक्तं हलन्ताद्धातोर्यो विहित इति ॥

"वा निंसनिक्षनिन्दाम्" ॥ णिसि चुम्बने, णिक्ष चुम्बने, णिदि कुत्सायां, णोपदेशत्वादेतेषां नित्ये णत्वे प्राप्ते विकल्पः ॥

"न भाभूपूकमिगमिप्यायिवेपाम्" ॥ 'पूग्रहणेन पूञो ग्रहणमेष्टव्यमिति'। इष्टिरेवेयम्। 'ण्यन्तानां चेति'। ण्यन्तस्याधात्वन्तरत्वात् प्राप्नोतीति वचनं, किं च ण्यन्तेष्वस्य प्रवृत्तौ पक्षे ऽनुवाददोषप्रसङ्गः, णेर्विभाषेत्येव पक्षे[2]निवृत्तेः सिद्धत्वात् ॥

"षात्पदान्तात्" ॥ 'निष्पानं दुष्पानमिति'। इदुदुपधस्य चेति विसर्जनीयस्य षत्वम्, अत्र कृत्यच इति प्रसङ्गः। 'सर्पिष्पानमिति'। कर्मणि षष्ठ्याः समासः। 'यजुष्पानमिति'। कर्तृकरणे कृता बहुलमिति समासः, उभयत्रापि नित्यं समासेनुत्तरपदस्यस्येति षत्वम्, अत्र पानं देशे वा भावकरणयोरिति प्राप्तिः। 'पदे अन्त इति'। सप्तमीतियोगविभागात्समासः। 'सुसर्पिष्केणेति'। शोभनं सर्पिरस्येति बहुव्रीहिः, कप्, इणः ष इति षत्वं, नायं पदे परतः पूर्वमवस्थितस्यान्तो भवति, पदस्य त्वन्तो भवति, स्वादिष्विति पदसंज्ञाया विधानात्, ततश्च षष्ठीसमासे ऽत्रापि प्राप्नोति, कथं पुनर्ज्ञायते सप्तमीसमासोऽयमिति, अन्तग्रहणात्, अन्यथा वर्णग्रहणे सर्वत्र तदन्तविधिरित्येव षकारान्तात्पदादिति लभ्यते ॥

"नशेः षान्तस्य" ॥ 'प्रनष्ट इति'। मस्जिनशोर्झलीत्यागतस्य नुमो ऽनिदितामिति नलोपः, व्रश्चादिषत्वम्। नशेरशः। अशकारान्तस्य नशेरिति वक्तव्यं, न तु षान्तस्येति, इहापि यथा स्यात्प्रनङ्क्ष्यतीति, षढोः कः सीति कत्वं भवति, तर्हि तथा वक्तव्यं, नेत्याह। 'षान्तग्रहणमिति'। षकारेण नशेर्विशेषणात् षान्तस्येति सिद्धे पुनरन्तग्रहणसामर्थ्याद्यः संप्रति षान्तो यश्च भूतपूर्वस्तस्य भवति प्रतिषेधः ॥

१ तत इत्यारभ्य संभवतीत्यन्तः पा॰ ई॰ पु॰ नास्ति।
२ पक्षे णत्वेति पा॰ ई॰ पु॰।

Digitized by Google

“पादान्तस्य” ॥ हेक[1]रिचित्याद्यप्युदाहरणम् ॥

“पदव्यवायेपि” ॥ ‘माषकुम्भवापेनेति’ । अत्र केचिदाहुः । यदा माषाणां कुम्भो माषकुम्भः, तस्य वाप इति प्रक्रिया तदोत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणप्रतिषेधात्पदत्वाभावान्निषेधाप्रवृत्तेर्भवितव्यमेव णत्वेन, तस्मात्कुम्भस्य वापः, कुम्भवापः, माषाणां कुम्भवापो माषकुम्भवाप इति प्रक्रियाश्रयेणोदाहरणमिति । अत्र कुमति चेति प्राप्तिः । ‘प्रावनद्धमिति’ । उपसर्गादसमासेपीत्यवशब्दव्यवायेपि अड्व्यवायइति प्राप्तिः । ‘प्रगाचयामइति’ । छन्दस्ययं व्यवहितः प्रयोगः । गामिति द्वितीयान्तेन पदेन व्यवायः । ‘पदव्यवाये ऽतद्धितइति’ । योयं पदव्यवाये प्रतिषेधः स तद्धिते यत्पदं तत्र न भवतीति वक्तव्यमित्यर्थः । ‘आर्द्रगोमयेणेति’ । गोश्च पुरीषइति मयट्, तत्र परतो गोशब्दः स्वादिष्विति पदम् ॥

“क्षुभ्नादिषु च” ॥ क्षुभ्नेति स्वरूपग्रहणं न धातुग्रहणं, तेन क्षोभणमित्यादौ णत्वं भवत्येव, क्षुभ्नीतः क्षुभ्नन्तीत्यत्र श्नाल्लोपयोः स्थानिवद्भावादेकदेशविकृतस्यानन्यत्वाद्वा णत्वं न भवति । नृनमयतीति नृनमः, हरिनन्दीति ताच्छीलिको णिनिः । हरिनन्दनः । गिरि[2]नगरमिति षष्ठीसमासो । ‘नरीनृत्यतइति’ । रीगृदुपधस्य च । ‘तृप्नोतीति’ । छन्दसि व्यत्ययेन श्नुः । ‘परिनर्त्तनं परिगहनमिति’ । प्रादिसमासो । ‘परिनन्दनमिति’ । गतिसमासः, श[3]रनिवेशादयो दर्भानूपान्ताः षष्ठीसमासाः । ‘आचार्यभोगीनः आचार्यानीति’ । अत्रैवास्य प्रतिषेधः, आचार्येण आचार्याणामित्यादौ तु भवत्येव । ‘क्षुभ्नातिराकृतिगण इति’ । चकारोनुक्तसमुच्चयार्थ एतमेवार्थं सूचयति ॥

“स्तो श्चुना श्चुः” ॥ अत्र संनिपातइत्यध्याहार्यम् । ‘वृक्षश्शेतइति’ । वा शरीति पक्षे विसर्जनीयस्य सकारः । ‘मज्जतीति’ । झलां

१ तरचिति पा॰ ह॰ पु॰ ।
२ हरिनगरमिति पा॰ ह॰ पु॰ ।
३ शरनिवासादय इति पा॰ ह॰ पु॰ ।

Digitized by Google

जश् झशीति सकारस्य दकारे कृते तस्य चुत्वं जकारः, असिद्धत्वं तु ज-श्त्वस्य न भवति, न मु ने इत्यत्र नेति योगविभागात्तथा च भृज्जतीनां ह्रितीति निर्देश उपपद्यते, इह सकारतवर्गौ कार्यिणौ द्वौ निमित्ते अपि द्वे एव शकारचवर्गौ, ततश्च साम्यात्संख्यातानुदेशः प्राप्नोतीत्याशङ्क्या-ह । 'शाद्वितिप्रतिषेध इति' । श्चुनेति तृतीयानिर्देशः पूर्वभूतेनापि योगे यथा स्यात्, यज्ञः, याच्ञेति, सप्तमीनिर्देशे तु तस्मिन्निति निर्दिष्टे पूर्वस्येति परभूतेनैव योगे स्यात् ॥

"ष्टुना ष्टुः" ॥ 'अट्टतीत्यादि' । अतट अतिक्रमणहिंसयोः, अदृड अभियोगे, तकारदकारोपधयोरेतयोर्गणपाठः क्विबन्तयोः संयोगा-न्तलोपे कृते तकारदकारयोः श्रवणार्थः, न न्द्राः संयोगादय इति प्रतिषे-धोऽप्यड्डुतेर्भवति, इहापि तृतीयानिर्देशः पूर्वभूतेनापि योगे ष्टुत्वं यथा स्यात् यथा द्रोढेति, अत्रापि तोः षीति प्रतिषेधाद्विमिर्त्तिनिमित्तयोः-संख्यातानुदेशो न भवति ॥

"न पदान्तात् टोरनाम्" ॥ अनामिति षष्ठीबहुवचनस्यागतनु-ट्कस्य प्रतिषेधः । 'श्वलिट्साय इति' । धुडभावपक्षे सकारस्य ष्टुत्वं प्राप्नो-ति, धुट्पक्षे तु चर्त्वस्यासिद्धत्वात्तस्यैव धकारस्येति । 'ईट्टइति' । ईड्ड स्तुतौ, अदादिरनुदात्तेत्, षडधिका नवतिः षण्णवतिः, षण्णां नगराणां समाहारः षण्णगरी ॥

"तोः षि" ॥ षीतिसप्तमीनिर्देशात्पूर्वभूतेनापि संनिपाते भवत्येव, लोष्टा पेष्टेति ॥

"शात्" ॥ 'प्रश्नः विश्न इति' । यजयाचेत्यादिना नङ्,च्छ्वोः शूडनुनासिके चेति छकारस्य शकारः, सर्वे विधयश्छन्दसि विकल्प्यन्तइति तैत्तिरीयके नायं प्रतिषेधो भवति । अपोश्नाति[१] । तत्रापि काठके भव-त्येव ब्रह्मचारिणे प्रश्नान् प्रोच्य अजिघाय । स्वाध्यायब्राह्मणे च भवतीति सकलं भद्रमश्नुते ॥

१ अद्यत्वे तु अपोऽश्नातीति अत्वाघटित एव पाठ उपलभ्यते ।

Digitized by Google

"यरोनुनासिकेऽनुनासिको वा" ॥ पदान्तादित्यनुवृत्तं षष्ठ्यन्तं विपरिणम्यते । 'वाङ्मयमिति' । नित्यं वृद्धशरादिभ्य इति मयट् ॥

"अचो रहाभ्यां द्वे" ॥ अर्चयतेर्घञ्, कुत्वम्, अर्कः, मर्चिः सौत्रो धातुः, तस्मादिण्भीकायाशल्यतिमर्चिभ्यः कन्, चोः कुरिति कुत्वं मर्कः, अत्राकारादनन्तरो रेफः तस्मादपि ककारः, एवमुत्तरेष्वपि द्रष्टव्यम् ॥

"अनचि च" ॥ 'अनच्परस्येति' । अचोऽन्योऽनच्, सपरो यस्मात्सोऽनच्परः, अनेन पर्युदासो दर्शितः, किं प्रयोजनं, न किं चित्, प्रत्युत दोष एव, अवसाने न सिद्ध्यति, वाक्क्, अच्सदृशस्य वर्णान्तरस्याभावात्, प्रतिपत्तिगौरवप्रसङ्गात्पर्युदास आश्रितः, पक्षान्तरे हि विशेषप्रतिषेधात्सामान्येन विधिरनुमेयः स्यादिति गौरवम् । 'उल्का वल्मीक इति' । लकारो यण् ककारमकारौ यमौ, स्थालीति सकारः शर्,थकारः खय्,वत्सादिषु तकारककारपकाराः खयः, सकारषकारौ शरौ । 'अवसानइति' । पर्युदासाश्रयणादिदमारब्धं, प्रसज्यप्रतिषेधे तु परस्य निमित्तस्यानाश्रयणाद्वेत्यधिकारात्सिद्धम् ॥

"नादिन्याक्रोशे पुत्रस्य" ॥ 'पुत्रादिनीति' । ताच्छील्ये णिनिः । 'तत्परे चेति' । स आदिनीशब्दो यस्मात्परस्तत्रापि परतः पुत्रशब्दस्य द्विर्वचनं न भवति, पुत्राश्च पौत्राश्च पुत्रपौत्राः, तानत्तुं शीलमस्याः पुत्रपौत्रादिनी, अन्ये तु तत्परे पुत्रशब्दइति व्याचक्षाणाः पुत्रपुत्रादिनीत्युदाहरन्ति, तत्र पुत्रस्य पुत्रमत्तीति विग्रहः । 'वा हतजग्धपरइति' । हतजग्धं च तत्परं चेति विशेषणसमासः राजदन्तादित्वात्परशब्दस्य परनिपातः । 'पुत्रहतीति' । पुत्रो हतो ऽनयेति बहुव्रीहिः, अस्वाङ्गपूर्वपदाद्वेति ङीष् । 'खयो द्वितीया इति' । खय इति षष्ठी । 'द्वितीया इति' । वर्गेषु खकारादयः ॥

"शरोचि" ॥ 'आदर्शइति' । दृशेरधिकरणे घञ् । 'दर्शइति' । अत्राप्यधिकरणे घञ्, विपरीतलक्षणा चेयं, न दृश्यतेस्मिंश्चन्द्रमा इति दर्शइति ॥

Digitized by Google

"त्रिप्रभृतिषु शाकटायनस्य" ॥ इन्द्र इत्यादौ नकारदकारयो-र्द्विर्वचनाभावः। 'आष्ट्रमिति'। दीर्घादाचार्याणामित्यस्यासिद्धत्वात्त्रि-प्रभृतिष्वयमेव प्रतिषेधो भवतीति मन्यते ॥

"सर्वत्र शाकल्यस्य" ॥ अत्रिप्रभृत्यर्थोयमारम्भः ॥

"दीर्घादाचार्याणाम्" ॥ दात्त्रमित्यादावनचि चेति प्राप्तिः ॥

"झलां जश् झशि" ॥ उदाहरणेषु भघधानाम्बगदाः ॥

"अभ्यासे चर्च" ॥ 'चिखनिषतीति'। खनेःसन्, द्विर्वचनं, कुहो-श्चुरिति चुत्वञ्छकारः, तस्य चर्त्वेश्चकारः। टिठकारयिषतीति। ठकार-माचष्टइति णिच्, टिलोपः, सन्,[१] ठकारस्य टकारः। 'तिष्ठासतीति'। शर्पूर्वाः खय इति थकारस्य शेषः, तस्य चर्त्वं तकारः। 'प्रकृतिचरां प्रकृ-तिचर इति'। जश्त्वबाधनार्थं पर्जन्यवल्लक्षणप्रवृत्त्या प्रकृतिरूपाश्चरः स्थानिना ऽभिन्नरूपा भवन्तीत्यर्थः। एतच्चान्तरतमपरिभाषया लभ्यते। 'प्रकृतिजशां प्रकृतिजश इति'। व्याख्यातम्। 'डिड्ढइति'। ढौकृ लिटि द्विर्वचने एरनेकाच इति यण् ॥

"खरि च" ॥ 'युयुत्सतइति'। युधेः सन्,धकारस्य तकारः। 'आरिप्सते आलिप्सतइति'। रभिलभ्योः सनि मीमाघ्वित्यादिना अच इस्, स्कोः संयोगाद्योरिति सलोपः, भकारस्य पकारः ॥

"वावसाने" ॥ झलां जशोन्तइति नित्ये जश्त्वे प्राप्ते चर्त्वं विधीयते, वावचनात्पक्षे सोपि भवति ॥

"अणोऽप्रगृह्यस्यानुनासिकः" ॥ अण इति पूर्वेण णकारेण प्रत्या-हारः। 'अग्नी वायू इति'। ईदूदेदिति प्रगृह्यसंज्ञा ॥

"अनुस्वारस्य ययि परसवर्णः" ॥ 'शङ्कितेत्यादि'। शकि शङ्कायाम्, उञ्छि उञ्छे, कुडि दाहे, टुनदि समृद्धौ, कपि चलने, इदित्त्वान्नुम्, नश्चापदान्तस्य झलीत्यनुस्वारः, तस्य ककारादिषु परतो यथासंख्यं परसवर्णा वर्गपञ्चमा ङकारादयः, कुर्वन्ति कृषन्तीत्यत्र झोन्तादेशे

१ सनीति पा॰ ई॰ पु॰।

Digitized by Google

नकारस्य णत्वं प्राप्नोति तत्कस्मान्न भवतीत्याह । 'इहेति' । णत्वमनुस्वारात्पूर्वं न भवति, यस्माण्णत्वस्यासिद्धत्वात्पूर्वमनुस्वार एव क्रियते, पश्चादपि न भवति, अनुस्वारस्थानिकस्यास्य परसवर्णस्य णत्वे कर्तव्ये असिद्धत्वात् । 'परसवर्णेनेति' । परसवर्णार्थेन शास्त्रेणेत्यर्थः । 'एवमित्यादि' । अनुस्वारीभूतो णत्वमतिक्रामतीति भाष्ये यदुक्तं तदेवमुक्तप्रकारेणेत्यर्थः ॥

"वा पदान्तस्य" ॥ 'तङ्कथयेत्यादि' । ककारादिषु परतो ङकारादयः क्रमेण भवन्ति ॥

"तोर्लि" । अत्र तकारस्य शुद्धो लकारः, नकारस्यानुनासिकः ॥

"उदः स्थास्तम्भोः पूर्वस्य" ॥ परसवर्ण इति समस्तमपि सवर्णग्रहणमिह निष्कृष्य संबध्यते । 'उत्थानेति' । सकारस्य पूर्वसवर्णस्तकारः । अन्ये तु बाह्यप्रयत्नसाम्यात् थकारमिच्छन्ति, तत्र थकारद्वयस्य श्रवणं, न च पूर्वस्य चर्त्वे तत्र कर्तव्ये ऽस्य पूर्वसवर्णस्यासिद्धत्वात् । 'रोगे चेति वक्तव्यमिति' । इदमविशेषेण छन्दसि भाषायां च ॥

"झयो होऽन्यतरस्याम्" ॥ उदाहरणेषु हकारस्य महाप्राणस्य सोष्मणो घोषवतस्तादृश एव घकारादयश्चतुर्था भवन्ति ॥

"शश्छोऽटि" ॥ 'शश्छोमी[1]तीति' । अटीत्यपनीयामीति वक्तव्यमित्यर्थः । तच्छ्लोकेन[2]तच्छ्मश्रुणेत्यत्र लकारम[3]कार परस्यापि[4] शकारस्य भवति ॥

"हलो यमां यमि लोपः" ॥ 'द्वौ यकाराविति' । एकः संज्ञायां समजेत्यादिना विहितस्य क्यपः संबन्धी, द्वितीयो ऽयङ्यिक्क्ङितीत्ययङादेशस्य । 'क्रमजस्तृतीय इति' । क्रम आनुपूर्वी, ततो जातः, क्रमजः, स च पुनरनचि चेति द्विर्वचनेन संपादितः । 'तकारात्पर एको यकार इति' ।

---

१ छत्वममीतिवक्तव्यमिति मु॰ मू॰ पु॰ पाठः पदमञ्जर्यसम्मतः ।

२ तच्छ्लोकस्तच्छ्मश्रुणामीति पा॰ ई॰ पु॰ ।

३ अकारपरस्येति पा॰ ई॰ पु॰ ।

४ अपीति नास्ति ई॰ पु॰ ।

दित्यदित्येत्यादिना विहितस्य ण्यस्य संबंधी। 'द्वौ यकाराविति'। एको ऽदितिशब्दात्परस्य ण्यस्य संबन्धी द्वितीय आदित्यशब्दात्। 'अत्र-मति'। भवत्ययं नकारो यम्, यम्परश्च, न तु हलः परः। '[1]अर्घ्य-मिति'। पादार्घाभ्यां चेति तादर्थ्ये यत्, भवत्ययं घकारो रेफाद्धलः परो यम्परश्च न तु यम्। 'शार्ङ्गमिति'। शृङ्गस्य विकार इत्यण्, ऋकारस्य रपरा वृद्धिः, अत्र ङकारो यम् भवति हलश्च परः न तु यम्परः। ननु च बहिरङ्गा वृद्धिः, ततः किं, हलः परो न भवति, लोपोपि बहिरङ्गो ऽनेक-निमित्तापेक्षत्वात्॥

"झरो झरि सवर्णे"॥ 'त्रयस्तकारा इति'। [2]अव उपसर्गात्त इत्याकारस्य तकारः, दकारस्यापि चर्त्वे तकारः, एकः प्रत्ययसम्बन्धी, अनचि चेति द्विर्वचने क्रमजश्चतुर्थः। 'चत्वारस्तकारा इति'। पूर्वोक्तास्त्रयश्चतुर्थो महच्छब्दसम्बन्धी, पञ्चमो द्विर्वचनेन सम्पादितः। 'महच्छब्दस्योप-संख्यानसामर्थ्यादिति'। एतच्च महच्छब्दस्योपसंख्यानमित्यत्रैव प्रति-पादितम्। 'शार्ङ्गमिति'। भवत्ययं ङकारो हलः परः झरि सवर्णे परतः न त्वयं झरिति न लुप्यते। 'प्रियपञ्चेति'। प्रियाः पञ्चास्येति बहुव्रीहिः। वा प्रियस्येति प्रियशब्दपूर्वनिपातस्तृतीयेकवचनम्, अल्लोपः, नकारस्य श्चुत्वं ञकारः, भवत्ययं चकारो हलः परः स्वयं च झर् सवर्णे च परतः, न तु ञकारो झरिति न लुप्यते। ननु चाल्लोपस्य स्थानिव-त्त्वादनन्तरो न भवति सवर्णः, तत्किमेतद्विवृत्त्यर्थेन झरीत्यनेनेत्यत आह। 'अल्लोपस्येति'। 'तर्प्तेति'। तृप प्रीणने, पकारस्य तकारः, स्थानभेदात्सवर्णो न भवति, ननु च निमित्तानां कार्यिणां च संख्यासा-म्यादिह संख्यातानुदेशे सति नैव तर्प्तेत्यत्र लोपः प्राप्नोति, तत्किमेतद्वि-वृत्त्यर्थेन सवर्णग्रहणेनात आह। 'सवर्णग्रहणसामर्थ्यादिति'। नहि यथासंख्ये ऽस[3]वर्णो झरस्ति यद्व्यावृत्त्यर्थं सवर्णग्रहणं स्यात्। 'शिण्ढि पि-

१ मु॰ मू॰ पु॰ यमामिति किमित्यस्य प्रत्युदाहरणमग्निरित्येवोपलभ्यते, मिश्रानु-सारेणार्घ्यमित्यपि।

२ अव उपसर्गात्तइत्यारभ्य चत्वारस्तकाराइत्यन्तो ग्रन्थ ह्वै॰ पु॰ नास्ति।

३ सत्यसवर्णइति पा॰ ह्वै॰ पु॰।

Digitized by Google

पठीति'। शिष्ल विशेषणे, पिष्ल संचूर्णने रुधादी, लोट्, सेर्हिः। श्नसो-रल्लोपः, हेर्धिः, झलां जश् झशीति षकारस्य डकारः, नश्चापदान्तस्य झलीत्यनुस्वारः, तस्य परसवर्णो णकारः, धकारस्य ष्टुत्वं ढकारः, अनेन डकारस्य ढकारे लोपः॥

"उदात्तादनुदात्तस्य स्वरितः"॥ 'गार्ग्यो वात्स्य इति'। गर्गादिभ्यो यञ्, ञित्त्वादाद्युदातत्त्वं, शेषनिघातः, तस्य स्वरितः। 'पचति पठतीति'। शप्तिपावनुदात्तौ, धातुस्वरः, शबकारस्य स्वरितत्वं, तित्स्वरितमित्यस्यानन्तरमिदं वक्तव्यम्, एवं हि स्वरितग्रहणं न कर्त्तव्यं भवति, अत आह। 'असेति'। यदि तत्र क्रियेत अनुदात्तं पदमेकवर्जमित्येतत्प्रवर्तेत, इह तु करणे न प्रवर्त्तते, स्वरितस्यासिद्धत्वात्तेन द्वयोरप्युदात्तस्वरितयोः श्रवणं भवति॥

"नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानाम्"॥ उदात्तस्वरितावुदयौ यस्मादिति बहुव्रीहिः, उदयशब्दः प्रत्येकमभिसंबध्यते, यदाह। 'उदात्तोदयस्येति'। उदयशब्दः परशब्देन समानार्थः प्रातिशाख्येषु प्रसिद्धः, तत्र शब्दो लित्स्वरेणाद्युदात्तः, क्वशब्दः किमोऽदित्यत्प्रत्ययान्तस्तित्स्वरितः। 'उदात्तस्वरितपरस्येति वक्तव्यइति'। एतदप्युपलक्षणम्, उदात्तस्वरितयोरित्येव वक्तव्यमिति, इत एव परशब्दार्थलाभात्। 'मङ्गलार्थमिति'। उदयशब्दोच्चारणमेव मङ्गलं मङ्गलादीनि हि शास्त्राणि प्रथन्ते, मङ्गलमध्यानि मङ्गलान्तानि च वीरपुरुषाणि च भवन्ति आयुष्मत्पुरुषाणि च, इह चादौ वृद्धिशब्दोमध्ये शिवशब्दः शिवशमरिष्टस्य करइति, अन्ते चायमुदयशब्दः॥

"अ अ"॥ एकोत्र विवृतः परः संवृतः, द्वावप्यविभक्तिकौ, यो विवृतस्स स्थानी, यः संवृतः स आदेशः। किमर्थमकारस्याकारो विधीयते, इत्याह। 'इहेति'। 'कार्यार्थमिति'। तत्पुनः कार्यमकारस्य दीर्घप्लुताभ्यां सवर्णसंज्ञा, अन्यथा प्रयत्नभेदान्न स्यात्, ततश्च ह्रस्वोऽकारो गृह्यमाणो दीर्घप्लुतौ न गृह्णीयात्। तत्र दोषः। अकः सवर्णे दीर्घः, इहैव स्यादैन्द्राग्नमिति, इह न स्याद्दण्डाढकमिति, तस्मादेवमादिकार्यार्थे-

मकार इह शास्त्रे विवृतः प्रतिज्ञायन्ते[1], तत्र यदीयं प्रत्यापत्तिर्न क्रियेत तस्य तदा तथाभूतस्यैव प्रयोगः स्यात्, स माभूदिति प्रत्यापत्तिरिह क्रियते, इह स्थान्यकारो विवृतो अण्त्वात् सवर्णानां ग्राहक इति दीर्घप्लुतयोरपि स्थाने संवृतोऽकारः प्राप्नोति आदेशस्त्वकारः संवृतोऽण् न भवतीति सवर्णानां ग्राहको न प्राप्नोति, भाव्यमानत्वात्। ततश्च यद्गुणः संवृत उच्चारितस्तद्गुण एवाष्टादशभेदभिन्नस्यापि अवर्णस्य प्राप्नोति, इत्याशङ्क्याह। 'दीर्घप्लुतयोश्चेति'। इष्टिरेवेयम्। यद्वा तपरनिर्देशात्सिद्धम्, अद इति सूत्रं कर्तव्यं, तत्र तः परो यस्मादिति पूर्वो ऽकारस्तपरः, तात्परस्तपर इति द्वितीयः, ततश्च स्थान्याकारो दीर्घप्लुतो न ग्रहिष्यत्यादेशस्त्वनणपि गुणान्तरयुक्तांस्तत्कालान् ग्रहिष्यति। एकशेषनिर्देशो वायं द्रष्टव्यः, अत्र षड् मात्रिका अकाराः स्थानिनो निर्दिश्यन्ते, आदेशा अपि षडेव, तत उभयत्रैकशेषः, तत्र षण्णां स्थानिनां निर्देशसामर्थ्यात् स्थानिभिर्दीर्घप्लुतौ भिन्नकालौ न गृह्येते। ततः षण्णां स्थानिनां स्थाने षडादेशाः संवृता यथासंख्यं भवन्तीति सर्वेष्टसिद्धिरिति शम्॥

इति श्रीभट्टहरदत्तमिश्रविरचितायां पदमञ्जर्या-
मष्टमस्याध्यायस्य चतुर्थः पादः।

समाप्ता चेयं काशिकाव्याख्या पदमञ्जरी।

॥ शुभं भवतु ॥

१ प्रतिज्ञात इति पा॰ ई॰ पु॰।

Digitized by Google

Digitized by Google

टी० ॥ इदमहं पश्यामीत्यादिषु बुद्धिस्वरूपातिरिक्तानां विषयाश्रयस्वगतविशेषाणां ग्रहोऽनभ्युपगतश्चेदित्यर्थः । विवक्षितस्योपयुक्तं वासनाबुद्धिस्वरूपयोर्भेदाभावन्तावदाह । न हीति । बुद्धिर्हि स्वयंविशेषात्मिका. न तु विशेषवतीति सिद्धान्ते वासनयाऽपि धर्मवत्त्वं तस्या नास्तीति यावत् । ततः तत्फलितमाह । बुद्ध्यात्मेति । बुद्धिस्वरूपमेवेत्यर्थः । वासनायाः स्वकार्ये सहकार्यसंभवमाह । न चेति । बाह्यमभावादेव नापेक्षणीयं बुद्ध्यन्तरन्तु सदपि न बुद्ध्यन्तरस्य सह कुरुते अनभ्युपगमात्, अभ्युपगमे च समकालानां सर्वसंविदां तदुत्तरकालसंविदारम्भकतया सन्ततिभेदासिद्धिप्रसङ्गादिति भावः । अनादिसंवृत्तिसंभूतानां नीलपीताद्यनन्तवासनानामेकैकक्षणात्मकत्वमाह । धीसन्तान इति । उक्तपरम्पराफलितमनिष्टमाह । तदिति । निश्शेषध्वंसिनी—निरन्वयविनाशिनी, एतेन भविष्यत्सर्वविकल्पसामग्रीभूतबुद्धिक्षणध्वंसकाले काचिदेव कल्पना जायते नान्येति नियमो न स्यादिति व्यज्यते अखिलं—तत्सन्तानावासंसारं भविष्यत्सर्वम् एवं सर्वकल्पनायौगपद्यात् उत्तरक्षणवत्पूर्वक्षणेष्वपि तुल्यन्यायतया तदुत्तरलोपे नानादिस्संसारप्रवाहः स्यादिति माध्यमिकमध्यमध्यास्वेति ॥ २६ ॥

इति योगाचारोक्तवासनाभङ्गः ।

अथ बाह्यार्थवादिबौद्धकल्पिताः पक्षाः प्रतिक्षिप्यन्ते तत्र सौत्रान्तिकाः प्राहुः विज्ञानं तावत्स्वप्रकाशप्रत्यक्षसिद्धं तच्च क्षणिकं पूर्वापरकालवर्तितया प्रकाशाभावात्, न चेदमर्थशून्यं नीलादिज्ञानसन्ततौ पीतादिज्ञानसन्तत्यनुत्पादप्रसङ्गात् स चार्थो न प्रत्यक्षः अधिपतिसंप्रयुक्तस्य क्षणस्य निरुद्धत्वात्, असंप्रयुक्तस्योत्तरक्षणस्य प्रत्य-

Digitized by Google

सत्वेऽतिप्रसङ्गात्, अतो बुद्धिजनकस्यार्थक्षणस्य स्वाकारसमर्पक-हेतुत्वमेव ग्राह्यत्वमित्युपचर्य्यते तदुक्तम् ।

भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥ इति,

अतः स्वहेतुभूतार्थसमर्पिताकारो बुद्ध्यात्मैव वस्तुतः प्रत्यक्ष इति तदिदमनुभाष्य प्रतिभाषते । स्वाकार इति ॥

मू० स्वाकारोऽर्थैः स्वबुद्धौ निहित इति च
नाधारहानाद्ययोगात्स्वच्छे च्छाया परस्मिन्न
च भवति न च स्यादसौ रूपशून्ये । साम्या-
सत्त्वाद्ययोगाद्विषयविषयिणोर्नापि भेदाग्र-
हः स्यान्नैका*कारोपरक्तं द्वयमपि स च ते
ग्राह्यता नातिरिक्तः ॥ २७ ॥

टी० विकल्पितदूष्यकोटिभञ्जकहेतुमाह । आधारहाना-द्ययोगादिति । अयमाशयः योऽयमर्थेन बुद्धावाकारस्समर्प्यते स किमर्थस्य स्वरूपमुत धर्मः उभयातिरिक्तो वा, नाद्यः क्षणध्वंसिनः क्षणान्तरवर्तिसंक्रमणायोगात् अन्यथा स्थिरवादप्रसङ्गात् अर्थस्य च साक्षात्प्रत्यक्षत्वापत्तेरनुमेयपरिशेषाभावाच्च । न द्वितीयः धर्मधर्मि-भावानभ्युपगमात्, तदभ्युपगन्तॄणामपि धर्मस्य धर्मिप्रहाणेनान्यत्र प्रवेशादृष्टेः क्षणिकत्वस्थिरत्वविकल्पेन दत्तोत्तरत्वाच्च । अत एव न तृतीयः अर्थस्य तेन संबन्धाभावात् असंबद्धस्य चान्यत्र सञ्चारयितु-मशक्यत्वात् अन्यथा ऽतिप्रसङ्गादिति विष्वपि च पक्षेषु परैष्टप्रत्यक्षा-नुमानयोरप्रवृत्तिरुद्घाटनीया । अथानवहितहृदयं गत्यन्तरं शङ्कते ।

* नैकाकारेण रक्तमिति पा० ।

स्वच्छ इति । यथाऽत्यासन्नमपि मुखं स्वयमगृह्यमाणं दर्पणसन्निधानेन तत्र समर्पितच्छायं तत्रत्यमेव गृह्यते तथाऽर्थाकारोऽपि स्वच्छबुद्धिप्रतिफलितच्छायात्मा गृह्यत इत्यर्थ: । एतदपि दूषयति । न चेति । न हि नष्टस्य क्वचिच्छायापत्तिर्दृष्टा न च वर्तमानस्यापि वर्तिष्यमाणे, अन्यमपि दृष्टविरोधमाह । न चेति । रूपवत्येव हि पदार्थे रूपवतामेव प्रतिबिम्बसिद्धि: न च विज्ञानं रूपवत्, नाप्यर्थ: स्पर्शगन्धादिग्रहणे रूपप्रसङ्गाभावात् नीलादौ रूपवत्त्वानभ्युपगमात् तत्कल्पनेऽपि प्रत्यक्षत्वानभ्युपगमेन प्रतिबिम्बप्रसङ्गाभावात्, अप्रत्यक्षस्याकाशस्य जलादिषु प्रतिबिम्बितत्वं दृश्यत इति चेन्न आकाशप्रत्यक्षत्वपक्षे तदभावात्, पक्षान्तरे तु यत्तन्मलिनताध्यासविशिष्टतया किञ्चिच्चाक्षुषं सर्वलोकसिद्धं तस्यैव जलादौ प्रतिबिम्बितत्वम् अतो नार्थस्य बुद्धौ कथञ्चिदपि बिम्बितत्वसिद्धिरिति । स्यादेतत् न मुख्यच्छायापत्तिं ब्रूम: किन्त्वध्यासमात्रम् आरोपितार्थाकारं विज्ञानमनुभूयत इति तद्दूषयति-त्तरम् अर्थस्य तदाकारस्य च ग्रहणाभावे कथं बुद्धौ तदध्यास: ग्रहणे च कथमर्थो न प्रत्यक्ष: अर्थग्रहणाभावेऽपि तदाकारो वासनावशादन्यत्राध्यस्यत इति चेन्न अप्रत्यक्षमेव ह्यर्थं समर्थयमानस्य तद्वासनैव निर्मूला सा कथमध्यासं प्रसुवीत अर्थनिरपेक्षवासनाप्रवाहवैचित्रीसंभवे योगाचारयूथात् किन्निर्गतोऽसि । किञ्च यथानुमानादावर्थस्य न बुद्धिहेतुत्वं तत्र स्वाकारसमर्पणक्षमहेतुत्वायोगात् ग्राह्यत्वाभाव: प्रसज्येत । अथ स्यात् यथा माषराशौ मषी यथा वा नीलोत्पलवने कादम्बस्तद्वदाग्रहात्तदपृथग्भावेनाभिमन्यते व्यवह्रियते च एवन्तत्तदर्थसन्निहितविज्ञानं तथेति इदमपि दत्तोत्तरमेव गृह्यमाणे हि माषराश्यादौ मषीप्रभृतेस्तत्सारूप्ये तत्संसर्गे च सति तथाऽभिमानव्यवहारौ स्याताम्, इह तु न तथा अर्थस्याप्रत्यक्षत्वात् ज्ञानस्य च तत्सारूप्यसंसर्गयोरयोगात् तत एव भेदा-

ग्रहस्याप्यसंभवादिति अत एव वैभाषिकमुखेनापि नेतद्वाच्यम् । नन्वस्ति तावत्कश्चिन्नीलादिराकारः दृष्टस्य दुरपलपत्वात् स त्वर्थे सन्नपि परमाणुगतसत्तावन्न गृह्यते, बुद्धिगतस्तु स्थूलगतसत्तावदुपलभ्यते अत एकस्याकारस्योभयोपरञ्जकत्वादर्थाकारो बुद्धौ गृह्यत इत्यत्राह । नैकेति । अयं खल्वाकारः प्रागुक्तैरर्थस्वरूपधर्मादिविकल्पैरभेदैरपास्तः । किञ्चानेकनिष्ठोऽयमेकाकारः सत्यः, असत्यो वा नाद्यः जात्यादिखण्डनायाप्रदृष्टाप्रसङ्गात् पूर्वापरवर्तिन एकत्वे स्थिरत्वादप्रसङ्गाच्च । न द्वितीयः अवगमाधीनसत्ताकस्यासत्यस्य कथमगृह्यमाणतयाऽर्थेऽवस्थानं तद्ग्रहे च तत्कल्पनाधिष्ठानस्यार्थस्यापि प्रत्यक्षत्वमकामेनापि स्वीकार्यम् । अपि च नीलाद्याकारस्यार्थातिरिक्तस्य स्वीकारेऽपसिद्धान्तः, अनतिरिक्ते तु न बुद्धौ तत्संभवः संभवे च बुद्ध्यारूढस्यार्थस्य प्रत्यक्षत्वं सुदुस्त्यजमित्यभिप्रायेणाह । स चेति ॥ २७ ॥

इति ज्ञानेऽर्थाकारसमर्पणादिमतभङ्गः ।

अन्ये त्वाहुः बुद्धिरर्थश्च वस्तुतो निराकारौ तथाऽपि चूर्णहरिद्रायोगजरागन्यायेन सितरक्तादिराकारस्तदोत्पन्नो गृह्यत इति तदनुभाषते । संसर्गादिति ।

मू० संसर्गाद्बोध्यबुद्ध्योरभिदधति सिताद्याकृतेस्सिद्धिमन्ये सादेश्यात् तन्मतेऽसौ न तु भवति तथा कालजोऽतिप्रसक्तः । व्यंशे नैवाभिमुख्यं विषयविषयितात्राकृतेः प्रागसिद्धा क्वास्यास्संसृष्टनाशे जनिरिति कुसृतिः पूगताम्बूलनीतिः ॥ २८ ॥

टी० तत्र संसर्गव्यवस्थापकविकल्पभेदानभिसन्धाय देशैक्यात् संसर्गं तावन्निराकरोति । सादेश्यादिति । यथा चूर्णहरिद्रयो-

Digitized by Google

रत्यासन्नदेशाधिष्ठानतया मिथ:संयोगो निरन्तरत्वं वा न तथाऽत्र विप्रकृष्टबोद्धृग्रहणात् कालान्तरवर्तिनामपि कयाचिद् बुद्ध्या गृह्यमाणत्वात् तत्र संसर्गाभावादेव तज्जन्याकारायोगात् स्वाकारधीसिद्धश्च वर्तमानधीसमानत्वात् न च त्वन्मते देशो नाम कश्चिदन्य: येन सादेश्यसंभव: । अथ मन्यसे यत्र कालासत्तिस्तत्रैव सांसर्गिक आकार: अन्यत्र तु वासनात एवेति तत्राह । तथेति । कालजो हि ग्राह्यग्रहणयोर्निरन्तरपूर्वापरत्वमात्रेण वा समानकालतया वा उभयथाप्यतिप्रसक्तिरनिवार्या स्वभावनियमादनतिप्रसक्तिरिति चेत् तर्हि किमर्थसंसर्गेण विज्ञानवादिनीत्या बुद्धेरेव स्वभावनियमोपपत्ते: । नन्वयस्कान्ताभिमुख्यादयस एव विकृति: चन्द्रसूर्याभिमुख्यात्तत्कान्तयोरेव एवं कुतश्चिदाभिमुख्यविशेषात् क्वचिदाकारविशेषोत्पत्ति: स्यात् तत्राह । व्यंश इति । सांशयोरेव पदार्थयोराभिमुख्यसंगति: इह तु द्वयोरपि निरंशत्वाभ्युपगमान्न तत्संभव इत्यर्थ: भिन्नकालयोश्च तदसंभव: स्पष्ट: । स्यादेतत् समकालयोर्भिन्नकालयोश्च बोध्यबुद्ध्योर्विषयविषयिभाव: सर्वाभिमन्य:, तत एव संसर्गादाकार उत्पद्येतेति तदपि दूषयति । विषयेति । किमत्र निराकारे वस्तुनि विषयीकृते पश्चादाकार उत्पद्यते साकारे वा, नाद्य: अर्थस्य प्रत्यक्षत्वानभ्युपगमात् आकारोत्पत्तिकाले बोध्यबुद्ध्योर्विनष्टतया निराधाराकारोत्पत्तिग्रहणयो: प्रसङ्गात्, आकारस्य च द्विष्ठैकनिष्ठत्वादिविकल्पदो:स्यात् । न द्वितीय: विषयीकारादाकारसिद्धि: साकारस्य विषयीकार इति मिथस्संश्रयात् । दूषणान्तरमाह । क्वास्या इति । अस्या:—आकृते: क्षणिकवस्तुद्वयसंसर्गजन्यायास्तदुभयनाशकाले तत्र वाऽन्यत्र वा स्थित्ययोगात् निराधारत्वे च अर्थादेराकार इति ग्रहणायोगाच्च संसर्गजाकारनीति; प्रमाणाभावात् प्रमेयविरोधाच्च कुत्सित-

Digitized by Google

गतिरित्यर्थः । अयञ्चात्र भावः ज्ञानार्थसंसर्गादुत्पत्स्यमान आकारो न प्रत्यक्षज्ञानेन गृह्येत ज्ञानकाले ग्राह्याकाराभावात् आकारोत्पत्तिकाले ज्ञानस्य विनष्टत्वात् लोकदृष्ट्या चात्र निदर्शनेन संभावना स्थाप्यते लोकश्च स्पर्शवद्रूपवद्द्रव्यसंसर्गाद्रक्तिमाद्युत्पत्तिं पश्यति तत्र यद्यप्यचाक्षुषेऽर्थे क्वचिद्रूपस्पर्शविकल्पास्पदत्वं तथाऽपि न बुद्धिस्तथा अतस्तयोरुभयत्र एकत्र वा न संसर्गहेतुको नीलाद्याकार उत्पद्येत एकस्य च द्विष्ठत्वे स्वमतलाभः विषयमात्रनिष्ठत्वे तदाकारविषयप्रत्यक्षतापत्तिः ज्ञानमात्रनिष्ठत्वेऽर्थनैरपेक्ष्यप्रसङ्गश्चोक्त इति ॥ २८ ॥

इति संसर्गजाकारमतभङ्गः ।

अथ केश्चिद् बाह्यार्थवादिभिस्सौगतैरुक्तां निरधिष्ठानख्यातिमन्वाख्याति । भ्रान्ताविति ।

मू० भ्रान्तौ रूप्यादिरर्थो विलसति निरधिष्ठान इत्याहुरेके तन्नाधिष्ठानदृष्टेरनियतिविरहादन्यथातिप्रसङ्गात् । निष्ठ्यूतस्वाक्षिदोषप्रभृतिषु च भवेत् केशपुञ्जादिबुद्धिः किञ्चैषाप्यन्यथा धीर्यदनिदमिदमित्यत्र भातं ब्रवीषि ॥ २९ ॥

टी० नात्र पुरोवर्तिनि रजताध्यासः किन्तु संस्कारोपनीतं प्रमुषिततत्तदंशं रजतं दोषवशादिदमिति भाति अन्यथा कथन्तैमिरिककेशस्तबकटिट्टिभादिप्रत्ययः, न हि तत्र किञ्चिदधिष्ठानं भ्रान्तिदशायां बाधदशायां वा भाति, न चेयं स्मृतिरेव अननुभूतेदन्त्वग्रहणात् प्रागनुभूतमेवेदन्त्वं भातीत्ययुक्तं तद्भाने तत्कारप्रसङ्गात् । अन्यथा कथं भ्रान्ता सविहतिरिति तदेतत् प्रतीतिविरोधादिविवक्षया प्रतिषेधति । तन्नेति । अबाधितलोकप्रतीतिविरोधात् निरधिष्ठानत्वं

Digitized by Google

दुर्वचमित्यभिप्रायेणाह । अधिष्ठानदृष्टेरिति । पुरोवर्तिद्रव्यमङ्गुल्या निर्दिशन्निदं रजतमिति व्यपदिशति उपादत्ते च स्वयं तद्वाक्यश्रावी च तद्रजतत्वेन वदति यदि शुक्लभास्वरशुक्तिशकलमिदन्तया न प्रतीतं कथं रजतार्थी तदेवोपादत्ते कथञ्च नेदं रजतमिति बाधकोदये जहातीत्यभिप्रायेणाह । अनियतिविरहादिति । अन्यथा प्रतीतिप्रवृत्त्योरनियतिरेव स्यादित्याह । अन्यथेति । न हि निमीलिताक्षो रजतं स्मरन् कदाचिद्रजतमिदमिति भ्राम्यति, न च रजतस्मृतिकालदृष्टमङ्गुलीयकार्थी संगृह्णातीति भावः । तैमिरिकभ्रान्तिषु साधिष्ठानत्वं साधयति । निष्ठ्यूतेति । प्रभृतिशब्देन गन्धर्वनगरादिभ्रमेषु मेघादेरधिष्ठानस्य संग्रहः । एवञ्च वर्ण्यतामन्यथाख्यातिरनतिक्रमणीयेत्याह । किञ्चेति । इदमर्थस्य रजततया मानमसन्निहितस्य रजतपदार्थस्येदन्तया भानमिति को विशेषः, अस्मत्पक्षे तु प्रतीतिप्रवृत्तिबाधानामुपपत्तिरिति विशेषः ॥ २९ ॥

इति बाह्यार्थवादिसौगतोक्तनिरधिष्ठानख्यातिभङ्गः ।

अथ केचिदेवमूचुः ख्यात्यन्तरवादिनां तावदन्ततोऽख्यातिपक्षेऽन्यथाख्यातिपक्षे वा विश्रमः, तत्र च ख्यात्यपन्हवदोषमसत्ख्यातिप्रसङ्गञ्च परिजिहीर्षमाणैरन्यासक्तदृष्टिन्यायेन निर्विषयैव ख्यातिरङ्गीकार्य्येति तदनुभाषते । ख्यातिमिति ।

मू० ख्यातिं भ्रान्तिस्वरूपां जगदुरविषयां केऽपि तद्वीविरुद्धं ख्यातिः कस्यापि पुंसः क्वचिदपि विषये सिद्धिरूपा हि सिद्धा । अत्रार्थासत्त्वतः स्यादियमविषयता सर्वथा सत्त्वतो वा तादृक्त्वेऽप्यन्यथाख्यात्यसदधिगमयोरेव पर्य्याय एषः ॥ ३० ॥

Digitized by Google

टी० तत्र प्रतीतिप्रवृत्तिबाधभ्रमत्वानामनुपपत्तिरित्यभिप्राये-णाह। तद्धीविरुद्धमिति। निर्विषयत्वे घटादिवत् ख्यातित्वं न स्यादि-ति प्रसङ्गमभिसन्धायाह। ख्यातिरिति। अयं भावः यद्यप्यात्मस्वरूप-ज्ञानमिति वाद्यन्तसिद्धान्तः तथाऽपि तस्य स्वप्रकाशरूपतामात्रेण ज्ञानत्वं श्रुतिपरतन्त्रैरङ्गीक्रियते एवं चेष्यतां धर्मभूतज्ञानस्य विष-यप्रकाशरहितावस्थाऽपि न त्विह तथा वक्तुं शक्यं भ्रान्तिर्निर्विषये-त्यागमाभावात् प्रत्युत सविषयत्वमेव तस्यास्सर्वेषु शास्त्रेषु सुव्यक्तमु-क्तम्। हि:-प्रसिद्धौ, तदिह सविषयत्वेऽवश्यं भाविनि तदविरोधाय भ्रान्तिविषयस्यार्थस्याध्यासाधिष्ठानेष्वविद्यमानतया सर्वेषामभावात्तु भ्रान्तेर्निर्विषयत्वं वक्तव्यं तथा सत्यन्यथाख्यातिरलीकख्यातिर्वा स्या-दिति न निर्विषयख्यातिसिद्धिरित्युत्तरार्द्धेनाह। अत्रेति। एषः-भ्रा-न्तिशब्दार्थो बोधः, स च निर्विषयोऽपि सविषयत्वेन भातश्चेदन्यथा-ख्यातिस्वीकारः, निर्विषयतया भाने तु प्रवृत्त्यादिहेतुत्वं न स्यादिति भावः ॥ ३० ॥

इति निर्विषयख्यातिभङ्गः।

प्रमाणाप्रमाणविभागप्रसङ्गात् ख्यातौ वादिभेदोक्तौ विकल्पाः प्रत्युक्ताः। अथ श्रुत्याद्यभिमतं बुद्धेश्चातुर्विध्यमाह। प्रत्यक्षादीति।

मू० प्रत्यक्षादित्रयञ्च स्मृतिरिति च मतिः श्रुत्य-
भीष्टा चतुर्द्धा प्रत्यक्षन्तत्र साक्षात्प्रतिपद-
नुमितिर्व्याप्यतो व्यापके धीः। शाब्दी वा-
चार्यबुद्धिः स्मृतिरपि कथिता संस्क्रियामा-
त्रजा सा येषामिष्टाऽन्यथाधीः पृथगभिद-
धिरे तैरिहान्येऽपि भेदाः ॥ ३१ ॥

Digitized by Google

टी० श्रूयते हि (श्रुतिः प्रत्यक्षमैतिह्यमनुमानञ्चतुष्टयमिति) ऐतिह्यमिह शाब्दज्ञानं वैचित्यात् आह च भगवान्मनुः ।

प्रत्यक्षमनुमानञ्च शास्त्रं च विविधागमम् ।

त्रयं सुविदितं कार्य्यं धर्मशुद्धिमभीप्सतेति ॥

तज्जन्यायाः स्मृतेस्तदनुविधानादधिकार्थासिद्धेश्च पृथगनुक्तिः यथोद्दिष्टं पादद्वयेन लक्ष्यते अथोक्तेषु चतुर्षु प्रत्यक्षमिह साक्षात्प्रतिपत्तृबुद्धिः तस्यास्साक्षात्त्वं नाम लैङ्गिकत्वशाब्दत्वस्मृतित्वरहितज्ञानत्वं तेन मुक्तादीनां धर्मभूतज्ञानेषु धर्मिज्ञाने चाऽनुस्मृतिः वैशद्यमात्रं साक्षात्त्वमिति त्वव्याप्त्यतिव्याप्त्यञ्च सुषुप्त्यादावविशदात्मस्वरूपभानस्य परोक्षज्ञानेष्वपि प्रकाशांशवैशद्यस्य च भावितत्वात् वैशद्यविशेषः साक्षात्त्वमिति तु दुर्विवेचनम् । ननु लैङ्गिकादिज्ञानानां स्वात्मनि साक्षात्त्वमस्ति वा न वा आद्ये लिङ्गादिजन्ये कथन्तदभावलक्षणं साक्षात्त्वं न च तत्र तज्जन्यत्वं नास्ति अजन्यत्वेनानादित्वप्रसङ्गात् न चैकस्य निरंशस्य कैश्चांशैर् आगन्तुकत्वम् अंशान्तरतश्चानादित्वमिति शक्ष्येयम् । न द्वितीयः प्रत्यक्षज्ञाने स्वात्मनि प्रत्यक्षत्वाभावप्रसङ्गात् न ह्यक्षजन्ये लिङ्गादिजन्ये वा ज्ञाने स्वात्मनि कश्चिद्विशेषो दृश्यत इति अत्र ब्रूमः । ये त्वाहुः ।

सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा ।

साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन सम्मतेति ॥

तान् प्रत्ययं पर्य्यनुयोगश्शोभते । ये तु लैङ्गिकादिज्ञानेषु स्वात्मस्वविषयविभागानादरेण ज्ञातकरणसंस्कारमात्रयोरन्यतरजन्यज्ञानत्वेन परोक्षत्वं निर्द्धारयन्ति न तान् प्रत्येषा ।

अन्ये तु भ्रमसंवित्तौ सत्यासत्यार्थते यथा ।

प्रत्यक्षत्वपरोक्षत्वे तथैकस्याहुरंशतः ॥

Digitized by Google

अनिर्द्धारितसाक्षात्त्वैरेष वक्तुं न शक्यते ।
बुद्धावेकत्र साक्षात्त्वं परोक्षत्वाविरोधतः ॥
परोक्षेतरबोधत्वं साक्षात्त्वमिति चेन्मतम् ।
स्वस्य स्वान्यत्ववैघट्यात् साक्षात्त्वाभाव इष्यताम् ॥
अनादिबुद्धिसाक्षात्त्वं कुतस्त्यमिति चेन्न तत् ।
कारणेनानपेक्षत्वात् प्रमाणं पुनरागमः ॥

श्रूयते हि कर्माध्यक्षस्सर्वभूताधिवासस्साक्षी चेता केवलो निर्गुणश्चेति स्मर्यते च नैव किञ्चित् परोक्षं ते इत्यादि, पश्यत्यचक्षुरित्यादिभिरपि सर्वदर्शित्वं सिद्धमिति । अनुमितिरिति लक्ष्यपदं व्याप्यतो व्यापके धीरिति लक्षणपदं व्याप्यतया प्रतिसन्धीयमानात्तद्व्यापकतया सामान्यतः प्रसिद्धस्यार्थस्य विशेषतोऽवगतिरनुमितिरित्यर्थः शाब्दीत्यत्र धीरिति योज्यं वाचा वाक्येन अर्थधीः विशिष्टार्थधीः स्मृतिः लक्ष्यम् । ननु स्मृतिलक्षणे संस्कारमात्रजन्यत्वमसंभवि एकहेतुजन्यस्य कस्याप्यभावात् अत्र तु तथाऽभ्युपगमे संस्कारोद्बोधकादिभिरपि नैरपेक्ष्यप्रसङ्गात्, न चैवमस्त्विति युक्तमतिप्रसङ्गात् उत्पन्नस्थिरसंस्कारस्य च प्रत्ययान्तराव्यवहितस्मृतिसन्ततिप्रसङ्गात् सुषुप्त्याद्यभावप्रसङ्गाच्चेति मैवं न ह्यत्र साधारणकारणानां सहकारिणाञ्च व्यवच्छित्त्यै मात्रशब्दः किन्तु पृथग्बोधजननसमर्थतत्तदसाधारणकारणानपेक्षत्वार्थं मनसोऽपि ज्ञानोत्पत्तौ साधारणकारणत्वात् न दोष इति मात्र शब्दः प्रत्यभिज्ञाव्यवच्छेदार्थः । ननु सन्ति संशयादयोऽपि मतिभेदाः किं ते न विभज्यन्त इत्यत्राह । येषामिति । अयं भावः यथार्थं सर्वविज्ञानमिति पक्षेण धीचातुर्विध्यमुक्तम् अन्यथाख्यातिपक्षे तु संशयादिभेदाश्च वक्तव्याः तद्व्यवच्छेदाय प्रत्यक्षादिलक्षणे प्रमितिशब्दः प्रयोक्तव्य इति ।

इति प्रत्यक्षादिप्रमाणविभागलक्षणे ॥ ३१ ॥

Digitized by Google

प्रमाणज्येष्ठतया प्रथमोद्दिष्टलक्षितस्य प्रत्यक्षस्य निर्विकल्पकसविकल्पकविभागमात्रं सर्वानुमतं सिद्धं कृत्वा निर्विकल्पकमविशिष्टविषयमिति परोक्तं निर्मूलयति । ईदृक्त्वेति ।

मू० ईदृक्त्वात्यन्तशून्ये न हि मिषति मतिर्नापि युक्तिस्तथात्वे सामग्रीभेदवेद्ये पृथगवगतिरस्त्वत्र नैषाऽन्यथात्वात् । धीत्वादेर्वा विशिष्टं प्रथयति जनिता बुद्धिराद्याक्षयोगैस्तस्मात् संस्कारशून्येन्द्रियजनितमतिर्निर्विकल्पेति वाच्या ॥ ३२ ॥

टी० अयं भावः अप्रत्यक्षा बुद्धिरिति वादं परिहरिष्यामः प्रत्यक्षत्वपक्षे तु नीलपीतादिवत्तत्स्वरूपमपि यथोल्लेखं निर्द्धार्यं तत्र न तावत्प्रथमाक्षसन्निपातसमनन्तरमविशिष्टविषया मे बुद्धिर्जातेति पामरः पण्डितो वा सावधानो ऽनवहितोवा कश्चिद्विजानन् व्याहरन् वा दृश्यते, न च निर्विकल्पकान्तरेण तद्ग्रहणं परैरभ्युपगम्यते एवं सविकल्पकेनापि, तद्धि निर्विकल्पकविषयं विशिष्टं गृह्णाति न तु निर्विकल्पकम् । यत्तु पठ्यते ।

अस्ति ह्यालोचनज्ञानं प्रथमं निर्विकल्पकम् ।
बालमूकादिविज्ञानसदृशं शुद्धवस्तुजम् ॥ इति ॥

तदपि डिम्भविप्रलम्भनं निदर्शनञ्च विशिष्टविषयमेव बालमूकपश्वादीनां जातिगुणादिविशिष्टवस्तुग्रहणाभावे तत्तन्नियतप्रवृत्त्यादिभङ्गप्रसङ्गात् शुद्धवस्तुजत्वञ्च वस्तुजत्वमात्रं वा असहितवस्तुजत्वं वा अनारोपितवस्तुजत्वं वा निर्विशेषवस्तुजत्वं वा, नाद्यः सविकल्पकसाधारण्यात्, न द्वितीयः अनेकव्यक्तिविषयैकनिर्विकल्पकसंभवात्

Digitized by Google

जातिगुणादीनाञ्च धर्मिणा सह मिथस्संबन्धरहितस्य ग्रहणस्य कैश्चि-
न्निर्वाहात्, न तृतीयः सविकल्पकसाधारण्यादेव न आरोपितवस्तु-
जत्वं सविकल्पकस्य कैश्चिदुपन्यस्तं यतस्तद्व्यवच्छेदार्थं शुद्धवस्तुज-
त्वोक्तिश्शोभेत, न चतुर्थः अपसिद्धान्तापातात् न हि निर्विकल्पक-
गृहीतं वस्तु निर्विशेषमिति नस्सिद्धान्तः तदात्मकजात्यादिविशेषाभ्यु-
पगमात् अन्तर्हितसुगतमतानभ्युपगमाच्च धर्माजन्यत्वे सति धर्मिज-
न्यत्वं विवक्षितमिति चेन्न धर्मधर्मितादात्म्यवादिनां भवतान्तथोक्तेः
पांसुविक्षेपप्रायत्वादित्यास्तामेतत्, माभूदुपलम्भतस्तादृशधीसिद्धिर्यु-
क्तितस्तु स्यादित्यत्राह । नापीति । न ह्याद्याविशिष्टग्रहणे काचि-
द्युक्तिः तदभावे वा काचिदयुक्तिरिति भावः । नन्वस्ति युक्तिस्सर्वत्र
हि विशिष्टप्रत्ययस्य विशेषणविशेष्यधीपूर्वकत्वं दृष्टम् अतः प्रथमस-
विकल्पकमपि तथा अन्यत्र विशिष्टप्रत्ययस्य विशिष्टप्रत्ययपूर्वकत्वनि-
यमात् अनवस्थाप्रसङ्गः, अतोऽवसीयते प्रथमाक्षसन्निपातात् प्रत्येक-
धीरिति । तत्राह । सामग्रीति । अयं भावः यत्र विशिष्टप्रत्ययस्य पृथग्वि-
शेषणविशेष्यग्रहणपूर्वकत्वं तत्र भिन्नसामग्रीवेद्यत्वनिबन्धनस्तथाभावः
सुरभिचन्दनत्वयोरन्योन्यनिरपेक्षभिन्नेन्द्रियग्राह्यत्वात् तदपेक्षस्तु प-
श्चात् कुतश्चित् सुरभि चन्दनमिति विशिष्टप्रत्ययः स तु चाक्षुषो मानस
आनुमानिको वेत्यवसरे चिन्त्यम् । नन्वेकेन्द्रियवेद्येष्वपि दण्डदेवदत्ता-
दिषु कदाचिद्विशिष्टप्रत्ययस्य पृथक्प्रत्ययपूर्वकत्वं दृष्टं सत्यं तत्रापि सा-
मग्रीप्रवाहवशात् प्रथमं प्रत्येकग्रहणसामग्रीप्रवृत्तिः अनन्तरं विशिष्टग्रह-
णमपि न पृथग्ग्रहणकारणकं यत्र तु विशेषणविशेष्यतत्संबन्धानां युग-
पद्योग्यैकेन्द्रियसंबद्धानां विशिष्टप्रत्ययः तत्र न पृथग्ग्रहणपूर्वकत्व-
मस्तीति दृष्टम् अत एव तथाप्यनुमीयत इति चेन्न भिन्नसामग्रीवे-
द्यत्वोपाधेरनिस्तारात्, विशिष्टप्रत्ययत्वज्ञानादिविशिष्टप्रत्यये व्यभि-

Digitized by Google

चरितं न चाविशिष्टविषयमेवेश्वरज्ञानं तेन कर्तृत्वानिर्वाहात् आदिमत्त्वे सतीति विशेष्टव्यमिति चेत् तत्कस्य हेतोरनादेरनपेक्षत्वादिति चेन्न आदिमतोऽप्येकसामग्रीवेद्यविषयस्य विशिष्टोल्लेखे पृथग्ग्रहणानेरपेक्ष्यात् तदिदमभिप्रेत्याह । अत्र नेष्टेति । एकसामग्रीवेद्यविषये विशिष्टप्रत्यये कारणभूता पृथगवगतिर्नास्तीत्यर्थः । तत्र भिन्नसामग्रीवेद्यविषयत्वासंभवं हेतुमाह । अन्यथात्वादिति । प्रतिप्रयोगमप्याह । धीत्वादेरिति । आदिशब्देन धीशब्दवाच्यत्वधीलक्षणयोगित्वयोर्ग्रहणं प्रथमाक्षसन्निपातजनिता बुद्धिर्विशिष्टविषया धीत्वात् संप्रतिपन्नवदिति, आत्मस्वरूपप्रत्ययस्याहन्त्वादिविशिष्टप्रकाशात्मेत्यङ्गीकर्तुः किन्तर्हि निर्विकल्पकस्योदाहरणमिति चेत् प्रथमाक्षसंप्रयोगजमेव कथन्तस्य निर्विकल्पकशब्दवाच्यत्वं विवक्षितविकल्पाभावमात्रात् अल्पधने दरिद्रव्यवहारवत् । ननु तत्तद्विकल्पाभावतारतम्याद्व्यवहारानियतिः स्यात् न च व्यवस्थापकं लक्षणं दृश्यते तत्राह । तस्मादिति । अविशिष्टविषयं प्रत्यक्षं निर्विकल्पकमिति परोक्तासंभवादित्यर्थः संस्कारनिरपेक्षेन्द्रियजन्या मतिर्निर्विकल्पिकेति लक्षणसिद्धेर्नोक्तदोष इति भावः । एतेन प्रत्यभिज्ञायां सविकल्पकत्वमेवेति अर्थादुक्तं भवति । ननु भाष्ये कथन्निर्विकल्पकमेकजातीयेषु प्रथमपिण्डग्रहणं द्वितीयादिपिण्डग्रहणं सविकल्पकमिति विभज्यते इत्थं लक्षणोन्नयनार्थमुदाहरणप्रदर्शनपरत्वादिति । नन्विह विशिष्टविषयत्वसाधनम् अविशिष्टविषयव्यवच्छेदाय तस्याश्च सिद्धासिद्ध्योस्तद्व्यवच्छेदो दुश्शकः मैवं सर्वत्र सिद्धौ व्यवच्छेदावश्यंभावाभावात् प्रसिद्धः खलु केवलान्वयी तादृशस्तु साध्यं तादृशहेतुसाध्यानभ्युपगन्तॄणामपि तत्स्वरूपं सिद्धं न च तद्विधिर्नास्ति सति च तस्मिन्नान्यव्यवच्छित्तिरसंभवात् अत्र तु विशिष्टविषयत्वं सवि-

Digitized by Google

कल्पकादौ दृष्टं तदभावो घटादौ तन्निषेधे च न सिद्धासिद्धिविरोध इति । एतेन निर्विकल्पकमप्रमाणम् अनवधारणात्मकत्वादिति लोकायतोक्तमपि लूनमूलं हेत्वसिद्धेरिति ॥ ३२ ॥

इत्यविशिष्टविषयनिर्विकल्पकभङ्गः ।

सौगतास्तु निर्विकल्पकमेव प्रत्यक्षम् । अर्थजत्वादर्थविषयत्वाच्च विकल्पस्तूभयरहितः अतो न प्रत्यक्षमिति तान् प्रत्याह । लिङ्गादीति ।

मू० लिङ्गाद्यव्यापृताक्षान्वयवति विषये ऽक्षार्थजन्यो विकल्पस्संस्कारस्त्विन्द्रियाणामिह सह कुरुतां तावता न स्मृतित्वम् । न स्यात्तस्यान्यथात्वं बहुविहतिहतैः कल्पनात्वादिलिङ्गैः स्याद्वा नैकान्त्यमेषामनियतिमविसंवादिबाधश्च सूते ॥ ३३ ॥

टी० अयमर्थः लिङ्गशब्दबोधनानुपक्षीणेन्द्रियसंप्रयोगानन्तरं यो विशिष्टप्रत्ययो जायते स इन्द्रियार्थसंप्रयोगजन्यः निर्विकल्पकवत्तदन्वयव्यतिरेकानुविधानात् परैरपि प्रत्यक्षानुपलम्भाभ्यां कारणत्वव्यवस्थापनात् अन्यथाऽतिप्रसङ्गात् अत्र च पराभीष्टकारणचतुष्केऽधिपत्यालम्बनयोरन्यथासिद्धत्वात्तदिह निर्विकल्पकवदर्थजत्वमर्थविषयत्वं दुस्त्यजम् । ननु निर्विकल्पकस्य विकल्पहेतुत्वं किं साक्षात् उत संस्कारद्वारा नाद्यः नायनरश्मिप्रवाहे प्रथमचक्षुस्संयोगस्याशुतरविनाशित्वेन सविकल्पकपूर्वक्षणेऽनवस्थानात् संप्रयोगान्तरकाले च क्षणिकस्य निर्विकल्पस्यापक्रान्तेः संप्रयोगनिरपेक्षनिर्विकल्पकजन्यत्वे विकल्पस्यानिन्द्रियजन्यत्वापातात् तत एवार्थजत्वस्या-

Digitized by Google

प्यसिद्धेः, अप्राप्यकारित्वस्य भवद्भिरनङ्गीकाराच्च । नापि द्वितीयः संस्कारजन्यत्वे विकल्पस्य स्मृतित्वप्रसङ्गादिति तत्राह । संस्कार-स्त्विति । इह—सविकल्पके अयं भावः न वयं ज्ञानेऽपि त्वदिष्टं क्षणिकत्वमिच्छामः येन संप्रयोगान्तरकाले अनवस्थाननियमः, तथा-त्वेऽपि संस्कारजन्यत्वमात्रेण न स्मृतित्वापत्तिः प्रत्यभिज्ञान्यायेन सहकारिमात्रत्वात् संस्कारस्य, अन्यथा प्रत्यभिज्ञाऽपि स्मृतिरेव स्यात् अस्त्विति चेन्न अननुभूतविशिष्टग्रहणात्, अन्यथा इन्द्रियसंप्रयोगस्य तथाकारणत्वप्रसङ्गात् भवत्वत्र कारणत्वसहकारित्वयोर्विपर्य्यास इति चेत् कुतोऽयं निर्णयः स इत्युद्देशप्राधान्यादिति चेत् नायं स इति विपरीतप्रत्यभिज्ञायां तदभावात् । त्वत्पक्षेऽपि कुतस्त्यः प्रधानाप्रधा-नविभाग इति चेत् अस्तु यतः कुतश्चिन्माभूद्वा तथाऽपि संस्कारमा-त्रजत्वाभावात् प्रत्यभिज्ञायास्सविकल्पकस्य च स्मृतित्वं दुरुपपादम् । ननु अविसंवादिविज्ञानं प्रमाणम् अविसंवादश्च बाधविरहः स च नास्ति विकल्पस्य स्वारसिकबाधाभावेऽपि नभःस्थलमलिनतादि-ष्विव यौक्तिकबाधात् यो विकल्पस्स विभ्रमोयथा विगीतस्तथा च जात्यादिविकल्प इति न चात्र प्रत्यक्षविरोधादनुमानमेव दुर्बलमिति वाच्यं ज्वालैक्यादिषु प्रसङ्गादिति एतद्दूषयति । न स्यादिति । कल्प-नात्वं विशिष्टग्राहित्वम् आदिशब्देन निर्विकल्पकेतरत्वं संस्कार-जन्यत्वमित्यादि गृह्यते बहुविहतिहतेरिति हेतुगर्भं, सन्ति ह्यत्र बह्व्यो विहतयः तथा हि कल्पनात्वादिहेतुप्रयोगे तत्तत्पक्षदृष्टा-न्तादिविकल्पा पक्षीकृता न वा, न पूर्वः, स्वयमेवाश्रयाद्यसिद्ध्यापा-दनात्, न द्वितीयः पक्षव्यतिरिक्तस्यात्र सपक्षत्वासंभवे विपक्षत्वपरि-शेषात् तथा च तत्र कल्पनात्वादिहेतुवृत्तेरनैकान्त्यमपरिहार्य्यं तदिदमाह । स्याद्वाऽनैकान्त्यमेषामिति । एवं स्वाभिमतक्षणिकत्वा-

Digitized by Google

ह्यनुमानबाध्यादिविकल्पपक्षीकारबहिष्कारयोरुक्तदूषणमनुसन्धेयम् । यत्पुनराहुः ।

विकल्पोऽवस्तुनिर्भासादसंवादादुपप्लवः । इति,
तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः ॥
व्यावृत्तमिव निस्तत्त्वं परीक्षाऽनङ्गभावतः । इति ।

तदप्यसिद्धहेतुकं प्रलोभनमात्रं विकल्पविषयावस्तुत्वे समीचीनयुक्त्यभावात् कूटयुक्तिभिस्तद्बाधे योगाचारमाध्यमिकतर्कैस्त्वदिष्टनिर्विकल्पकविषयनीलादिस्वलक्षणानामपि निरस्ततापत्तेः तदिदमभिप्रेत्याह । अनियतमिति । नन्वर्थक्रियास्थितिमविसंवादं ब्रूमः न च विकल्पविषयाणां जात्यादीनां काचिदर्थक्रियाऽस्ति स्वलक्षणसापेक्षत्वे तस्यैव हेतुत्वोपपत्तेः तन्निरपेक्षत्वे तेषां पृथगेव कदाचित् कस्याश्चिदर्थक्रियायास्साधकत्वप्रसङ्गात्, अतः कल्पनात्वादिहेतुभिरविसंवादबाधः क्रियत इत्यचोद्यानुयोगः, मैवं तत्तत्कार्यापेक्षया नियतपूर्वभावित्वेन प्रत्यक्षानुपलम्भनिश्चितस्वभावानां जात्यादीनां तदर्थक्रियाहेतुत्वस्य दुरपन्हवत्वात् । एतेन समर्थप्रवृत्तिहेतुत्वमविसंवाद इति स्थापनेऽपि विकल्पप्रामाण्यस्य न काचित् क्षतिः, विकल्पद्वारेव हि निर्विकल्पकस्य प्रवृत्तिहेतुत्वं मन्यसे तदविसंवादाच्च वस्तदविसंवादवाचोयुक्तिः । अथ मणिप्रभाविषयमणिविकल्पन्यायेन विकल्पस्य परम्परया निर्विकल्पकविषयार्थप्रतिबन्धात् विवेकाग्रहप्रसूतोऽयं तस्मिन्नविसंवादारोपः, नतु वस्तुतस्तस्य प्रामाण्यमिति तर्ह्यनुमानस्यापि तथैव प्रसक्तिः तदेव वस्तुतस्सौगतरहस्यमिति चेत् प्रलीनं तर्ह्येव प्रवृत्तेरनुमानेः उपयोगविशेषादनुमानस्य पृथग् ग्रहणमिति चेत् तद्रूपतया विकल्पस्यापि तदस्तु न वा द्वयोरपीति निपुणमवसीयतामिति ।

इति सविकल्पकबाधपरिहारः ॥ ३३ ॥

ननु सर्वे विकल्पाश्शब्दानुविद्धा एव दृश्यन्ते शब्दश्च विकल्पविषयमर्थं स्वात्मनैवोपरञ्जयति पीतिमेव शङ्खं पीतश्शङ्ख इति अभ्रान्तो पृथगुपलम्भस्त्वध्यासोपयुक्त एव अतोऽशब्दात्मकस्यार्थस्य शब्दात्मना भानादप्रमितिर्विकल्प इति, अत्र किमिदं कृत्स्नविकल्पापेक्षयोच्यते उत तद्विशेषापेक्षयेति बुद्ध्या विभज्य पूर्वन्तावत्प्रतिक्षिपति । शब्दादिति ।

मू० शब्दात् प्रागर्थसिद्धेः परमपि च तयोरक्षभेदादिबोधाच्छब्दैक्ये वाच्यभेदादपि बहुषु पदेष्वेकवाच्यप्रसिद्धेः । साम्यासत्त्वाद्वयोगाद्युगपदवगतेर्व्यक्तिजात्यादिशब्दैश्शब्दाध्यासो न युक्तः प्रथयति विषयं किन्तु संज्ञा तटस्था ॥ ३४ ॥

टी० अयमभिसन्धिः न हि सर्वो विकल्पः शब्दोपरञ्जनघन एव प्रवर्त्तते पश्वादीनामव्युत्पन्नानाञ्च तदयोगात् व्युत्पन्नानामपि तत्तत्संज्ञाविशेषस्मरणहेतुतया तत्तत्प्रवृत्तिनिमित्तविशिष्टवस्तुग्रहणावश्यम्भावादिति, तेन शब्दप्रतीतेः पूर्वमर्थप्रतीतिरस्तीत्ययमेको हेतुः, हेत्वन्तरमप्याह । परमपीति । विस्मृतशब्दस्य शब्दप्रतीतिमन्तरेण केवलमर्थ एव प्रतीयते तथापि न शब्दप्रतीत्यवश्यम्भावः । किञ्च शब्दः श्रोत्रेन्द्रियेण प्रतीयते अर्थस्तु यथायोगं तत्तदिन्द्रियेण इदञ्च ग्राहकमात्रोपलक्षणम्, अतो ग्राहकप्रमाणवैलक्षण्यनियमादर्थैक्येनैव शब्दग्रहणमसमञ्जसमित्याह । तयोरिति । तथा च कतिपयविकल्पापेक्षयाऽपि शब्दाध्यासो न युक्तः पीतशङ्खादिष्वेकेन्द्रियग्राह्यत्वादन्योन्यसंसर्गाध्यासो युक्त एव अपि च एक एव

Digitized by Google

शब्दो बहूनप्यर्थानभिदधाति शक्तिवैचित्र्यात् तत्र परस्परविरुद्धेष्वर्थेष्वेकस्यैव शब्दस्य ऐक्येन बोधनं न घटत इत्याह । शब्देक्य इति । एवं बहुषु पदेषु परस्परविरुद्धस्वभावेष्वेकस्यैव वाच्यत्वं दृश्यते पर्य्यायशब्देषु । तथाप्यर्थैक्योपलम्भनमनेकेषां शब्दानां न युज्यत इति वदति । बहुष्विति । उपलभ्यते च शब्दानां साम्येऽप्यर्थे वैषम्यमेवमर्थानां साम्येऽपि शब्दवैषम्यं साम्यञ्चैकजात्याद्येकाकारधर्मयोगित्वाद्वेति एवमर्थस्य दूरस्थत्वं शब्दस्य सन्निकृष्टत्वं शब्दस्य दूरस्थत्वमर्थस्य सन्निकृष्टत्वञ्च एवन्तीव्रमन्दादिविशदाविशदादिविविधवैचित्र्ययोगदर्शनान्न शब्दार्थयोरन्योन्याध्यासेन प्रतिपत्तिरित्याह । साम्येति । यद्वा साम्यं शब्दार्थयोः समदेशवर्त्तित्वम् आसत्त्यादिः पूर्वमेव युगपदवगतेः सामानाधिकरण्यवाक्ये परस्परविरुद्धस्वभावैर्जात्यादिशब्दैरेकस्यैवार्थस्य यौगपद्येन प्रतीतेरपि न शब्दाध्यासो युक्तः । एवं व्यधिकरणवाक्येऽपि शब्दार्थसंसर्गयोः पृथग्भावेनैव भानादिति भावार्थः । कथन्तर्हि सविकल्पकज्ञाने संज्ञा स्वोपश्लेषेणार्थं प्रकाशयतीत्याशङ्क्याह । प्रथयतीति । अयमर्थः तटस्थैव संज्ञा विशेषणान्तरवद्वाचकत्वेनैव प्रतीयते न पुनरर्थात्मना अर्थात्मना प्रथने कथं वाचकत्वेन प्रतीतिर्योयुज्यत इति भावः । उक्तञ्च ।

संज्ञा तु स्मर्य्यमाणाऽपि प्रत्यक्षत्वं न बाधते ।
संज्ञिनस्सा तटस्था हि न रूपाच्छादनक्षमा ॥ इति ।

अयमत्र निर्णयः ।

परस्परविरुद्धत्वप्रतिभासानुरोधतः ।
सविकल्पकविज्ञाने शब्दाध्यासो न युज्यते ॥ इति ।

इति शब्दाध्यासभङ्गः ॥ ३४ ॥

Digitized by Google

अथ केचिदाहुः अनुमानेनैव सर्वप्रतीतेश्शब्दानुवेधमुपपादयाम इति तदेतदनुवदति । धीत्वादिति ।

मू० धीत्वाच्छब्दानुविद्धां विमतमतिमुशन्त्यत्र
शाब्दा न सत्तत्तस्यार्थः स्मार्य्यभावात् स्फुरतु
च स कथं बालमूकादिबोधे । सूक्ष्मा वाङ्मा-
त्रकल्प्या न हि समधिगता तादृशी क्वापि
संज्ञा वाचस्सूक्ष्माद्यवस्था कथनमपि विदु-
र्भावनाद्यर्थमाप्ताः ॥ ३५ ॥

टी० अनूदितमर्थम्प्रतिक्षिपति । न सत्तदिति । तस्य हेतुमाह । तस्येति । अयमर्थः परिदृश्यमान एवार्थः शब्दं स्मारयति तस्य कथन्तदात्मना भानमिति बालमूकादिबोधे कालात्ययापदेशमाह । स्फुरतु चेति । सूक्ष्मा पश्यन्ती मध्यमा वैखरीति शब्दविभागात् सूक्ष्मशब्दस्सर्वत्रास्तीति न बालमूकादिबोधे कालात्ययापदेश इत्याशङ्क्य परिहरति । सूक्ष्मेति । अवाचकस्य तादृशावस्थापन्नस्य शब्दस्य प्रतिपत्तिवेलायां प्रसङ्गाभावादित्यर्थः । तदेव विवृणोति । न हीति । वाचकश्शब्द एव वाच विमृश्यत इति भावः । कथं तर्हि सूक्ष्माद्यवस्थाकथनं तेषुतेषु शास्त्रेष्वित्यत्रोत्तरम् । वाच इति । अवस्थाभेदकथनं केवलभावनार्थं न पुनर्वाचकत्वेन अतश्शब्दानुवेधानुमानमसमञ्जसमिति भावः । अनेन ।

न सोऽस्ति प्रत्ययो लोके यश्शब्दानुगमादृते ।
अनुविद्धमिव ज्ञानं सर्वं शब्देन गृह्यते ॥ इति

शब्दानुवेधप्रत्यक्षत्वोदाहरणमपि दत्तोत्तरं तादृशोपलम्भाभावादेव ॥ ३५ ॥

इति सर्वप्रत्ययानां संज्ञानुविद्धत्वमतभङ्गः ।

Digitized by Google

इत्थं सर्वप्रत्ययानां शब्दानुवेधवादी निरस्तः । इदानीं सर्वेषामप्यर्थानां प्रत्यक्षत्ववादी निरस्यते स खल्वेवमाह धर्मादयः कस्यचित्प्रत्यक्षाः सत्त्वादित्यादिकमनुमानजातं धर्मादीनां प्रत्यक्षत्वं साधयतीति तथा च योगिप्रत्यक्षं सिद्धमिति तदेतदनूद्य परिहरति । सत्त्वाद्यैरिति ॥

मू० सत्त्वाद्यैरक्षगम्यं विमतमिति वदन् वस्तु बाधं विपक्षे श्रुत्यालम्बे तु सैव प्रसजति शरणं तादृशादृष्टसिद्धौ । अध्यक्षं लौकिकञ्चेदधिगतिविहतं भावनोत्थं न युक्तं नित्यं त्वक्षानपेक्षं निरुपधिरिह ते दुर्वचोऽक्षप्रकर्षः ॥ ३६ ॥

टी० अयं भावः किं प्रत्यक्षत्वमात्रं प्रसाध्यते किं वा पुनरैन्द्रियकप्रत्यक्षत्वं पूर्वत्र न योगिप्रत्यक्षसिद्धिः ईश्वरप्रत्यक्षेणैवान्यथासिद्धत्वात् उत्तरत्र विपक्षे बाधकाभावात् अन्यथा सिद्धिरनुमानस्य, अतो न योगिप्रत्यक्षं साधयितुमलं, श्रुतिस्मृत्यादिबाधप्रसङ्गो विपक्षे बाधक इति चेत् तर्हि श्रुत्यादिकमेव शरणं किमनेनानुमानेनेत्याह । श्रुत्येति । उक्तमर्थं विकल्प्यापि दूषयति । अध्यक्षमिति । किमध्यक्षं लौकिकं वा किं वा भावनोत्थम् उत नित्यमेव लौकिकञ्चेत् प्रत्यक्षविरुद्धमित्याह । अधिगतिविहतमिति । लोकोपलम्भविरुद्धमित्यर्थः, न हि धर्मादिविषयं लौकिकं प्रत्यक्षमुपलभ्यते तथात्वे वा सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वादिति सूत्रविरोधः, भावनोत्थमपि प्रत्यक्षं भावनावैशद्यातिरेकेण न क्वापि दृष्टमित्याह । भावनोत्थं न युक्तमिति । मारीचादेर्भावनया रामादिसाक्षात्कारो भयभरदोषनिमित्तं विपरीतज्ञान-

मेव वृक्षे वृक्षे च पश्यामीति, एवमनुरागादिनिमित्तकामिनीमुखदर्शनादिकमपि व्याख्यातम् । नित्यं प्रत्यक्षं न कारणायत्तमित्याह । नित्यं त्विति । तत्साधनेऽपि न योगिप्रत्यक्षसिद्धिरिति भावः । ननु प्रकृष्यमाणं सर्वं निरतिशयदशाशिरस्कं यथा कुवल*यामलकबिल्वादिपरिमाणं प्रकृष्यमाणं निरतिशयदशाशिरस्कं परममहत्परिमाणे विश्राम्यति तथा चेन्द्रियशक्तेः प्रकृष्यमाणायाः सार्वज्ञ्ये विश्रमस्समुचितः । एवञ्च योगिनां मानसप्रत्यक्षस्य सर्वविषयत्वं सेत्स्यतीत्याशङ्क्य परिहरति । निरुपधिरिति । यथा चक्षुःस्पर्शनादेः प्रकृष्यमाणस्य न सर्वविषयत्वे विश्रमः एवं मनसोऽपीति भाव्यम् अन्यथा धर्मादयः कस्यचिच्चाक्षुषाः स्पार्शना इत्यादिकमपि वक्तुं शक्येत ॥ ३६ ॥

तदेव प्रकाशयति । प्रत्येकमिति ।

मू० प्रत्येकं ह्यक्षवेद्यं प्रतिनियततया सर्वलोकप्रसिद्धं काकोलूकादिकानामपि निजविषये दृश्यते चक्षुःप्रकर्षः । मान्यालव्यालपूर्वेष्वपि खलु रसनास्पर्शनादिक्रमात् स्यादक्षस्यानेकमात्रं स्थितविषयमतस्त्वक्पिपासादिवाक्यम् ॥ ३७ ॥

टी० प्रतिनियतविषयतया हि चक्षुरादीनां प्रसिद्धिः प्रवृत्तिरप्येवमेव एवम्मनसोऽपि प्रतिनियतविषयत्वं स्वीकार्य्यं दृष्टञ्च तत्, आत्मादिविषये एव हि मनसः स्वातन्त्र्यमवलोक्यते बाह्यविषये पुनरिन्द्रियान्तरसहकारितामात्रमेव परमाणवदृष्टादिविषये पुनस्तदपि नास्ति तेषामतीन्द्रियत्वात्, तथा च स्वात्मनि तज्ज्ञानादिषु वा शक्तस्य मनसः स्वातन्त्र्येण न बाह्यविषयेषु शक्तिः, तत्र प्रमाणमाह । सर्वलोके-

ति । ननु चक्षुरादीनामपि स्वविषयातिलङ्घनं दृश्यते दूरे हि काकः पश्यति अन्धकारेऽप्युलूकादिरर्थं गृह्णाति अतो मनसोऽपि प्रकर्षविशेषादविषयग्रहणं युक्तमित्याशङ्क्याह । काकेति । काकादिचक्षुःप्रकर्षोऽपि न स्वविषयातिलङ्घी रूपरूपितदेकार्थसमवायिमात्रग्रहणात् न हि काकश्चक्षुषा रसं गृह्णाति नापि चोलूकश्चक्षुषा जिघ्रति कथन्तर्हि मान्यालव्यालादिष्विन्द्रियवृत्तिसंकरः मान्यालो हि मुखेनैवाभ्यवहरति निर्हरति च व्यालश्चक्षुषैवाकर्णयत्यवलोकते च अत इन्द्रियवृत्तेरनियमो ऽयुक्त इत्याशङ्क्य परिहरति । मान्यालेति । तत्र हि रसनास्पर्शनयोरेकस्थानवर्तित्ववत् वागशनयोश्च*चक्षुःश्रोत्रयोश्च स्थानैक्यमेव न पुनरन्येन्द्रियेणान्येन्द्रियकृत्यमाचर्य्यते अतो न स्वविषयातिलङ्घनमिन्द्रियवृत्तेरिति भावः ॥

धर्मादिविषयत्वन्तु मनसो यद्विशिष्यते ।
चक्षुरादेस्तथा भावो नेष्यते केन हेतुना ॥

इति चक्षुरादिप्रतिबन्दिरेव मनसो धर्मादिविषयत्वं निवारयतीति संग्रहः कथन्तर्हि ।

त्वक् च दृक् च निपिपासति जिह्वा विह्वला श्रवणश्च परिवृत्तो ।
नासिका त्वयि करीश तथेति प्राप्नुयां कथमिमां त्रिदशस्याम् ॥

---

* यद्यपि प्राण्यङ्गत्वेन पाणिपादमितिवच्चक्षुःश्रोत्रमिति प्राप्तं न तु द्विवचनं तथाऽप्यत्र चक्षुर्भ्यां सहिते श्रोत्रे इति विगृह्य द्विवचनान्तता समर्थनीया । पाणिपादादेः प्राणिशरीरारम्भकत्वेन चक्षुःश्रोत्रादेरतथात्वेन च चक्षुःश्रोत्रयोरिति द्विवचनसमर्थनं तु न न्याय्यं पाणिपादादिगोलकस्येव चक्षुःश्रोत्रादिगोलकस्यापि शरीरारम्भकत्वेन इन्द्रियाणां स्थूलशरीरानारम्भकत्वेन च सर्वथा समानयोगक्षेमत्वात् । इतरथा तु गोलकतात्पर्येण पाणिपादमिति, इन्द्रियतात्पर्येण च पाणिपादा इत्यपि स्यादित्यस्मदुक्तसमाधिरेव साधुः । वाक्पाणिपादपायूपस्थानीति प्रयोगोऽपि पूर्वोक्तदिशा समर्थनीय इति शब्दापशब्दज्ञाः ।

इति इन्द्रियवृत्त्यनियमो महापुरुषैरभिधीयत इति इत्थमिन्द्रियवृत्तिनियममन्तरेण स्वाभाविकेनैव ज्ञानेन सर्वं साक्षात्करिष्यामीति भावः । न पुनरन्येन्द्रियविषयेष्वन्येन्द्रियवृत्तिरभिधीयते पश्यत्यचक्षुस्स शृणोत्यकर्ण इत्यादेः परविषयतया श्रुतस्याप्यकरणायत्तज्ञानस्यासंकुचितविज्ञाने मुक्तात्मन्यपि साधारण्यात् । अयमत्र निर्णयः—यदि योगिप्रत्यक्षं प्रामाणिकं तदा श्रुत्या स्मृत्या पुराणेन च सिद्ध्यति न पुनरनुमानेन तस्यान्यथासिद्धत्वात् चाक्षुषत्वादिप्रसञ्जनप्रतिबन्दिग्रस्तत्वाद्धेति पूर्वमेवोक्तम् ।

यथोपनिषदस्त्वीशो नानुमानेन सिध्यति ।
तथा योगी च शास्त्रेण केवलेन प्रसिध्यतु ॥

इति योगिप्रत्यक्षानुमानभङ्गः ॥ ३७ ॥

एवं योगिप्रत्यक्षादागमगम्यादृष्टादेरसिद्धिरुक्ता । अथा योगिप्रत्यक्षादनुमानगम्याग्न्यादेरसिद्धिरुच्यते कश्चिदाह धूमादिसंयुक्तमिन्द्रियमेव वह्न्यादिकं गृह्णातु किमनेनानुमानेन सहकारिसामर्थ्यस्सर्वमपि संपत्स्यते चक्षुर्धूमादिसंयोगः प्रथमं सहकारी तत्सहकारि च व्याप्तिपक्षधर्मत्वपरिज्ञानादि किमितरप्रमाणपरिकल्पनयेति एतदाशङ्कते । संयुक्तेति ।

मू० संयुक्तव्यापकत्वप्रभृतिसहकृतैर्व्याप्तिधीसव्यपेक्षैरक्षैरेवानुमाधीर्भवतु किमितरत्कल्पयित्वेति चेन्न । निर्व्यापारेन्द्रियस्याप्युदयति खलु सा भूतभाव्यादिलिङ्गैः स्मृत्यारूढैः श्रुतैर्वा मन इह सकलज्ञानसामान्यमिष्टम् ॥ ३८ ॥

Digitized by Google

टी० परिहरति । नेति । परिहारं विवृणोति । निर्व्यापारेति । अयमत्र भावः—नेन्द्रियमत्र वह्न्यादिज्ञाने करणमपि तु धूमादिज्ञान एव अतो न वह्न्यादिज्ञानं प्रत्यक्षप्रमाणफलम् अपि तु धूमादिज्ञानमेव वह्न्यादिज्ञानं जनयति । नन्वस्तु धूमादिज्ञानमवान्तरव्यापारः तद्द्वारा प्रत्यक्षमेव वह्न्यादिज्ञानं जनयतीति चेत् तत्र इन्द्रियार्थसन्निकर्षजन्य-धूमादिज्ञानमन्तरेणापि स्मृत्याहृतेः श्रुतेर्वा भूतभाव्यादिलिङ्गैरग्न्या-दिज्ञानदर्शनात् । किञ्च यद्धि यज्जनयित्वैव यज्जनयति तस्य तत्र तदवान्तरव्यापारत्वमिति ह्यवान्तरव्यापारलक्षणमाचक्षते न चेदं लक्षणं धूमादिज्ञानेऽस्ति धूमादिज्ञानमन्तरेणापि प्रत्यक्षेण वह्न्यादे-र्द्रष्टुं शक्यत्वात् तथा दर्शनाच्च अतोऽनुमानादेव साध्यसिद्धिर्न पुनः प्रत्यक्षात् अन्यथा शब्दज्ञानमवान्तरव्यापारीकृत्य शब्दार्थज्ञा-नमपि प्रत्यक्षमेव प्रसज्येत न च तद्युक्तं परोक्षापरोक्षविभागाभाव-प्रसङ्गात् । अथापि सर्वविषयस्य मनइन्द्रियस्य वह्न्यादिज्ञाने व्यापृत-त्वान्मानसप्रत्यक्षं वह्न्यादिज्ञानमस्त्वित्याशङ्क्य परिहरति । मन इति । सकलज्ञानसामान्यमिति संशयविपर्य्ययस्मृत्यादिज्ञानसाधारणत्वान्म-न इन्द्रियस्य न तज्जन्यतामात्रेण प्रत्यक्षत्वसिद्धिरिति भावः ॥ ३८ ॥

उक्तार्थस्यैमं पुनरपि विकल्प्य दूषयति । पक्षस्थमिति ।

मू० पक्षस्थं व्याप्यमादौ विदितमिह तु न व्याप-
कस्य प्रसक्तिर्व्याप्तिस्तेन स्मृता स्यान्न च तत
उभयोर्निश्चयः पक्षयोगे । तादृग्व्याप्यान्वि-
तोऽसाविति मतिरपि न व्यापकं तत्र
यच्छेत् तस्मात्तद्व्यापिपक्षान्वयनियतमति-
र्नोक्तसंस्कृतेर्वा ॥ ३९ ॥

Digitized by Google

टी० किं धूमादिदर्शनदशायां प्रत्यक्षो वह्निः तदा धूमादिरेव विदितः न तु वह्न्यादिस्तदिदमाह । इह तु न व्यापकत्वप्रसक्तिरिति । यदा पुनर्व्याप्तिस्मरणं तदा पुनर्दृष्टान्त एव साध्यप्रसिद्धिः तत्रैव पूर्वं ग्रहणात् न तु पक्षे तदिदमाह । न चेति । तर्ह्युपनयावस्थायां साध्यसिद्धिरस्तु ततोऽनुमानं व्यर्थमित्याशङ्क्याह । तादृगिति । उपनयजन्यं ज्ञानं व्याप्तस्य हेतोः पक्षधर्मत्वमवगाहते न पुनः साध्यस्य पक्षधर्मत्वं तस्मात् साध्यस्य पक्षधर्मत्वप्रतीतिर्नोपनतः, नापि व्याप्तिदर्शनजसंस्कारात्, न चोभयस्मात्, अतो व्याप्तस्य हेतोः पक्षधर्मत्वप्रतीतिः साध्यस्यापि पक्षधर्मत्वं प्र*व्यापयतीति सुस्थिरमनुमानम् ।

इत्यनुमानस्य प्रत्यक्षादिबहिर्भावः ॥ ३९ ॥

नन्वनुमानं प्रमाणमेव न भवति प्रामाण्ये सत्येव हि प्रत्यक्षाप्रत्यक्षविवाद इत्याशङ्क्य परिहरति । नायोग्यस्येति ।

मू० नायोग्यस्याक्षबाधः स्वविषयविहतिं न क्षमेतानुमानं स्वस्यैवापेक्षितत्वादनुमितिमखिलां बाधते नागमोऽपि । निस्सन्देहप्रवृत्तेरिह निपुणधियां नाप्यसौ संशयात्मा वैशिष्ट्यान्न स्मृतिश्चेत्यनुमितिरुदिताऽध्यक्षवन्मानमन्यत् ॥ ४० ॥

टी० अयमत्र विकल्पक्रमः अनुमानस्याप्रामाण्यमबाधितत्वेऽपि उत बाधितत्वेन, तत्रापि किं बाधः प्रत्यक्षेण अथा-

* प्रसाधयतीति द्राविड़पाठः ।

Digitized by Google

नुमानेन अथवाऽऽगमेन यद्वा नियतबाधकाभावेऽपि संशयात्मकत्वेनाप्रामाण्यमथवा स्मृतिरूपत्वेन, तत्राबाधितत्वेऽप्यप्रामाण्यमिति तावद्व्याहतं बाधेऽपि प्रत्यक्षबाधो योग्यस्यैव स पुनर्धूमानुमानादौ न दृश्यते अयोग्यविषये बाधस्त्वप्रयोजकः अयोग्यानुपलब्धेरबाधकत्वात् अतो न प्रत्यक्षबाधात् अप्रामाण्यमनुमानसामान्यस्य, यत्र पुनः क्वचित् प्रत्यक्षबाधः तत्र वयमप्यप्रामाण्यमङ्गीकुर्महे नैतावताऽनुमानतत्त्वापलापः, न चानुमानेन वा बाधो व्याघातात् कृत्स्नानुमानाप्रामाण्ये बाधकस्याप्यनुमानस्य तदन्तर्भावात् तदिदमाह । स्वविषयेति । नाप्यागमेन बाधः आगमस्यैव व्युत्पत्तिदशायामनुमानसापेक्षत्वात् इदमप्याह । स्वस्येति । न च संशयात्मकमनुमानं निश्चयेनैव प्रवृत्तिव्यवहारयोर्दर्शनात् तदप्याह । निस्सन्देहेति स्मृत्यात्मकत्वमवशिष्यते तच्च साध्यस्य पक्षधर्मताप्रतिपत्तौ न संभवतीत्युक्तं प्रागेव । एतदपि वदति । वैशिष्ट्यादिति । अतः प्रत्यक्षवदनुमानमपि पृथगेव प्रमाणमिति निगमयति । अध्यक्षवदिति । अत्र स्मृतेरप्रमाणत्वेनोपादानमन्वारुह्य वादेनेति भाव्यम् ।

इत्यनुमानप्रामाण्यसिद्धिः ॥ ४० ॥

अत्र चार्वाकः प्रत्यवतिष्ठते किमनुमानेन विशेषतस्साध्यते उत सामान्यं न तावत्सामान्यं प्रागेव प्रसिद्धत्वात् न ह्यग्निमत्त्वसामान्यमप्रसिद्धं महानसस्याप्यनग्निमत्त्वेन दृष्टान्तस्य साध्यविकल्पत्वप्रसङ्गात् तदिदमाह । सामान्यमिति ।

मू० सामान्यं प्राक् प्रसिद्धं न पुनरनुगमस्सिद्ध-
पूर्वो विशेषे व्याप्तिस्सर्वाऽपि भग्ना क्वचिदपि

सकलव्याप्यसकृत्यदृष्टेः। भूयोदृष्टेर्व्यवस्था न हि भवति तथोपाधयः स्युर्दुरूहा इत्याद्याः स्वेष्टतर्कस्थिरनियमजुषां दर्शनेनैव बाध्याः॥ ४१॥

टी० न च विशेषस्साध्यः तस्मिन्ननुगमाभावादित्याह। न पुनरिति।

यथाहुः॥

विशेषेऽनुगमाभावस्सामान्ये सिद्धसाधनम्।
अनुमाभङ्गपङ्केऽस्मिन्निमग्ना वादिदन्तिनः॥ इति॥
विशेषेऽनुगमाभावात् सामान्ये सिद्धसाधनात्।
तद्वतोऽनुपपन्नत्वादनुमानकथा कुतः॥ इति च॥

किञ्च

व्याप्तिरेवानुमानस्य जीवातुः सा च सर्वथा।
न संभवति संबन्धग्रहस्यानुपपत्तितः॥ इति,

कतिपयव्यक्तिदर्शनेन संबन्धग्रहणस्य व्यभिचारिष्वपि साधारण्यात्वात् सकलव्यापकव्यक्तिदर्शनेन संबन्धग्रहणमसर्वज्ञेन कर्तुं न शक्यते यदि सर्वज्ञस्संबन्धवेदी तर्हि किमनेनानुमानेन एवञ्च सर्वोपि व्याप्तिभंग्ना प्रमेयत्वाभिधेयत्वादौ सर्वव्यक्त्युपसंहारेण व्याप्तिग्रहणस्याशक्यत्वादित्याह। व्याप्तिरिति। अस्तु भूयोदर्शनेन व्यवस्थेत्याशङ्क्याह। भूयोदृष्टेरिति। सहस्रशो भूयोदर्शनस्यापि तत्रतत्र व्यभिचारदर्शनादिति भावः। तर्हि निरुपाधिकसंबन्धो व्याप्तिरिति लक्षणं कृत्वोपाधिविधूननेनैव व्याप्तिं प्रतिष्ठापयाम इति चेन्न दृष्टादृष्टोपाधीनामनन्तानां दुरूहत्वेन तद्विधूननस्यैवाशक्यत्वादित्याह।

Digitized by Google

तयोपाधय इति । इत्थमनुमाननिराकरणे दुर्वादिनां प्रलापोऽयं किमनुमानमूलः उत तर्कमूलः अथवा निर्मूलः निर्मूलत्वे प्रलाप एव अनुमानमूलत्वे तर्कमूलत्वे वा व्याप्तिमन्तरेण तदुभयं न संभवतीति तत्रापि व्याप्तिग्रहणमवश्यं भावि, तथा च व्याघात इत्यभिप्रायेण परिहरति । इत्याद्या इति । न केवलं तर्क एव परपक्षबाधकोऽपि तु लोकोपलम्भोऽपीत्याह । दर्शनेनेति ॥ ४१ ॥

इत्यनुमानबाधकतर्कपरिहारः ॥

अनुमाने तावत् सामान्यं न साध्यते येन सिद्धसाधनत्वमुद्भाव्येत किन्तु सामान्यव्याप्तिसहकृतेन पक्षधर्मत्वेन सामान्यस्य पक्षनिष्ठत्वरूपो विशेषस्साध्यते कथन्तर्हि विशेषव्याप्तिशून्येन पक्षधर्मेणापि हेतुविशेषेण तत्सिद्धिरिति मा वोचः विशेषव्याप्तेरनुमानाङ्गत्वस्वीकारे पुनरयुक्ताङ्गत्वम् अनपेक्षितप्राप्तिकल्पनया दूषणात् प्राप्तिसमा समाधिश्च सामान्यव्याप्तेरेवानुमानाङ्गत्वात् कथं सामान्यविषया व्याप्तिर्विशेषसिद्धावङ्गमिति चेत् एवन्तर्हि युक्ताङ्गपरित्यागः सामान्यव्याप्तेरेव विशेषसिद्धौ युक्ताङ्गत्वात् विशेषव्याप्तिरूपायाः प्राप्तेरङ्गत्वं परिकल्प्य तदभावेन दूषणमप्राप्तिसमां प्रक्रियामनुधावति अविषयवृत्तित्वञ्च सामान्यविषयाया व्याप्तेर्विशेषविषये सञ्चारणेन दूषणकथनात् तथा च सामान्यव्याप्त्या पक्षधर्मतया च परिष्कृतो हेतुः पक्षे साध्यविशेषं साधयति अन्यथा प्रत्यनुमानप्रतितर्कयोरपि कण्ठगतजीवितत्वमापाद्येत अतो विशेषेऽनुगमाभाव इत्यादेरनवकाशः यत्पुननस्सामान्येन सर्वव्यक्तिग्रहणासंभवान्न व्याप्तिग्रहणं संभवतीति तदनन्तरमेव समाधास्यामः तदवशिष्यते भूयोदर्शनाद्व्याप्तिग्रहणं न संभवतीति अतिचारशङ्कायास्सर्वत्र सुलभत्वादिति तदेतद्वि-

कल्प्य दूषयति भूयोदर्शनदृष्टस्याप्यर्थस्य किं दृष्ट एव देशेऽतिचारशङ्का उत देशान्तरादौ न तावद् दृष्ट इत्याह । दृष्ट इति ।

मू० दृष्टेऽतीचारशङ्का न भवति यदि सा क्वापि देशान्तरादौ सिद्धा तत्रानुमानस्थितिरथ न तदा क्वातिशङ्कावकाशः । व्याघातान्ता तु शङ्का न पुनरुदयति स्वप्रवृत्त्यादिभङ्गाद्यावच्छङ्कञ्च तर्कप्रसृतिरिह ततोऽनानवस्थादिदोषः ॥ ४२ ॥

टी० ॥ नापि देशान्तरादाविति वक्तुमनुवदति । यदीति । देशान्तराद्यावतिचारशङ्कायां देशान्तराद्यनुमानमेव निष्प्रतिद्वन्द्वमवतिष्ठत इत्याह । सिद्धेति । देशान्तरानुमानाभावमाशङ्कते । अथेति । शङ्कितमर्थं प्रतिक्षिपति । तदेति । तर्हि शङ्कायाः को निवारकः निवारकाभावे कथं शङ्का निवर्त्ततेत्यत आह । व्याघातान्तेति । अयमर्थः उत्पन्ना शङ्का व्याघातदर्शनेन निवर्त्तते तेनैव व्याघातदर्शनेन उत्तरोत्तरं शङ्का न जायत इति, तथा च शङ्कानिवृत्तौ तर्कप्रवृत्तिस्तावतैवावसीदतीत्याह । यावच्छङ्कमिति । तेनोत्तरोत्तरतर्कप्रवृत्त्याऽनवस्थावचनमस्थानवाद इत्याह । तत इति । एतत्सर्वमभिप्रेत्योक्तं न्यायविद्भिः ।

शङ्का चेदनुमास्त्येव न चेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कःशङ्कावधिर्मतः । इति,

अनेन

* अतिचारशब्दस्य घञन्तत्वेन अतिचारः, अतीचारः, इत्युभयं साधु ।

Digitized by Google

व्याघातो यदि शङ्काऽस्ति न चेच्छङ्का ततस्तराम् ।
व्याघातावधिराशङ्का तर्कश्शङ्कावधिः कुतः ॥ इति, ॥

कुसृष्टिरपि नष्टप्राया यावच्छ्याघातदर्शनं शङ्कायास्सत्त्वं व्याघातदर्शने तन्निवृत्तिरित्युक्तत्वात्; भूयोदर्शनदृष्टाया व्याप्तेर्न निर्मूला शङ्का तस्यास्सर्वेच सुलभत्वेन स्वप्रवृत्त्यादिविरोधप्रसङ्गात् उपाधिदर्शनादिमूलशङ्कायामुपाधिविधूननमुत्तरत्र दर्शयिष्यते ॥ ४२ ॥

इत्यतिचारशङ्कोद्धारप्रकारः ॥

उपाधिस्वरूपप्रदर्शनपूर्वकमुपाधिविधूननप्रक्रियां दर्शयितुमारभते । व्याप्यत्वमिति ।

मू० व्याप्यत्वं यस्य यत्र स्फुरति सहचरे सोऽस्य हेतोरुपाधिस्साध्यव्यापी समोऽयं समगणि निपुणैस्साधनाव्यापकश्च । योग्यादृष्ट्या च तर्कैरपि तमपनुदेच्छङ्कितं निश्चितं वा साम्यं नात्राहुरेके तदभिमतमिह व्यापकादर्शनादि ॥ ४३ ॥

टी० अथ मतभेदेन लक्षणद्वयमाह साधनाव्यापकत्वे सति साध्यसमव्याप्तो धर्म उपाधिरित्युदयनः । साधनाव्यापकत्वे सति साध्यव्यापक इति समशब्दप्रतिक्षेपेण वादीन्द्रः । तत्र स्वधर्ममन्यत्रारोपयन्नुपाधिशब्देनोच्यते तथा च स्वधर्मभूताया व्याप्तेर्हेतुत्वाभिमते मैत्रीतनयत्वादौ प्रतीतिहेतुत्वाच्छाकाद्याहारपरिणतिरुपाधिः, यथा स्फटिकगतारुणिमप्रतीतिहेतुर्जपा*कुसुमादिः तथा च निरुपाधिकसंबन्धत्वस्य व्याप्तिलक्षणत्वात् तदभा-

* जपा जवेति पदद्वयमपि देशभेदभिन्नसाधुत्वाभिमतपाठम् ।

येन व्याप्तिमवसादयन्नुपाधिर्दूषणमिति समशब्दं प्रयुञ्जानानामुपाधिशब्दार्थापरित्यागेन दूषणाभिधाने तात्पर्य्यम् । अन्येषान्तु समो विषमो वा भवतूपाधिः तन्निवृत्तौ पक्षे साध्यनिवृत्तेरुभयत्रापि साधारणत्वात्तथा च साध्यनिवृत्त्यङ्गभूतव्यापकत्वोपादानमन्तरेण समशब्दप्रयोगो व्यर्थः, तथा च समो वाऽधिको वा व्यापकत्वेनाभिमतः पक्षे व्यावर्त्तमानः साध्यं व्यावर्त्तयतीति पक्षे साध्यबाधादुपाधेर्दूषणत्वम् । उपाधिशब्दार्थस्तु यथा तथा वा भवत्विति तदेतत्सर्वं पूर्वार्द्धेनोक्तमिति अत्र निपुणैरिति कथनम् उपाधिशब्दार्थनिरूपणेन निर्वाहात् अन्यथाऽपि दूषणत्वे सिद्धे कथमनपेक्षितसमशब्दोपादानमिति चेत् इत्थं यथा पक्षविपक्षयोर्वर्त्तमानत्वेन हेतोर्दूषणत्वे सिद्धेऽपि पक्षविपक्षयोरेव वर्त्तमानो हेतुर्विरुद्ध इति विरुद्धलक्षणे सावधारणनिर्देशः प्रकारान्तरप्रदर्शनार्थः विपक्षे वर्त्तमानत्वात् साध्यासाधकत्वं विपक्ष एव वर्त्तमानत्वात् परपक्षस्यापि साधकत्वं तथा चात्यन्तदुष्टमनुमानमितीममर्थं प्रकाशयितुं पक्षविपक्षयोरेवेत्यवधारणप्रयोग इति चेत् एवन्तर्हि व्यापकनिवृत्त्या व्याप्यनिवृत्तिद्वारेण पक्षे साध्यबाधं बोधयितुं व्यापकत्वोपादानं व्याप्यस्य मैत्रीतनयत्वादेर्व्याप्यत्वप्रतिभासोऽपि न स्वाभाविकः अपि तु स्फटिकारुणिमवदन्यप्रयुक्त इति प्रतिभासमात्रस्यापि दुष्टत्वेन हेतोर्व्याप्तिनिवृत्तिं स्फुटमेव वक्तुं समशब्दप्रयोग इति सन्तोष्टव्यं, व्यापकत्वमात्रोपादाने व्यापकनिवृत्त्या व्याप्यभूतसाध्यनिवृत्तिमुपजीव्य साध्यबाधेन हेतुदोषो वाच्यः समशब्दोपादाने तु हेतोर्व्याप्तिप्रतिभासोऽप्यौपाधिक इति साक्षाद्धेतुदोषकथनम् उद्भटत्वाद्दोषस्येति अत उपाधिशब्दार्थस्वारस्यादुद्भटदोषप्रकाशनौचित्याच्च समशब्दप्रयोग इत्यौदयनिका इति । अस्तूपाधिलक्षणं कथन्तर्हि तस्य विधूननमित्याशङ्क्याह । योग्येति ।

उपाधिः खलु शङ्कितो निश्चितश्च शाकाद्याहारपरिणत्यादिः शङ्कितः निषिद्धत्वादिर्निश्चितः यत्र खलु साधनाव्यापकत्वसाध्यसमव्याप्त्योरन्यतररूपस्याशङ्का स शङ्कितोपाधिः, अन्तिमगर्भेऽपि शाकाद्याहारपरिणतिसंभवेन साधनाव्याप्तेराशङ्कितत्वात् यत्र पुनर्द्वयोरपि रूपयोर्निश्चयः स निश्चितोपाधिः यथा हिंसात्वानुमाने निषिद्धत्वं यन्निषिद्धं तदधर्महेतुरिति निर्णयात् साध्यव्याप्तिः, वैधहिंसायां निषिद्धत्वाभावात् साधनाव्याप्तिः उभयञ्च निश्चितमुभयं च प्रत्यक्षेण ग्रहीतुं योग्यं चेद्योग्यादृष्ट्या तावदपनुद्यते अयोग्यञ्चेत्तर्केणैवेति विभागः । तदिदमाह । योग्येति । तर्कप्रवृत्तिस्तु किमुपाधयः सर्वथा प्रमाणपथमनवतीर्णा वा उतावतीर्णा वेत्यादिना विकल्प्य तेषुतेषु ग्रन्थेषु वादिनां पठितपाठाः तथा हि समव्याप्तिपक्षस्य सर्ववादिसंप्रतिपन्नत्वाद् विषमव्याप्तिमनूद्य तेषां वादिनां भावमाह । साम्यमिति । अयमत्र भावः—व्यापकस्योपाधेः पक्षे दर्शनाभावाद्व्याप्यस्य साध्यस्य बाध इति आदिशब्देन बौद्धोक्तषोडशविधानुपलब्ध्यन्तर्गता व्यापकविरुद्धोपलब्धिरुच्यते यथा द्रव्यत्वाभावात् पृथिवीत्वाभाव इति व्यापकानुपलब्धिर्द्रव्यत्व विरुद्धगुणत्वाद्युपलम्भात् पृथिवीत्वाभाव इति व्यापकविरुद्धोपलब्धिरित्यादि, एवं पक्षे साध्यव्यापकस्योपाधेरनुपलम्भे तथोपाधिविरुद्धधर्मान्तरोपलम्भेऽपि साध्यासिद्धिरिति भावः । अन्यत् सर्वं विस्तरभयान्न लिख्यते ॥ ४३ ॥

अथोपाधिविधूननप्रक्रियां विशेषतो दर्शयति । नित्य इति ।

मू० नित्यो व्यापी न च स्यादुपधिरिह सदा
सर्वतस्तत्प्रसङ्गान्नाप्येष व्याप्यमात्राकृतिर-
वियुतितो नैकलिङ्गोपपत्तेः । नासौ पक्षेत-

त्वप्रभृतिरपि भवेद्व्यापकोऽतिप्रसङ्गात्तु-
ल्यस्साध्येन पक्षे सह यदि घटते साधनं
व्याप्नुयात् सः ॥ ४४ ॥

टी० न तावदनुमाने धूमादौ वन्ह्यादिसाधने नित्यो व्यापी वा कश्चिदुपाधित्वेन शङ्कितुं शक्यते। कुत इत्यत आह। सदेति। उपाधेस्सर्वदाऽतनत्वप्रसङ्गात् सार्वत्रिकत्वप्रसङ्गात् तथा च तत्समवृत्तेस्साध्यस्यापि वन्ह्यादेस्सदातनत्वं सार्वत्रिकत्वञ्च प्रसज्येतेति भावः। तर्ह्यनित्योऽसार्वत्रिकश्च व्याप्यमात्राकृतिरस्त्वित्याशङ्क्याह। नापीति। तत्र हेतुं दर्शयति। अवियुतित इति। व्याप्यमात्ररूपस्योपाधित्वाङ्गीकारे कृतकत्वानुमाने सावयवत्वमुपाधिः स्यात् न्यायविदाम्मते सावयवत्वस्यानित्यत्वकृतकत्वाभ्यां व्याप्तत्वात् उभयञ्चानित्यत्वसाधने सम्यगनुमानमेव, आहुश्च। कृतसावयवत्वादिप्रयुक्ता च विनाशितेति। अवियुतितः—अविनाभावात्। ये तु समपदं प्रतिक्षिप्य व्यापकमात्रमुपाधिरिति वदन्ति तेषामपि पक्षेतरत्वं पक्षप्रतियोगिकान्योन्याभाववत्त्वं पक्षत्वात्यन्ताभाववत्त्वं पक्षत्वविरुद्धधर्मवत्त्वं पक्षत्वात्यन्ताभावाविनाभूतधर्मवत्त्वमित्येतादृशं नोपाधिरित्याह। नासाविति। कुत इत्यत आह। अतिप्रसङ्गादिति। तदुक्तमस्माभिरेवान्यत्र।

नोपाधिः पक्षतोऽन्यत्वं साधनं न विपक्षतः।
बाधनं न सपक्षेभ्यः सर्वानुमितिबाधनात् ॥ इति

अयमर्थः पक्षेतरत्वं नोपाधिः, एवं पर्वतो वन्हिशून्यः सपक्षेतरत्वात् विपक्षवदिति बाधितुं न शक्यते तथा पर्वतो वन्हिमान् विपक्षेतरत्वात् सपक्षवदिति साधयितुमपि न शक्यते सर्वानुमान-

बाधनादिति यं पक्षीकरोति वादी तमेव प्रतिवाद्यपि विपक्षीकरोति तथा च परस्परविरोधादनुमानस्य प्रामाण्यमेव संभज्येतेति । इत्थं न्यूनाधिकव्यक्त्योर्निरासे समवृत्तिरवशिष्यते स च यदि पक्षे संभवति साधनव्यापकत्वान्नोपाधिः, असंभवे स एवोपाधिः, अत एव वह्निरसामग्याः पक्षे संभवमाश्रित्य साधनव्यापकत्वादनुपाधित्वमाहुः । अत उभयाव्यभिचारिणामुभयव्यभिचारिणामन्यतरव्यभिचारेऽपि व्याप्यमात्राव्यभिचारिणां व्यापकमात्राव्यभिचारेऽपि विषमवृत्तीनामनुपाधित्वे व्याप्यव्यापकस्वभावानां साधनाव्यापकानामुपाधित्वमित्युक्तं भवति । तथा च यावत्साधनदेशमवर्तमानो यावत्साध्यदेशवृत्तिरुपाधिः साधनवन्निष्ठात्यन्ताभावप्रतियोगित्वे सति साध्यवन्निष्ठात्यन्ताभावाप्रतियोग्युपाधिरित्यादिकमपि लक्षणं संगच्छते ॥ ४४ ॥

समाधिकव्याप्तिकपक्षाङ्गीकारेणोपाधेर्व्यापकत्वप्रकारपरिशोधनपूर्वकं तद्दूषणत्वप्रकारमपि विशदयति । दृष्टमिति ।

मू० दृष्टं साध्यस्य यत्स्यात् सममधिकमपि क्वापि पक्षान्यता वा तस्याभावेऽपि साध्ये सति यदि न भवेद्बाधकं व्यापि नैतत् । दुर्वारे बाधके तद्द्वयमपि दहनानुष्णतादावुपाधिस्साध्यं तद्व्याप्यतां वा हरतु स विरहात् पक्षतो हेतुतश्च ॥ ४५ ॥

टी० पूर्वं पक्षेतरत्वस्योपाधित्वं प्रतिक्षिप्तम् । इदानीं तस्याप्युपाधित्वमङ्गीकरोति । क्वापीति । अयं भावः—यत्र वह्न्यनुष्णत्वानुमानादौ पक्षे साध्यबाधः स्फुटमेव दृश्यते तत्र पक्षेतरत्वमप्युपाधिः यत्र पुनर्बाधो नास्ति न तत्र पक्षेतरत्वमुपाधिरिति विभागः

अथोपाधेर्व्यापकत्वावगमप्रकारमाह । तस्येति । अयमस्यार्थः—यद्यस्य व्यापकत्वेन निर्दिश्यते तस्याभावेऽपि तत्संभवे यदि बाधकतर्कः प्रवर्तते स एव तस्य व्यापकः यथा शाकाद्याहारपरिणत्यभावे पुरुषगताद्यश्यामिकाभावो नियतमुपलभ्यते एवमन्यत्रापि, अन्यथा अकारणकंकार्योत्पत्तिप्रसङ्ग इति तर्कः । एतादृशबाधकसद्भावे व्यापकत्वं, या तु क्षीराद्याहारपरिणतिः सा श्यामत्वं प्रति न व्यापिका विपक्षे बाधकाभावादित्यर्थः । तथा च वह्न्यनुष्णत्वानुमाने पक्षे प्रत्यक्षबाधकसद्भावादुपजीव्यविरोधादितर्कबाधाच्च सममधिकं वा पक्षेतरत्वं पक्षेतरवह्निसामग्रीशून्यत्वमित्यादिकं सर्वमप्युपाधिः स्यादित्याह । दुर्वार इति । तद्द्वयमपि—सममधिकमपि । उपाधेर्दूषणत्वप्रकारं निगमयति । साध्यमिति । पक्षे साध्यापहारे बाधः हेतोस्साध्यव्याप्यत्वापहारे व्याप्यत्वासिद्धिः, उपाधिः खलु व्यापकस्वभावः पक्षे स्वाभावेन साध्यमपहरन् हेतोस्साध्यव्याप्यतामप्यपहरतीति भावः ।

इत्युपाधितद्विधूननादिः ॥ ४५ ॥

एवमनुमानेषूपाधिविधूननप्रकारमुक्त्वा हेतु—तदाभासादिविभागं दर्शयति । व्याप्तिरिति ।

मू० व्याप्तिः पक्षान्वयश्चेत्युभयमविकलं यस्य हेतुस्स सम्यङ्क्काभासौ तद्विहीनौ तदुभयविततिस्स्यादनैऽकान्तिकादिः । तत्तद्वक्रानुमोत्प्रेक्षणामपि घटते न क्वचित् साध्यसिद्धौ स्वव्याघातादिदोषादविषयनियतेर्वाञ्छिता-लाभतश्च ॥ ४६ ॥

टी० द्वयमनुमानाङ्गं व्याप्तिः पक्षधर्मता चेत्युक्तं सा च व्याप्तिरन्वयव्यतिरेकाभ्यां द्वेधा भवति साधनसद्भावे साध्यसद्भावोऽन्वयः साध्याभावे साधनाभावो व्यतिरेकः तत्रान्वये सर्वसपक्षवर्तिनो हेतोस्साध्येन सह सार्वत्रिकस्संबन्धः तद्यथा शब्दोऽनित्यः कृतकत्वादिति कतिपयसपक्षवर्तिनस्तस्य सपक्षे कुत्रचित् साध्येन संबन्धः तद्व सावयवत्वमिति घटादिषु सावयवत्वसद्भावात् क्रियादिष्वभावात् व्यतिरेकस्तु सकलविपक्षव्यावृत्त्यात्मकत्वादेकरूप एव तथा च यस्य यस्यानुमानस्यान्वयव्यतिरेकौ स्तः तदन्वयव्यतिरेकित्वात् सर्वाविगीतमेव, यस्य पुनरन्वयो व्यतिरेको वा तयोरुभयोर्गतिरुत्तरत्र वक्ष्यते एवं व्याप्तिपक्षधर्मताभ्यां सम्यक्त्वमुक्त्वा तदभावे पुनरसम्यक्त्वमाह । आभासाविति । व्याप्त्यभावे व्याप्यत्वासिद्धिः पक्षधर्मताऽभावे स्वरूपासिद्धिः अनैकान्तिकत्वादिकमशेषमपि हेत्वाभासजातं व्याप्तिपक्षधर्मताविरहे विश्राम्यति । तत्राह । तदुभयेति । तथा हि विपक्षगामित्वे व्याप्तिविरहः पक्षमात्रगामित्वेऽपि स एव सपक्षे सति पक्षमात्रगामित्वेऽपि व्याप्तिप्रदर्शनाभावात् स एव विपक्षादिव सपक्षादपि व्यावृत्तत्वेन व्यतिरेकव्या*प्त्यभावात् यदा पुनः कालात्ययापदिष्टः तदापि व्याप्त्यभावः तदा साध्यशून्ये साधनवृत्त्या व्याप्तिभङ्ग इति केचित् । अपरे तु बाधितेऽपि सिद्धसाधनवत् साध्यसन्देहाभावात् पक्षधर्मत्वभङ्ग इति । एवं प्रकरणसमेऽपि पक्षे साध्यनिश्चयावसादनेन व्याप्तिभङ्ग इति केचित् । अन्ये तु स्वारसिकसन्देहापवादिना ऽपि विपरीतनिश्चयप्रसङ्गेन बाधतुल्यत्वमापाद्य पक्षधर्मताभङ्ग इति । इतरे तु व्याप्तिपक्षधर्मत्वयोर्द्वयोरपि विमर्दनेनोभयदोषापादनमिति, कथन्तर्ह्यनुमानस्य सन्दे-

* व्यतिरेकव्याप्त्यवगमादिति पा. ।

होऽङ्गमित्युच्यते—इत्थम्, उभयी खलु सन्देहप्रवृत्तिः एका सर्वानुमा-
नसाधारणी स्वारसिकी सा भवेदनुमानाङ्गं, द्वितीया पुनः प्रतिकूला-
नुमानदर्शनजनिता सा पुनर्नानुमानाङ्गं शङ्कापनोदनप्रवृत्तपूर्वानु-
मानपरिपन्थित्वेनानुमानान्तरेण प्रवर्त्तितत्वात् । अतः प्राचीन एव
संशयोऽनुमानाङ्गं, पराचीनास्तु परिपन्थ्यनुमानमूलत्वादनुमानबाध-
केष्वन्तर्भवतीति विभागः । अनुकूलतर्काभावो व्याप्तिमेवावसादयति
व्याप्तेस्तु तर्कमूलत्वात् प्रतिकूलतर्को ऽप्येवमेव अनुकूलतर्कसद्भाव-
वत् प्रतिकूलतर्काभावस्यापि व्याप्त्यङ्गत्वात् आत्माश्रयादिः स्वरू-
पासिद्धिमापादयति केवलानिष्टप्रसङ्गः, प्रतिकूलतया व्याप्तिमवसाद-
यतीति विभागः, सोपाधिकत्वमपि व्याप्तिमेव व्यावर्त्तयति निरु-
पाधिकसंबन्धत्वाद्व्याप्तेः यत्सोपाधिकं तदेवान्यथासिद्धमप्रयोजक-
मित्यादिशब्दैरभिलप्यते यदा पुनर्हेतोः स्वरूपमसिद्धं विशेषणं
वा यद्वा पुनराश्रयः अत्र सर्वत्रापि स्वरूपासिद्धिरेव अत-
स्सर्वो हेत्वाभासोऽप्यसिद्धावेव पर्य्यवस्यति व्याप्यत्वासिद्धेरप्यसिद्ध-
व्यवहारविषयत्वात् दृष्टान्तदोषाणां पुनर्हेतुदोषपर्य्यन्तचिन्तायां
हेत्वाभासेष्वन्तर्भावमाहुः । असिद्धि*रप्यन्ततस्तत्रैव विश्राम्यति अत-
स्सर्वेषामपि हेत्वाभासानां व्याप्तिपक्षधर्मताभञ्जकत्वेन दोषत्वात्त-
दुभयभञ्जनवितितिरेव सर्वमनुमानदोषजातमित्याह । तदुभयवित-
तिरिति । एवञ्च व्याप्तिपक्षधर्मतयोरनुपप्लवे अन्वयव्यतिरेकिवत् केव-
लान्वयिनोऽप्यनुमानत्वमङ्गीकृतं, तर्हि वक्रानुमानस्यापि केवलान्व-
यित्वादनुमानत्वमङ्गीकर्त्तव्यमित्यत आह । तत्तदिति । वक्रानुमानं
सर्वमपि स्वसाध्यसिद्धेरनङ्गत्वादप्रयोजकमेव । कुत इत्यत आह ।
स्वव्याघातेति । विषयनियमाभावादपि दुष्टत्वमाह । अविषयेति ।

* अज्ञानासिद्धिरप्यन्तत इति पा० ।

Digitized by Google

येनैवानुमानेनानित्यत्वं साध्यते तेनैव यत् किञ्चित्पदव्यत्ययेन नित्यत्वमपि साधयितुं शक्यते अत एव स्वव्याघातो व्यक्तः, वक्रानुमाने सामान्यसिद्धावपि न विशेषसिद्धिः, अतो वाञ्छितस्याप्यर्थविशेषस्य लाभो नास्ति अतो वक्रानुमानं केवलान्वयिरूपमपि साधनजातिरेव स्वव्याघातात्, जातिर्द्विविधा साधनजातिर्दूषणजातिश्च तत्र साधनजातिर्महाविद्या, दूषणजातिः प्रतिधर्मसमाधिरिति विषयाणां निर्णयः। एतत्सर्वं विडम्बने विस्तरेण द्रष्टव्यम्। अतो वक्रानुमानस्य नानुमानत्वप्रसङ्ग इति।

हेतु—तदाभासादिविभागः ॥ ४६ ॥

पूर्वोक्तव्याप्तिग्रहणानुपपत्तिं पूर्वं परिहृतामपि सिंहावलोकितेन प्रकारान्तरेण परिहरति। साध्येनेति।

मू० साध्येन व्याप्तिमेके जगदुरिह सकृद्दर्शनेनैव
गम्यां शङ्कानिर्धूतिमात्रं फलमिति च परं
भूयसां दर्शनानाम्। धूतोपाधिस्तु योगः
स्फुरति बहुविधैर्दर्शनैरेव पश्चात्तज्जात्याधा-
रभावाद्युगपदखिलमप्यत्रसंबन्धि तत्र ॥ ४७ ॥

टी० भूयोदर्शनेनैव व्याप्तिरवगम्यत इति न्यायवित्संप्रदायः। एकदेशिनस्तु प्रथमदर्शनेनैव व्याप्तिर्गृह्यते, किमर्थं तर्हि भूयोदर्शनमित्यत्राह। शङ्केति। आद्येनैव दर्शनेन व्याप्तिर्गृह्यते भूयसां तु दर्शनानां व्यभिचारशङ्कानिराकरणमात्रं फलमित्यर्थः। तर्हि तर्कस्य किं फलमित्यत्राह। धूतोपाधिस्त्विति। प्रथमदर्शनेनैव व्याप्तिग्रहणं भूयोदर्शनैर्व्यभिचारशङ्कानिराकरणं तर्केण पुनर्व्यभिचारशङ्कानिदानभूतोपाधिनिराकरणमिति विभागः। अस्तु तावदयं

Digitized by Google

क्रमः । अथापि व्याप्तिग्रहणं किं सर्वव्यक्त्युपसंहारेण उत कतिपयव्यक्त्युपसंहारेण द्वितीये व्याप्तिरेव न संभवति प्रथमे सर्वव्यक्त्युपसंहारे सर्वव्यक्तिसंबन्धाभावादिन्द्रियस्य कथं ग्रहणमित्यत्राह । तज्जात्याधारभावादिति । अयं भावः इन्द्रियेण तावत्सन्निहिता व्यक्तिस्संबद्धा तत्समवेतत्वेन जातिः तदाधारतया तद्विशेषणत्वेन सर्वा व्यक्तयः, तथा चेन्द्रियेण सह संबन्धविशेषणत्वेन सर्वव्यक्तीनां संबन्धः । अतः सर्वव्यक्त्युपसंहारेण व्याप्तिग्रहणोपपत्तिरिति । अस्मिन्नर्थे किं प्रमाणमिति चेत् आबालगोपालमानुमानिकव्यवहारानुपपत्तिरेव किमानुमानिकव्यवहारो नास्ति किं वा तद्व्याप्तिमन्तरेण संभवति । अथवा व्याप्तिरज्ञाताऽप्यनुमानाङ्गं भवति । अथवा व्याप्तिज्ञानापेक्षायां प्रकारान्तरेण व्याप्तिज्ञानं संभवति, अथवा न प्रकारान्तरेण नानेनापि प्रकारेण व्याप्तिज्ञानं संभवतीति । नाद्यः, लोकोपलम्भविरोधात्, न द्वितीयः अकारणककार्योत्पत्तिप्रसङ्गात्, अत एव न तृतीयः, व्याप्तिज्ञानमन्तरेणानुमानादर्शनात् । न चतुर्थः तस्याप्युपायस्य त्वदुक्तदोषग्रस्तत्वस्य वक्तुं शक्यत्वात्, न पञ्चमः व्याप्तिज्ञानोपायाभावे व्याप्त्यभावेन सर्वानुमानोच्छेदप्रसङ्गात् । व्याप्तिभञ्जकानुमानतर्कयोरपि व्याप्तिबाधेन विवक्षितासिद्धेः, तयोर्व्याप्तिज्ञानविधुरयोरपि बाधकत्वे साधकानामपि तद्विधुराणां साधकत्वं स्यात् अस्मदुक्तप्रकारेण व्याप्तिज्ञानसाधने अस्माकमपि तथैव स्यादिति । तर्हि प्रमेयत्वाभिधेयत्वयोर्व्याप्तिग्रहणे सर्वोपसंहारात् भवतस्सार्वज्ञ्यं स्यादिति चेत् भवतोऽपि तर्हि सार्वज्ञ्यं स्यात् अन्यथा कथं सर्वज्ञत्वापादनं करोषि भवतः किञ्चिन्नाविदितं स्यादित्यापादयामीति चेत् किं सर्वेष्वपि पदार्थेषु किञ्चिन्नाविदितं स्यादित्यापादयसि यद्वा येषु केषुचिदर्थेषु उत्तरत्र न सार्वज्ञ्यापादनं पूर्वत्र सर्वेष्वपि पदार्थेषु किञ्चिन्नाविदितं स्यादिति वदतो-

Digitized by Google

भवतोऽपि सार्वज्ञ्यं स्यात् सामान्याकारेण सर्वम्मम विदितं विशेषतो न विदितमिति चेत् ममाप्येवमेवेति समस्समाधिः अतस्सामान्याकारेण व्याप्तिग्रहस्य वादिप्रतिवादिसाधारणत्वान्नैकः पर्य्यनुयोक्तव्य इति न्यायः, यदि कतिपयव्यक्तिग्रहणमात्रेऽपि व्याप्तिग्रहणमङ्गीकृत्य प्रतिकूलानुमानं प्रतिकूलतर्कञ्च वदसि तच्चास्माकमपि समानं, तस्मात् सुस्थितमनुमानम् ।

इति व्याप्तिग्रहणप्रकारः ॥ ४७ ॥

अथ व्याप्त्यादिविभागप्रकारं विशदयति । अस्मिन्निति ।

मू० अस्मिन् सत्ये तदस्तीत्यवितथनियतेरन्वयव्याप्त्यभिख्या तस्याभावे तु तन्नेत्ययमपि नियमस्तौ पृथक् चापृथक्च । तस्मात् त्रेधानुमानं कतिचिदकथयन्नेकहानाद्द्विधैके कश्चिच्चेद्व्याप्तियुग्मप्रिय इह भविता वर्णयत्वैकविध्यम् ॥ ४८ ॥

टी० हेतुसद्भावे साध्यसद्भावोऽन्वयः । व्यतिरेकव्याप्तिमुदाहरति । तस्येति । साध्याभावे साधनाभावो व्यतिरेकः न पुनस्साधनाभावे साध्याभावः । यथाहुः ।

व्याप्यव्यापकभावो हि भावयोर्य्यादृगिष्यते ।
तयोरभावयोस्तस्माद्विपरीतः प्रतीयते । इति ॥

एतौ व्याप्तिप्रकारावन्वयव्यतिरेकिणि उभावेव वर्त्तेते केवलान्वयिनि केवलव्यतिरेकिणि च पृथगेव वर्त्तेते इति न्यायसंप्रदाय इत्याह । ताविति । अतोऽनुमानत्रैविध्यमिति च दर्शयति । तस्मा-

Digitized by Google

दिति । कुमारिलादयो व्यतिरेकिणं निरस्यन्ति वादीन्द्रादयोऽन्वयि-नमिति विशेषं दर्शयति । एकहानादिति । एवमन्वयव्यतिरेकिमा-त्रसक्तो यदि कश्चिद् भविष्यति स त्वन्वयव्यतिरेकिणमेवाङ्गीकृत्य तद्‌द्वयमपि प्रतिविपद्यत्वित्याह । कश्चिच्चेदिति । अयमत्र भावः अन्व-यव्यतिरेकिवत् केवलान्वयी न प्रतिक्षेप्यः अन्वयस्य निश्चलत्वात् केवलव्यतिरेकिणं वयमेव प्रतिक्षेप्स्याम इति ।

इति व्याप्त्यादिविभागः ॥ ४८ ॥

एवं केवलान्वय्यङ्गीकारे महाविद्याऽप्यङ्गीकार्य्या तस्या अपि केवलान्वयित्वात् तथा च पूर्वोक्तं तन्निराकरणं न युज्यते किञ्च सकलसपक्षवृत्तिः केवलान्वयी महाविद्येत्युच्यते तच्च न सम्भवति प्रमेयत्वाभिधेयत्वादीनां सर्वस्थत्वे स्वात्मन्यपि वृत्तिप्रसङ्गात् तद-भावे केवलान्वयित्वाभावादिति चोदयति । सर्वस्थ इति ॥

मू० सर्वस्थः केवलान्वय्यघटितसरणिः स्यात् स्व-वृत्तेर्विकल्पे साध्ये स्वस्मान्निवृत्तेर्भवति च स तदा साध्यहानेर्विपक्षः । हेतोस्तद्वृत्त्यवृत्त्यो-रभिमतविहतिस्तत्र चैवं विकल्पादित्युत्प्रे-क्षाविभागं विघटयतु न वा सर्वथा व्याप्ति-सिद्धिः ॥ ४९ ॥

टी० तदेव विवृणोति । साध्य इति । साध्यं स्वस्मान्निव-र्त्तते न वा न निवर्त्तते चेदात्माश्रयः निवर्त्तते चेत्तद्विपक्ष एव, तदि-दमाह । साध्य इति । विपक्षभूते तस्मिन् साध्ये हेतुर्वर्त्तते न वा यदि वर्त्तते विपक्षवृत्तित्वेन हेतुत्वमेव भज्येत, यदि न वर्त्तते प्रमेयत्वा-भावात् साध्यस्य साध्यत्वं व्याहन्येत तदेतदाह । हेतोरिति । एवं

Digitized by Google

प्रमेयत्वादिहेतौ साध्यं वर्त्तते न वा न चेद्धेतुरेव विपक्षः स्यात् तस्मिन् विपक्षभूते हेतौ हेतुर्वर्त्तते चेदात्माश्रयः विपक्षगामित्वाद्व्यभिचारश्च, न वर्त्तते चेत् कथमिव केवलान्वयित्वं हेतोः क्वचिद्व्यतिरेकस्यापि दर्शनात्, यदि हेतौ साध्यं वर्त्तते स तु हेतुः सपक्षः स्यात् तत्र हेतुवृत्तावात्माश्रयः अवृत्तावप्रमेयत्वाद्धेतोरेवासिद्धिः किञ्च हेतुसाध्ययोर्द्वयोरपि सपक्षत्वादन्योन्यवृत्तावन्योन्याश्रयप्रसङ्गः अवृत्तौ कथमिव केवलान्वयित्वम् इत्थं बहुविधतर्ककर्कशं महाविद्यानुमानं न प्रतितिष्ठतीत्याह । तत्र चैवं विकल्पादिति । यथासंभवं विकल्पानां भूयस्त्वादित्यर्थः । इयमुत्प्रेक्षा केवलान्वयिरूपमहाविद्यादिविभागं विघटयतु न वा सर्वथा अन्वयव्यतिरेकिसद्भावाद् व्याप्तिरभङ्गुरेत्याह । इतीति । न वेत्युक्त्या विभागविघटनं न सिध्यतीत्यभिप्रैति । अयमभिप्रायः महाविद्या चेत् स्वाव्याघातादिभिः प्रागेव दूषिता । अभिधेयत्वादिसाधकं प्रमेयत्वादिकन्तु सर्व*था केवलान्वयि च भवति तस्य त्वदुक्तदूषणाभासैरपाकरणशङ्कापि नाङ्कुरतीति ॥ ४९ ॥

केवलान्वयिविशेषमुदाहृत्य पूर्वोक्तदूषणाभावं दर्शयति । तत्तदिति ।

मू० तत्तद्धीव्यक्तिभेदात्प्रमितिविषयता मान-
सिद्धा घटादौ प्रत्यक्षत्वञ्च तद्वत्तदिदमुभय-
मध्यक्षसिद्धं तथैव । इत्यन्तकृत्स्यवृत्तिव्यति-
करकलहैः केवलान्वय्यपोहे दुर्वारश्शून्यवा-
दो न तमभिमनुषे स्थापयन् किञ्चिदिष्टम्॥५०॥

* सर्वस्यामिति युक्तः पाठः ।

टी० धर्मादयः कस्यचित् प्रत्यक्षाः प्रमेयत्वादिति केवलान्वयिनमुदाहरन्ति न्या*यविदः तच मेयत्वं स्वात्मनि वर्तते वा न वा प्रत्यक्षत्वं स्वात्मनि वर्तते वा न वेति साध्यसाधनविषयविकल्प एव दूषणाङ्कुरः तच स्वात्मनि वृत्तौ न कश्चिदपि दोषः स्वपरनिर्वाहकसमाधेस्सर्ववादिसाधारणत्वात् औपाधिकधर्माणां यावदुपाधिवृत्तिमेवाङ्गीकुर्वन्ति विपश्चितः एकं हि वस्तु प्रमाणेन सिध्यति अतस्तत्प्रमेयं तच्च प्रमाणान्तरेण तच्च तदन्येन प्रमाणेनेति प्रमेयत्वं सर्वसाधारणमेव । एवं वाच्यत्वादिकमपि अतो व्यक्तिभेदेन प्रमेयत्ववाच्यादीनां यावदुपाधिव्यक्त्यङ्गीकारावश्यम्भावेन नात्माश्रयदोषः नाप्यन्योन्याश्रयदोषः प्रमेयत्वस्याभिधेयत्वात् अभिधेयत्वस्यापि प्रमेयत्वात्, न हि दृष्टेऽनुपपन्नं नाम प्रमेयत्वमेव ह्यभिधीयते अभिधेयत्वमेव प्रमीयते व्यक्तिभेदेन विरोध उपशाम्यतीत्युक्तम् । उक्तञ्च यावदुपाधिवृत्तित्वं सर्वोपाधिकधर्मसाधारणम् इत्यमनङ्गीकारे शून्यवाद एव प्रसज्येत । न च भवान् शून्यवादी केवलान्वयिमात्रविडम्बनप्रवृत्तत्वात् । एतत्सर्वमभिप्रेत्याह । तत्तद्धीति । अयमत्र शब्दार्थः तत्तद्बुद्धिव्यक्तिभेदात् प्रमेयत्वस्यापि प्रमेयत्वे न दोषः प्रत्यक्षत्वञ्च प्रत्यक्षान्तरेण प्रत्यक्षं तथा च प्रमेयत्वं प्रत्यक्षत्वञ्च प्रत्यक्षान्तरेण प्रत्यक्षमित्युक्तम् इत्थं सत्युपरञ्जकधर्माणां स्ववृत्त्यवृत्तिविकल्पेन दूषणे नित्यसमा विषयिधर्माणां स्वविषयत्वाविषयत्वविकल्पेन दूषणे पुनरनुपलब्धिसमा एतादृशात्यन्तागतेर्विकल्पैर्दूषणकथने शून्यवादो दुर्वारः । भवान् पुनर्महाविद्यामेव विडम्बयन् न शून्यवादी तत्तत्स्थापनप्रवणत्वात् । तदिदमाह । न तमभिमनुष इति ।

---

* न्यायवादिन इति पाठान्तरम् ।

Digitized by Google

नात्माश्रयप्रसक्तिर्वा नान्योन्याश्रयसंस्थितिः ।
प्रमेयत्वाभिधेयत्वप्रसङ्गे सर्ववादिनाम् ॥
औपाधिकानां धर्माणां वृत्तिर्य्यावदुपाधि चेत् ।
प्रमेयत्वादिकं सुस्थमन्यथा व्याहतिस्तव ॥
व्याघातो यदि दोषो न को वा दोष इतीर्य्यताम् ।
दोषादोषविभागश्चेत् तस्यास्त्वं दूषकः कथम् ॥

इति केवलान्वयिविशेषनिरूपणम् ॥ ५० ॥

अथापि विप्रतिपन्नमभिधेयं प्रमेयत्वादिति केवलान्वय्यनुमानं निष्प्रयोजनं विप्रतिपत्त्यभावादित्याशङ्क्य परिहरति । ख्यातत्वादित्यादिना ।

मू० ख्यातत्वाच्छब्दवाच्यो विमतिविषय इत्यादिरूपेणा साध्ये व्यर्थोऽसौ हेतुरित्थं विमतिसमुदयासंभवादित्ययुक्तम् । व्याघातव्यक्त्यभावाच्छ्रुतिशकलबलात् कूटयुक्त्यादिभिर्वा पाकः कश्चित् प्रमुह्यन् प्रमितिगतिकथापक्तिमैर्हि प्रबोध्यः ॥ ५१ ॥

टी० पूर्वार्द्धेन तत्र हेतुमाह । व्याघातेति । अविचाराणां बालप्रायाणां व्याघातादिभिव्यक्त्यभावात् यतो वाचो निवर्त्तन्त इति श्रुतिशकलश्रवणात् प्रच्छन्नसौगतप्रवादाच्च व्यामुह्यन्ननेनानुमानेन प्रतिबोध्यत इति प्रयोजनवानेवायमनुमानप्रयोग इत्युत्तरार्द्धस्य भावः ।

इति केवलान्वयिविशेषप्रयोजनम् ॥ ५१ ॥

१ रूपे त्विति पा० ।

Digitized by Google

इत्थमन्वयव्यतिरेकिणं केवलान्वयिनञ्च व्याप्तिसंग्रहप्रका-रैर्हेतुभिरुपपाद्य केवलव्यतिरेकिणं निराकर्त्तुमुपक्रमते । पक्ष इति ।

मू० पक्षेऽन्यत्रापि साध्यं न मितमविदिते नापि संबन्धधीः स्यात् क्वापीत्यप्यस्य सिद्धावृजु-रविहतिमान्नास्ति सामान्यहेतुः । सत्यप्य-स्मिन्न शक्याधिकरणनियतिः स्वेच्छया सर्व-साम्याद्वैषम्यं दुर्वचं तत्प्रमितिकरणता क्वापि नावीतहेतोः ॥ ५२ ॥

टी० व्याप्तिग्रहणसापेक्षं प्रमितिसाधनमनुमानमित्यनुमानल-क्षणं व्याप्तिश्च साध्यसाधनयोः अतस्तदुभयज्ञानसापेक्षं व्याप्तिपरिज्ञानं-साध्यञ्च न क्वापि मितं, पक्षे मितञ्चेत् सिद्धसाधनं सपक्षे चेद्व्यतिरे-कित्वहानिः, विपक्षे चेद्व्याघातः, अविदिते संबन्धबुद्धिरसंभाविनी तदिदमाह । अविदित इति । ननु शब्दः क्वचिदाश्रितः गुणत्वात्, ज्ञानादयः क्वचिदाश्रिता इति सामान्यहेतुना सिद्धं साध्यमुपजीव्य विशेषविषयस्याष्टद्रव्यातिरिक्तद्रव्यानुमानस्य व्यतिरेकिरूपिणो व्याप्ति-रिति मतमनूद्य दूषयति । क्वापीति । साक्षात्साध्यसिद्ध्यभावेन विशेष-व्याप्तिकथने तावदार्जवं नास्तीति तदिदमाह । ऋजुरविहतिमान्नास्ति सामान्यहेतुरिति । यस्य येन व्याप्तिरभिधीयते तयोरन्यतरस्येतरेण सम्बन्धकथने तद्विशेषप्रतिपत्तिरुपयुज्यते न तु सामान्यस्य प्रति-पत्तिरिति भावः । यद्यन्यप्रतिपत्तिरन्यसंबन्धप्रतिपत्तावुपयुज्यते सर्व-त्राप्यन्यप्रतिपत्तिरन्यसंबन्धप्रतिपत्तावुपयुज्येत अन्यत्वा व्याघात् न हि गन्धवत्त्वपृथिवीत्वसंबन्धप्रतिपत्तौ गुणत्वद्रव्यत्वप्रतीतिस्तन्त्र-मिति भावः । अस्तु वा सामान्यहेतुर्विशेषसंबन्धोपयोगी । अथापि

Digitized by Google

परिशेषः कर्तुं न शक्यते भवदभिमतमाचे परिशेषप्रवृत्तेर्विश्रमाभा-वात् परस्परव्यावृत्त्या परिशेषानियमाच्चेत्याह । सत्यपीति । अस्मिन् परिशेषप्रमाणे कथं परिशेषानुपपत्तिरित्यत आह । स्वेच्छयेति । किं स्वेच्छया परिशेषः तथा सति परेच्छया वस्त्वन्तरपरिशेषोऽपि कर्तुं शक्यत इत्यर्थः । वस्तुवैधर्म्यात् परिशेषसिद्धिमाशङ्क्य परिहरति । वै-धर्म्यं दुर्वचमिति । यथा श्रोत्रेन्द्रियग्राह्यत्वात् शब्दः पृथिव्यादीनां गुणो न भवतीति साध्यते तथा तेनैव हेतुना विभूनां गुणो न भवतीति साधनादाकाशगुणत्वमपि भज्येत यथा विशेषगुणत्वादिति दिक्कालगुणत्वं बाध्यते एवं श्रोत्रेन्द्रियग्राह्यत्वाद्विभ्वन्तरगुणत्वमपि बाध्येत तथा च बाह्येन्द्रियग्राह्यत्वादतीन्द्रियगुणत्वमपि बाध्येत अत एव हेतोर्निरवयवगुणत्वमपि निर्दूयेत उपलक्षणमेतत् सर्वपरि-शेषानुमानेष्विति प्रसङ्गबाहुल्यं द्रष्टव्यं तर्कानुग्रहाद्वैधर्म्यमपि तत्तत्तर्कान्तरकथनेन बाधनीयम् अतः प्रमितिहेतुत्वं न केवलव्यतिरे-किण इत्याह । तदिति । तस्मादित्यर्थः ॥ ५२ ॥

उक्तार्थस्य विशदीकरणाय व्यतिरेकिणो विपक्षे व्यतिरेक-व्याप्तिदर्शनासम्भवमुक्तमप्यनुवदति । साध्याभाव इति ॥

मू० साध्याभावो विपक्षे कथमिव विदितस्तस्य
साध्याप्रसिद्धेर्भावात्मन्यमुष्मिन् प्रतिभट-
वपुषा ह्यत्र ते व्याप्तिसिद्धिः । इत्यज्ञाता-
न्वयेऽस्मिन् कथमिव सुशकः स्यादभावो
नियन्तुं हेतौ सारोऽन्वयोऽतः क्वचिदनुप-
धिकः केवलान्वय्यपीष्टः ॥ ५३ ॥

टी० साध्याप्रसिद्ध्या तद्व्यतिरेकोऽपि विपक्षे ज्ञातुं न शक्यत इत्यर्थः । अत्र केचिदाहुः यस्मिन् व्यतिरेकिणि साध्यं भावरूपं तत्र

व्यतिरेकग्रहणासंभवः व्यतिरेकस्याभावरूपत्वात् अभावस्य प्रतियोगिज्ञानमन्तरेणासिद्धेः प्रतियोगिनश्च पक्षादिषु न क्वापि सिद्धेः यथाभावरूपं साध्यं तत्र भावरूपो व्यतिरेकः स च भावो न प्रतियोगिग्रहणसापेक्षः भावत्वादेव, तथा च व्यतिरेक्यनुमानसिद्धिः । उदाहरन्ति च गौरितरेभ्यो भिद्यते सास्नादिमत्त्वादिति तत्र इतरेभ्यो भेदो हि इतरप्रतियोगिकान्योन्याभावस्तस्य चाभावरूपत्वाद्व्यतिरेक इतरत्वादिकं भावरूपं तस्मादभावरूपसाध्यव्यतिरेकस्य निरपेक्षप्रतीतिकत्वात्तेनैव हेतुव्यतिरेकस्य व्याप्तिग्रहणं युज्यत इति अयन्तु ग्राम्यजनविप्रलम्भ इत्याह । भावात्मनीति । अयं भावः व्यतिरेकस्य भावात्मत्वेऽपि व्यतिरेकव्याप्तिकथनावस्थायां साध्याभावरूपतया कथनमवश्यं भावि यदितरस्मान्न भिद्यते तत्सास्नादिमन्न भवतीति हि व्यतिरेकिव्याप्तिकथनम्, अन्यथा साध्यप्रतिभटत्वाभावे व्यतिरेकव्यवहारानुपपत्तेः, तथा च भावरूपत्वेऽभावरूपत्वे च व्यतिरेकस्य साध्यविरोधित्वेन ग्रहणावश्यंभावात् साध्याप्रसिद्धौ न प्रसिद्धिः साध्यं च पक्षादिषु न प्रसिद्धमित्युक्तं प्रागेवेति, अतोऽन्वयापरिज्ञाने व्यतिरेकपरिज्ञानं सर्वथा न शक्यमित्याह । इतीति । अस्मिन्—व्यतिरेक्यनुमाने, इत्थं केवलव्यतिरेकिणं निरस्य सर्वानुमानसारभूतमन्वयव्यतिरेकिणं प्रमाणतया निगमयति । हेताविति । अन्वयः व्यतिरेकसहितः अन्वये हेतौ सारः स्थि*राङ्गम् अतोऽन्वयव्यतिरेकी सर्वप्रधानः अन्वयव्यतिरेकाभ्यामर्थतत्त्वनिर्णयात्केवलान्वय्यपि क्वचिदिष्टः यत्र निरुपाधिकत्वादिनिर्णयः स्तर्कानुग्रहेण भवति यथा प्रमेयत्वादभिधेयत्वमिति स च हेतुरभीष्ट एवेति । अतः केवलव्यतिरेकी अभावविषयत्वे भाव-

* स्थिरांश इति पा० ।

Digitized by Google

विषयत्वेऽपि न साधक एव । अयं गौरिति व्यवहर्तव्य इति भाव-
विषयः, इतरेभ्यो भिद्यत इत्यभावविषय इति भेदः ।

इति केवलव्यतिरेकिभङ्गः ॥ ५३ ॥

ननु केवलव्यतिरेक्यभावे सर्वमपि लक्षणं निष्प्रयोजनं स्यात्
व्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनं तदुभयमपि केवलव्यतिरे-
क्यनुमानसाध्यमित्याशङ्कते । सन्त्यक्तेति ।

मू० संत्यक्तावीतहेतोरभिदुरमखिलं लक्षणा-
भावतः स्यान्नैवं लक्ष्मैव भेदस्तदवगमकमि-
त्याप्तवाक्ये तदुक्तिः । यद्वा गन्धादिरप्त्व-
प्रभृतिविरहितेष्वेव दृष्टो घटादिष्वाज्या-
दावन्वयी स्यादयमिव विमतेष्वेक लक्ष्मण्य-
पोहः ॥ ५४ ॥

टी० अभिदुरं भेदकानुमानाभावादभिन्नमित्यर्थः । निराकरो-
ति । नैवमिति । तत्र हेतुमाह । लक्ष्मैव भेद इति । विरुद्धधर्माध्यासो
हि भेदः लक्षणानि च विरुद्धधर्माः अतो लक्षणप्रतीतिरेव भेदप्र-
तीतिः अतो ऽनुमानसाध्यं नावशिष्यते लक्षणप्रतीतेरेव लक्षणप्रतीत्या
साधने पुनरात्माश्रयः । भवन्तोऽप्याहुः अयमेव हि भेदो भेदहेतुर्वा
यद्विरुद्धधर्माध्यास इति लक्षणस्यापि भेदत्वं, लक्षणातिरिक्तो भेदस्तु
भवद्भिरङ्गीकृतोऽपि नैरर्थक्यान्नास्माभिरङ्गीक्रियत इति भावः । कथ-
न्तर्हि लक्षणस्य भेदत्वं लक्षणं हि वाक्यरूपं स पुनर्न भेद इत्या-
शङ्क्य परिहरति । तदवगमकमिति । आप्तवाक्ये लक्षणत्वकथनमौ-
पचारिकमित्यर्थः । अथ वा लक्षणमनुमानम् । अन्वय्येव तदि-
त्याह । यद्वेति । तथा हि अबादिर्व्यतिरिक्ततया संप्रतिपन्नेषु घटा-

दिषु गन्धादिर्दृष्टः तमेव दृष्टान्तीकृत्य सन्दिग्धेष्वाज्यादिष्वबादिव्यतिरेकस्साध्यः तथा चान्वयित्वमेव अयमेव हि पक्षस्साधीयान् लोके हि व्यवहारानुसारिणा लक्षणेन सुशिक्षिताः पामराः परीक्षकाश्च विप्रतिपन्नेषु विषयेषु लक्षणानुरोधेनार्थतत्त्वं निर्णयन्तीति सार्वलौकिकमेतत्, अतो लक्षणाद्व्यतिरेकसाधनमन्वय्यनुमानफलमेव एवं क्वचिदनुमाने विनिश्चिते सर्वत्रापि लक्षणप्रयोगे केवलमन्वयित्वेनैव वैलक्षण्य*प्रसाधनं युक्तमिति दर्शयति । अयमिवेति ।

इति लक्षणनिरूपणम् ॥ ५४ ॥

एवं परोक्तचोद्यमन्यथा सिद्ध्या निराकृत्य परोक्तं लक्षणफलद्वयं विभज्य विशेषेण निराकरोति । भेद इति ।

मू० भेदोऽबादेर्घटादौ विदित इतरथा त्वप्रसिद्धिः पुरोक्ता कृत्स्नतोऽप्यन्वितो ऽसौ न विदित इति चेत् पक्षसिद्धिः कथं स्यात् । व्याहारेऽप्येवमूह्यं न खलु न विदितं तन्निमित्तं घटादौ नो चेत्तन्निमित्तव्यवहृतिनियमस्थापनं दुश्शकं ते ॥ ५५ ॥

टी० भवता खलु भेदो वा व्यवहारो वा लक्षणेन नियम्यत इत्यभिधीयते उभयमप्यसंबद्धं भेदे तावदुदामः—अयं घटोऽबादेर्भिद्यत इत्यनुमानं प्रयुज्यते अयमर्थः प्रसिद्ध एव, अन्यथा पाषाणादेरबादिभेदव्यवहाराभावप्रसङ्गः । अन्यथा पक्षस्याप्रसिद्धविशेषणत्वं पूर्वमुक्तमित्याह । इतरथेति । अस्तु प्रसिद्धोघटादेः प्रत्येकमबादिभ्यः-

* लक्षणप्रसाधनमिति पा० ।

Digitized by Google

भेदस्तथाऽपि कृत्स्नोव्यन्वितोऽबादिभ्यो भेदो न प्रसिद्धः तथा हि घटपाषाणकाष्ठादिकं प्रत्येकं जलविलक्षणतया उपलभ्यते तथाऽपि यावन्ति पार्थिवानि वस्तूनि परमाणुद्व्यणुकत्रसरेणुपूर्वकाणि मेरुसर्षपादीनि च तेषां सर्वेषां यौगपद्येन जलविलक्षणत्वं न पूर्वप्रसिद्धं तद्गन्धवत्त्वानुमानेन साध्यत इति अस्मत्पक्षः, तथा च न सिद्धसाधनमिति इदमनुवदति । कृत्स्नेति । परिहरति । पक्षसिद्धिरिति । अयं भावः प्रसिद्ध एव पक्षे साध्यं साध्यते प्रसिद्धिश्च पक्षस्य सपक्षविपक्षाभ्यां व्यावृत्तत्वेन तथा च कृत्स्नापि क्षोणी विपक्षव्यावृत्तत्वेन प्रसिद्धा चेदनुमेयं नावशिष्यते व्यावृत्तेरेवानुमेयत्वात् अप्रसिद्धा चेत् कथमनुमानस्य प्रसिद्धिः,* न हि पक्षप्रतीतिमन्तरेणानुमानं प्रवर्तेत इति व्यवहारेऽपि साध्ये दूषणमेतादृशं वाच्यमित्याह । व्याहारेऽपीति । व्यवहारस्यापि पूर्वमप्रसिद्धौ अप्रसिद्धविशेषणत्वं पक्षस्य, इयं पृथिवीति व्यवहर्तव्या गन्धवत्त्वादिति ह्यनुमानं प्रयुञ्जते तच्च प्रसिद्धमेव घटादौ अन्यथा क्वापि पृथिवीव्यवहारनियमप्रसिद्ध्यभावात् विप्रतिपन्नं जलमिति व्यवहर्तव्यं गन्धवत्त्वात् एवं विप्रतिपन्नं पृथिवीति व्यवहर्तव्यं स्नेहवत्त्वादिति वैपरीत्येनानुमानं प्रवर्तेत एवं व्यवहारे लोकव्यवहारविरोध इति चेत् एवन्तर्हि लोकव्यवहारादेव व्यवहारनियमे सिद्धे किमनेनानुमानेन । असिद्धे वा किमनेनानुमानेन स्वयमेव व्यवहारनियमस्थापकत्वाभावात् तदिदं सर्वमभिप्रेत्याह । नो चेदिति । अतो व्यवहारनियमस्य लोकप्रसिद्धिसिद्धत्वादेवानुमानमनर्थकमिति, कथन्तर्हि लक्षणेन तत्तदर्थव्यवहारस्थापनं वादिभिः क्रियते अनादिप्रसिद्धव्यवहारस्य नियामकधर्ममात्रप्रदर्शनं शिष्याणामिति न कश्चिद्दोषः, न

* प्रवृत्तिरिति पा० ।

Digitized by Google

खलु सर्वमपि शब्दार्थव्युत्पादनं लक्षणोपदेशेन लोकव्यवहारस्यैव प्रायेण नियामकत्वादिति ।

इति परोक्तलक्षणसाध्यत्वभङ्गः ॥ ५५ ॥

यद्येवं न्यायशास्त्रविरुद्धमपि भवद्भिरभिधीयते तर्हि न्यायशास्त्रस्य कथं धर्म्येषु विद्यास्थानेषु प्राधान्येनाभिधानं पुराणं न्यायेति यत्तदनुवदति । विद्यास्थानेष्विति ।

मू० विद्यास्थानेषु धर्म्येष्विह यदगणयन् विस्तरं न्यायपूर्वं तत्रापि ह्यक्षपादस्स इति न नियतिर्न्यायतत्त्वेऽनुगम्ये । नार्षत्वादिप्रधानं क्वचिदपि यदि वा वार्त्तिकं क्वापि युक्तं यद्वा नेयं कथञ्चिन्निखिलमपि न किन्निर्वहन्त्येवमन्ये ॥ ५६ ॥

टी० अस्तु न्यायस्य वेदाङ्गत्वं स पुनर्न्यायोऽक्षपादप्रणीत इति न नियमोऽस्तीत्याह । तत्रापीति । कस्तर्हि न्याय इत्यत्रोत्तरम् । न्यायतत्त्व इति । अनुगम्ये—अनुसर्तव्ये वेदान्तानुकूले विद्वद्विशेषनिर्मिते ग्रन्थे सति किमनेन वेदविरुद्धेनाक्षपादकल्पनेन । उक्तं खलु नाथमुनिभिः—वेदान्तानुकूलं न्यायशास्त्रं न्यायतत्त्वाभिधानेन तच्च परिगृहीतं यामुनाचार्य्यादिभिः । नन्वार्षं परित्यज्य कथं मानुषं परिगृह्यते,युक्त एव मानुषस्याप्युपपन्नस्य परिग्रहः आर्षस्याप्यनुपपन्नस्य परित्यागः, अन्यथा लोकायतस्यापि परिग्रहः स्यादित्याह । नार्षत्वेति । आर्षत्वमेव परिग्रहकारणं चेदृषिप्रणीतेषु ग्रन्थेषु वार्त्तिकारम्भो न स्यात् उक्तानुक्तदुरुक्तचिन्तारूपत्वाद्वार्त्तिकस्य, तदिदमाह । यदि वेति। अत्रापि नेत्यनुषज्यते इत्थमक्षपादप्रणीतस्य न्यायशास्त्रस्य वेदा-

Digitized by Google

न्तविरुद्धत्वमङ्गीकृत्यान्वा*रोहवादेन, त्याज्यत्वमभिहितम् इदानीं विरोध एव नास्तीति पक्षान्तरमाह । यद्वेति । अयं भावः अनवधानात् प्रणीते सूत्रे न क्वापि वेदान्तविरोधः व्याख्यातार एव स्वयमप्रतिपत्तिविप्रतिपत्तिभ्यामन्यथा व्याचख्युः तत्सम्यङ्न्यायविद्भिः परिशोधनीयमिति । अत्रोपपत्तिमाह । न किमिति । सर्वेऽपि हि व्याख्यातारः सूत्रभाष्यवार्तिकादिषु विरुद्धवदवभासमानमित्थमेव समादधते इत्यर्थः ।

इति व्यवहारशिखायां न्यायविस्तरविरोधनिस्तारः ॥ ५६ ॥

तर्हि न्यायानुसारे पञ्चावयवमनुमानमेव सर्वत्र प्रयुज्यताम् त्र्यवयवमपि क्वापि क्वापि प्रयुज्यते भावत्कैरेव विद्वद्भिः कथमित्याशङ्क्यानुमानावयवपरिमाणं निगम†यितुं परमार्थानुमानस्वरूपमाह । अन्यस्मा इति ।

मू० अन्यस्मै स्वप्रतीतं प्रकटयति यया वाक्यवृत्त्याऽनुमानं तत्रोदाहृत्युपेताऽप्यविकलमिह तद्बोधयेन्नोपनीतिः । युक्ता तूदाहृतिस्त्वोपनयनिगमना सप्रतिज्ञादिका वा वक्तव्या यावदुक्तैस्तदधिकमपि वा संमतत्वाद्यथेष्टम् ॥ ५७ ॥

टी० अयमर्थः यावदपेक्षितं तावद्वक्तव्यं यद् बौद्धपरिकल्पितमुदाहरणोपनयमात्रं तत्पक्षे साध्यव्यवस्थापनाभावादनादरणीयमेवेत्याह । तत्रेति । कियत्तर्हि वक्तव्यमित्यत्राह । युक्तेति । चोनुदाहरणान्तान् यद्वोदहरणादिकानित्युक्तक्रमेण त्र्यवयवत्वमेव प्रायेण

* अन्वारुह्य वादेनेति पा० ।

† नियमयितुमिति पा० ।

Digitized by Google

परिपूर्णमिति भावः । ये तु प्रतिज्ञामन्तरेण न हेतुप्रयोगः कर्तव्यः साध्यस्यैव प्रमित्सितत्वात् नापि हेतुप्रयोगमन्तरेण उदाहरणप्रसङ्गः, हेतुसाध्ययोर्व्याप्तिप्रदर्शनात्मकत्वात् उदाहरणस्य, न चोदाहरणमन्तरेणोपनयप्रसिद्धिः उदाहरणेन गृहीताविनाभावस्य हेतोस्तेनैवाकारेण पक्षधर्मताप्रदर्शनार्थत्वादुपनयस्य, न च हेतुना पौनरुक्त्यमुपनयस्य पक्षधर्मतामात्रं हेतोरर्थः व्याप्तस्य पक्षधर्मत्वमुपनयस्यार्थ इति विभागेनार्थनिर्णयात् न च निगमनं निरर्थकं वि*पक्षे बाधकप्रमाणाभावद्योतनार्थमग्निमानेवेति सावधारणसाध्यनिर्देशरूपत्वेन निगमनस्यापि सफलत्वात्, अतः पञ्चावयवयुक्तं वाक्यमेव परिपूर्णोपदेश इति मन्यन्ते तेषामपि पक्षमविरुद्धत्वादनुमन्यते । तदधिकमिति । अयमर्थः त्र्यवयवपञ्चावयवयोर्द्वयोरपि संमतत्वादस्मत्पक्षवादिना त्र्यवयवप्रयोगे पञ्चावयवप्रयोगे न न्यूनाधिकभावप्रसङ्ग इति ॥

इत्यनुमानप्रयोगावयवनिरूपणम् ॥ ५० ॥

नन्वनुमानप्रयोग एव कर्तुं न शक्यते परस्परविरुद्धाङ्गीकारप्रचुरत्वाद्वादिनः, तथा हि शब्दो द्रव्यं नित्यमिति कौमारिलाः, गुणो ऽनित्य इत्यन्ये । शब्दब्रह्मविवर्तो वृक्षादिशब्द इति शाब्दिकाः पञ्चभूतगुण इति पौराणिकादयः । आकाशगुण इत्यौलूक्याः, आक्षपादाश्चैवं । तथा च शब्दानित्यत्वाद्यनुमानं न संघटते एकेन परिगृहीतस्य पक्षस्य इतरेणाग्रहणात् तथा च परस्परविसंवादात् अन्यतरासिद्धिः । एवञ्चानुमानवार्तैव लोपुप्यत इतीमामाशङ्कां परिहरति । कार्य्यैरिति ।

मू० कार्य्यैर्वा कारणैर्वा स्वगुणत उत वा किञ्चिदस्तीति सिद्धं पक्षीकारादियोग्यं समयनिय-

---

* पक्षे इति पा० ।

Digitized by Google

मितव्यक्तिभेदो न दोषः। सिद्धान्तास्पृष्टचित्तैरिति खलु पशुभिः पामरैर्वाऽनुमेयं नो चेद्गोचेत कस्मै विषमितमनसे वादसंग्रामकेलिः ॥ ५८ ॥

टी० अयमभिसन्धिः पक्षस्य सामान्येन प्रसिद्धत्वमुपजीव्यं वादिप्रतिवादिनोर्न पुनरन्योन्यं विशेषप्रसिद्ध्यभावेन सामान्यप्रसिद्धस्य पक्षस्य पक्षत्वहानिः पक्षप्रसिद्धिश्च प्रत्यक्षेण चेदविवादमेव अनुमानेन चेत् कार्य्येण वा कारणेन वा तद्व्यतिरिक्तेनापि व्याप्तिविकल्परहितेन स्वगुणेन वा किञ्चिदस्तीति प्रसिद्धं पक्षीकाराहम् एवं सपक्षो विपक्षश्च प्रमाणप्रसिद्धत्वेन तत्तत्कोटिनिवेशार्ह इत्यादिशब्देनोच्यते पक्षीकारादियोग्यमिति एतच्च हेत्वादिष्वपि समानं ततस्तत्तत्सिद्धान्तप्रसिद्धिसिद्धव्यक्तिभेदो न दोष इत्याह। समयेति। एतच्च न केवलं वादिनामेव शास्त्रपरिज्ञानशून्यानामपि पश्वादीनां साधारणमित्याह। सिद्धान्तेति। इत्थमनङ्गीकारे वादिनां प्रवृत्तिरेव न स्यादित्याह। नो चेदिति। वादिनां वादादिप्रवृत्तिर्यथा न घटते तथा पामराणां प्रतिनियतप्रवृत्तिरपि न भवेदिति भावः। सर्वस्या अपि प्रवृत्तेरनुमानमूलत्वादनुमानस्य चोक्तप्रकारेणावान्तरविभागानादरेण वस्तुस्वरूपप्रमाणिकत्वमात्रावलम्बित्वादिति।

इति प्रतिज्ञादेर्लौकिकसिद्धानुसारित्वम् ॥ ५८ ॥

एवमनुमानमुक्त्वा तदङ्गभूततर्कतत्कर्त्तव्यतदवान्तरभेद—तदङ्गान्याह। तर्क इति।

मू० तर्को व्याप्याभ्युपेतावनभिमतपदव्यापकस्य प्रसक्तिर्मानप्रत्यूहघातिद्विविषय उदितः

पञ्चधाऽऽत्माश्रयादिः । विश्रान्तिर्वैपरीत्ये प्रतिहतिविरहोऽनिष्टताऽनानुकूल्यं व्याप्तिश्चास्याङ्गमेनं कतिचिदनुमितेस्तादृशं भेदमाहुः ॥ ५९ ॥

टी० अयमत्र श्लोकार्थः व्याप्त्यङ्गीकारेऽनिष्टव्यापकप्रसञ्जनं तर्क इति तर्कलक्षणं, तत्फलमाह । मानप्रत्यूहघातीति । विपक्षजिज्ञासाविच्छेदक इत्यर्थः । द्विविषय उदित इति तर्कावान्तरभेदकथनं, प्रामाणिकपरित्यागाप्रामाणिकस्वीकाररूपविषयद्वयोपेत इत्यर्थः । स चात्माश्रयान्योन्याश्रयचक्रकानवस्थाकेवलानिष्टप्रसङ्गभेदेन पञ्चविधः, प्रतिबन्दीति तर्कान्तरमाचक्षते केचित् तच्च केवलानिष्टप्रसङ्गावान्तरभेद इत्यपरे इत्याह । पञ्चधेति । वैपरीत्ये विश्रान्तिः—विपर्यये पर्य्यवसानं, प्रतिहतिविरहः—प्रतितर्कपराहत्यभावः । अनिष्टता—प्रसञ्जनीयस्यानिष्टत्वम् । अनानुकूल्यं—विरुद्धहेत्वाभासवत्परपक्षसाधकत्वाभावः, स्वपक्षपरपक्षयोर्द्वयोरपि साधारणमिष्टं परस्य परपक्षस्यैवासाधारणं परस्यानुकूलं तदुभयरूपविधुरमित्यर्थः, यथाऽनैकान्तिकः स्वपरपक्षसाधारणः यथा च विरुद्धः परपक्षस्यैवासाधारणः, तदुभयरूपरहितस्तर्क इत्यर्थः । व्याप्तिः पूर्वोक्ता एतत्परमङ्गं तर्कस्य इमञ्च तर्कं केचिदनुमानभेद इत्याहुरित्याह । एनमिति । नेदं निरात्मकं जीवच्छरीरं प्राणादिमत्त्वप्रसङ्गादित्यनुमानभेदमाचक्षते केचिन्न्यायवादिन इति भावः ।

इति तर्कलक्षणफलावान्तरभेदाङ्गादिः ॥ ६० ॥

इत्थं तर्कस्वरूपमुक्त्वा दुस्तर्कावलम्बनेन सर्वोपलापवादिनः कथानधिकारादिकमाह । यस्सर्वमिति ।

मू० यस्सर्वं नाभ्युपेयात् स्वपरमतविदा केन कि-

Digitized by Google

न्तस्य साध्यं प्रश्नोऽसावुत्तरं नः कथमनधिकृते कल्पनीयाः कथाः स्युः । मध्यस्थोऽप्येतदेवं यदि न न मनुते योजयेन्नात्र वादं नोचेन्माध्यस्थ्यहानिः परमनधिकृतिस्तस्य शिष्याय वाच्या ॥ ६१ ॥

टी० अथ कश्चित् पृच्छति यस्सर्वमपि दूषणभूषणवादिप्रतिवादिस्वपक्षपरपक्षादिविभागं नाङ्गीकरोति स्वपरमतविदा विदुषा केन किन्तस्य साध्यमिति नायं तावत्प्रतिक्षेपः हेत्वाद्यनुपादानात् उपादाने वा यस्सर्वं नाभ्युपैतीति वचनस्य नायं विषयः हेत्वादेरेवाभ्युपगमात् अतश्शिष्यप्रश्नोऽयमित्यवशिष्यते तदिदमाह । प्रश्नोऽसाविति । तत्रोत्तरमाह । उत्तरं न इति । कथमुत्तरमित्यत्राह । कथमनधिकृत इति । न हि बालमूकोद्भ्रान्तादिभिर्वादं कुर्वते वादिनः, न च तदकरणात् सर्ववादिनां विदुषामतिशयस्य काचिद्धानिः एवमनधिकृतैस्सर्वानङ्गीकारवादिभिरव्यवहारे न कश्चिद्विपश्चितां दोष इति भावः । यदि भवतैवमुच्यते तत्तेन गौरवाय मध्यस्थवचनमेव सर्वनियामकमिति वदतामुत्तरमाह । मध्यस्थ इति ।

मध्यस्थोऽप्युद्भ्रान्तवदयथायथवादिनां वादाधिकारो नास्तीति यदि न न मनुते मनुत इत्यर्थः द्वौ नञौ प्रकृतमर्थं सूचयत इति यद्येवं जानाति मध्यस्थः वादमेव तेन न प्रवर्तयेत् न ह्युद्भ्रान्तादिभिर्वादं मध्यस्थाः प्रवर्तयन्ति ।

यदि पक्षपातात् प्रवर्तयति तर्हि मध्यस्थ एव न स्यादित्याह । नो चेदिति । ननु सर्वानङ्गीकारवादिनो वादानधिकार इति यदि तं प्रति वदसि तस्य वादाधिकारं स्वयमेवानुमन्यसे तस्मिन्नेव

वादेऽधिकारात् । यद्यन्यं प्रति अन्यस्य प्रतिवादित्वाभावात् कथं व्याघातादिदोषोऽभिधीयेत न हि दोषाभिधानमन्तरेण वादाधिकारनिराकरणं वक्तुं शक्यते । अपेतरम् । वरमिति । उद्भ्रान्तवत् सर्वानिर्वचनीयत्ववादिनो दुर्वादिनो वा वादानधिकारिण इति शिष्यादीनामुपदिश्यते ।

इति कथानधिकाराधिकारादिः ॥ ६१ ॥

अथ वादिप्रतिवादिनोर्विवादस्थानभूतां कथां तद्विशेषानप्याह । निर्दिष्टेति ।

मू० निर्दिष्टाऽप्युत्थितोक्तेर्विहृतिरिह कथा सा त्रिधा तत्र वादः कर्त्तव्योमानतर्कैरभिमतिनियतैस्तत्त्वसिद्धौ विरागैः । जल्पाख्याऽन्या जयार्था भवति कथकयोस्साधनाक्षेपवत्त्वे सैव प्रोक्ता वितण्डा त्यजति परमते साधनं तां द्विधैके ॥ ६२ ॥

टी० परस्परविरुद्धवादिनोर्व्यवहारः कथा, सा त्रिधा वादजल्पवितण्डाभेदात्, वादे प्रमाणतर्कौ साधनं प्रामाणिकत्वाभिमानपरिगृहीतौ प्रमाणतर्कावित्यर्थः, प्रयोजनं पुनस्तत्त्वसिद्धिः तत्त्वज्ञानम् अधिकारी वीतरागः । वादाज्जल्पस्य विशेषमाह । जल्पेति । जयार्थी जल्पाधिकारी अत एव न वीतरागः उभयोरपि वादिनोस्साधनवत्त्वे जल्पः, अन्यतरस्य स्वपक्षसाधनवत्त्वे परस्य दूषणमात्रशरणत्वे वितण्डा तत्रापि वैतण्डिकस्य दूषणसमर्थनं कर्तव्यम् अन्यथा वैतण्डिकव्यवहारः प्रलापमात्रमेव स्यात् । एतमेव विभागमाह । सैवेति । जल्परूपा कथैव वितण्डा अपि तु परमते साधनं त्यजतीत्यर्थः ।

तां द्विधेव इति । वितण्डायामपि द्वैविध्यमाहुरेके वीतरागवितण्डा विजिगीषुवितण्डेति । अयं भावः स्वपक्षसाधनं परपक्षदूषणं साधनदूषणसमर्थनं शब्ददोषवर्जनमिति पञ्चाङ्गो वादः, एकस्मिन् वादे वादिप्रतिवादिनावधिकारिणौ तत्र वीतरागकर्तृकवादद्वयसमुच्चयेन वीतरागकथारूपो वादः प्रवर्त्तते । एवं विजिगीषुकर्तृकवादद्वयसमुच्चयेन विजिगीषुकथारूपो जल्पः जल्पाद्दूनेकेनैव वादेन यथा विजिगीषुवितण्डा तथा वादाद्दूनेकेनैव वादेन वीतरागवितण्डेति । अत्र वितण्डाशब्दोऽन्यतरसाधनवत्त्वसाधर्म्यादिति मन्तव्यं दृश्यते चेयं वीतरागवितण्डा आदौ तावदाचार्य्यो वदति शिष्यस्सोपपत्तिकमेवानुयुङ्क्ते आचार्य्योऽपि सोपपत्तिकमेव परिहरन् शिष्यचोद्यं परिहरति ।

इति कथातदवान्तरविभागादिः ॥ ६२ ॥

वितण्डायामपि वादिप्रतिवादिव्यवस्थानुपालनं कर्त्तव्यमित्याह । कर्त्तव्यत्वेनेति ।

मू० कर्त्तव्यत्वेन यत्तु प्रमितिपरवशैः कल्पितं स्वेच्छया वा यच्चाकर्त्तव्यमेवं परिभवनपदं तत्प्रहाणग्रहौ स्तः । स्वाचारद्यूतसंपत्प्रभृतिषु च तथा स्वीकृतेयं व्यवस्था नैनामीषद्वितण्डाऽप्यलमतिपतितुं साधनांशोज्झिताऽपि ॥ ६३ ॥

टी० कर्त्तव्यत्वेन प्रमितिपरवशैः कल्पितं स्वपक्षसाधनादि, अकर्त्तव्यत्वेन कल्पितं छलजातिनिग्रहस्थानादि, स्वेच्छया कल्पितं निरोष्ठ्यव्यवहारोदन्त्यव्यवहारः, उक्तशब्दस्य पुनरनभिधानं लुङः प्रयोगः, यङ्प्रयोगोयङ्‌प्रयोग इत्यादिकं शब्दविषयम् अनुमानेनैव

Digitized by Google

साधनमागमेनैव साधनं वक्तानुमानेनैव साधनं वैदिकागमेनैव साधनमित्यादिकं प्रमाणविषयम् । एवमन्यदपि वादिप्रतिवादिप्रोक्तिप्रकाशनार्थं कल्पनं द्रष्टव्यम् । एतत्परित्यागे निग्रह इत्याह । परिभवनपदमिति । नियमातिलङ्घने परिभवनं स्वकुलाचारद्यूतादिष्वपि दृष्टमित्याह । स्वाचारेति । सर्वा चेयं व्यवस्था वादजल्पयोरेव वैतण्डिकस्य न काचिद्व्यवस्थेत्याशङ्क्य परिहरति । नेनामिति । साधनांशोज्झितापीति वितण्डायां स्वपक्षसाधनाभावेऽपि दूषणसद्भावसमर्थनात् सर्वापि व्यवस्था वैतण्डिकेनाप्यङ्गीकार्येत्यर्थः ।

इति वितण्डायामपि व्यवस्थाऽनुपालनम् ॥ ६३ ॥

इत्थं वैतण्डिकस्यापि दोषादोषव्यवस्थानुपालनमुक्त्वा निग्रहस्थानलक्षणतद्विभागादिकं दर्शयति । सद्दोषेति ।

मू० सद्दोषोक्त्या कथयां परपरिभवनं स्वोक्तहान्यादिनाम्ना तत्त्वाबोधस्य लिङ्गं विविधमकथयन्निग्रहस्थानमाप्ताः । तत्राचोद्यानुयोगं द्विविधमशकनासिद्धिभेदादवोचन् पूर्वा जातिः परस्तु च्छलमनृतवचः स्यादकालग्रहश्च ॥ ६४ ॥

टी० वादिप्रतिवादिभ्यां दोषत्वेनाङ्गीकृतानामभिधानेन कथायां परेषां परिभवनं निग्रहो भवति । प्रतिज्ञाहान्यादिनाम्ना वक्तव्यमित्याह । स्वोक्तेति । निग्रहस्थानलक्षणमाह । तत्त्वेति । अप्रतिपत्तिविप्रतिपत्तिश्च निग्रहस्थानमिति निग्रहस्थानलक्षणसूत्रं तस्याभिप्रायस्तत्त्वाप्रतिपत्तिसूचकं निग्रहस्थानमिति अप्रतिपत्तिविप्रतिपत्त्योर्द्वयोरपि तत्त्वाप्रतिपत्तिसूचकत्वादिति वादेऽपि कथाऽवसानहेतुत्वेना-

त्वन्तानुपादेयस्य निरनुयोज्यानुयोगस्य विभागान् दर्शयति । तत्रेति जातिः, छलं प्रतिज्ञाहान्याद्याभासोऽप्राप्तकाले ग्रहणमिति चतुर्विधो निरनुयोज्यानुयोगः स च जातिरजातिरिति द्विविधः अजातिरपि छलमच्छलमिति अच्छलमपि हान्याद्याभासस्तदन्यच्चेति तत्र छल-जात्योर्वैषम्यमाह । अचोद्यानुयोगं द्विविधमशक्तनासिद्धभेदादवो-चन्निति । सिद्धमपि दूषणासमर्थं जातिः दूषणासमर्थमप्यसिद्धं छल-मिति विभागः । तदिदमाह । पूर्वा जातिः परस्तु च्छलमिति । अनृ-तवचः—अविद्यमानस्य वचनं हान्याद्याभासवचनम्, अकालग्रहः अप्राप्तकाले ग्रहणम् ।

इति निग्रहस्थानलक्षणविभागादिः ॥ ६४ ॥

अथ च्छलजात्योर्लक्षणविभागमाह । जातिरिति ।

मू० जातिः स्वव्याहता वागुपधिनियतिभिर्भि-द्यतेऽनेकधा सा युक्तत्यागस्त्वयुक्तग्रहणम-विषये वृत्तिरप्यत्र दोषाः । स्वव्याघातोऽनु-वृत्तच्छलमपि वचसां कल्पितार्थे निषेधस्त-त्सद्भक्तिप्रभेदादिदमपि विविधं विस्तरेणा-लमत्र ॥ ६५ ॥

टी० स्वव्याघातकमुत्तरं जातिः दूषणाशक्तमुत्तरं जातिरिति मतभेदेन पूर्वमुक्तं सा जातिरवान्तरलक्षणनियतिभिः प्रतिधर्मसमा-दिभेदेनाऽनेकधा भिद्यत इति दर्शयति । उपधीति । जातिषु विशे-षदोषान् कथयति । युक्तेति । युक्ताङ्गत्यागोऽयुक्ताङ्गस्वीकारोऽविषय-वृत्तिस्त्वश्चेति हि जातिदोषविशेषाः सर्वजात्यनुवृत्तस्तु दोषः स्वव्या-घातः । छललक्षणमाह । छलमपीति । कल्पितदूष्यदूषणाभिधानं

Digitized by Google

छलमित्यर्थः, इदञ्च छलं तत्तच्छब्दप्रवृत्तिभेदात् मुख्योपचारतात्पर्य्य-वृत्तिभेदेन त्रिविधम् अस्यार्थस्यानेकेषु ग्रन्थेषु प्रसिद्धत्वात् किमत्र विस्तरेणेति विस्तरानादरः ।

इति जात्यादिलक्षणविभागादिः ॥ ६५ ॥

उक्तदोषेष्वन्यतमस्यापि संभवे द्वितीयादिकक्ष्यायामेव वाद-विच्छेदः स्यात् किमनया षट्पक्षीकल्पनयेत्याशङ्कमानस्योत्तरं वदति । यस्मिन्निति ।

मू० यस्मिन्मानप्रवृत्तिस्तदिदमशरणैरभ्युपेत्यं हि सर्वैर्व्याघातो यत्र दृष्टस्तदपि न शरणं साधने दूषणे वा । इत्थं सिद्धे कथानां रहसि कथकयोस्सावधानत्वभूम्ने षट्पक्ष्यन्ता सदुक्तिः परिषदनुमता रुद्धरोधावकाशा ॥ ६६ ॥

टी० अयमर्थः यत्प्रमाणेन प्रतीयते तत्सर्वैरपि वादिभिरङ्गी-कार्यं यत्र पुनस्साधने दूषणे वा व्याघातो दृश्यते तदपि न शरण-मेव स्वपक्षसाधने परपक्षदूषणे वाऽनुपाय इत्यर्थः इत्थं कथानां तिसृ-णामपि सिद्धे रहस्ये यद्यपि द्वितीयादिकक्ष्यायामेव दूषणं मध्य-स्थैरवलोक्यते तथाऽपि कथकयोस्सावधानत्वसिद्ध्यर्थं षट्पक्षीपर्य्यन्ता पुनरुक्तिर्मध्यस्थैरनुमता भवति । तत्र हेतुमाह । रुद्धेति । षट्पक्षी-पर्य्यन्तं मध्यस्थानां निवारणावकाशाभावादित्यर्थः तथा हि द्विविधा हि कथा सत्साधनोपक्रमा तावदेका अपरा पुनरसत्साधनोपक्रमा पर्य्यनुयोज्योपेक्षणञ्च मध्यस्थैर्वक्तव्यम् उभयोरपि वादिनोर्दुष्टत्वात् अन्यतरदोषमात्रकथने माध्यस्थ्यमेव हीयेत तथा च सत्साधनोपक्र-मकथायां वादीन दुष्टः असदुत्तरकथने द्वितीयकक्ष्यायां प्रतिवादी दुष्टः

Digitized by Google

तत्र वादिना तृतीयकक्ष्यायां दुष्टवचनपरिग्रहे वादिनः पर्य्यनुयोज्योपेक्षणम् अयमेव च मध्यस्थानां वक्तुमवसरः अथ मध्यस्थाः प्रतिवादिनो यथावस्थितवचनसंभवमपेक्षन्ते स पुनरयथैव भाषते तत्र चतुर्थकक्ष्याप्रवृत्तिः ततो वादिनमपेक्षन्ते सोऽप्ययथैव भाषते अथ पञ्चमकक्ष्या प्रवर्तते। अथ वादिप्रतिवादिनोः स्तम्भे सभापतिप्रश्नमपेक्षन्ते स पुनर्न पृच्छति तस्मिन्नवसरे प्रलाप एव प्रतिवादिन इति षष्ठी कक्ष्या एवं सत्साधनोपक्रमकथायां षट्पक्षी असत्साधनोपक्रमकथायां पञ्चैव पक्षाः द्वितीयकक्ष्यायामेव पर्य्यनुयोज्योपेक्षणस्य प्रवृत्तेरिति विभागः। ततः षट्पक्ष्यादिकमनुसृत्य मध्यस्था निवारयन्तीति न्याय्यमेतत्।

इति षट्पक्षीसम्भवः ॥ ६६ ॥

इत्थं प्रमाणाभासप्रवृत्तिरूपां षट्पक्षीमुक्त्वा सौगतसमयानुवर्तिना येन केनापि परिकल्पितस्य वाक्याद्वाक्यार्थानुमानस्य प्राभाकरवैशेषिकपरिकल्पितयोर्वक्तृज्ञानानुमानयोराभासत्वं वक्तुमारभते। वाक्यार्थे इति।

मू० वाक्यार्थो यस्त्वपूर्वो न खलु किमपि तद्व्याप्यमस्मिन् पदादौ संगत्यं बोधकत्वादधिकमनुमितौ ग्राह्यमत्रैतदेव वक्तृज्ञानानुमानादिकमपि न भवेदन्ततोव्याप्तिभङ्गात्तत्तल्लिङ्गाप्रतीतावपि मतिजननाद्वक्तृभावाच्च वेदे ॥ ६७ ॥

टी० कृत्स्नस्यापि वाक्यस्यानुमानरूपतामाहुः सौगता वैशेषिकाश्च प्राभाकरास्तु लौकिकवाक्यमात्रस्य,कथन्तत्रानुमानप्रवृत्तिरिति पृच्छामः विप्रतिपन्नानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि पदत्वा-

दिति यदि वदसि तदा न विशेषसिद्धिः, यदि संसर्गविशेषज्ञानपूर्वकाणि संसर्गविशेषवन्तीति सा तदा संसर्गविशेषो न प्रसिद्धः कथं व्याप्तिग्रहः, अनेनैव वाक्येन प्रसिद्धश्चेदन्योन्याश्रयः, अव्युत्पन्नेषु च पदेषु व्यभिचारः, न ह्यव्युत्पन्नानि पाठमात्रावगतानि पदानि स्मारितार्थसंसर्गज्ञानपूर्वकाणि व्युत्पन्नपदत्वादिति चेत् केयं व्युत्पत्तिः अभिधानशक्तिग्रहणमिति चेत् तर्हि पदसङ्घातेनैव वाक्यार्थसिद्धिः किमनयाऽनुमानकुसृष्ट्या वाक्याद्वाक्यार्थप्रतिपत्तिरिति हि लौकिका मन्यन्ते पूर्वमनुमानं पश्चाद्वाक्यार्थप्रतिपत्तिरनुवादरूपतयेति चेन्न अदर्शनात् न हि प्रयुक्ते वाक्ये द्विवारमर्थप्रतिपत्तिर्दृश्यते अतो वेदवल्लोकेऽपि वाक्यादेवार्थप्रतिपत्तिरिति प्राभाकरस्योत्तरं, वैशेषिकस्याप्युपलम्भविरोधः सर्वेऽपि व्यवहर्त्तारः शब्दादेव साक्षादर्थप्रतीतिमुपलभन्ते कल्पनागौरवञ्चोत्तरं शब्दादर्थप्रतीतिरिति कल्पने लाघवं वक्तृज्ञानानुमानपृष्ठलग्नवाक्यार्थप्रतीतिकल्पने गौरवम् । सम्बन्धभेदादपि प्रमाणभेदमाह । सांगत्यमिति । शब्दे केवलबोधकत्वमात्रं सम्बन्धः, अनुमाने व्याप्तिरिति विभागः एतदेव बोधकत्वम् । उक्तमर्थं संकलय्य विशदयति । वक्तृज्ञानेति । यदि वा पूर्वं वाक्यादर्थानुमानं परास्तम् अत्र वक्तृज्ञानानुमानपूर्वकमर्थसिद्धिर्निरस्यत इति न पौनरुक्त्यशङ्का बुद्धप्रभाकरवैशेषिकाणां निराकरणे न्यायतौल्यात् साधारण्येनास्माभिर्व्याख्यातं पूर्वमिति न दोषः । तत्र हेतुमाह । व्याप्त्यभावादिति । हेत्वन्तरमप्याह । तत्तदिति । तत्तद्वाक्युक्तलिङ्गाप्रतीतावपि वाक्यार्थप्रतीतिप्रसिद्धिप्राचुर्य्यादिति वैशेषिकस्य विशेषदूषणं प्रदर्शयति । वक्त्रभावाच्च वेद इति । ईश्वरानुमानं निरस्तमिति भावः ।

इत्यागमस्यानुमानाद् बहिर्भावः ॥ ६० ॥

Digitized by Google

अथ कश्चिदाह आगमजन्यमनुमानजन्यं वा परोक्षज्ञानमिति किञ्चिन्नास्ति किन्तु नानासंस्कारजन्यस्मृतिसमुच्चयमात्रमेव यथा प्रत्येकमनुभूतानां वृक्षादीनां समुच्चयेन सेनावनादिस्मरणं स्मरणमेव, एवं प्रत्येकानुभूतपदार्थस्मरणमेवागमजन्यं ज्ञानं तथाऽनुमानजन्यमपीति न स्मरणादतिरिच्यते परोक्षम् । तदिदमाशङ्कते प्रत्येकमित्यारभ्यानधिकमित्यनेन ।

मू० प्रत्येकं स्वानुभूतात्तदुभयमधिकं संस्कृतिद्वन्द्वयोगात् स्मृत्यारूढं विजानन्त्यनुमितिवचसोर्वेद्यमप्येवमस्तु । पारोक्ष्यं तत्स्मृतित्वादनधिकमिति न प्रागनिर्द्धारितांशं ज्ञानस्य स्पष्टदृष्टेः परिहि*तहरितस्त्वेतदस्पष्टमाहुः ॥ ६८ ॥

टी० परिहरति । नेति । तत्र हेतुमाह । प्रागनिर्द्धारितेति । अयमत्र भावः—वाक्यार्थे तावत्प्रागविदितसंसर्गविशेषस्सिद्ध्यति अतो न स्मृतित्वम्, एवमनुमानेऽपि पक्षनिष्ठं साध्यं सिध्यति अतोऽपूर्वार्थप्रतिपत्त्या न स्मृतित्वसिद्धिरिति । अयमत्र निर्णयः संस्कारे सत्यप्यपूर्वार्थप्रतिपत्तौ न स्मृतित्वम् । अन्यदा पुनः स्मृतित्वमिति अनुभव एव । परोक्षापरोक्षविभागं बाह्या अप्याहुरित्याह । परिहितेति क्षपणकाः खलु प्रत्यक्षपरोक्षविभागं स्पष्टमस्पष्टमिति विभज्य व्याचक्षते ।

इति परोक्षानुभावासिद्धिपरिहारः ॥ ६८ ॥

सर्वं वाङ्मयमप्रमाणमिति वादिनं प्रतिक्षिपति । प्रत्यक्षादीति ।

मू० प्रत्यक्षादीव मानं विमतिपदवचो हेतुदोषा-

* परिहिताः धृताः, हरितः,—दिशो यैस्ते तथा दिगम्बरा इत्यर्थः ।

ऽभावाद्वाक्यत्वादप्रमाणं विमतमिति यदि स्वोक्तिबाधादयः स्युः । अव्युत्पन्नस्य बोधं न जनयति वचस्संगतिज्ञानहानेर्लिङ्गं व्याप्तिप्रतीतेः पुरत इव न चावद्यमेतावता-ऽस्य ॥ ६९ ॥

टी० विप्रतिपन्नं वाक्यं प्रमाणं कारणदोषबाधकप्रत्ययाद्य-भावादिति हेतुः, दृष्टान्तः प्रत्यक्षमनुमानं वा । अथ प्रत्यनुमानमाशङ्क्य परिहरति । वाक्यत्वादिति । स्वोक्तिबाधः—स्वाभ्युपगमबाधः स्वप्र-तिपत्तिबाध इत्यादिकमूह्यं सर्ववाक्याप्रामाण्ये स्वाचार्यवचनस्यापि सर्वशब्दार्थत्वेन स्वमतपरमतविभागो न स्यादित्यर्थः । यदि शब्दः प्रमाणम् अव्युत्पन्नस्याप्यर्थं बोधयेत् प्रदीपवत् न हि दीपो व्युत्पन्ना-व्युत्पन्नविभागेनार्थमवबोधयतीत्याशङ्क्य परिहरति । अव्युत्पन्न-स्येति । संगतिज्ञानहानेरिति वाच्यवाचकभावसंबन्धप्रतिपत्तिरागम-स्येवार्थावबोधनाङ्गं न तु प्रत्यक्षस्य अतस्सहकार्य्यभावादव्युत्पन्नस्य शब्दोऽर्थं नावबोधयतीति न दोषः । तत्र दृष्टान्तमाह । लिङ्गमिति । यथा व्याप्तिप्रतीतिशून्यस्य लिङ्गं साध्यप्रतीतिं न जनयति नैतावता लिङ्गस्य दोषः एवमागमस्येति ।

इति निर्दोषवाक्यप्रामाण्यम् ॥ ६९ ॥

अथ शब्दस्य बोधकत्वशक्तिसमर्थनेन सन्तुष्टः कश्चिदाह अव्युत्पन्नोऽपि शब्दोऽर्थप्रत्यायक इति तं प्रतिब्रूते । वक्रीति ।

मू० वक्री व्युत्पत्तितः प्राग्यदि निजविषयं वा-ग्विभजत्यन्वयाद्यैः किं व्युत्पत्त्या तिरश्चा-

**मपि न कथमितो बालकानाञ्च बोधः ।
स्वार्थेश्शब्दस्तदा चेत्तदपि न विषयैस्तस्य
साम्यात्तदन्यैरव्युत्पन्नत्वतो वा स्वमपि न
गमयेदेष तद्वत्स्ववाच्यम् ॥ ७० ॥**

टी० अथ वक्तीति किं शक्तिमात्रमभिधीयते किं वा वचनक्रियासम्बन्धः पूर्वस्मिन् पक्षे नास्माकमपि विप्रतिपत्तिः शब्दशक्तेर्नित्यत्वादुत्तरं पक्षमनुवदति । वक्ती व्युत्पत्तितः प्रागिति । विभक्त्यन्वयाद्यैरिति वचनहेतुः प्रकृतिप्रत्ययादिभेदेन व्युत्पन्नो हि शब्दोऽर्थं प्रत्याययतीति भावः । अनूदितमर्थं प्रतिक्षिपति । किं व्युत्पत्त्येति । स्वयमेव शब्दोऽर्थं प्रत्याययति चेद् व्युत्पत्तिर्निरर्थिकैव स्यादव्युत्पन्नाच्छब्दात्तिरश्चां बालमूकानां च बोधः कथं न स्यात् नन्वव्युत्पन्नानामपि शब्दः स्वरूपं प्रतिपादयति अतःशब्दस्याव्युत्पन्नस्यापि बोधकत्वं स्वस्वरूपे दृष्टमिति तदिदमाह । स्वार्थे इति । दूषयति । तदपि नेति । तत्र हेतुमाह । विषयैरिति । अयं भावः यथा विषयेषु व्युत्पन्नः शब्दोऽर्थमवगमयति एवं स्वबोधकत्वेनापि व्युत्पन्नश्शब्दः स्वात्मानमवगमयति अन्यथा स्वात्मनि व्युत्पत्त्यभावात् स्वात्मानमपि नावबोधयेत् । उक्तमर्थमनुमानेनाप्युपपादयति । अव्युत्पन्नत्वत इति । स्वात्मन्यव्युत्पन्नश्शब्दः स्वात्मानं नावगमयेत् यथा स्वविषये अव्युत्पन्नश्शब्दः स्वविषयं नावगमयति अयमत्र भावः शब्दस्य द्वयी शक्तिः अर्थप्रकाशकत्वं स्वस्वरूपप्रकाशकत्वञ्चेति अर्थप्रकाशनशक्तिः स्वयमगृहीता नार्थप्रकाशनाङ्गं भवति, एवं शब्दप्रकाशनशक्तिः स्वयमगृहीता चेन्न स्वप्रकाशनाङ्गं भवति, तस्माच्छब्द

स्वार्थवत् स्वस्मिन्नपि व्युत्पन्नः स्वप्रतीतिं जनयतीति अतश्शक्तस्यापि तत्तदर्थप्रकाशनशक्तिप्रतिसन्धानमन्तरेण नार्थप्रतिपत्तिजनकत्वमिति ।

इत्यव्युत्पन्नशब्दबोधकत्ववादभङ्गः ॥ ७० ॥

सर्वस्यापि शब्दस्य संकेतपूर्वकत्वं कश्चिदाह विप्रतिपन्नश्शब्दः सांकेतिकः शब्दत्वात् भाषाशब्दवदिति तदेतदनुवदति । शब्द इति ।

मू० शब्दस्संकेतितोऽर्थं गमयति विमतोऽपीति शास्त्रप्रतीपं तत्कर्त्तात्र ह्यसिद्धस्स च दुरधिगमस्सृष्टिकालेऽनुमानैः । श्रुत्या चेत्सत्युतैतद्विभुरपि तनुते वेदतोमानरूपे व्याकृत्यादेर्विरुद्धौ क्रमजनिविलयौ क्षुद्रभाषासु नैवम् ॥ ७१ ॥

टी० परिहरति । शास्त्रप्रतीपमिति । वाचा वाचा विरूपनित्ययेत्यादिश्रुतिविरुद्धत्वात् कालात्ययापदिष्टमित्यर्थः संकेतकर्त्ता किमाधुनिकः किं विश्वजगत्सृष्टिकालस्थः आधुनिकश्चेन्न दृष्टः ईश्वरश्चेदीश्वरानुमाननिरासेन प्रागेव निरस्त इत्याह । तत्कर्त्तेति । श्रुतिप्रसिद्धस्संकेतकर्त्तेति चेत् तद्विरुद्धमेव भवतः धाता यथा पूर्वमकल्पयत् नामरूपञ्च भूतानां कृत्यानाञ्च प्रपञ्चनं वेदशब्देभ्य एवादौ देवादीनाञ्चकार स इति नामरूपव्याकरणस्य वेदपूर्वकत्वश्रवणात् कथन्तर्हि काठकादिसमाख्या कथं वा व्याहृत्यादेः क्रमादुपदेशः कथं ऋग्वेदादेरनुक्रमादुपदेशः पुराणेषु व्यवह्रियते सर्वज्ञेनदभिव्यक्तिविशेषादित्याह । व्याकृत्यादेरिति । प्रवर्त्तनविशेषादेरित्यर्थः उत्प-

त्तिविलयो नामरूपे व्याकरोदिति श्रुतिविरुद्धो तर्हि भाषान्तरेऽप्य-
सांकेतिकत्वं स्यादित्याशङ्क्य परिहरति । वृद्धेति ।

इति सर्वशब्दसांकेतिकत्वभङ्गः ॥ ७१ ॥

एवं व्युत्पत्तिं प्रसाध्य सिद्धे व्युत्पत्तिं साधयितुमारभते, तत्र प्राभाकरमतमनुवदति । व्युत्पत्तिरिति ।

मू० व्युत्पत्तिः कार्य्य एव प्रथमसमुदिता वृद्धवा-
क्यात्प्रवृत्तौ तत्सर्वास्तत्पराः स्युर्गिर इति
यदि न क्वापि सिद्धेऽपि सिद्धेः । स्याद्वा
कार्य्यैकलक्ष्या प्रथममिह कुतश्शब्दशक्तिं
नियच्छेत्तात्पर्यज्ञान्यथाऽपि ह्यनितरशरणै-
र्लोकवेदप्रयोगैः ॥ ७२ ॥

टी० पूर्वं सर्वशब्दानां सांकेतिकत्वं निरस्तम्, अथ सर्वश-ब्दानां कार्य्ये व्युत्पत्तिं वदन् प्राभाकरो निरस्यते, स ह्येवं मनुते व्यु-त्पत्त्यायत्तं शब्दस्य प्रामाण्यम् आद्या व्युत्पत्तिः कार्य्य एव, वृद्ध-व्यवहारो हि व्युत्पत्तिबीजं प्रयोजकवृद्धो हि गामानयेति वाक्यं प्रयुङ्क्ते प्रयोज्यस्त्वानयति व्युत्पित्सुरन्योऽनेन वाक्येनानुमानवद्धीचा व्युत्पाद्यते इत्थं ह्यनुमिनोति व्युत्पित्सुः—विप्रतिपन्ना प्रयोज्यप्रवृत्तिः कार्य्यताबुद्धिपूर्विका चेतनप्रवृत्तित्वात् अस्मत्प्रवृत्तिवत्, विप्रतिपन्ना कार्य्यताबुद्धिः प्रयोजकवाक्यजन्या तदन्वयव्यतिरेकानुविधायित्वात् यद्यदन्वयव्यतिरेकानुविधायि तत्तज्जन्यं यथा संप्रतिपन्नमिति, एवं सामान्यतः कार्य्यपरत्वे प्रयोजकवाक्यस्य निश्चिते गामानय गां बधान अश्वमानय अश्वं बधानेत्यादिषु वाक्येषु आवापोद्वापवशा-द्विशेषव्युत्पत्तिरपि जायते, अतः कार्य्य एव शब्दानां व्युत्पत्तिः

तस्मान्न सिद्धरूपे ब्रह्मणि वेदान्तवाक्यानां प्रामाण्यमिति, एतदनुभाषते। व्युत्पत्तिरिति। परिहरति। नेति। तत्र हेतुमाह। क्वापीति। सिद्धे व्युत्पत्तिप्रकार उपरितनग्रन्थे विस्तरेण प्रतिपादयिष्यते तत्रावतिष्ठतु अभ्युपगम्यापि वदामः कार्य्ये एव व्युत्पत्तिरस्तु तथापि सिद्धेऽपि तात्पर्यं स्यादित्याह। स्यादिति। अयं भावः चत्वारो ह्यर्थाश्शब्दस्य मुख्यगौणलाक्षणिकतात्पर्य्यवृत्तिभेदेन, तत्र मुख्यवृत्तेरेकत्रावस्थानेऽपि तात्पर्य्यवृत्तिरन्यत्रापि संक्रमते अन्यथा कथमृत्विक्पत्नीयजमानादिभेदेन कर्तृव्यवहारः स्फ्य*कपालपुरोडाशादिभेदेन करणविभागः स्वर्गस्वाराज्यपशुपुत्रादिभेदेन फलविभागः, अतः कार्य्यशेषतया सिद्धस्यापि कार्य्यवाक्येषु तात्पर्य्यभूमित्वात् व्युत्पत्तेः कार्य्यपरत्वनिर्बन्धोनिर्निबन्धनः॥

इति सर्वशब्दानां कार्य्यपरत्वभङ्गः॥ ७२॥

इत्थं कार्य्ये एव व्युत्पत्तिरिति नियमाङ्गीकारेण कार्य्यतात्पर्य्यशेषतया सिद्धेऽपि तात्पर्य्यमुक्तम्। इदानीं सिद्ध एव प्राधान्येन तात्पर्य्यं संभवति कोऽसौ पाञ्चाल इत्यादिषु तथा दृष्टेरिति वदन्तं सिद्धपरवादिनं तत्पक्षानुवादपूर्वकं प्राभाकरं प्रतिक्षिपति। कोऽसाविति।

मू० कोऽसौ पाञ्चाल इत्याद्यनुभवतु वचस्सिद्धतात्पर्य्ययोगं शास्त्रं कार्य्यैकशेषं गमयति निखिलं सिद्धमित्यद्धुरम्यम्। यत्र ज्ञानं पुमर्थस्तदवधिवचनं तत्र बाधोऽपि नास्मिन्नातो-

---

* विभागः।

† स्वकपालेति पुस्तकान्तरपाठस्तु विमतः।

नाट्यादिनीतिर्निधिवचननयादन्यथा स्या-
द्विरोधः ॥ ७३ ॥

टी० अयमस्य भावः लौकिकवाक्यं सिद्धपरमस्तु वैदिक-वाक्यं सर्वमपि कार्य्यपरमेव सिद्धन्तु कार्यशेषतया वदतीति तद्दूषयति। अद्धरम्यमिति। कानिचित्सिद्धपराणि कानिचित्कार्य्यपराणीति विभागस्य दर्शनादद्धरम्यत्वमुच्यते, पुरुषार्थपर्य्यवसायित्वं हि वाक्यस्य प्रामाण्ये तन्त्रं, तच्च तव गृहे निधिरस्तीत्यादौ प्रतिपत्तिमात्रेण ज्योतिष्टोमादिवाक्येषु स्वर्गादिफलप्रतीत्या अतो ब्रह्मज्ञाने स्वरूपेण पुरुषार्थत्वान्न पुरुषार्थान्तरापेक्षा। तर्हि आलोपच्छन्दनादिवाक्यवदर्थ-तथात्वं न स्यादिति चेन्न स्याद् बाधाभावेन स्वतःप्रामाण्यस्यैव न्यायप्राप्तत्वात् तत एव न नाट्यादिनीतिः, नाट्यादावर्थानुकारमात्रेण प्रीतिः नाथानुकारप्रतीत्या प्रीतिः, अपि तु स्वगृहेनिहितनिधिसद्भाव-प्रतीत्या, इत्थं बाधविधुरेष्वर्थतत्त्वेषु प्रामाण्यानङ्गीकारे कार्य्यवाक्येऽपि प्रामाण्यं न स्यादिति कण्ठगतजीवितमेव वेदप्रामाण्यमिति भावः।

इति ब्रह्मस्वरूपपरवाक्यानां विधिशेषत्वमन्तरेण प्रामाण्यनिरूपणम् ॥ ७३ ॥

इदानीमाद्यव्युत्पत्तिः प्रकारत्रयेण सिद्धार्थेऽपि कर्त्तुं शक्येति वक्तुमारभते। कस्मैचिदिति।

मू० कस्मैचिज् ज्ञापयेतत्त्वमिति परकृतां वीक्ष्य
चेष्टां तदन्यस्तस्मै ब्रूते ततस्तद्गमकमिह
वचोवेत्ति चेष्टाविदन्यः। तत्तद्वाच्येषु शब्दै-
र्हितविदभिहितैरङ्गुलीयोगपूर्वं जानन्नन्यत्र
तत्तत्स्वहितजनकृतिं शिक्षणार्थामवैति॥७४॥

टी० यथा किल काचित्प्रक्रिया पुत्रस्ते जात इति देवदत्ताय ज्ञापयेति केनचित्प्रेष्ठया चोद्यमानः क्वचि*द् गत्वा तस्मै देवदत्ताय तं वक्ति तेन सह गतः कश्चिदन्यो व्युत्पित्सुर्मूकवच्चेष्टाविशेषज्ञस्तद्वाक्यं श्रुत्वा व्युत्पद्यते यतद्वाक्यं पुत्रजन्मरूपार्थप्रतिपादकमिति तदिदमाह । ततस्तदिति । प्रकारान्तरेण प्रतिपदव्युत्पत्तिनिरूपणेन सिद्धे व्युत्पत्तिं दर्शयति । तदिति ॥

तत्तच्छब्दवाच्येषु शिशुपशुपक्षिमृगादिष्वम्बाताततमातुलादिभिर्हितविद्भिरभिहितेऽश्विशुपश्वादिशब्दैस्साकमङ्गुलीनिर्देशपूर्वकं जानन् प्रतिपाद्यमानस्तत्तत्स्वहितप्रवृत्तिमन्यथापि शिक्षयार्थां व्युत्पादनार्थामवैति ।

अयमत्र क्रमः शिक्षको जनः कश्चिद्बालमङ्गुलीनिर्देशपूर्वकं तेषुतेष्वर्थेषु तत्तच्छब्दान् प्रयुङ्क्ते पश्चादङ्गुलीनिर्देशमन्तरेण वदति व्युत्पित्सुस्तच्छृणोति चेष्टापरिज्ञानवत्त्वाद्व्युत्पादकानां प्रवृत्तिं व्युत्पादनार्थां जानाति ततश्चेष्टामन्तरेणापि शब्दमात्रादेव स्वप्रतिपत्तिं दृष्ट्वा शब्दस्य बोधकत्वशक्तिं जानाति अयं शब्द इममर्थं बोधयति शब्दार्थयोस्संबन्धान्तरं न दृश्यते संकेतयिता चान्यो न दृष्टः परिशेषाद् बोध्यबोधकभावेनैवायं शब्द इममर्थं बोधयतीति व्युत्पद्यते ॥ ७४ ॥

अथश्चान्यः प्रकारः देवदत्तस्य पुत्रे जाते कश्चिद् गत्वा पुत्रस्ते जात इति वदति तत्पश्यन् बालकस्तन्मुखविलासेन तस्यानुकूलबुद्धिं जानन्नेतद्वाक्यं सन्निहितानुकूलरूपपुत्रजन्मप्रतिपादकमिति व्युत्पद्यते तदिदमाह । कश्चिदिति ।

---

* कश्चिद् पा० ।

मू० कश्चित् कस्यापि पुंसस्सुतजनिमिह तत्प्रीतिकृत्त्वञ्च जानँस्तज्जन्मोक्तिप्रहृष्टे पितरि सुतजनेर्वेत्ति तद्वाच्यभावम् । शक्यन्तद्धर्षहेतुस्स इति नियमनं सन्निधानादियुक्तेरासीदत्सु प्रसूत्याद्यनियतिकथनं कार्य्यवाक्येऽपि शक्त्यम् ॥ ७५ ॥

टी० अयमत्रान्वयः कस्यापि पुंसस्सुतजनिं पुत्रजननं तस्य च प्रीतिकृत्त्वं प्रीतिहेतुत्वञ्च जानन् तज्जन्मवाक्यप्रहृष्टे पितरि सुतजनेः पुत्रजननस्य तद्वाच्यभावं वेत्ति जानाति बहुष्वपि हर्षहेतुषु सत्सु पुत्रजननमेव हर्षहेतुरिति विशेषनियमनं सन्निधानादिलिङ्गैश्शक्यम् आसीदत्सु बहुषु प्रीतिहेतुषु सुखप्रसूत्याद्यनियतिकथनं कार्य्यव्युत्पत्तावपि शक्यते वक्तुं तत्राप्यवान्तरबहुव्यापारसंभवादनियतिर्वक्तुं शक्या ॥

इति सिद्धार्थेऽप्याद्यव्युत्पत्त्युपपत्तिः ॥ ७५ ॥

इत्थं सिद्धार्थे प्रथमां व्युत्पत्तिमभिधाय द्वितीयामपि व्युत्पत्तिं तत्रैव वदति । शब्दस्येति ।

मू० शब्दस्यैतस्य वाच्यस्त्वयमिति च तथा वाचकोऽसावमुष्येत्येवं शिक्ष्येत पश्चात् कतिपयवचसां पूर्वनिर्ज्ञातशक्तिः । इत्थं व्युत्पन्नतत्तत्सहपठितवशाद्वाचकान् वेत्ति कांश्चिद्यो लोके ते हि वेदे समधिकमिह यत्तत्तु तत्रैव वेद्यम् ॥ ७६ ॥

टी० अस्य शब्दस्यायमर्थो वाच्यः अस्यार्थस्यायं शब्दो वाचक इति हि काव्यादिषिवप्रकारः, लोकव्यवहारोऽप्येवमेव ग्राहयति इमां व्युत्पत्तिं पूर्वार्द्धेन दर्शयित्वा व्युत्पत्त्यन्तरमुत्तरार्द्धेन दर्शयति । इत्थमिति । अयमर्थः प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीति वाक्यं श्रुत्वा प्रभिन्नेत्यादिशब्दानां पूर्वव्युत्पन्नत्वाद्व्युत्पन्नप-दसहपठनसामर्थ्यात् पूर्वमव्युत्पन्नं मधुकरपदमोचित्यादिना भ्रमरप-रतया व्युत्पद्यत इति काश्चिद् भ्रमरादिशब्दांस्तर्हि लौकिकश-ब्दानामेवं व्युत्पत्तिरस्तु न वैदिकानामित्याशङ्क्याह । य इति । य एव लौकिकास्त एव वैदिका इति हि लोकवेदाधिकरणन्याय इति भावः । कथन्तर्हि वैदिकप्रयोगेषु वैषम्यमत आह । समधिकमिति । यल्लौकिकशब्दाद्वैदिकशब्देषु समधिकं वैषम्यं तत्प्रातिशाख्यादिव्याक-रणविशेषावगम्यमित्यर्थः, अतः कार्य्ये व्युत्पत्तिसिद्धेः व्युत्पत्त्या-दिभिर्बहुभिर्लौकिकव्यवहारसहितैरभिधानपठितैर्व्याकरणप्रक्रियादिभिः प्रातिशाख्यादिभिरसाधारणहेतुभिस्सिद्धे वा कार्य्ये वा सर्वत्रापि व्युत्पत्तिस्समानस्वभावेति नैकत्र व्युत्पत्तिनियमः कार्य्य इत्यर्थः ।

इति सिद्धार्थे द्वितीयादिव्युत्पत्तिकारः ॥ ७६ ॥

अस्तु प्रत्यक्षेषु पदार्थेषु एतादृशी व्युत्पत्तिः अप्रत्यक्षेष्विन्द्रा-दिषु सिद्धेषु व्युत्पत्तिर्न युज्यत इत्याशङ्कते । व्युत्पाद्यमिति ।

मू० व्युत्पाद्यं नाप्रतीतं प्रसजति विदिते नैर-
पेक्ष्यं श्रुतीनामिन्द्राद्यर्थे पदानामिति दुर-
धिगमा नामतेत्यप्ययुक्तम् । अप्रत्यक्षेषु सिंह-
प्रभृतिषु वचनैः कैश्चिदारण्यकोक्तैर्व्युत्प-
द्यन्ते हि पौराः स्वयमपि च वदन्त्येवम-
त्रापि वार्त्ता ॥ ७७ ॥

टी० किमप्रतीते व्युत्पत्तिरुत प्रतीते अप्रतीतं तावद्व्युत्पाद्यं न प्रभवति न भवतीत्यर्थः, प्रतीते व्युत्पाद्ये प्रतीतत्वादेवाप्राप्तार्थप्रत्यायकश्रुतिनैरपेक्ष्यप्रसङ्ग इति इत्थं सतीन्द्राद्यर्थे पदानां नामता दुरधिगमेति एतदयुक्तमित्याह । इत्यपीति । अयुक्तिमेवोपपादयति । अप्रत्यक्षेऽष्विति । सिंहादिष्वागमाद्व्युत्पत्तिर्नास्ति अपि तूपमानात् अत एवोक्तमुपमानवादिभिः ।

सादृश्यस्यानिमि*त्तत्वान्निमित्तस्याप्रतीतितः ।
समयो दुर्ग्रहः पूर्वं शब्देनानुमयाऽपि वा ॥

इति चेदुक्तन्तु तत् तादृशस्योपमानस्यैवाभावात् अन्यथा वैदिकेन्द्रादिशब्दानां नित्याव्युत्पत्तिप्रसङ्गात् नित्यादृष्टत्वादिन्द्रादिजातेः, कथन्तर्ह्यप्रत्यक्षे गवयत्वे गवयशब्दव्युत्पत्तिः कथं वा प्रत्यक्षत्वप्रसङ्गविधुरेन्द्रादिसामान्ये तत्र वक्त्रभिप्रायमाश्रित्य व्युत्पद्यते अयं खलु वक्तुरभिप्रायः सहस्राक्षत्वाद्युपलक्षिता काचिज्जातिरिन्द्रशब्दार्थ इति तदन्यत्रापि समानं गोसादृश्योपलक्षिता काचिज्जातिर्गवयशब्दार्थ इति । किञ्च वक्त्रभिप्रायानङ्गीकारे प्रत्यक्षेऽपि घटादौ व्युत्पत्तिर्न स्यात् तथा हि कश्चित्को घट इति पृच्छति व्युत्पादकः पुनरयं घट इति वक्ति विशेषं दर्शयति व्युत्पित्सुश्च तावता व्युत्पद्यते तत्रैकस्यां व्यक्तौ व्युत्पन्नस्य व्यक्त्यन्तरे घटप्रतीतिर्न स्यात् वक्त्रभिप्राय एव तत्र शरणम् एतज्जातीयो घट इति वक्तुरभिप्रायः तेन तज्जातीये व्युत्पद्यते तदभिप्रायाभिज्ञो व्युत्पित्सुरिति । एवन्तर्कसहकृतेन वक्त्रभिप्रायपरिशोधनेन गवयत्वादौ गवयादिशब्दं व्युत्पद्यते व्युत्पित्सुः किमिह निरर्थकोपमानकल्पनेनेति न

* न्यायकुसुमाञ्जलिग्रन्थस्य श्लोकोऽयम्

केवलं सिंहादिशब्दव्युत्पत्तिर्व्यवहारोऽपि दृश्यत इत्याह । स्वयमिति । दृष्टान्तदृष्टमर्थं पक्षे योजयति । एवमिति । वार्ता प्रवृत्तिः ।

इत्यप्रत्यक्षपदार्थव्युत्पत्तिप्रकारः ॥ ७७ ॥

यदि जातिवाचकत्वं शब्दस्य तर्हि विशिष्टविषयत्वं न स्यात् इत्याशङ्कते । व्यक्तिरिति ।

मू० व्यक्तिः शब्दैर्न बोध्या यदि न खलु भवेदन्वितप्राप्तिसिद्धिस्तच्छक्तिर्व्यक्तिमात्रे न च भवति यतः स्वोपलम्भादिबाधः । धर्मो धर्मी च नैकं किमपि न च तयोर्भिन्नयोरप्यभेदस्तस्मात्तां तद्विशिष्टामभिदधति पदान्यन्यथागत्यभावात् ॥ ७८ ॥

टी० परिहरति । न खल्विति । व्यक्तिविषयत्वाभावे कथमन्वितप्राप्तिसिद्धिः अन्वयस्य व्यक्तिनिष्ठत्वात् यदि व्यक्तिमात्रे शक्तिः तत्र न भवति उपलम्भादिबाधात् व्यक्तिमात्रे शब्दशक्तावनुवृत्तव्यवहारादिबाध इत्यर्थः । तर्हि धर्मो धर्मी चैकम् अथवा भिन्नाभिन्नमित्याशङ्क्य पक्षद्वयमपि क्रमेण प्रतिक्षिपति । धर्म । इति । न चेति अतो जातिविशिष्टा व्यक्तिरेव शब्दार्थ इति निगमयति । तस्मादिति । तदेवोपपादयति । अन्यथा गत्यभावादिति । अयमर्थः केचिच्छब्दा जातिमात्रवाचकाः जातिस्सामान्यमित्यादयः केचिद्व्यक्तिवाचकाः व्यक्तिः स्वरूपमित्यादयः । अपरे पुनर्जातिविशिष्टव्यक्तिवाचकाः गौरश्व इत्यादयः, तत्र पूर्वकोटिद्वयविलक्षणतृतीयकोटिवाचकाश्शब्दा जातिविशिष्टव्यक्तिवाचिन इति ॥

इत्याकृतिशब्दानां विशिष्टवाचित्वम् ॥ ७८ ॥

Digitized by Google

कौमारिलास्त्वेवं प्राहुः जातिवाचिनश्शब्दा व्यक्तिं लक्षयन्तीति तदयुक्तमित्याह । जातिमिति ।

मू० जातिं व्यक्त्या विहीनां स्पृशति न धिषणा
तेन जातौ प्रवृत्ता शक्तिर्व्यक्तिं स्पृशेच्चेत्
स्थित इह वचसां तद्विशिष्टावगाहः । जाते-
र्बोधः स्वहेतोः स्थितिरपि हि भवेत् क्वापि
गोत्वोक्तिनीत्या शब्दात्तत्पारतन्त्र्यं स्फुरति
यदि पराबोधने तन्न शक्यम् ॥ ७९ ॥

टी० व्यक्तिशून्यां जातिं कदाचिदपि न स्पृशति धिषणा तेन जातौ प्रवृत्ता शब्दशक्तिर्व्यक्तिमपि स्पृशतीति वक्तव्यं तथा चेद्वचसां जातिविशिष्टव्यक्त्यवगाहनं स्थितमेव तथा च शक्तिर्विशिष्ट इति भवतेत्रोक्तं भवति । तदेव विवृणोति । जातेर्बोध इति । जातेः प्रतिपत्तिःस्वकारणादवस्थानञ्च कुत्राप्याधारविशेषे तत्र दृष्टान्तमाह । गोत्वेति । यथा गोत्वशब्दे गोर्भावो गोत्वमिति गोशब्दप्रतिपत्ति-मन्तरेण प्रतिपत्तिर्न भवति गोशब्दमन्तरेण भावविषयस्य त्वप्रत्यय-स्यानुत्पत्तिः एवं गोत्वस्य प्रत्ययस्थितौ तदाधारभूतगोत्वद्रूपसापेक्ष इत्यर्थः । अस्तु गोत्वस्य पारतन्त्र्यस्फुरणं ततः किं शब्दशक्तेरि-त्यत आह । शब्दादिति । शब्दाद् गोत्वस्य व्यक्तिपारतन्त्र्यं यदि स्फुरति तदा परस्य व्यक्तिद्रव्यस्याबोधने जातेस्तत्पारतन्त्र्यं शब्देन बोधयितुं न शक्यम् अतो गवादिशब्दशक्तिर्व्यक्तिपर्य्यन्तेति ।

इति विशिष्टवाचिनां विशेषणमात्रे शक्तिभङ्गानुप-पत्तिः ॥ ७९ ॥

तत्तमपि दूषणं सम्यगजानानः पूर्वपक्षी लघुत्वावलम्बनेन लक्षणापक्षं पुनर्दृढयति । जाताविति ।

मू० जातौ शक्तिर्लघुत्वाद्भवति च वचसां भाषणं जातिमात्रे भेदो निष्कर्षकेभ्यस्त्विह परमजहल्लक्षणाया निरूढिः । इत्युक्तं कैश्चिदेवं यदि भवति तदोपाधिशब्देऽपि नीतिर्म्मन्दं वैषम्यमात्रं भवतु च नियतिः प्रत्ययैर्ल्लक्षणायाः ॥ ८० ॥

टी० अयमर्थः जातावेव शक्त्यङ्गीकारे शब्दस्य शक्तिलाघवं भवति अतो वचसां भाषणमभिधानं जातिमात्रे तर्हि गोत्वशब्दाद् गोशब्दस्य जातिवाचित्वे को भेदस्तत्राह । भेद इति । गोत्वशब्दो गोत्वजातिमेव प्राधान्येनाह गोशब्दस्त्वनिष्कर्षकत्वादजहल्लक्षणानिरूढ्या गोत्ववत् तदाधारभूतां गामपि प्रकाशयति अयमेव निष्कर्षकानिष्कर्षकभेदः । इमं पक्षमनुवदति । इत्युक्तं कैश्चिदिति । एतत्प्रतिबन्द्या दूषयति । एवमिति । तर्हि उपाधिशब्देऽपीयं नीतिरनुसन्धेया तत्राप्युपाधावेव शब्दशक्तिः उपाधिमति निरूढलक्षणेति तदेतदाह । तदेति । गवादिशब्दस्तु जातिशब्दः अन्यस्तूपाधिशब्द इति वैषम्यं मन्दमेव प्रयोजकं न्यायसाम्ये वैषम्यमात्रस्याप्रयोजकत्वात् अत उपाधिशब्दवज्जातिशब्दस्यापि धर्मिपर्य्यन्ताभिधानमपरित्याज्यं कथन्तर्हि गङ्गायां घोष इत्यादिषु लोके लाक्षणिकव्यवहारनियमः, तत्राह । भवत्विति । प्रतीतिरेव हि सर्वत्र शरणं प्रतीतिश्च व्युत्पन्नानां व्युत्पत्तिश्च व्युत्पादकपारम्पर्य्यादेव नियता व्युत्पादकाश्च गोशब्दं गोत्वाधारद्रव्यविषयतया व्युत्पादयन्ति

गोत्वशब्दं पुनर्भावविषयतया अतो निष्कर्षकानिष्कर्षकनिर्णयसिद्धि-रिति ।

इति व्यक्तिलक्षणापत्तभङ्गः ॥ ८० ॥

एवं जातिशब्दवद् गुणशब्दस्यापि द्रव्यपर्य्यन्ताभिधानं कथन्तर्हि गुणवाचिशब्दे मत्वर्थीयाः शुक्लवान्मधुरवानित्यादि तत्राह । मत्वर्थीयेति ।

मू० मत्वर्थीयानुशिष्टिर्गुणवचनगणे वैभवात्स्या-
दसौत्री शक्तिस्तत्रापि तत्तद्गुणवति नियता
जातिशब्दाविशेषात् । निष्कृष्यैषां प्रयोगे
क्वचिदगतितया द्रव्यवृ*त्तिर्निरुद्धा शक्ति-
स्साम्ये विभक्तेस्तदवधिरुणाधिक्रियाया-
मभाषि ॥ ८१ ॥

टी० द्रव्यपर्य्यन्ताभिधानशक्तिमत्सु गुणवचनेषु मत्वर्थीयाभिधानं वैभवादेव न पुनर्मत्वर्थीयप्रत्ययावश्यंभावात् असौत्री—तथा सूत्रकारोपदेशाभावादित्यर्थः । यत्र शुक्लवान्मधुरवानिति मत्वर्थीयव्यवहारः तत्रापि शब्दशक्तिर्धर्मिपर्य्यन्ता जातिशब्दाविशेषात् जातिशब्दवद् गुणवाचिनोऽपि तस्य धर्मिपर्य्यन्ताभिधानशक्तेरपि विद्यमानत्वात् द्वयी हि प्रवृत्तिश्शुक्लादिशब्दानां लोकव्यवहारानुरोधेन कदाचिद् गुणमात्रपरत्वं शुक्लो गुण इति, कदाचिद् गुणिपर्य्यन्ताभिधानं शुक्लः पट इति एषां शुक्लादिशब्दानां निष्कृष्य प्रयोगे द्रव्यपर्य्यन्ताभिधानशक्तिर्निरुद्ध्यते तदा मत्वर्थीयप्रत्ययप्रयोगः स्यात् विभक्तेस्साम्ये समानाधिकरणपदप्रयोगे पटः शुक्ल इत्यादौ

* शक्तिरिति पा० ।

द्रव्यपर्य्यन्ताभिधानं शारीरकशास्त्रनिर्णीतापृथक्सिद्धाधिकरणन्यायेन भाष्यकारैरेवाभाषीत्यर्थः । अत एव गुणे शुक्लादयः पुंसि गुणिलिङ्गास्तु तद्वतीति अस्याचलिङ्गनियमोऽप्युपपद्यते ॥

इति गुणवचनशब्दानां द्रव्यपर्य्यन्ताभिधायित्वम् ॥ ८१ ॥

एवं जातिगुणवाचिनोर्द्रव्यपर्य्यन्तत्वमुक्तमिदानीं द्रव्यवाचिनां देवादिशब्दानामात्मपर्य्यन्तत्वमुच्यते । जीवमिति ।

मू० जीवं देवादिशब्दो वदति तदपृथक्सिद्धभावाभिधानान्निष्कर्षाभावयुक्ताद् वहुरिह च दृढो लोकवेदप्रयोगः । आत्मासंवन्धकाले स्थितिरनवगता देवमर्त्त्यादिमूर्त्तेर्जीवात्मानुप्रवेशाज्जगति विभुरपि व्याकरोन्नामरूपे ॥ ८२ ॥

टी० देवादिशब्दो जीवं वदति जीवापृथक्सिद्धदेवादिशरीरद्रूपभावाभिधानान्निष्कर्षकविपत्त्याविधुरत्वात् अत्र किं प्रमाणमित्यत्राह । वहुरिति । सर्वत्रापि शब्दार्थनिर्णये विशिष्टप्रयोग एव शरणम् अस्ति च देवादिशब्दानामात्मपर्य्यन्ताभिधाने लोकप्रयोगः देवो मनुष्यः पशुर्मृग इत्यादि, तथा वेदप्रयोगोऽपि चत्वारः पञ्चदशरात्रादेवत्वं गच्छन्तीति, वाचिकैः पक्षिमृगतामित्यादिः तत्रापृथक्सिद्धविशेषणत्वमेव व्यवहारनियमे तन्त्रम् अस्ति चापृथक्सिद्धत्वं शरीरिणा शरीरस्य तदिदमाह । आत्मासम्बन्धकाले देवमनुष्यादिमूर्त्तेः स्थितिरनवगतेति । न हि मृतस्य शरीरं क्षणमपि तत्संस्थानसंस्थितमवतिष्ठते न केवलं लोकप्रसिद्धिः जीवात्मानमनुप्रविश्य नामरूपे व्याकरोदीश्वर इति हि वेदप्रसिद्धिः अतोऽविच्छरीरको जीवः

अचिज्जीवशरीरक ईश्वर इति चेतनाचेतनशब्दानां भगवत्पर्य्य-न्ताभिधानं युक्तमिति भावः ॥

इति देवादिशब्दानां शरीरपर्य्यन्तत्वम् ॥ ८२ ॥

अथ देवादिशब्दानां सर्वशरीरत्वेनावस्थितपरमात्मपर्य्यन्त-त्वमुक्त्वा भगवत्सर्वशरीरित्वसिद्ध्यर्थं शरीरलक्षणं लक्षयति । संस्थानेति ।

मू० संस्थानैक्याद्यभावे बहुषु निरुपधिर्देहशब्द-
स्य रूढिर्लोकाम्नायप्रयोगानुगतमिह ततो
लक्ष्म निष्कर्षणीयम् । अव्याप्त्यादिदुःस्थं
परमतपठितं लक्षणान्तत्र तस्माद्धीतुल्या-
श्रयं यद्वपुरिदमपृथक्सिद्धिमद्द्रव्यमस्य ॥८३॥

टी० अयं भावः संस्थानैक्यं जात्यैक्यं कारणैक्यं कार्य्यैक्यमि-त्यादिनियामकविशेषाभावेऽपि देवमनुष्यपशुमृगपक्षिसरीसृपवृक्षगु-ल्मलतादिषु शरीरशब्दस्य रूढिरुपलभ्यते अत्र च लोकाम्नायप्रसिद्ध्यनु-गुणं लक्षणमिह निष्कर्षणीयम् इदन्तु सर्वसाधारणन्यायप्रदर्शनम् अत्र चेष्टेन्द्रियार्थाश्रयश्शरीरमिति परमतपठितं लक्षणमव्याप्तिदोषदुष्टं तथा हि प्रयत्नवदात्मसंयोगासमवायिकारणिका क्रिया चेष्टा यदाहुः चेष्टा हिताहितप्राप्तिपरिहारार्थः स्पन्द इति इदञ्च लक्षणमीश्वरशरी-रतया श्रुतिप्रमितेषु कालादिषु नास्तीत्यव्याप्तिः तथा प्रतिक्षणपरिणा-मिषु निद्राणकुम्भकर्णादिशरीरेष्वव्याप्तिस्सुप्रसिद्धा कुम्भकर्णशरीरे जागरावस्थायां चेष्टाऽस्ति चेत् किमनेन शरीरान्तरमेव तत् अन्यथाऽऽ-कारपरिणामविशेषेण प्रतिक्षणपरिणामकथनस्य भावत्कस्योद्भ्रान्तप्र-लपितत्वप्रसङ्गात् चेष्टाश्रयसजातीयत्वं शरीरत्वमिति चेत् केयं जातिः

शरीरत्वमेवेति चेन्न शरीरत्वजातेरभावात् अन्यथा त्वदुक्तजातिसंकरप्रसङ्गात्, न हि शरीरत्वस्य पृथिवीत्ववत् परापरभावो निरूपयितुं शक्यते, शरीरत्वव्यतिरिक्ता कापि जातिरिति चेत् सापि संकरदोषेण परास्यते तुल्यन्यायत्वात् तर्हि जातिं मुञ्च। चेष्टाश्रयत्वलक्षणं शरीरलक्षणमिति वदाम इति चेत् किन्तत्सालक्षण्यं शरीरलक्षणलक्षितत्वमिति चेन्न शरीरलक्षणस्यैव निरूप्यमाणत्वात् न ह्यद्यापि शरीरलक्षणं निरूपितं येनैतत्परिग्रहान्निद्राणशरीरस्य शरीरत्वमुपपाद्येत यदा कदाचिच्चेष्टाश्रयत्वं शरीरलक्षणमिति वचनमत्यन्तजघन्यमेव निद्राणशरीरस्य कदाचिदपि चेष्टाश्रयत्वाभावात् चेष्टाश्रयत्वार्हत्वमिति चेत्तदपि न नित्यानुपलब्धचेष्टस्य निद्राणशरीरस्य चेष्टाश्रयत्वार्हताया अभावात् । अथापि शरीरजातीयत्वादस्त्यर्हतेति चेन्न जातेर्निरस्तत्वात् अद्यापि शरीरशब्दार्थानिरूपणेन तज्जातीयत्वस्य वक्तुमेवाशक्यत्वात् । किञ्च शरीरावयवानां चेष्टाश्रयत्वेन शरीरत्वप्रसङ्गः, अत एवान्त्यावयवीति विशेषयाम इति चेन्न शरीरोपष्टम्भकेषु भूतान्तरेष्वपि प्रसङ्गात् तेषामन्त्यावयवित्वं नास्तीति चेन्न तेरारभ्यस्यावयव्यन्तरस्यादर्शनात् कालान्तरे भविष्यतीति चेत्, तर्हि शरीरारभ्यमप्यवयव्यन्तरं कालान्तरे भविष्यतीति तत्राप्यन्त्यावयवित्वं न स्यात् तर्ह्युपष्टम्भकानां चेष्टाश्रयत्वमेव नास्तीति चेत् शरीरस्यापि तर्हि चेष्टाश्रयत्वं न स्यात् न ह्युपष्टम्भकमन्तरेण शरीरमपि चेष्टते । किञ्च प्रयत्नवदीश्वरसंयोगासमवायिकारणेषु भूकम्पादिषु पृथिव्यादीनामीश्वरशरीरत्वं भवतैवाङ्गीकृतं स्यात् तत्रादृष्टवदात्मसंयोगोऽसमवायिकारणमदृष्टवांश्च जीवः अतो नेश्वरसंयोगासमवायिकारणकत्वमिति चेत् को ब्रवीति नियमम् ईश्वरसंयोगस्यापि कारणत्वात् असमवायिकारणलक्षणोपेतत्वात् तल्लक्षणलक्षितत्वेऽपि तत्कारण-

त्वाभावे जीवसंयोगोऽप्यसमवायिकारणं न स्यात् इत्थं भोगाश्रयत्वमपि दुष्टं पूर्वोक्तदूषणकलापदूषितत्वात् इन्द्रियाश्रयत्वमपि शोधयामः, अत्राश्रयत्वं समवायिकारणत्वञ्चेदिन्द्रियावयवेषु व्यभिचारः, वस्त्वन्तरसमवायिकारणत्वेऽन्त्यावयवित्वमपि व्याहन्येत संयोगित्वमापद्येत् पूर्वोक्तदूषणकलापान्न मुच्यते । किञ्च इन्द्रियान्तरसंबन्धनियते त्वगिन्द्रिये व्यभिचारः तथा त्वगिन्द्रियसंबन्धनियतेष्विन्द्रियान्तरेष्वपि व्यभिचारः उत्पाटितस्याक्ष्णस्त्वगिन्द्रियसंबन्धनियमो नास्तीति चेन्न उत्पाटनावस्थायामेव तस्याः स्वावयवसंबोभेद्य विनष्टत्वेनाक्ष्णस्सद्भावाभावात् केवलं गोलकमात्रमुपलभ्यते एवं त्वगिन्द्रियोपष्टम्भकेष्वपि व्यभिचारो वाच्यः शरीरमेव त्वगिन्द्रियोपष्टम्भकमिति चेत् तर्हि शरीरोपष्टम्भकेषु व्यभिचारस्तदवस्थ एव ईश्वरशरीरतया श्रुतिशतप्रसिद्धेषु पृथिव्यादिष्वेतल्लक्षणमस्ति चेदविवाद एव प्रपञ्चवाचिनां शब्दानां परब्रह्मपरत्वेऽपि विरोधाभावात् नास्ति चेच्छ्रुतिविरुद्धत्वादलक्षणमेव । श्रुतिरेव गौणीति चेत् किममूलमेव अथवा केनचित्प्रमाणेन अमूलञ्चेत् शब्दार्थसंबन्धनियमव्यवहारस्यासंबन्धत्वप्रसङ्गः केनचित्प्रमाणेनेति चेत् किन्तत्प्रमाणं श्रुतिप्रयोग इति चेत् स पुनरस्मदीय एव विश्वशरीरत्वस्य श्रुतिशतसिद्धत्वादस्मत्कल्पितलक्षणविरोधात् श्रुतेर्गौणत्वमुपपादयाम इति चेन्न परस्पराश्रयात् युष्मल्लक्षणस्य लक्षणत्वे श्रुतेर्गौणत्वं तद्गौणत्वे च भवदुक्तलक्षणस्य लक्षणत्वमिति । एवमनेकविधदोषदुष्टत्वात् परकल्पितलक्षणप्रहाणेन सर्वप्रयोगानुगुणं शरीरलक्षणं वाच्यमित्याह । अव्याप्तेति । किन्तल्लक्षणमित्यत्राह । तस्मादिति । तथा हि यस्य चेतनस्य यद् द्रव्यं सर्वात्मना स्वार्थे नियन्तुं धारयितुञ्च शक्यमिति लक्षणद्वयमुक्त्वा तच्छेषतैकस्वरूपञ्चेति तृतीयमपि लक्षणमाहुर्भाष्य-

Digitized by Google

कारा:, अथ यस्येति प्रतिसंबन्धिनियमनिर्देशादन्यशरीरस्यान्यं प्रति शरीरत्वं निरस्यते चेतनस्येति चेतन्यविशिष्टतया प्रतिसंबन्धितया निर्देशाद्धर्मभूतज्ञानस्य शरीरत्वं निरस्यते, न हि ज्ञानं ज्ञानविशिष्ट-स्याधेयविधेयशेषभूतं, द्रव्यमिति गुणक्रिययोर्निरास:, सर्वात्मनेति दण्डकुण्डलादीनां गर्भदासादीनां च निरास: तेषां कदाचिदेवाधेय-त्वाद्विधेयत्वात्, शक्यमिति योग्यतामात्रकथनेन रुग्णशरीरेऽव्याप्ति-परिहार:, रुग्णस्यापि शरीरस्य धारणादियोग्यताऽस्ति रोगानुब-न्धाद्धारणादिकं प्रतिबध्यते रोगनिवृत्तौ तदेव योग्यत्वं निष्प्रतिद्वन्द्व-मवतिष्ठत इति भाव: । इत्येषा दिक् ।

इति शरीरलक्षणम् ॥ ८३ ॥

इत्थं शरीरलक्षणमुक्त्वा विश्वस्येश्वरशरीरत्वेन तदपृथक्सि-द्धस्य तच्छरीरत्वप्रतिष्ठापनार्थं तदपृथक्सिद्धिमाह । शब्दैरिति ।

मू० शब्दैस्तत्त्वंशरूपप्रभृतिभिरखिलः स्थाप्यते विश्वमूर्त्तेरित्थंभावः प्रपञ्चस्तदनवगमतस्त-त्पृथक्सिद्धमोहः । श्रोत्राद्यैराश्रयेभ्यः स्फु-रति खलु पृथक्शब्दगन्धादिधर्मो जीवा-त्मन्यप्यदृश्ये वपुरपि हि दृशा गृह्यते-ऽनन्यनिष्ठम् ॥ ८४ ॥

टी० तत्सर्वं वै हरेस्तनु:, ममैवांशो जीवलोके, रूपान्तरं तद्द्विज कालसंज्ञं, विष्णुशक्ति: परा प्रोक्ता, यदम्बुवैष्णव: काय:, यस्यात्मा शरीरमित्यादिभिर्विश्वमूर्तेर्विष्णोरित्थं भाव: अपृथक्सिद्ध-विशेषणं प्रपञ्च इति स्मृतिमुख्योरभिधीयते यद्येवमित्थंभाव: प्रपञ्च: कथन्तर्हि पृथक्सिद्धिरित्यत्रोत्तरम् । तदनवगमत इति । ईश्वरस्य

विशेष्यभूतस्यावगमाभावाद् विशेषणभूतस्य प्रपञ्चस्य पृथक्सिद्धत्वव्यामोहमात्रं पामराणां, विदुषां तु परमर्षीणामपृथक्सिद्धत्वेनैव सर्वदा प्रतीतिव्यवहारौ । अमुष्मिन्नर्थे लोकसिद्धं दृष्टान्तमाह । श्रोत्राद्यैरिति आश्रयग्रहणानर्हैः श्रोत्राद्यैर्यथा शब्दादिकं पृथगेव गृह्यते एवमीश्वरग्रहणानर्हैरल्पज्ञानां प्रमाणैरीश्वरात् प्रपञ्चस्य पृथक्त्वेन ग्रहणं युक्तमित्यर्थः । उक्तमर्थमुदाहरणान्तरेणापि द्रढयति । जीवात्मनीति । मनोग्राह्ये जीवात्मनि सति चक्षुषा गृह्यमाणं शरीरं न जीवविशेषणत्वेन गृह्यते जीवस्य चक्षुर्ग्राह्यत्वाभावात् । एवं प्रपञ्चोऽपि पामरबुद्धिभिर्नेश्वरविशेषणत्वेन गृह्यते नैतावता श्रुतिस्मृत्यादिप्रसिद्धमीश्वरापृथक्सिद्धत्वं न सिध्यतीति ॥ ८४ ॥

इति विश्वस्येश्वरापृथक्सिद्धत्वम् ।

जगतः परमात्मापृथक्सिद्धिमुक्त्वा तद्वाचिनां पदानां निष्कर्षाभिप्रायाभावे परमात्मपर्य्यन्तत्वमाह । निष्कर्षेति ।

मू० निष्कर्षाकूतहानौ विमतिपदपदान्यन्तरात्मानमेकं तन्मूर्त्तेर्वाचकत्वादभिदधति यथा रामकृष्णादिशब्दाः । सर्वेषामाप्तमुख्यैरगणि च वचसां शाश्वते ऽस्मिन् प्रतिष्ठा पार्थक्यस्याप्रतीतेर्जगति तदितरैः स्याच्च भक्त्या प्रयोगः ॥ ८५ ॥

टी० विप्रतिपन्नानि प्रपञ्चवाचकानि पदानि परमात्मवाचकानि निष्कर्षेतरत्वे सति तन्मूर्तिवाचकत्वात् ये निष्कर्षेतरत्वे सति भगवन्मूर्तिवाचकास्ते भगवद्वाचकाः यथा रामकृष्णादिशब्दा इति विशेषतो व्याप्तिः, सामान्यतोऽपि ये निष्कर्षेतरत्वे सति यन्मूर्तिवा-

Digitized by Google

चकास्ते तद्वाचकाः यथा देवमनुष्यादिशब्दा इति इत्थमनुमानम् आगमोऽप्यस्तीत्याह । सर्वेषामिति । आप्तमुख्यैर्महर्षिभिः सर्वेषां वचसां शाश्वते भगवति प्रतिष्ठा पर्य्यवसानमगामि वचसां वाच्यमुत्तमम्, ततः स्म सर्ववचसां प्रतिष्ठा यत्र शाश्वती इत्यादीनि प्रमाणानि सहस्रशस्सन्ति वेदैश्च सर्वैरहमेव वेद्य इति स्ववचनमपि, किमनेन स्मृत्युपदेशेन श्रुतिरेव तावच्छरणं सर्वे वेदा यत्रैकं भवन्तीत्यादिका बहुशः प्रवर्तते कथन्तर्हि बालिशानां भगवत्पर्य्यन्तप्रतीतिः सर्वेष्वपि शब्देषु न जायते अत आह । पाकैरिति । तस्याप्रतीतेः भगवत्पर्य्यन्तत्वाप्रतीतेः, विशेषणाभावे प्रयोगः तदितरैर्विद्वद्भिरपि विशेषणाभावे क्वचित्क्वचिद् भक्त्या प्रयोगः विशिष्टवाचिनश्शब्दस्य विशेषणाभावे विभज्य प्रयोग इत्यर्थः ॥

इति जगद्वाचिनां शब्दानां परमात्मपर्य्यन्तत्वम् ८५

यदि ब्रह्मणस्सर्वशब्दवाच्यत्वं तर्हि लोकव्युत्पत्तिविरोधः स्याद् घटपटादिशब्दानां घटपटादिष्वेव लोके व्युत्पत्तिर्न पुनरीश्वरे अतः कथं व्युत्पत्तिविरोधस्सोढव्य इत्याक्षिपति । व्युत्पत्तिरिति ।

मू० व्युत्पत्तिर्वाचकानां स्थिरचरविषये लोकतो नेश्वरादावव्युत्पन्नार्थवृत्तिस्त्वधिपतिनयतः स्यादमुख्येति चेन्न । व्युत्पत्तेः पुरणां हि श्रुतिशिरसि कृतं नोपरोधः कथञ्चिद्देहित्वञ्चाधिपत्यात् समधिकमिह खल्वलपादप्रणीतात् ॥ ८६ ॥

टी० कथन्तर्हीश्वरे जगद्वाचिनां शब्दानां प्रयोग इत्यत्राह । अव्युत्पन्नेति । यथा राजा राष्ट्रमित्यत्राधिपत्यनिबन्धनम् सामानाधि-

Digitized by Google

करणम् एवं जगद्वाचिनामीश्वरे प्रयोगोऽप्याधिपत्यनिबन्धन इत्यर्थः अत्रोत्तरम् । नेति । अयमत्र भावः प्रथमव्युत्पत्तेरपूर्णाया: पूरणमेव वेदान्ते क्रियते न पुनः प्रथमव्युत्पत्तिबाधः, वेदान्तश्रवणेन हि व्युत्पत्तिः पूर्य्यते कर्मकाण्डश्रवणेन देहमात्रपरतया पूर्वं व्युत्पन्नस्य देवादिशब्दस्य देहव्यतिरिक्तात्मपरतया व्युत्पत्तिः पूर्यते एवमत्रापि तदिदमाह । नोपरोध इति । नन्वीश्वरस्य जगत्कर्तृत्वमक्षपादेनाप्यभिधीयते किमधिकं देहित्वं भवताऽभ्युपगम्यते इत्याशङ्क्याह । देहित्वमिति । अयमत्र भावः यद्यक्षपादोऽपीश्वरस्याधातृत्वविधातृत्वशेषित्वनियमेन शरीरित्वं शरीरवाचिशब्दानां शरीरपर्य्यन्तत्वमाह तमपि वयमनुमन्यामहे यदि नाह तमेवानेनोपपादनेन प्रतिक्षिपामः स खलु केवलमाधिपत्यमक्षपादः प्राह वयन्तु विश्वदेहित्वमीश्वरस्य विश्ववाचिशब्दवाच्यत्वञ्चेति विभागः ॥

इति ब्रह्मणः सर्वशब्दवाच्यत्वे व्युत्पत्तिविरोधपरिहारः ॥ ८६ ॥

एवं सर्वशब्दवाच्यत्वं ब्रह्मण उपपाद्य शब्दस्वरूपमेव शोधयति तत्र स्फोटवादिन आहुः वर्णानां नानात्वात् ते न वाचकाः शब्दादर्थं प्रतीम इति ह्येकत्वेनैव शब्दप्रतीतिः अतो वर्णातिरिक्तः पदस्फोटः पदार्थप्रत्यायकः एवं पदातिरिक्तो वाक्यस्फोटो वाक्यार्थप्रत्यायकः, न च वर्णसमुदायविवक्षया पदसमुदायविवक्षया वा वर्णानां पदानाञ्च एकत्वं संभवति देशतः कालतो वा तेषामेकत्वासंभवात् न तावत्ताल्वादिव्यापारोच्चारितानां देशत एकत्वं संभवति एककर्णशष्कुलीदेशसंबन्धादेकत्वमिति चेत्तर्हि सर्ववर्णानाम् एकपदत्वप्रसङ्गः, न च शब्दानामेककाल्यं वाचः क्रमवृत्तित्वेन क्रमेणैव तदभिधानात् अतः पदस्फोटो वाक्यस्फोटश्चैकत्वेनोपलभ्यमानः पदार्थं वाक्यार्थञ्च बोधयतीति अत्रोत्तरम् एकार्थप्रतिपादकत्वेन व्याकरणादिव्युत्पन्ना

Digitized by Google

एकबुद्ध्युपग्रहेण संघातभावमापन्ना वर्णा एव पदम् एवमेकार्थप्रति-
पादनरूपकार्य्यावच्छिन्नानि पदार्थप्रतिपादकानि पदान्येव वाक्यम्
अपेक्ष्यमेकबुद्ध्यवस्थितानां संघातभावविषयम्, अतो न विरोधः
पदतत्संघातव्यतिरिक्तस्फोटयोरनुपलम्भात् ऐक्यप्रतीतेरन्यथासिद्ध-
त्वात् एवंबुद्धिसंगृहीतानां वर्णानां पदानामर्थप्रत्यायकत्वानङ्गीकारे
स्फोटाभिव्यञ्जकत्वमपि न स्यात् तथापि किमेकैकस्याभिव्यञ्जक-
त्वमुत समुदायस्येति वक्तुं शक्यत्वात् अस्मदुक्तप्रक्रियया समाधाय
स्फोटाभिव्यञ्जकत्वाङ्गीकारे किमनेन स्फोटेनादृष्टचरेण अर्थस्यैव
तथा प्रतिपत्तिरस्त्विति तदेतत्सर्वमभिप्रेत्याह । न हीति ।

मू० न ह्यर्त्तेः कोऽपि वर्णाभ्यधिकमिह विदुर्वा-
चकं सावधानाश्शब्दादर्थं प्रतीमस्त्विति च
जनवचो नैकमन्यद्व्यनक्ति । सामग्र्यैक्यादि-
नीत्या भवति मतिरियं तादृशे वर्णसंघे
संभेदे वा पदानामिति न तदधिकः कोऽपि
शब्दो ऽपरोक्षः ॥ ८७ ॥

टी० किं प्रत्यक्षात् स्फोट उपलभ्यते तत्तावन्नास्ति प्रत्यक्षा-
भावात् नाप्यनुपपत्त्येत्याह । शब्दादिति । एकत्वं संघातविषयमि-
त्युक्तं तदेव दृष्टान्तेन विवृणोति । सामग्रीति । न हि सामग्रीव्य-
तिरेकेण कार्यकारणमिति किञ्चित्कल्प्यते तद्वदेव वर्णपदसंघात-
व्यतिरेकेण पदवाक्यस्फोटाभिधानविषयत्वेन किञ्चिन्न कल्पनीय-
मित्यर्थः, अतो वर्णपदातिरिक्तस्फोटो न प्रत्यक्षगम्य इत्याह ।
नेति ।

इति स्फोटप्रत्यक्षत्वभङ्गः ॥ ८७ ॥

स्फोटप्रत्यक्षत्वं निरस्य स्फोटक्लृप्तिवादं प्रतिबन्द्या विशदं निरस्यति । यादृग्भिरिति ।

मू० यादृग्भिः स्फोटधीस्तैर्भवति भवतु तैरर्थधीरेव वर्णैर्वर्णेषूक्तो विकल्पस्समगतिरुभयोर्यौगपद्यक्रमादिः । वाक्यस्फोटेऽपि तुल्यं तदिदमिह पदैरक्षरैर्वाऽवगम्ये स्फोटे तद्बुद्धिबोध्ये सति न च घटते तत्तदध्यासक्लृप्तिः ॥ ८८ ॥

टी० यादृग्भिर्वर्णैस्ते स्फोटधीर्भवति तैरर्थधीरेव भवतु वर्णेषूक्तो विकल्पः स्फोटाभिव्यक्तावपि समगतिः उभयोर्वादिप्रतिवादिनोरित्यर्थः । यद्वा पक्षप्रतिपक्षयोः पदस्फोटोक्तं दूषणं वाक्यस्फोटेऽपि तुल्यमित्याह । वाक्येति । किञ्च पदैरक्षरैर्वा वाक्यस्फोटः पदस्फोटश्चाभिव्यज्यत इति भवदीया प्रक्रिया । एवञ्च वर्णपदाभिव्यङ्ग्यस्फोटे तस्मिंश्च स्फोटबुद्धिबोद्ध्ये सति स्फोटे विश्वस्यापि शब्दविशेषस्याध्यास इति भवदीया क्लृप्तिरसमञ्जसैव तदिदमाह । न घटत इति । स्फुटदृष्टे स्फोटे कथं वर्णाध्यासक्लृप्तिरित्यर्थः स्फोटोऽपि क्लृप्तिमात्रमिति चेत् कुत्र क्लृप्तिः शब्दब्रह्मणीति चेद् वर्णातिरेकेण किं तच्छब्दब्रह्म वर्णानामेव श्रोत्रग्राह्यत्वेन शब्दत्वात् स्फोटस्य चानुपलम्भनिरस्तत्वात् ॥

इति स्फोटक्लृप्तिभङ्गः ॥ ८८ ॥

आगमिकस्फोटशब्दनिर्वाहमाह । शब्द इति ।

मू० शब्दो ब्रह्मेति यत्तन्मुनिभिरभिदधे स ह्यचिद्भेद इष्टस्सूक्ष्माकारस्तु सोऽर्थं न गम-

यति यतस्तत्तया नैष हेतुः । स्फोटस्त्वं वर्ण-
जुष्टस्त्विति हि यदभिहितं भारते सापि
शक्तिर्वर्णानां स्यात्तयाऽर्थः स्फुट इति घटते
स्फोटशब्दोऽपि तस्याम् ॥ ८६ ॥

टी० तर्हि शब्दो ब्रह्मेति तत्रतत्र मुनिभिरभिधीयते तत्कि-
मित्यत्राह । स हीति । अचिद्भेद ऋग्वेदादिरूपं शब्दमात्रं
यदि वा शब्दस्य सूक्ष्माकारः शब्दोत्पत्त्यवस्थाविशेषः स चार्थाव-
गमको न भवति शब्दस्य सतयाऽर्थावबोधकत्वाभावात् तादृशावस्था-
पन्नस्य शब्दस्यानुपलम्भविषयत्वात् तदिदं सर्वमाह । सूक्ष्माकार
इति । तर्हि स्फोटस्त्वं वर्णजुष्ट इति भारतोक्तं कथमिति चेत्
इत्थम् अर्थस्फोटकत्वात् प्रकाशकत्वाद्वर्णानां शक्तिरेव स्फोट
इत्यभिधीयते अतो वर्णानामुत्पत्त्यवस्थाग्रहविशिष्टाचिद्द्रव्यविशेष-
व्यतिरेकेण शब्दब्रह्मेति किञ्चिन्नास्ति अर्थावबोधकशब्दशक्तिव्यति-
रेकेण स्फोटशब्दवाच्योऽपि नास्तीत्यर्थः ॥

इत्यागमिकस्फोटादिशब्दनिर्वाहः ॥ ८६ ॥

चिन्मात्रविवर्तवद् शब्दब्रह्मविवर्तत्वेन विश्वमपि वदन्तं
शाब्दिकं प्रतिक्षिप्य प्रतिभैव वाक्यवाक्यार्थभावेन दृश्यते न प्रति-
भातिरिक्तं किञ्चिदिति वदन्तौ बौद्धशाब्दिकाभासौ प्रतिक्षिपति — ।
यदिति ।

मू० यस्मत्येकादिकल्पे गमकविषययोरप्रतीत्या-
दिदोषाद् बौद्धाश्शब्दाश्च बुद्धिं कतिचिद-
भिदधुर्वाक्यवाक्यार्थरूपाम् । नैतद्वाह्येन
वाह्यो विदित इति मतेर्बोधकोक्तेश्च

साम्याद्वाक्यादावैक्यबुद्धिस्त्वनुकथितनयादन्यथासिद्धितश्च ॥ ९० ॥

टी० तत्र पूर्वार्द्धेनानुवदति उत्तरार्द्धेन परिहारं वदतीति विभागः । अयमत्र भावः प्रत्येकं वा शब्दवाच्यमर्थः सर्वा वा यदि प्रत्येकमर्थः व्यभिचारः स्यात्, सर्वस्याप्यर्थत्वे पुनरानन्त्यम् एवं प्रत्येकं वा वाचकत्वं शब्दस्य सामस्त्येन वेति विकल्प्य दूषणं वाच्यं तथा च गमकविषययोरप्रतीतिर्विरुद्धप्रतीतिर्वा भवेदिति दोषात् बौद्धाश्शाब्दाश्च केचिद् बुद्धिमेव वाक्यवाक्यार्थभावेनारोपितामाहुः एतद्दूषयति । नैतदिति । कुत इत्यत आह । वाह्येनेति । वाह्येन शब्देन वाह्योऽर्थो विदित इति प्रतीतेः प्रत्येकादिविकल्पेन दोषोक्तेश्च साम्याद् वाक्यवाक्यार्थयोः प्रतिभारूपत्वेऽपि किं व्यवस्थितप्रतिभारूपत्वमुताव्यवस्थितप्रतिभारूपत्वम् अव्यवस्थितरूपत्वे लोकव्यवहारविरोधः, व्यवस्थितरूपत्वे सैव व्यवस्था शब्दार्थयोरप्रतिभारूपत्वे स्यादिति भावः । कथन्तर्हि वाक्यपदवाक्यार्थपदार्थादिष्वैक्यबुद्धिरिति चेदत्रं पूर्वोक्तन्यायेन समुदायविषयत्वेन परिहृतमित्याह । वाक्यादाविति ।

इति प्रतिभावाक्यवाक्यार्थभङ्गः ॥ ९० ॥

वाक्यानामर्थवत्त्वे सिद्धे तेषामन्विताभिधायित्वं पदप्रतिवन्द्या समर्थयते । आचष्ट इति ।

मू० आचष्टे प्रत्ययश्च प्रकृतिरपि मिथः श्लिष्टमित्यभ्युपेतं स्पष्टं दध्यादिशब्देष्वपि तदितरथा धीविरोधप्रसङ्गात् । अन्योन्यस्मारितार्थान्वितमभिदधति स्वार्थमेवं प-

दानि स्यान्नातश्चक्रकादिर्न च पुनरभिधा नापि वाक्यस्य भेदः ॥ ९१ ॥

टी० द्विविधं हि वाक्यार्थप्रक्रियाभेदमाहुस्तन्तन्त्रनिष्ठाः अन्विधानमभिहितान्वय इति, तत्र पदैरभिहिताः पदार्था वाक्यार्थं बोधयन्तीत्यभिहितान्वयः

पदजातं श्रुतं सर्वं स्मारितानन्वितार्थकम् ।
न्यायसंपादितव्यक्ति पश्चाद्वाक्यार्थबोधकम् ॥

इत्यन्विताभिधानम् अयमत्र श्लोकार्थः पदानि तावच्छ्रूयन्ते श्रुतानि च व्युत्पत्त्यनुसारेण पदार्थस्वरूपाणि परस्परानन्वितानि स्मारयन्ति स्मृतेषु च पदार्थेष्वाकाङ्क्षादिपरामर्शः, तत्रैव न्यायप्रवृत्तिः न्यायप्रवृत्त्या च वचनव्यक्तिविशेषाभिव्यक्तिस्संपाद्यते ततस्सम्यङ्न्यायानुगृहीतानि पदानि नानापदार्थविशिष्टैकप्रधानपदार्थात्मकं वाक्यार्थमभिदधतीति । अभिहितान्वयवादिनस्त्वेवमभ्यधुः पदैः पदार्थाः पृथक्पृथगभिधीयन्ते तन्नाभिधानं विशेषव्यत्ययभावात् स्मारकान्न विशिष्यते पदमभ्यधिकाभावात् स्मारकान्न विशिष्यत इति वचनात् ते चाभिहिताः पदार्था योग्यत्वेन परामृश्यमानाः स्वयमेव विशेषसंसर्गात्मकं वाक्यार्थमवबोधयन्ति न तत्र पदव्यापारः अर्थैरेवार्थविशेषवित्तेः यथा कविभिरालोच्यमानाः पदार्था एव वाक्यार्थरूपमर्थविशेषं संसर्गात्मकमवबोधयन्ति पश्चादेव शब्दरचनाप्रतिपन्नार्थानुरोधेन एवमत्राप्यर्था एवार्थविशेषमवबोधयन्तीति । अत्रान्विताभिधानवाद्याह यथा पदे प्रकृतिप्रत्ययौ सहैवार्थं विशिष्टरूपमभिधत्तस्तथैव वाक्येऽपि सर्वे शब्दाः सहैवार्थं विशिष्टमर्थमभिदधति तदिदमाह । आचष्ट इति । तदिदं मत्वर्थीयप्रत्ययसहितेषु दण्डादिशब्देष्वपि समानमिति दर्शयति । स्पष्टमिति । उक्तार्थेऽनुग्राहकन्तर्कमाह ।

इतरथेति । उपलम्भविरोधप्रसङ्ग एव हि सर्वेष्वपि तर्केषु सारतमः यथा पदानि प्रकृतिप्रत्ययविभागेन विभक्तान्यपि विशिष्टमेकं पदार्थं वदन्ति एवं पदान्यपि परस्परस्मारितार्थविशिष्टमेकमर्थं वदन्ति अयमर्थः कार्य्यपरं चेद्वाक्यं संहतान्येतानि पदानि कारकविशिष्ट-क्रियामभिदधति सिद्धपरत्वेऽपि समानाधिकरणवाक्यं नीलमुत्पल-मितिवत् नानाविशेषणविशिष्टमेकं विशेष्यं सिद्धमेवाभिदधाति वैयधिकरण्येऽपि व्यधिकरणविशेषणविशिष्टं सिद्धमसिद्धं वा विशेष्यमाचष्टे काष्ठैः स्थाल्यामोदनं पचतीति काष्ठैः स्थाल्यामोदनः पक्व इति वा अत्रायं सारतमोऽर्थः योग्येतरान्वितस्वार्थाभिधायीनि सर्वाण्यपि पदानि तत्रतत्र कारकपदानि क्रियान्वितस्वार्थाभिधायीनि क्रियापदं तु कारकान्वितस्वार्थाभिधायकम् एवं सिद्धपरत्वेऽपि विशे-ष्यपदं विशेषणान्वितस्वार्थाभिधायकं विशेषणपदञ्च विशेष्यान्वित-स्वार्थाभिधायकं सर्वमेतदन्विताभिधानान्न मुच्यते गुणप्रधानभावे-नैव पदार्थानां प्रतीतेरेकवाक्यत्वं न विहन्यते इति एवमभिधाना-ङ्गीकारे परवाद्युक्तास्सर्वे दोषा निरस्ता इत्याह । स्यादिति । पदै-रर्थप्रतीतिः अनन्तरमाकाङ्क्षादिपरामर्शः पश्चात्पदैरर्थाभिधानं ततोऽर्थप्रतीतिरिति चक्रकम् आकाङ्क्षादिपरामर्शादर्थाभिधानमर्थाभि-धानानन्तराकाङ्क्षादिपरामर्श इत्यन्योन्याश्रयः उभयमपि नास्ति प्रथममर्थाभिधानाभावात् स्मरणमात्रत्वात् प्रथमं प्रत्येकमर्थानाम्, अत एव न द्विरभिधानप्रसङ्गः विशेषणानां नानात्वेऽपि सर्वेषामपि पदानां विशिष्टार्थैक्यपरत्वेन वाक्यभेदप्रसङ्गोऽपि नास्ति ॥

इत्यन्विताभिधानम् ॥ ६१ ॥

इत्थमन्विताभिधानं साधयित्वा स एवान्विताभिधानवादी परैरभिहितमभिहितान्वयवादं दूषयति । स्वार्थ इति ।

मू० स्वार्थे शब्दस्य चासावपि मिलितमतो व्या-
पृतावित्यनेकाः कल्प्यास्ते शक्तयः स्युः
कथमपि न भवेत्तादृशी शक्तिरेका । अर्थेषु
स्मारितेषु प्रथममथ च तद्योग्यतादौ विमृष्टे
शब्दैरेवान्विते धीर्मम भवति तव स्वार्थ-
बोधव्यपेतैः ॥ ६२ ॥

टी० पदानां स्वार्थबोधनशक्तिः पदार्थानां संसर्गबोधनशक्तिः पदानामेव पदार्थेषु संसर्गबोधनशक्त्याधानशक्तिरिति शक्तित्रयं कल्प्यमभिहितान्वयवादिनः स चासावविति शब्दस्वार्थश्चेत्यर्थः मिलितमतो शब्दा अपि व्याप्रियन्त इति वक्तव्यमभिहितान्वयवादिना अर्थे संसर्गबोधनशक्त्याधानशक्तेश्शब्दनिष्ठत्वादिति भावः । नन्वेकैव शक्तिः अर्थप्रतिपादनं संसर्गप्रतिपादनं च तद्द्वारा करोति तन्न तत्तच्छक्तीनान्नियतविषयत्वात् तदिदमाह । कथमपीति । अस्माकं पुनरेकैव शक्तिर्योग्येतरान्वितं स्वार्थमभिदधातीति लाघवं प्रथमं स्मरणं न तत्राभिधान व्यापारः अथ च परामर्शः तत्रापि न शब्दव्यापारः केवलं विशिष्ट एवार्थे शब्दव्यापारः अत एव शाब्दत्वं वाक्यार्थज्ञानस्यास्मत्पक्षे, युष्मत्पक्षे तु पदार्थप्रतिपादनद्वारेण कथञ्चिदेव शाब्दत्वम् अतो जघन्यस्त्वत्पक्ष इत्याह । शब्दैरेवेति ।

इत्यभिहितान्वयवादभङ्गः ॥ ६२ ॥

इत्थमन्विताभिधानमुक्त्वा अभिहितान्वयपक्षेऽपि नास्माकं काचित् क्षतिरित्याह । संसर्गमिति ।

मू० संसर्गं वाक्यवेद्यं स्फुटमभिदधते कानि-
चिद्व्याप्यवाक्यान्याद्यव्युत्पत्तिकक्षा प्रतिप-

दमिह च क्वापि नान्यस्य हानिः । इत्थं मत्वा सयूथ्याःकतिचिदभिहितान्योन्यसंसर्गमीषुस्तत्तत्स्वारस्यलोकप्रतिपदनुगमात्तञ्च नाधिक्षिपामः ॥ ६३ ॥

टी० संसर्गमेव वाक्यवेद्यं कानिचिद्भाष्यवाक्यान्यभिदधति तदनुकूलं चाम्बातातमातुलादिभिर्बालानां प्रतिपदव्युत्पत्त्यभिधानं भाष्यकारस्य तदेतदाह । आद्येति । एतत्पक्षस्वीकारे नान्यस्य प्रधानार्थस्य हानिः तदिदमाह । इह चेति । यत्तु शक्तिद्वयकल्पनागौरवमभिहितं तदपि नास्ति पदानामेव पदार्थाभिधानशक्तेः स्वीकारात् अर्थानां संसर्गबोधनसामर्थ्ये स्वाभाव्यमेव शब्दाभिधानमन्तरेणापि प्रतीतानामर्थानां संसर्गबोधनसामर्थ्यं ह्य लोके दृष्टत्वात् अन्यथा कथमिव कवयः परामृश्यमानैः पदार्थैर्वाक्यार्थं प्रतिपद्य स्वयमेव वाक्यं रचयेयुः, शब्दत्वञ्च शब्दान्वयव्यतिरेकाभ्यामेव युज्यते वाक्यार्थस्याव्यवधाने त्वनादरः अतोऽभिहितान्वय एव स्यादिति केचिदाचार्याः तदेतदाह । इत्थमिति । एतदङ्गीकरोति । तत्तदिति । तत्तद्भाष्यस्वारस्याल्लोके बालकानां व्युत्पत्तिसमये पदार्थप्रतिपत्तिपूर्वकं वाक्यार्थप्रतिपत्तिस्वारस्यानुगमादमुमपि पक्षं नाधिक्षिपाम इति अयमत्र भावः यद्यप्यन्विताभिधानं तथापि निर्विशेषब्रह्मवादिनो न वेदवेद्यत्वं निर्विशेषस्य सिद्ध्येत् यद्यभिहितान्वयस्तथापि तथा अन्वितस्यान्वयस्य वा भेदगर्भत्वात् अतो गुरुकुमारिलपरिगृहीतं पक्षद्वयमप्याश्रित्य परपक्षवादिनं प्रतिक्षिपामः नास्माकं क्वापि निर्बन्ध इति प्रधानार्थविरोधे हि प्रतिक्षेप्यत्वनिर्बन्धः ॥ इत्यभिहितान्वयपक्षः ॥ ६३ ॥

Digitized by Google

इत्थं वाक्यस्याभिधानप्रकारभेदमुक्त्वा समानाधिकरणवाक्यानां भेदाभेदपरत्वं प्रतिक्षिपति । द्वार इति ।

मू० द्वारे भिन्ने समानाधिकरणवचसामैक्यतात्पर्य्यसिद्धेर्भेदाभेदस्थितानामिदमनुगुणमित्यार्हतादेर्दुराशा । वस्तुस्थित्यैकरूप्ये वचनमितरथा बोधयत्स्यान्न मानं तन्मानत्वाद्द्विधैकं स्थितमिति च न सद्भेद एवोपपत्तेः ॥ ९४ ॥

टी० इत्थं खल्वार्हतादीनामालापः यत्र समवायमिच्छन्ति समवायवादिनः तत्र भेदाभेदमेव वयमन्विच्छामः स च भेदाभेदात्मा धर्मविशेषस्सामानाधिकरण्येनैव सिद्धः, भेदे सति मत्वर्थीयदर्शनात् सामानाधिकरण्यस्य दण्डी कुण्डली गोमानश्ववानिति अतो मत्वर्थीयनिरपेक्षसामानाधिकरण्यं भेदाभेदमेवोपपादयति अत्यन्तभेदे सामानाधिकरण्यानुपपत्तेः घटः पट इतिवत् अत्यन्ताभेदे च सामानाधिकरण्यं न संभवति घटो घट इतिवत् यत्र भेदाभेदौ तत्रैव सामानाधिकरण्यं नीलमुत्पलम् इति, अतो नीलत्वोत्पलत्वादीनां द्रव्यात्मना भवत्यैक्यं पर्यायात्मना भेदः पर्य्यायशब्देन धर्मा उच्यन्ते अतस्सामानाधिकरण्यं भेदाभेदानुगुणमिति तदेतदनुभाष्य दूषयति । आर्हतादेर्दुराशेति । भिन्नप्रवृत्तिनिमित्तानां शब्दानामेकत्र वृत्तिस्सामानाधिकरण्यमिति प्रवृत्तिनिमित्तभेदेनैकार्थनिष्ठत्वलक्षणत्वात् सामानाधिकरण्यस्य तेनैव सामानाधिकरण्येन भेदाभेदसिद्धिरिति वचनं विरुद्धभाषणत्वाद् दुराशामूलमेव यदि भेदाभेदं बोधयेत् सामानाधिकरण्यं प्रमाणविरुद्धार्थ-

Digitized by Google

प्रतिपादकत्वात् प्रमाणमेव न स्यादित्याह । यस्त्विति । न ह्यतीतमस्तीति बोधयितुमेव शक्नोति वचनं, वचनबलाद्वस्तुस्थितिमप्यन्यथयाम इति चेत् तन्नेत्याह । तन्मानत्वाद्विधेर्वा स्थितमिति । न यदिति कुत इत्यत आह । भेद इति । भेदपत्त एव सामानाधिकरण्यस्योपपत्तेर्भवत्यवविरुद्धं सामानाधिकरण्यमित्यर्थः । किञ्च सामानाधिकरण्यस्यानेकान्तपरत्वे भेदाभेदसिद्धिः तत्सिद्धौ सामानाधिकरण्यस्यानेकान्तनिष्ठत्वमित्यन्योन्याश्रय इति च भावः ।

इति सामानाधिकरण्ये भेदाभेदप्रसङ्गपरिहारः ॥ ६४ ॥

माभूद् भेदाभेदपरं सामानाधिकरण्यमथाप्यनुमानबलान्निर्विशेषोपलम्भकमस्त्वित्याह । तथा हि तत्त्वमित्यादिसामानाधिकरण्यंन्निर्विशेषोपलक्षकं सामानाधिकरण्यात्मकत्वात् सोऽयं देवदत्त इत्यादिसामानाधिकरण्यवदिति तदेतदनुभाषते । ऐकाधार्य्यादिति ।

मू० ऐकाधार्य्याद्विगीतं तदिदमिति नयाल्लक्षये-
न्निर्विशेषं मैवं बाधातिचारः स्ववचनहृ-
तिभिः स्वोक्तदृष्टान्तदोष्यात् । तत्तेदन्ता-
विरोधो वचसि न हि भवेत्ताद्दृशाद्यप-
नीत्या नो चेत् स्याद्वस्तमस्तं क्षणिकमिह
पुनर्देशभेदःक्रमात् स्यात् ॥ ६५ ॥

टी० दूषयति । मैवमिति । कुत इत्यत आह । बाधेति । तत्त्वमिति विशेषणद्वयविशिष्टविषयतया उपलब्धस्य निर्विशेषपरत्वे स्फुट एव बाधः अतिचारोऽपि नीलमुत्पलं दण्डी कुण्डलीत्यादौ सविशेषपरत्वात् स्ववचनहतिः तदिदमिति सामानाधिकरण्यमिति च भेद

व्यवहारं कुर्वाणस्य निर्विशेषपरत्वकथनं स्ववचनविरुद्धमेव स्वोक्ते च सोऽयं देवदत्त इत्यत्र निर्विशेषपरत्वदृष्टान्तेऽपि दोःस्थ्यमेव सोऽयमिति सामानाधिकरण्यस्य तत्तेदन्ताविशिष्टवस्तुपरत्वात् । ननु तत्तेदन्ताविशिष्टमेकस्य कथमुच्यते तत्तेदन्तयोः परस्परविरुद्धत्वादिति तन्न विरोधाभावात्, यदि तत्तेदन्तयोरैक्ये विरोधः तर्हि सोऽयं देवदत्त इति प्रत्यक्षोपलम्भविरोधः स्यात्, तदिदमाह । तत्तेदन्तेति । तर्हि प्रत्यक्षेऽपि वचनवद्विरुद्धमेव स्यादित्याशङ्क्याह । नो चेदिति । एकस्य कालद्वयसंबन्धानङ्गीकारे क्षणभङ्गवाद एव प्रसज्येत अतो न कालविरोधः, देशद्वयसंबन्धविरोधस्तु कालभेदेन परिहृत इत्याह । इहेति । प्रत्यभिज्ञायां देशभेदः कालभेदादेव परिहृत इत्यर्थः अयमत्र निर्णयः कालद्वयमेकस्याविरुद्धमक्षणिकत्वाङ्गीकारात् स्वप्रागभावस्वप्रध्वंसकालौ स्वस्य विरुद्धौ स्वकालस्तु सर्वोऽपि स्वकालत्वादेव स्वस्याविरुद्धः स्वकालांशौ च तदेतत्कालौ स्वस्याविरुद्धावेव तत्कालस्तत्काले वस्तुनि संबध्यते एतत्कालोऽप्येतत्काले कालस्य स्वपरनिर्वाहकत्वेन कालान्तरानपेक्षणान्नानावस्थादोषः, नाप्यात्माश्रयदोषः अन्यथा स्थिरवादानङ्गीकारेण क्षणभङ्गप्रसङ्गादिति ॥

इति निर्विशेषोपलक्षणसामानाधिकरण्यभङ्गः ॥ ६५ ॥

उक्तमर्थमवहमानो मृषावादी प्रत्यवतिष्ठते सत्यादिवाक्यमखण्डपरं लक्षणवाक्यत्वात् प्रकृष्टप्रकाशश्चन्द्र इतिवाक्यवत्, न चेतद्वाक्यं स्वरूपपरं न भवतीति वक्तुं शक्यते स्वरूपस्यैव प्रकृष्टत्वात् कश्चन्द्र इति यदेव पृष्टं तदेव प्रतिवक्तव्यम् अन्यथाऽऽम्रान् पृष्टः कोविदारानाचष्ट इति न्यायः स्यादिति तदेतदनुवदति सत्येत्यादिना यदीत्यन्तेन ।

मू० सत्याद्युक्तिः प्रकृष्टद्युतिरुडुपतिरित्यादिवद्वस्तुमात्रं ब्रूते लक्ष्मोक्तिभावादिति यदि न तथा स्वोक्तिबाधादिदोषात् । रोधस्तद्वाक्यभावाद् भवति च कथितोदाहृतिस्साध्यहीना प्रश्नोक्तेश्चाविशिष्टं न विषय इति नापृष्टजल्पोपहासः ॥ ९६ ॥

टी० दूषयति । नेति । तत्र हेतुमाह । स्वोक्तीति । लक्ष्मोक्तिभावादिति वदसि वस्तुमात्रं ब्रूत इति च परस्परविरुद्धमेतत् असाधारणधर्मो लक्षणं तद्वाचिनः कथन्निर्विशेषवाचित्वमिति एवं स्वाचार्य्यादिवचनबाधः श्रुतिबाध इत्यादिक्रमादिशब्दार्थः, सत्यादिवाक्यं सविशेषं वक्ति सद्वाक्यत्वादित्यादिभिः प्रतिरोधश्चानुमानस्य, बाधो वा तेषामेवानुमानानां तर्कानुग्रहणेन प्राबल्यादिति भावः । तदिदमाह । रोध इति । दृष्टान्तोऽपि साध्यविकल इत्याह । भवति चेति । प्रकृष्टप्रकाशश्चन्द्र इति वाक्यस्य सविशेषपरत्वात्, अन्यथा लक्षणसंबन्धाभावेन चन्द्रप्रतीतिः सिद्ध्येत् अपृष्टोत्तरत्वचोद्यस्य किमुत्तरम् अभाव एवोत्तरं न ह्यपृष्टस्योत्तरं दीयते प्रष्टा खलु सामान्यतश्चन्द्रशब्दार्थं प्रतिपद्य तद्विशेषप्रतिपत्त्यर्थं चन्द्रस्यासाधारणलक्षणमप्राक्षीत् वक्ता च तदसाधारणलक्षणं प्राहेति न कश्चिद्विरोधः । अतः प्रश्नोऽपि सविशेषविषय एव, उत्तरमपि तथेति ॥ ९६ ॥

अथ चोदयति । एकत्रेति ।

मू० एकत्रार्थे समानाधिकरणवचसां वृत्तिरुक्ता ततोऽत्र स्याप्ये तत्तन्निमित्ते प्रसजति हि

भिदा धर्मिणोऽपीति चेन्न । नेतव्यं लक्ष्मवाक्यं प्रतिपदनुगुणं सात्र सिद्धा विशिष्टे व्युत्पत्तेस्तादृशत्वाद् भवति तु विहतेः क्वापि भिन्नं विशेष्यम् ॥ ६७ ॥

टी० एकस्मिन्नर्थे समानाधिकरणपदानां प्रवृत्तिरुक्ता तर्हि विशेषणभेदाद् विशेष्यभेदोऽवर्जनीयः तत्तन्निमित्ते तत्तद्विशेषणे खण्डत्वादिवदिति भावः । एवं विशेषणभेदाद्विशेष्यभेदमाशङ्क्य तदेव प्रतिक्षिपति । नेति । तदुपपादयति । नेतव्यमिति । प्रतीत्यनुगुणं हि सर्वं वाक्यं प्रतिपादयति लक्षणवाक्येऽपि प्रतीतिर्विशिष्ट एव अन्यथा लक्षणानुपपत्तेः, व्युत्पत्तिरपि तथैव भिन्नप्रवृत्तीत्यादिना समानाधिकरणपदानां विशिष्टवाचित्वस्यैव निर्णयात् यथैव व्युत्पत्तिस्तथैवार्थं *प्रतिपादयति तथैव श्रोतृणां प्रतीत्युत्पत्तिः, व्युत्पत्तिश्च यथादर्शनं दर्शनञ्चानेकेषां विशेषणानामेकवस्तुनिष्ठत्वेन अतो यत्र नीलमुत्पलमित्यादौ विशेषणमेकवस्तुनिष्ठत्वेन तत्र तथैवाङ्गीकर्तव्यं यत्र पुनः खण्डो मुण्ड इत्यादौ विरुद्धानां विशेषणानां भिन्नवस्तुनिष्ठत्वेन तत्र तथैवाङ्गीकर्तव्यमिति विभागः । तदिदमाह । भवतीति । क्वापि—खण्डो मुण्ड इत्यादौ ॥ ६७ ॥

नन्वनेकधर्मविशिष्टैकार्थाभिधाने किं क्रमेणाभिधानं युगपद्वा, क्रमेणाभिधाने पूर्वविशेषणविशिष्टे वस्तुनि उत्तरविशेषणाभावात् विशेषणानाञ्च पाठे क्रमनियमाभावादन्योन्यसमवायप्रसङ्गः, युगपदभिधाने पुनरन्योन्यैक्यप्रसङ्गो विशेषणानामपि विशिष्ट†प्रतिपादकत्व-

* तथैव वाक्यं प्रतिपादयतीति पा० ।

† विशिष्टप्रतिपादकतेति पा० ।

Digitized by Google

गतसमानविभक्तेर्विशिष्यवद्विशेषणेऽप्यैक्यप्रतिपादनात्त्रयस्यम्भावात् न हि विशेषणं मुक्त्वा विशिष्टमिति किञ्चित् प्रतिपा*द्यत इत्याशङ्क्य परिहरति । नानाधर्मेत्यादिना प्रसजत इत्यन्तेन ।

मू० नानाधर्मप्रणाड्या बहुभिरपि पदैर्द्धर्मिणो-
ऽनैक्यसिद्धौ नान्योन्याधारतैक्ये प्रसजत
उचितज्ञापनैकप्रवृत्तेः । बोध्ये सर्वैर्विशिष्टे
न च वचनभिदा तच्च सूत्रादिसिद्धं तात्प-
र्य्यञ्च स्वरूपे क्वचिदपि न भवेन्निर्निमित्ते-
ऽनुपाख्ये ॥ ९८ ॥

टी० अयमत्र भावः अन्योन्यसमवायैक्ययोः प्रसञ्जनमव्युत्पन्नानां वादः सामानाधिकरण्यलक्षणानवधारणेनैव ह्येवमुच्यते भिन्नानामर्थानाम् एकत्र धर्मिणि वृत्तिरर्थसामानाधिकरण्यं भिन्नप्रवृत्तिनिमित्तानां शब्दानाम् एकस्मिन्नर्थे वृत्तिः—प्रवृत्तिःपर्य्यवसानं शब्दसामानाधिकरण्यमित्युक्तं, तथा च क्रमाभिधाने युगपदभिधाने च नान्योन्यसमवायप्रसङ्गः । नाप्यन्योन्यैक्यप्रसङ्गः कुत इत्यत आह । उचितेति । आकाङ्क्षासन्निधियोग्यतापरामर्शपूर्वकमेव शब्दार्थे प्रतिपद्यन्ते श्रोतारः तथा च योग्यमेव परामृश्यते नायोग्यं न ह्यग्निना सिञ्चेदिति अग्निसेकयोः कार्य्यकारणभावं परामृशन्ति यथैव परामृश्यन्ते तथैव प्रतिपादयन्ति पदानि, न हि विशेषणानामन्योन्यसमवायो योग्यकोटिमाटीकते तथाऽन्योन्यैक्यमपि, तेनोचितज्ञापनैकप्रवृत्तं वाक्यमनेकविशेषणविशिष्टमेकमाश्रयं प्रतिपादयति तत्र च परामर्शदशायामेव प्राप्ताप्राप्तविभागसिद्ध्यर्थे पौर्वापर्य्यपरिकल्पनं विभागः

* प्रतिपद्यत इति पा० ।

Digitized by Google

वाक्यार्थप्रतिपादनावस्थायामेकबुद्धिसमावेशेन सहितानि पदानि विशेषणविशेष्यभावेन युगपदेव विशिष्टमर्थं प्रतिपादयन्ति अन्यथा सामानाधिकरण्यलक्षणमेव संभज्येतेति भावः, तर्हि विशेषणभेदाङ्गीकारे कथमेकवचनप्रवृत्तिरिति मन्दस्य चोद्यमाशङ्क्य परिहरति । बोध्य इति । तदुपपादयति । तदिति । सामानाधिकरण्यप्रतिपादकसूत्रभाष्यवाक्यादिसिद्धत्वादनवद्येयमास्माकी प्रक्रिया शब्दादर्थप्रतिपत्तिमोभूतात्पर्य्यादेव निर्विशेषसिद्धिरित्याशङ्क्याह । तात्पर्य्यमिति । तात्पर्य्यमपि शब्दानां वृत्तिरेव तच्च प्रतिपत्त्यर्हे वस्तुनि न तु तदनर्हे प्रतिपत्त्यर्हञ्च सविशेषमेव अतो निर्विशेषे नाभिधा । नापि लक्षणा न च गौणी वृत्तिर्नापि तात्पर्य्यमिति शब्दाविषयत्वमेव, निर्विशेषशब्दस्तु यदि प्रामाणिकस्तदा केन चिद्विशेषणेन विशिष्टस्य विशेषणान्तरनिवारणार्थः निर्विशेषं नगरमिति वत्, न हि नगरस्य योगजरथतुरगादिसंबन्धः सोऽपि निषिध्यते निर्विशेषशब्देन, अपि त्वतिपातग्रहदाहाद्युपघात एव एवं ब्रह्मणि निर्विशेषशब्दः यद्यप्रामाणिकप्रयुक्तोऽयं निर्विशेषशब्दः किमस्यार्थवत्त्वगवेषणेन नैरर्थक्यस्यैव तादृशवचनदूषणत्वात्, न ह्यप्रामाणिकवचनमनर्थकमित्यस्माकं काचिद्धानिरिति ॥ ६८ ॥

इदानीं निर्विशेषबोध्यत्वं प्रकारान्तरेणापि विकल्प्य दूषयति । बोध्यमिति ।

मू० बोध्यञ्चेन्निर्विशेषं बहुभिरपि पदैरेकतोऽन्यकृत्या स्यादन्यव्यावृत्तिभेदात् फलमभिदधतः स्यादखण्डत्वहानिः । व्यावृत्तिश्चेत्स्वरूपं भ्रम इह न भवेद्धासमाने तु तस्मिंस्तस्मात्

स्वार्थेषु मुक्तेष्वखिलपदगता लक्षणैवात्र लाभः ॥ ६९ ॥

टी० यदि बहुभिरपि सत्यज्ञानादिपदैरेकं निर्विशेषं बोध्यम् एकमेव पदमर्थवत् अन्यत् सर्वं वृथैव स्यात् । ननु विधिरूपार्थपराणि सत्यज्ञानादिपदानि माभूवन् किन्तु निषेधपराणीति यदि वदसि तदाऽप्यखण्डवाक्यार्थभङ्गः व्यावृत्तिरूपैरेव विशेषणैर्ब्रह्मणस्सखण्डत्वात्, तर्हि व्यावृत्तिर्ब्रह्मस्वरूपमेव तथा च व्यावृत्तिभेदेनार्थवत्त्वं व्यावृत्तीनां स्वरूपत्वादैक्यञ्चोपपन्नमिति चेतच्च न स्वरूपभूताया व्यावृत्तेर्नित्यस्वयंप्रकाशत्वेन प्रपञ्चभ्रमो न स्यात् तदिदमाह । भ्रम इति । कथन्तर्हि शौक्ल्यादीनां स्वरूपमेव भेदः इत्थं शौक्ल्यादीनां स्वरूपप्रतिभासे काष्र्ण्याद्यध्यासाभावात् शौक्ल्यादयो हि स्वपरनिर्वाहकधर्माः तेषां प्रतिभासे च न काष्र्ण्याद्यध्यासः अतो युक्तं स्वस्यैव भेदत्वं शौक्ल्यादिषु, ब्रह्म तु न धर्मः नापि च ब्रह्मप्रतिभासे प्रपञ्चाध्यासनिवृत्तिः अतः कथं व्यावृत्तिरूपत्वं ब्रह्मणः, तदयमर्थः ब्रह्मस्वरूपस्यैव व्यावृत्तिरूपत्वे प्राभाकरस्येव शिष्योऽसि तथा च स्वरूपभेदखण्डनविभीषाभङ्गः धर्मस्य कस्यचिद्व्यावृत्तिरूपत्वे कणभक्षाक्षपादादिमतमवलम्बसे तथा च धर्मभेदवादखण्डनगर्वो निर्वापित इति दुर्वतपण्डितां मुञ्चसीति कथमखण्डवाक्यार्थ इति यान्यच वक्तव्यान्यन्यानि दूषणानि भाष्य एव विस्तरेणानुसन्धेयानीत्यस्माभिरुपरम्यते ।

इत्यखण्डवाक्यार्थभङ्गः ॥ ६६ ॥

नन्वस्मत्पक्षे बाधार्थसामानाधिकरण्याङ्गीकारान्न विशिष्टविषयत्वसिद्धिः, यथा चोरः स्थाणुरिति तथैवेदं सर्वं पुरुष एवेदं सर्वं तत्त्वमसीत्यादिकमिति तदेतदप्ययमस्ज्ञमित्याह । बाधार्थमिति ॥

मू० बाधार्थं यत्समानाधिकरणवचनं नाविशिष्टं
वदेत्तत्रैकोऽध्यासयोग्याकृति वदति परो-
भेदयुक्तन्तु शब्दः । निर्दिष्टे वस्तुमात्रे भवतु
कथमिहारोपितं बाधनीयं भ्रान्तिर्भेदाप्र-
तीतौ विरमतु च कथं हेतुपौष्कल्ययु-
क्ता ॥ १०० ॥

टी० यदिदं बाधार्थे सामानाधिकरण्यमित्युच्येत तद्विशिष्ट-मेव वदति । तत्कथमित्यत्राह । तत्रेति । बाधार्थे सामानाधिकरण्ये-ऽप्येकश्शब्दोऽध्यासयोग्याकृति वस्तु वदति यश्चोरत्वेन प्रतिपन्न इति परस्तु शब्दो भेदयुक्तं वस्तु वदति स्थाणुरिति तथा च य एतावन्तं कालं चोरत्वेन प्रतिपन्नः स स्थाणुरिति चोरप्रतीतिविषयत्वं स्थाणुत्वं चैकवस्तुनिष्ठमेव प्रतीयते तथा च सविशेषविषयत्वमेव चोरत्वस्थाणुत्वयोः परस्परविरुद्धत्वात् चोरत्वबाधेन बाधार्थमित्यु-च्यते यदि स्थाणुत्वमपि मिथ्या कथं चोरत्वं बाध्येत अतो विरुद्धधर्म-सद्भावस्तद्विरोधिधर्मबाधाङ्गं न हि शुक्तित्वसद्भावमन्तरेण रजतत्वं बाध्यते तदिदमाह । पर इति । ननु वस्तुमात्रप्रतीतिरेव बाधकमस्तु किमनेन तदतिरिक्तेन धर्मेणेति मा वोचः वस्तुप्रतीतेरध्यासावस्था-यामपि सद्भावादित्याह । निर्दिष्ट इति । बाधाभावे भ्रान्तिर्नित्यमेवा-नुवर्तेत बाधश्च भेदग्रहणमन्तरेण नोपपद्यत इत्याह । भ्रान्ति-रिति । हेतुपौष्कल्ययुक्ता भेदाप्रतीतिरेव भ्रान्तेर्हेतुपौष्कल्यं तथा च कथं भ्रान्तिर्विरमेत्, अयमर्थः यथा चोरत्वस्य स्थाणुत्वं बाधकम् एवन्तत्पदार्थगतासाधारणधर्मदर्शनमेव प्रपञ्चबाधहेतुः अन्यथा बाध्यबाधकभाव एव न स्यादिति ॥

इति बाधार्थसामानाधिकरण्यस्यापि विशिष्टार्थत्वम् ॥ १०० ॥

Digitized by Google

अथ कश्चिदाह मा भून्निर्विशेषपरत्वं वाक्यस्य अथापि वेद-प्रामाण्यमेव नास्तीति तं प्रति ब्रूते । मानमिति ।

मू० मानं बाधाद्यभावान्निगम इतरवद्वक्तृदोषस्तु नास्मिन् बाधोऽप्यस्यानुमाद्यैरपि न हि सुवचस्तद्बलेनैव बाध्यैः । सन्दिग्धा नात्र बुद्धिर्न च न समुदिता तेन विज्ञानसिद्धा-वुत्सर्गाज्ज्ञानमेतन्मतिकलुषजयः स्याच्च मी-मांसयैव ॥ १०१ ॥

टी० वेदः प्रप्रमाणं कारणदोषबाधकप्रत्ययविधुरत्वे सति वाक्यत्वात् संप्रतिपन्नवाक्यवत् न चायं विशेषणासिद्धो हेतुरि-त्याह । वक्तृदोष इति । वक्त्रभावादेव वक्तृदोषो नास्ति बाधक-प्रत्ययोऽपि न तावदनुमानेन अनुमानस्यैवागमबाधितत्वेनाप्रमाण-त्वादित्याह । बाधोऽपीति । आगमेन चेद् बाधः स चागमो वेदश्चेत् वेदप्रामाण्याङ्गीकारः स्मृत्यादिकञ्चेद्वेदमूलत्वान्न वेदबाधकं वेदविरुद्धस्मृतिः पुनर्वेदानुकूलस्मृतिविरोधादप्रमाणमिति शारीरक-स्मृत्यधिकरणे स्थापितं, लौकिकञ्चेद्वाक्यं बाधकं तस्यालौकिकविषये प्रवृत्त्यभावादबाधकत्वमेवेति भावः । तर्हि वेदवाक्यजनितस्य ज्ञानस्य बाधितत्वाभावेऽपि सन्दिग्धत्वादप्रमाणत्वमुपवर्णयाम इति चेतन्न असंदेहरूपत्वाज् ज्ञानस्येत्याह । संदिग्धेति । न च ज्ञानमेव वेदवाक्यान्न जायत इतीत्यनुत्पत्तिलक्षणाप्रामाण्यमपि नेत्याह । न चेति । अतो विज्ञानस्य सद्भावे सति प्रामाण्यस्य स्वतस्त्वाद् वेदवाक्यमुत्सर्गात्सामान्यात् प्रमाणमेव अप्रामाण्यशङ्कानिराकरणं मीमांसया सिध्यतीत्याह । मतिकलुषेति ।

इति वेदप्रामाण्यम् । १०१ ।

Digitized by Google

मू० मानं वेदोऽपि वक्तृगुणात इति परं न्याय-
वित्साधयिष्यन् सामान्याद् बुद्धिहेतोः प्रमि-
तिमधिकतस्साधयत्यन्यनीत्या । कार्य्यत्वं
भेदकं स त्विह वदतु कथं धीविशेषत्वहेतौ
सिद्धेऽसिद्धेऽपि नित्यप्रमितिमति विभौ
निष्फलत्वादमुष्य ॥ १०२ ॥

टी० इत्थं किल परतः प्रामाण्यवादिनो वदन्ति वक्तृगुणात एव मानं वेद इति तस्यायमनुमानाभिप्रायः—प्रमा ज्ञानहेत्वतिरिक्तहेत्वधीना कार्य्यत्वे सति तद्विशेषत्वात् अप्रमावदिति सामान्यात् बुद्धिहेतोरधिकतः अधिकेनाप्रोक्तत्वेन हेतुना अन्यनीत्या अप्रमादृष्टान्तेन यथा अप्रामाण्यमनाप्रोक्तत्वेनाधिकेन हेतुना जायते एवं प्रामाण्यमप्याप्रोक्तत्वेनाधिकेन हेतुना भवतीत्यर्थः । अथानन्तरम् । कार्य्यत्वमिति । धीविशेषत्वहेतौ—तद्विशेषत्वादित्यस्मिन् हेतौ कार्य्यत्वं भेदकं विशेषणं स तु स वादी कथं वदतु वक्तुमशक्यमित्यर्थः । तदेवोपपादयति । सिद्धे ऽसिद्धेऽपीति । यदि नित्यप्रमितिमानीश्वरस्सिद्धस्तदा स्वतःप्रामाण्यमेव सिद्धं भवति ईश्वरप्रमितेर्नित्यत्वेन अप्रामाण्यकारणाभावात् तथा चेश्वरप्रमितेः पक्षकोटिनिवेशे कार्य्यत्वे सतीति विशेषणमसिद्धं पक्षकोटिनिवेशाभावे क्वचित् स्वतःप्रामाण्यमेव सिध्यति नित्यप्रमितिमत ईश्वरस्यासिद्धावपि कार्य्यत्वे सतीति विशेषणं व्यर्थं व्यवच्छेद्याभावादित्यर्थः ॥

इति परतःप्रामाण्योत्पत्त्यनुमानभङ्गः ॥ १०२ ॥

इत्थं वेदप्रामाण्यमुपपाद्य तत्प्रसङ्गागतं बुद्धीनां स्वतःप्रामाण्यमाह । संवित्तीनामिति ।

Digitized by Google

मू० संवित्तीनां यथावस्थितनिजविषयोल्लेख औत्सर्गिकः स्याद्वह्न्यादेर्दाहकत्वप्रभृतिवदुपधेरन्यथात्वं भ्रमांशे । नित्यज्ञानप्रमात्वं वदसि च निरुपाध्यत्र निर्हेतुकत्वाद्दोषाभावात् प्रमा चेच्छ्रुतिरपि जयिनी दोषदूरोज्झिता नः ॥ १०३ ॥

टी० अयमर्थः ज्ञानानां यथाऽवस्थितार्थप्रकाशकत्वं सामान्यमेव भ्रान्तस्यापि ज्ञानस्य धर्म्यंशेऽभ्रान्तत्वात् अतो वह्न्यादेर्दाहकत्ववज्ज्ञानानां प्रामाण्यं स्वाभाविकमेव उपधेर्मणिमन्त्रवद्दोषोपाधिवशादप्रमाणत्वं भ्रमांशे । किं च भवानपि नित्यस्येश्वरज्ञानस्य कारणाभावेन निरुपाधिकमेव प्रमात्वमाचष्ट इत्याह । नित्येति । ईश्वरज्ञाने दोषाभाव एव प्रमात्वनियामक इति चेत् तच्छ्रुतावपि तुल्यमित्याह । श्रुतिरपीति । यथा नित्यमीश्वरज्ञानं कारणदोषाभावात् प्रमाणम् एवं वेदवाक्यमपि कारणदोषाभावात् प्रमाणं तद्वाक्यजनितं ज्ञानमपि निर्दोषवाक्यजनितत्वात् प्रमैवेति । इत्थं च स्वतःप्रामाण्यं निर्वहति । घटोऽस्तीति ज्ञानमुत्पद्यते तत्र विषयास्तित्वमेव प्रामाण्यं तत्तु तेनैव ज्ञानेन प्रतीयते अतः स्वतःप्रामाण्यं प्रतीयते यत्र पुनः शुक्तौ रजतज्ञानमुत्पद्यते तत्रापि रजतमस्तीति रजतास्तित्वमेव प्रतीयते न पुनर्नास्तित्वं तेनैव ज्ञानेन प्रतीयते अतो विषयास्तित्वं स्वेन नास्तित्वं बाधकेन प्रतीयत इति स्वतःप्रामाण्यप्रतीतिः, अप्रामाण्यप्रतीतिः परत इति विभागः शेषं विस्तरभयान्न लिख्यते ॥ १०३ ॥

किञ्च स्वतःप्रामाण्यं श्रुत्यर्थानुधाविना तुल्यत्वमिति दर्श-यति । सर्वमिति ।

मू० सर्वं साक्षात्करोति स्वत उपधिगणैरुज्झित-स्संप्रसादः प्रामाण्यन्तत्र नोपाध्युपनतमिति तत्तुल्यताऽन्यत्र युक्ता । आत्मस्वात्मांशयोश्च क्वचिदपि न भवेद् भ्रान्तिरंशान्तरेऽपि स्यादेषा न स्वरूपे क्वचन परमसौ द्विप्रकारे प्रकारे ॥ १०४ ॥

टी० सर्वं ह पश्यः पश्यतीत्यादिश्रुतिः उपाधिगणैरुज्झितो मुक्तः संप्रसादः जीवः सर्वं साक्षात्करोतीति वदति तत्र प्रामाण्य मुपाधिकृतं परप्रयुक्तमिति वक्तुं न शक्यते स्वाभाविकत्वात्तज्ज्ञानस्य अतोऽन्यत्रापि तत्तुल्यता युक्ता स्वाभाविकत्वमेव युक्तमिति भावः । किञ्च भ्रान्त्यभ्रान्तिविभागाभावेन सर्वेष्वपि ज्ञानेष्वात्मस्वात्मांशयोः क्वचिदपि भ्रान्तिर्न भवति अतः स्वाभाव्यमेव प्रामाण्यस्य समुचि-तम् । अंशान्तरेऽपि—विषयांशेऽपि एषा भ्रान्तिः स्वरूपे क्वचन न स्यात् सर्वं ज्ञानं धर्म्यभ्रान्तमिति वचनात् तथा च विषयेऽपि स्वरूपांशे सर्वज्ञानसाधारण्यात् प्रामाण्यस्य स्वाभाविकत्वमेव युक्तमित्यर्थः । तर्हि कुत्र भ्रान्तिरित्यत आह । परमिति । असौ—भ्रान्तिः द्विप्रकारे प्रकारे द्विप्रकारे—स्वरूपनिरूपकधर्मे निरूपितस्वरूपविशेषकधर्मे चेत्यर्थः इदं रजतमित्यत्र स्वरूपनिरूपकधर्मिवैपरीत्यं, पीतश्शङ्ख इत्यत्र निरूपितस्वरूपविशेषकधर्मवैपरीत्यमिति विभागः ॥

इति बुद्धीनां स्वतःप्रामाण्यम् ॥ १०४ ॥

Digitized by Google

अथ सौगतः पुनरप्रामाण्यमेव स्वाभाविकमित्याह तन्न युज्यत इति वदति । भ्रान्तिज्ञानेऽपीति ।

मू० भ्रान्तिज्ञानेऽपि सत्यं किमपि तव मतेऽप्यस्त्यधिष्ठानपूर्वं सत्यैकालम्बि चैकं समयिभिरखिलैर्दुस्त्यजं स्वार्थसिद्धौ । बुद्धेस्तत्पक्षपातः स्वयमपि कथितस्सौगतैरेव कैश्चित् स्वात्मांशे सत्यता च स्वत इति तदसौ वैदिकोक्ते वृथेर्ष्या ॥ १०५ ॥

टी० अप्रामाण्यस्वाभाविकत्ववादिनोऽपि तव मते भ्रान्तिज्ञानेऽप्यधिष्ठानांशे प्रामाण्यस्य स्वाभाविकत्वं वाच्यम् अन्यथा निरधिष्ठानभ्रमप्रसङ्गात् । किञ्च प्रमाणात्प्रमेयसिद्धिः, युक्तियुक्तं वचो ग्राह्यमित्यादिकं वचनं सर्वैरपि वादिभिः स्वसिद्धान्तसिद्ध्यै सत्यैकालम्बि भवतीति दुस्त्यजं सत्यैकालम्बि सत्यमात्रावलम्बि अन्यथा व्याघातात् अतः स्वतःप्रामाण्यं सिद्धमिति भावः । किञ्च कैश्चित् सौगतैरेव बुद्धेः प्रामाण्यपक्षपातः स्वयमेवोक्तः निर्विकल्पकस्य वासनोपप्लवाभावेन स्वभावत एव प्रामाण्यात्सविकल्पकस्यापि स्वयंप्रकाशस्य स्वात्मांशे प्रामाण्यस्यावर्जनीयत्वात् विषयांश एव हि विकल्पस्यावस्तुनिर्भासत्वम् अर्थसंवादो वासनोपप्लव दूषितत्वञ्चेति भावः । तदिदमाह । स्वात्मांशे सत्यता चेति । एवं प्रामाण्यस्वाभाविकत्वे स्वस्याप्यवर्जनीये सति वैदिकोक्ते स्वतःप्रामाण्ये वृथैवेर्ष्या अवैदिकस्येति ॥ १०५ ॥

यदि प्रामाण्यं स्वभावः अप्रामाण्यमपि स्वभाव एव किन्न स्यात् अथवा स्यादप्रामाण्यमेव स्वभावः प्रामाण्यन्तु गुणतः अतः प्रामाण्यमेवौपाधिकमिति एतदनूद्य परिहरति । अप्रामाण्यमिति ।

मू० अप्रामाण्यं स्वभावो गुणत इतरदित्यत्र न

ह्यस्ति हेतुर्न्नाभावो हेत्वपेक्षस्त्विति च न नियमादन्यथातिप्रसङ्गात् । किञ्चाभावोऽपि भावान्तरमिति मथने स्वेष्टभङ्गश्च भावी मुक्तौ शुद्धां हि बुद्धिं वदसि न यदि सा विभ्रमः स्यान्न वा स्यात् ॥ १०६ ॥

टी० न ह्यस्ति हेतुः प्रामाण्यस्वभावत्वे सार्वत्रिकत्वं हेतुः अप्रामाण्यस्य पुनरसार्वत्रिकत्वात् किं शुक्लाद्युपाधिकारण्यन्यायेनो-पाधिगतामेवाश्रयते अतोऽप्रामाण्यस्य स्वाभाविकत्वे हेतुर्नास्ती-त्यर्थः । नन्वभावः शून्यात्मकत्वाद् हेतुनिरपेक्षः अप्रामाण्यञ्चाभा-वत्वाद्धेतुं नापेक्षते तदेतदनुभाष्य परिहरति । नाभाव इति । कुत इत्यत आह । नियमादिति । मुद्गरादिप्रहारघटादिध्वंसयोः पौर्वा-पर्य्यनियमेनाभावस्य हेतुनैरपेक्ष्यं न घटत इत्यर्थः । विपर्य्यये बाध-माह । अन्यथेति । अन्वयव्यतिरेके सत्यप्यभावस्य कारणानपे-क्षत्वे भावस्यापि कारणानपेक्षत्वं स्यादित्यर्थः । इत्थमभावस्य भावा-दतिरिक्तत्वपक्षाङ्गीकारेण दूषणमभिधाय भावान्तराभाववादेनापि दूषणमाह । किञ्चेति । गोत्वाभावोऽश्वत्वादिः शोक्ल्याभावो नैल्यादि-रिति हि भावान्तराभावस्तथा चाभावस्य भावान्तररूपत्वे तस्या-भावत्वाभावात् अप्रामाण्यमभावत्वात् स्वाभाविकमित्यसिद्धो हेतुः तदयमर्थः—यदभावो भावो वा यस्य स्वरूपानुबन्धि तत्स्वाभाविकं यदुपाध्यन्तरसापेक्षं तदौपाधिकं प्रामाण्यञ्च ज्ञानस्य स्वभावानुब-न्धि धर्मिस्वरूपे संशयविपर्य्ययोरप्यभ्रान्तत्वात् तथाऽस्तित्वभास्व-रोद्धत्वादिसाधर्म्येऽपि प्रामाण्यं दुरपन्हवं केवलं धर्ममात्रे वैपरीत्यं सन्देहो वा अतः प्रामाण्यं स्वतः, अप्रामाण्यं परत इति सिद्धम् ।

इत्यप्रामाण्यस्वाभाविकत्वभङ्गः ॥ १०६ ॥

Digitized by Google

प्रामाण्यमप्रामाण्यञ्च स्वत इति सांख्याः तन्मतमनूद्य दूषयति । मानत्वामानते इति ।

मू० मानत्वामानते द्वे स्वत इति वदतस्सांख्यसिद्धान्तिनस्ते व्यक्तिद्वैतन्तयोश्चेत् प्रतिनियततयोपाधिभेदोऽभ्युपेत्यः । व्यक्त्यैक्ये व्याहतिः स्यादथ निजविषयेष्वंशतस्ते तथाऽपि स्याद्धीस्सर्वा तथेति स्वपरसमययोर्द्वेषरागौ जुषस्व ॥ १०७ ॥

टी० मानत्वामानत्वे द्वे अपि स्वत एव भवत इति वदतस्ते सांख्यस्य तयोर्मानत्वामानत्वयोर्व्यक्तिद्वैविध्यञ्चेत् भिन्नाधिकरणवृत्तित्वञ्चेदुपाधिभेदोऽङ्गीकार्य्यः कारणदोषात् क्वचिदप्रामाण्यं कारणगुणात् क्वचित्प्रामाण्यमिति, तथा च नैयायिकानाम् अयं सिद्धान्तः एकस्यामेव व्यक्तौ प्रामाण्यमप्रामाण्यञ्चेत् स्वाभाविकमभ्युपैषि तदा व्याघातः न ह्येकमेव विज्ञानमेकविषये स्वत एव प्रमाणमप्रमाणञ्चेत्यनुन्मत्तो ब्रवीति, तर्हि स्वविषयेष्वंशभेदेन प्रामाण्यमप्रामाण्यञ्चेत्ते प्रामाण्याप्रामाण्ये ते इति द्विवचनम् । एवन्तर्हि स्वसिद्धान्तजन्यज्ञानमपि प्रमाणाप्रमाणात्मकं परसिद्धान्तजन्यज्ञानमपि प्रमाणाप्रमाणात्मकमिति कृत्वा स्वसिद्धान्तेऽपि द्वेषं परसिद्धान्तेऽपि रागं भजस्वेति परिहासेनोत्तरम् ॥ १०७ ॥

अथ चोदयति । ज्ञानमिति ।

मू० ज्ञानं मानं स्वतश्चेत्कथमिव विषयः कस्यचित्क्वापि भावी मीमांसा चानपेक्ष्येत्यसदुपधिकृताकारशङ्कोपपत्तेः । नेत्रालोकादि-

नीतेर्भवति च निगमोऽप्यत्र मीमांसयाऽर्थी हेतूनां साध्यसिद्धौ सहकृदनुविधिर्हेतुभावं न हन्ति ॥ १०८ ॥

टी० ज्ञानं स्वत एव प्रमाणं चेर्त्तर्हि कस्यचित्कुत्रचित् प्रमाणमप्रमाणं वेति संशयो न स्यात् तथा च मीमांसा ऽ नपेक्ष्या स्यादिति इमां शङ्कान्निराकरोति । असदिति । अत्र हेतुमाह । उपधीति । प्रामाण्यस्य स्वाभाविकत्वेऽप्युपाधिकृताप्रामाण्यशङ्कायास्सद्भावात्तन्निराकरणार्थं मीमांसा अपेक्षणीया स्यादिति भावः दृष्टान्तेनस्वत एव रूपादिविषये प्रमाणभूतस्यापि नेत्रस्यालोकादिसहकारिसाहित्यापेक्षणं, तदिदमाह । नेत्रेति । नेत्रमालोकमपेक्षते एवं निगमोऽप्यर्थतत्त्वावलोकने मीमांसयाऽर्थी मीमांसासापेक्ष इत्यर्थः, न केवलं प्रमाणानामेव सहकारिसापेक्षत्वम् अपि तु सर्वेषामपि कारणानाम् । इदञ्च सापेक्षत्वं कारणानां कारणत्वं न व्याहन्तीत्याह । हेतूनामिति ।

इति स्वतःप्रामाण्यविरोधितर्कनिरासः ॥ १०८ ॥

उभयवादिसंप्रतिपन्नदृष्टान्तोपादानेन स्वतःप्रामाण्यव्याप्तिमुपपादयति । सर्वज्ञस्येति ।

मू० सर्वज्ञस्य प्रमाया न खलु न विषयः स्यात्स्वकीयं प्रमात्वं निर्बाधा धीः प्रमेति प्रमितिरपि निजं गाहते मानभावम् । मानेऽर्थः स्वात्मनैव स्फुरति न च परं भाति शङ्कानिरासैर्भ्रान्त्या स्वार्थोऽन्यथात्वं स्वयमनवगतं बाधकैर्वेद्यते ऽतः ॥ १०९ ॥

Digitized by Google

टी० पूर्वं प्रामाण्यस्वरूपस्य ज्ञानेषु स्वतस्त्वमुक्तम् । इदानीं प्रमाज्ञप्तेरपि स्वतस्त्वमुच्यत इति विभागः । ज्ञानस्य स्वप्रामाण्यं स्वेनैव गृह्यत इति दृष्टमित्याह । सर्वज्ञस्येति । ईश्वरज्ञानं सर्वविषयत्वात् स्वगतमपि प्रामाण्यं गृह्णाति, अन्यथा सर्वविषयत्वमेव न स्यात्, न केवलमीश्वरज्ञानमीदृशम् अस्मदीयमपि ज्ञानं तथेत्याह । निर्बाधेति । प्रमितिः—लक्षणप्रमितिः स्वकीयमपि प्रमितित्वं गृह्णाति अन्यथा सर्वानुवृत्तलक्षणग्रहणमेव न स्यादिति भावः अस्त्वेवं तथाऽपि कथं प्रामाण्यं स्वतो गृह्यते कथं वा अप्रामाण्यं परतो गृह्यत इत्याशङ्क्य क्रमादुभयत्र उपपत्तिमाह । मान इति । प्रमाणज्ञाने घटोऽस्तीति सद्भावविशिष्ट एव घटः प्रतीयते स एवार्थसद्भावो घटज्ञानस्य प्रामाण्यम् अतः स्वतो गृह्यते प्रामाण्यम् । नन्वप्रामाण्यशङ्कानिरासकैस्संवादकारणगुणार्थक्रियाज्ञानैः किं क्रियते तदेव पूर्वप्रतिपन्नं प्रामाण्यं प्रतिष्ठाप्यते, न हि संवादादिज्ञानेषु घटसद्भावातिरेकेण ज्ञाप्यमस्ति अतः स्वतःप्रतिपन्नमेवार्थतथात्वं तैरपि पुनर्गृह्यत इति प्रामाण्यग्रहणस्य स्वतस्त्वमेव । तदिदमाह । न चेति । भ्रान्तिज्ञानेष्वप्रामाण्यं परत एव ज्ञाप्यत इत्याह । भ्रान्त्येति । अर्थान्यथात्वमेव ज्ञानस्याप्रामाण्यं तदन्यैरेव बाधकैरवगुह्यते, न हि रजतज्ञानं रजतज्ञानस्यान्यथात्वमावेदयति अपि तु कारणदोषादिज्ञानं ज्ञानविषयस्यान्यथात्वं बोधयति अतोऽप्रामाण्यस्य परतस्त्वमिति विभागः । अत्र वक्तव्यं सर्वमवशिष्टं स्वयमेव भाष्यमन्तेवासिभिः ॥

इति स्वतःप्रामाण्यज्ञप्तिप्रकारः ॥ १०६ ॥

अस्तु स्वतःप्रामाण्यं प्रमाणस्य अथापि वेदेष्वद्भुतोक्तीनामयाथात्म्यमित्याशङ्क्य परिहरति । दृष्टमिति ।

मू० दृष्टं मान्धालभोगिप्रभृतिषु करणस्थानभेदादिचित्रं तादृग्द्वीपान्तरादौ श्रुतमपि न मृषा वेदसिद्धे तथा नः । यत्रानाप्तोक्तताधीर्न भवति विहतिर्नापि संभावनायाः किं व्याप्त्याऽत्रोपचारो विहतिमति भवेन्नैव तद्व्याप्तिदौःस्थ्ये ॥ ११० ॥

टी० न हि वेद एवाद्भुतदृष्टिः लोकेऽपि अद्भुतत्वानामान्यथादृष्टस्यापि क्वाचित्कदर्शनं, दृश्यते हि मान्धालव्यालादीनामन्धकारेऽपि रूपदर्शनं मान्धालानामाहार—निर्हारकरणयोरेकस्थानवर्तित्वं, व्यालानां चक्षुःश्रवस्त्वं, पक्षिषु च केषुकेषुचिदङ्गाराहारत्वम्, वीक्षणध्यानसंस्पर्शैर्मत्स्यकूर्मविहङ्गानां पुत्रपोषणं नालिकेरद्वीपवासिनामपक्वान्नेनैव देहधारणं, तदिदमाह । तादृगिति । दृष्टान्तदृष्टं दार्ष्टान्तिके योजयति । वेदसिद्ध इति । लोकेऽप्यद्भुतार्थाङ्गीकारः प्रमाणसिद्धत्वादङ्गीक्रियते किं पुनर्वेद इत्यर्थः । तर्हि सर्वमप्यघटितं वेदसिद्धमित्यङ्गीकार्य्यं नेत्याह । यत्रेति । अयमत्र नियमः यत्रानाप्तोक्तत्वज्ञानं नास्ति प्रतीतेश्च न व्याघातः तत्र दृष्टान्ताभावेऽपि सोऽर्थोऽङ्गीकार्य्यः, तदेतदाह । किं व्याप्त्येति । किं दृष्टान्तदर्शनेनेत्यर्थः । उपचारस्तर्हि कुत्रेत्याशङ्क्याह । उपचार इति । व्याघाते सत्युपचारः नैव तत् उपचरणं व्याप्तिदौःस्थ्ये—दृष्टान्तदौःस्थ्ये, अपूर्वार्थस्य प्रमाणेन दर्शने पूर्वदर्शनविरूपता न दोषायेत्यर्थः, देवकीजठरे वासः स्वोदरे विश्वदर्शनमित्यादिकं विश्वरूपस्य भगवतो योयुज्यत इत्यर्थः ॥

इति वेदेष्वद्भुतोक्तियाथात्म्यम् ॥ ११० ॥

एवं वेदानां स्वाभाविकं प्रामाण्यमुपपाद्य तेषामाप्तोक्तत्वेन प्रामाण्यमुपपादयतां पक्षप्रतिक्षेपार्थं वाक्यत्वात् कर्तृमत्त्वं वेदानामित्यादिकमनुमानं दूषयितुमारभते । वाक्यत्वादिति ।

मू० वाक्यत्वात् कर्तृमत्यः श्रुतय इति यदि ब्रूहि बाधं विपक्षे श्रुत्या स्मृत्या च बाध्या त्वदनुमितिरियं कर्तुरत्रास्मृतेश्च । त्वं तावत्तिष्ठ लोकैर्न हि पुरुषगुणप्रत्ययात्तद्ग्रहीतिस्सन्तश्चापह्नुवीरंस्तमिह न मुनयस्सत्यनिष्ठाः कृतज्ञाः ॥ १११ ॥

टी० तथा हि वेदवाक्यानि सकर्तृकाणि वाक्यत्वादित्याद्यनुमाने यदि विपक्षे बाधकतर्कोऽस्ति स वक्तव्यः, न चेदनुग्राहकतर्काभावादप्रयोजकोऽयं हेतुः, वक्त्रभावे वाक्यत्वं हीयत इति चेतन्न स्वतन्त्रवक्त्रभावेऽपि प्रवक्तृपारम्पर्यमात्रेण वाक्यत्वस्यान्यथासिद्धत्वात् यथा सवक्तृ*काणामपि वाक्यानामुच्चारयितृपूर्वपुरुषताल्वोष्ठादिव्यापारपूर्वकत्वमेव हि वाक्यत्वे तन्त्रम् । आदौ कस्यचित्पुरुषस्य स्वातन्त्र्यमङ्गमिति चेन्न तस्य कादाचित्कसंदर्भसाजात्य एव नियामकता यथा भवतां ज्ञानानामनित्यत्वेन कारणगुणपूर्वकत्वेनैव प्रमात्वे सत्यपीश्वरज्ञानस्य नित्यत्वेन तादृशगुणपूर्वकत्वाभावः, एवमागन्तुकसंदर्भस्य स्वतन्त्रपुरुषपूर्वकत्वेऽपि नित्यसन्दर्भसाजात्यस्य स्वतन्त्रपुरुषपूर्वकत्वं न स्यात् तथा च वाक्यत्वमन्यथासिद्धत्वान्न स्वतन्त्रपुरुषपूर्वकत्वं साधयति, सर्वं वाक्यमनित्यमेव वाक्यत्वादिति चेतन्न सिद्धसाधनत्वात् तत्र चोच्चार्यमाणवाक्यस्या-

* सकर्तृकाणामिति पा० ।

Digitized by Google

नित्यत्वात् तादृशवाक्यपारम्पर्य्यस्य च नित्यत्वे बाधकाभावात् तावन्मात्रेणैव अस्माकं वेदनित्यत्वसिद्धेः, न ह्येकरूपवाक्यप्रवाहाना- दित्वातिरेकेण वेदवाक्यानामनादित्वं प्रतिपद्यामहे न ह्येकरूपब्रह्मा- ण्डप्रवाहस्य अनादित्वे को नाम विप्रतिपद्यते सावयवत्वाद् ब्रह्मा- ण्डस्य सादित्वे साध्यमाने तज्जातीयब्रह्माण्डस्य पूर्वं सद्भावो न निषिद्ध्यते एवं प्रत्येकं वाक्यस्य सकर्तृकत्वेऽपि प्रवाहस्यानादित्वे न कश्चिद्विरोधः । किञ्चेदमनुमानं वाचा विरूपनित्यया, नाम रूपञ्च भूतानामित्यादिश्रुतिस्मृतिविरोधात् कालात्ययापदिष्टम् । तदिदमाह । श्रुत्येति । स्मर्तव्यत्वे सति कर्तृस्मरणाभावाच्च कर्तृशून्यो वेदः, न च जीर्णकूपारामादिषु व्यभिचारः उपदेशपारम्पर्ये स्मर्तव्यत्वे च सत्य- स्मरणस्य कर्त्रभावनियतत्वात् मया स्मृतः कर्ता तत्प्रत्ययाद्वेदप्रामा- ण्यमिति चेत्तन्न आग्रहगृहीतस्य भवतो वाक्ये प्रामाण्याभावादित्याह । त्वं तावदिति । न हि मन्वादीनां वेदपरिग्रहः पुरुषगुणप्रत्ययेनेत्याह । न हीति । प्रत्युत वेदस्याकर्तृकत्वमेव परमर्षयः प्रवदन्ति । ननु सर्ववेदकर्तरि भगवति विद्यमानेऽपि मन्वादयस्तदनुविधायिनश्च वेदवक्तारमपलपन्तीति तन्न तेषां तदपलापे प्रयोजनाभावात् न हि सत्यनिष्ठास्तादृशा महात्मानस्तमपि भगवन्तमपलपन्तीति संभव- तीत्याह ।

सन्तश्चेति ॥ १११ ॥

मन्वादिकाले वेदैक्यं श्रुतमतस्तदातदा नानावेदसृष्टिरित्या- शङ्क्य परिहरति । आदाविति ।

मू० आदौ वेदैक्यवादस्त्वविभजनवशात्तावता
नान्यसृष्टिस्सर्वेषामेकवेदान्वयमपि जगदुः

Digitized by Google

कालभेदप्रतिष्ठम् । तद्वच्छाखाविभागः प्रवचननियता काठकाद्या समाख्या द्रष्टा मन्त्रादिकर्त्ता परिहृत इह चानित्ययोगः प्रवाहैः ॥ ११२ ॥

टी० तत्र हेतुमाह । अविभजनेनेति । तस्मिन् काले सर्वेषां वेदानामेकवेदान्वयकथनं कथं तदपि युज्यते कालभेदनियतत्वात् । तदिदमाह । कालेति । अत एव पश्चाच्छाखाविभागकथनमपि कालभेदादेवेत्याह । तद्वदिति । एवं काठकादिसमाख्यापि प्रवचनानुबन्धित्वान्न वेदसृष्टिहेतुरित्याह । प्रवचनेति । एवं वेदद्रष्टृत्वान्मन्त्रादिकर्तृत्वञ्च व्याख्येयमित्याह । द्रष्टेति । कथन्तर्हि नित्यस्य वेदस्यानित्यैर्योग इत्यत आह । अनित्येति । अयमर्थः वेदवाक्यसन्दर्भसाजात्यमनादित्वेन नियतं सर्वमप्यनित्यं पदार्थजातं साजात्येन नित्येन वेदेन संबध्यते स्फ्य–कपाल–पुरोडाशादीनामपि साजात्येनानादित्वात् ॥ ११२ ॥

कथन्तर्हि प्रतिमन्वन्तरञ्चैषा श्रुतिरन्या विधीयत इत्याशङ्कां परिहरति । भेद इति ।

मू० भेदो मन्वन्तरादौ भवति च नियतोऽनादिसिद्धे तदंशे पुंसूक्तादौ श्रुतीनां जनिवचनमपि प्रागवदाविष्कृतौ स्यात् । आज्ञारूपत्वमासां न च गलति विभोरैक्य*रूप्याभिसन्ध्येर्य्योऽसौ देवः प्रमाणं स च न शिथियेच्छक्तिमन्तं क्रमं तम् ॥ ११३ ॥

* रैकरूपाभिसंधेरिति पा० ।

टी० अनादिसिद्धानां वेदांशानामनन्तत्वात् कस्मिँश्चिन्मन्वन्तरे कश्चिद्वेदांशः प्रवर्तत इत्यर्थः । कथन्तर्हि पुंसूक्तादौ ऋचस्सामानि जज्ञिरे इत्यादिवचनं तच्च प्रादुर्भावमात्रपरमित्याह । पुंसूक्तेति । अन्यथा यो वै वेदांश्च प्रहिणोति तस्मा इत्यादिवचनशतविरोधात्, कथन्तर्हि नित्यानां वेदानामीश्वराज्ञारूपत्वम् आज्ञावाक्यस्य तदातदान्यथाकरणसंभवादित्याशङ्क्य परिहरति । आज्ञेति । हेतुमाह । त्रिभोरिति । प्रतिकल्पमेकरूपाभिसन्धिरीश्वर एकरूपमेवाज्ञावाक्यं वदति, एतदेव वेदस्य नित्यत्वं यदेकरूप्येण सर्वेष्वपि कल्पेष्वाय्यमाणत्वमीश्वराभिसन्धिविशेषद्योतनत्वादाज्ञारूपत्वमपि न विहन्यत इत्यर्थः । नन्वीश्वरः स्वतन्त्रत्वाद्वेदान् प्रतिकल्पमन्यथयतु, नान्यथयति अन्यथा करणे प्रमाणाभावात् यथापूर्वमकल्पयदिति यथापूर्वकल्पने प्रमाणसंभवाच्च अतस्ततत्क्रमविशेषविशिष्टतया ततत्कार्य्यकारणशक्तमन्त्रार्थवादविधिरूपं वेदराशिं नेश्वरश्शिथिलयेदिति ॥ ११२ ॥

इति वेदनित्यत्वम् ।

ननु महाजनपरिग्रहाद्वेदप्रामाण्यं प्रतिपद्यन्ते वेदवादिनः स च परिग्रहो बाह्यागमेष्वपि तुल्य इत्याशङ्क्य वैषम्यमाह । प्रेक्षावन्त इति ।

मू० प्रेक्षावन्तो महान्तः परिजगृहुरिमं सार्थमङ्गैरनन्तं नेत्थं बाह्यागमानां प्रसृतिरनुपधेस्तद्ग्रहीतेरभावात् । दृश्यन्ते गत्यभावो नियतिषु लघिमा वञ्चनन्तर्कमोहो वृत्ति-

Digitized by Google

स्वास्थ्यादि चैषामुपधिरधिगमे वैपरीत्यं तु वेदे ॥ ११४ ॥

टी० अयमर्थः बहुजनपरिगृहीतत्वं न महाजनपरिग्रहः अपि तूत्कृष्टजनपरिग्रहः स तु वेदेष्वेवेति भावः । कथमन्येषामागमानामनुत्कृष्टजनपरिग्रह इत्यत्राह । नेति । प्रकृतिर्मर्य्यादा तत्परिग्रहप्रकारपरिशोधने वैषम्यमवगम्यत इत्यर्थः । कथमित्यत्राह । अनुपधेरिति । द्विविधो हि परिग्रहः आस्तिक्यनिबन्धनः कश्चित् अल्पाल्पप्रयोजनाभिलाषादपरः, तत्र वेदपरिग्रहः पूर्वकोटौ निविशते बाह्यागमपरिग्रहस्सोपाधिक इत्यर्थः । उपाधिस्तु दृष्टमेव प्रयोजनम् उपाधीनेव परिगणयति । दृश्यन्त इति । अनन्यगतिकत्वं कर्त्तव्याकर्त्तव्यनियमेषु लाघवं परैर्वञ्चनं कुतर्काभ्यासव्यामोहो वृत्तिस्वास्थ्यमशनाच्छादनादिसौकर्य्यम् एतादृशमन्यदपि बाह्यागमपरिग्रहे निदानम् एतद्वैपरीत्यं वेदपरिग्रहे दृष्टमिति न बाह्यपरिग्रहस्य वेदपरिग्रहेण तुल्यत्वमिति भावः । इदमेव न्यायविद्भिरपि हेतुदर्शनादर्शनाभ्यां विवेकादित्युच्यते ॥ ११४ ॥

किञ्चैवं प्रमाणत्वेन प्रतिपन्नवेदवाक्याद् बाह्यानां बाधस्यापनमप्रामाण्यहेतुरित्याह । नित्यैरिति ।

मू० नित्यैरस्पृष्टदोषैर्भवति च निगमैः पौरुषेयेषु बाधः पाख*ण्डत्वप्रथैषां जगति न च मृषा पक्षपातप्रहाणे । अन्योन्यस्मिंस्तु बाधः प्रसजति कृतकेष्वाप्तिमोहादिसाम्यात् संवादोंऽशेषु तुल्यः परमिह कुहनासिद्धयेऽन्यप्रवेशः ॥ ११५ ॥

* पाषण्डशब्दोऽपि ।

Digitized by Google

टी० अतस्तेषां पाख*ण्डत्वप्रसिद्धिरप्यप्रामाण्यनिमित्तं भवतीत्याह । पाखण्डत्वेति । न चैतावदेव बौद्धचार्वाकार्हतसांख्यादीनां परस्परबाधोऽप्यप्रामाण्यहेतुरित्याह । अन्योन्यमिति । तत्रैकश्चेदाप्तः अपरोऽप्याप्तः, मूढश्चेन्मूढ इत्याह । आप्तीति । क्वचिद्वेदसंवादात् कुत्रचित् प्रामाण्यमिति चेत्तुल्यमित्याह । संवाद इति । अतस्सिद्धान्तान्तरप्रवेशः कुहनासिद्धये—परवञ्चनादिसिद्धय इति न वाह्यसिद्धान्तैर्वेदागमस्य तुल्यत्वप्रसङ्ग इत्यर्थः ॥ ११५ ॥

इति वेदस्य वाह्यागमेभ्यो वैषम्यम् ।

इत्थं वेदस्य प्रामाण्यमुपपाद्य स्मृतीतिहासादेर्वेदमूलत्वेन प्रामाण्यमुपपादयति । संवाद इति ।

मू० संवादे मानवादेः श्रुतिभिरविरले संग्रहे तत्समाने ताभिश्चाप्तत्वसिद्धौ स्वकथित उचितस्तस्य तन्मूलभावः । नाद्यं लिङ्गं नरोक्तिर्भ्रम इह घटते विप्रलिप्सा ऽपि मूलं नाज्ञाते भावनाऽपि श्रुतिविषयतया भाति योगे तु धर्मः ॥ ११६ ॥

टी० अयमर्थः मानवादेर्मन्वादिग्रन्थस्य श्रुतिभिस्संवादे अविरले—सार्वत्रिके संग्रहे—परिग्रहे, तत्समाने—श्रुतिभिस्समाने स्मर्तॄणां मन्वादीनां ताभिः यद्वै किञ्च मनुरवददित्यादिभिः श्रुतिभिरेवाप्तत्वसिद्धौ, स्वकथितः—स्मृतिभिरेव कथितः तस्य—मानवादेस्तन्मूलभाव उचितः आप्तः स्मर्तार एव वेदमूलत्वं स्मृतीनामाहुरित्यर्थः । श्रुतेरेव स्मृतिमूलत्वमुक्त्वा तदन्येषां तन्मूलत्वं निषेधति । नेति । न

* पाखण्डेति पा० ।

Digitized by Google

तावदिन्द्रियं स्मृत्यादिमूलं संभवति तस्यालौकिकार्थत्वात् तद्विषये लौकिकस्य प्रत्यक्षस्याप्रवृत्तेः । न चानुमानं तत्र प्रवर्तते अन्वयव्यतिरेकस्य प्रत्यक्षमूलत्वेन प्रत्यक्षस्य निवृत्तावनुमानस्यापि निवृत्तेः, न च लौकिकं वाक्यं तन्मूलं तस्य प्रत्यक्षानुमानमूलत्वेन तन्निवृत्तावसंभवात्, न च भ्रम एव मूलं महाजनपरिग्रहासंभवात् तत एव न विप्रलिप्सापि मूलं, तर्हि भावनैव मूलमिति चेत् तदपि नेत्याह । नाज्ञात इति । तथा च चक्रकमित्यर्थः, ज्ञाते भावना भावनया च स्मृतिः स्मृत्या ज्ञानमिति श्रुत्या ज्ञाने पुनरस्मत्पक्षः प्रत्यक्षादिभिः स्मृतिविषयज्ञानमशक्यमेव प्रतिक्षिप्तं कथन्तर्हि महर्षीणां प्रत्यक्षेण धर्मदर्शनम् इत्थं श्रुत्या धर्मं प्रतिपद्य स्वयमनुष्ठातारो धर्मप्रभावात् प्रभावविशेषमासाद्य पश्चाच्चोदनालक्षणोऽर्थो धर्म इति श्रुतिविषयत्वेन धर्मान् साक्षात्कुर्वन्ति नैतावता स्मृतीनां श्रुतिमूलत्वभङ्गः तैरपि योगिभिर्योगदशायां श्रुतिप्रमाणगम्यत्वेनैव धर्माणामुपलम्भात् अतो वेदमूलत्वं स्मृत्यादेरुपपन्नमिति ॥ ११६ ॥

इति स्मृतीतिहासादेर्वेदमूलत्वम् ।

इत्थं वेदमूलत्वं स्मृतीनामुपपाद्य अष्टकाद्याचारादेः प्राभाकरोक्तं नित्यानुमेयवेदमूलत्वं प्रतिक्षिपति । या मूलमिति ।

मू० या मूलं त्वष्टकादेरियमपि मनुजैः क्वाप्यधीता श्रुतित्वात् सा चेन्नित्यानुमेया प्रसजति न कथं तादृशाध्यक्षक्लृप्तिः । सर्वस्मिन् पूर्वपूर्वस्मृतिरपि निगमोपज्ञमित्याचरिष्णो नित्यादृश्ये च मूले नियतमिह भवेदन्धसन्तानतीतिः ॥ ११७ ॥

Digitized by Google

टी० इदमत्रानुमानम् अष्टकाद्याचारमूलभूता श्रुतिरन्यत्र क्वचिदधीता श्रुतित्वात् प्रत्यक्षश्रुतिवदिति, नित्यानुमेया सा श्रुतिरिति चेन्न श्रुतित्वे नित्यानुमेयत्वव्याघातात् ताल्वादिव्यापारैः क्वचिदुच्चार्य्यमाणो वर्णसंघातविशेष एव हि श्रुतिः तस्य कथन्नित्यानुमेयत्वम् उच्चारणदशायां वक्तृश्रोत्रोरुपलम्भात् । यदि च नित्यानुमेया श्रुतिमूलभूता स्मृतीनान्तर्हि तादृशं नित्यानुमेयं प्रत्यक्षमपि तन्मूलतया किं न कल्प्यते । प्रमाणाभावादिति चेत्तुल्यं, स्मृतिरेव मूलसद्भावे प्रमाणमिति चेत् सत्यं, सा हि स्मृतिर्मूलमेवानुमापयति न पुनर्नित्यानुमेयत्वमपि मूलभूतस्य वेदस्य मूलान्तराभावादिति चेन्न विप्रकीर्णैव श्रुतिरस्तु मूलं किमनया नित्यानुमेयया श्रुत्या । किञ्च सर्वेऽपि पूर्वपूर्वस्मृतिमेव प्रमाणीकृत्याचरन्ति न कश्चिदपि वेदं दृष्टवान् इति हि नित्यानुमेयत्वं वेदस्य, तथा च सर्वेषामेव परप्रत्ययमात्रशरणत्वात् सकलस्यापि मूलभूतप्रमाणादृष्टेरन्धपारम्पर्य्यवदप्रमाणमूल एव स्मृतिपरिग्रह इति प्रसज्येत अतो नित्यानुमेयवेदमूलत्वं स्मृतीनामप्रामाण्यकारणमिति ॥ ११० ॥

इत्यष्टकादेर्नित्यानुमेयश्रुतिमूलत्वभङ्गः ।

माभून्नित्यानुमेयवेदमूलत्वमुच्छिन्नशाखामूलत्वं स्मृतीनामिति तार्किकास्तान् प्रत्याह । शाखोच्छेद इति ।

मू० शाखोच्छेदस्त्विदानीमिह यदि स मतस्सर्वतश्चेदसिद्धिर्व्यासागस्त्यप्रधानैर्भवति च मुनिभिर्भूषिताद्यापि भूमिः । उच्छिन्ना सा यथैवाचरितुरविदिता तत्तदाचारमूलं तद्वत्सा

Digitized by Google

विप्रकीर्णा क्रमसमधिगमः कालवद्देशतो-ऽपि ॥ ११८ ॥

टी० अयमर्थः किं शाखोच्छेदं प्रत्यक्षेण साधयति तच्च प्रत्यक्षमभावादेव निरस्तम्, काव्याद्युच्छेददर्शनाद्वेदोच्छेदमपि वदाम इति चेतन्न न ह्यन्योच्छेद एवान्योच्छेदः, अस्तु वा अन्योच्छेदादन्योच्छेदः, अथापि केनापि हेतुना वेदोच्छेदमनुमिमीषे स पुनरुच्छेदः किमिदानीम् एतस्मिन्नेव देशे उत देशान्तरेऽपि पूर्वत्र सिद्धसाधनम् एतद्देशे तत्प्रवृत्त्यभावात्, उत्तरत्र कालात्ययापदेशः, व्यासागस्त्यादेरद्यापि तत्रतत्र विद्यमानत्वात्, असिद्धिः—बाध इत्यर्थः । तर्हि विप्रकीर्णा श्रुतिः कथमत्रत्याचारमूलमिति चेत् कथं वोच्छिन्ना श्रुतिरत्रत्याधुनिकाचारमूलमिति भवानेव पश्यतु । आचरितुरविदिताऽपि तत्पूर्वविदितत्वात् तदाचारमूलमिति चेतुल्यम् अत्रत्यैरविदितापि देशान्तरस्थैर्विदिता श्रुतिस्तदुपदेशपारम्पर्य्यादत्रत्याचारमूलमिति तदिदमाह । क्रमेति । यथाकालक्रमागतप्रवक्तृपारम्पर्य्यादधिगमः एवं देशक्रमागतप्रवक्तृपारम्पर्य्यादस्माकमप्यधिगम इति ॥

इति शिष्टाचारादेरत्यन्तोच्छिन्नशाखामूलत्वभङ्गः ॥ ११८ ॥

स्मृतेर्वेदमूलत्वेन श्रुतिविरोधे स्वत्यप्रामाण्यमुक्तं तत्पुराणादीनामपि समानमित्याह । दृष्ट इति ।

मू० दृष्टे वेदैर्विरोधे स्मृतिपरिहरणं सूत्रभाष्यादिसिद्धं तद्वन्नीतिः पुराणप्रभृतिषु भविनां संभवाद्विभ्रमादेः । स्यादन्योन्यं विरोधे त्विह बलनियतिस्सात्त्विकत्वादिभेदान्मा-

Digitized by Google

त्स्यादौ दर्शितं तच्छ्रुतिहतिरहितैस्तत्परैरेव वाक्यैः ॥ ११९ ॥

टी० तत्र हेतुमाह । भविनामिति । पुरुषाणां भ्रमविप्रलम्भादिसंभवो हि वेदात् स्मृतीनां दौर्बल्ये हेतुः, स च हेतुः पुराणादिष्वपि समान इत्यर्थः । अस्तु श्रुत्या विरोधे पुराणादीनां दौर्बल्यम् अन्योन्यविरोधे कथमित्यत्राह । स्यादिति । सात्त्विकत्वादिभेदस्य बलाबलहेतुत्वे प्रमाणमाह । मात्स्यादाविति । उक्तं हि मात्स्ये ।

अग्नेश्शिवस्य माहात्म्यं तामसेषु प्रकीर्त्यते ।
राजसेषु च माहात्म्यमधिकं ब्रह्मणो विदुः ॥
संकीर्णेषु सरस्वत्याः पितॄणाञ्च निगद्यते ।
सात्त्विकेष्वथ कल्पेषु माहात्म्यमधिकं हरेः ॥
तेष्वेव योगसंसिद्धा गमिष्यन्ति परां गतिम् ॥

इति श्रुतिविरोधरहितैस्तात्पर्य्यवद्भिर्वाक्यैः प्रतिपन्नत्वादयमर्थस्सर्वैरपि वादिभिरनतिलङ्घनीय इत्यर्थः, अतः श्रुत्यविरोधिनां सात्त्विकानामेव पुराणानामुपादेयत्वं न पुनः श्रुतिविरोधिनां राजसानान्तामसानाञ्च पुराणानामुपादेयत्वं तेषां संसारवर्द्धनाय भगवत्प्रवर्तितैः पितामहादिभिः प्रवर्तितत्वान्न सात्त्विकपरिग्राह्यत्वमिति भावः ॥ ११९ ॥

इति पुराणादिबलाबलविभागः ।

तर्हि पुराणादिवद्वेदाविरुद्धांशे पशुपतिकपिलाद्युक्तीनां प्रामाण्यमस्तु कथं तर्कपादे तेषां प्रतिक्षेप इत्याशङ्क्यते । भाग इति ।

मू० भागे वेदाविरुद्धे पशुपतिकपिलाद्यागमा-

स्युः प्रमाणं मोहाद्यर्थन्तु शेषं मुनिभिरभिहितं यत्र मज्जन्ति डिम्भाः । भूयस्यर्थे प्रधाने विहतिमति सतां संशयश्च क्वचित्स्याच्छ्रुत्या बाधं निरुन्द्धे श्रुतिसहपठितिर्हेत्वहन्तव्यता च ॥ १२० ॥

टी० वेदविरुद्धांशस्योपयोगं पूर्वपक्ष्यभिप्रायेणाह । मोहाद्यर्थमिति । असुरमोहनार्थं तत्र वेदविरुद्धांशाभिधानम् अतः पुराणादिवत् कापिलादिकमपि परिग्राह्यमिति । यत्र मज्जन्ति डिम्भाः—येष्वभिधानेषु बालिशा मुह्यन्तीत्यर्थः । परिहरति । भूयसीति । न हि पुराणादिषु प्रधानार्थविरोधो भूयान् श्रुत्युक्तमेवानुसरन्ति सत्त्वोत्तराणि पुराणादीनि तामसानि पुनरप्रमाणान्येव कापिलपाशुपतादिषु श्रुतिविरोधभूयस्त्वात् सत्त्वोत्तरस्मृतिपुराणादितुल्यत्वन्नाङ्गीकुर्महे । विरुद्धस्मृतिपुराणादितुल्यत्वे का नोहानिरिति वेदविरुद्धांशस्य भूयस्त्वात् क्वचित् सत्त्वोत्तरांशसद्भावेऽपि न सार्वत्रिकविश्वासास्पदत्वमिति भावः । संशयश्च क्वचित्स्यात् बह्वर्थविरोधे सति संशय एव स्यादित्यर्थः । कथं तर्हि सांख्यं योगः पाञ्चरात्रमिति वेदैस्सह कथनं कथं वा हेतुबाध्यत्वं पञ्चानान्नास्तीत्याह । श्रुत्येति । श्रुतिविरोधे पुनर्बाध्यत्वमेव न हि साधर्म्यमात्रेण वैधर्म्यं निवार्य्यत इति भावः ॥ १२० ॥

इति पाशुपतादेर्वेदविरुद्धव्यामिश्रत्वम् ।

अस्तु तर्हि श्रीपाञ्चरात्रस्यापि पाशुपतादितुल्यत्वमित्याशङ्कमानं प्रतिक्षिपति । निर्दोषेति ।

मू० निर्दोषाम्नायमौलिश्रुतिनिखिलजगन्मूलस-

Digitized by Google

वेदमूले हेतुर्व्यूहे चतुर्द्धा क्वचिदपि न भवेद्विभ्रमः पञ्चरात्रे । युक्ता भक्तानुकम्पागरिमसमुदिते विप्रलिप्सापि नास्मिन् वेदाच्छेद्योक्तिरर्थस्थितिविशदतया भूमविद्यादिवच्च ॥ १२१ ॥

टी० तत्र कर्तृवैषम्यं प्रामाण्ये हेतुमाह । निर्दोषेति । अयमर्थः साङ्ख्यं योगः पञ्चरात्रमिति सहपठितिनिमित्तसाम्यभ्रमं मन्दानां निवारयितुं भगवता बादरायणेनैव सांख्यस्य वक्ता कपिल इत्यादिना सांख्यादीनां संभावितभ्रमकपिलादिकर्तृकत्वेनाप्रामाण्यमभिधाय पञ्चरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयमिति भगवदभिहितत्वेन प्रामाण्यमेव प्रतिष्ठापितमिति । अथापि तन्त्रमन्त्रादिसिद्धान्तभेदेन वा ज्ञानादिकाण्डभेदेन वा वासुदेवादिचातुरात्म्यप्रतिपादनभेदेन वा विभक्ते तस्मिन् शास्त्रे सार्वत्रिकाप्रामाण्याभावेऽपि क्वाचित्कमप्रामाण्यं स्यादित्याशङ्क्याह । हेतुर्व्यूह इति । अत्र कुत्रापि वेदविरोधाभावात् कर्तृसामान्याच्चाप्रामाण्यशङ्का न जायत इत्यर्थः माभूद्विभ्रमः विप्रलिप्सा भगवतः स्यात् दृष्टा हि भगवतोऽपि विप्रलिप्सा त्वं हि रुद्र महाबाहो मोहशास्त्राणि कारयेत्यादौ क्षिपाम्यजस्रमशुभानित्यादौ च अत्राह । युक्तेति । द्विधा खलु भगवतः प्रवृत्तिः असुरमोहनार्थम् आश्रितसंरक्षणार्थञ्च पञ्चरात्रे सत्त्वोत्तरजनसंरक्षणार्थमेव प्रवृत्तिः, अत एव सत्त्वोत्तराश्शाण्डिल्यादय एव तच्छास्त्रप्रवक्तारः, अतो नास्मिन् शास्त्रे विप्रलिप्सापि कारणम् । तर्हि साङ्गेषु वेदेषु निष्ठामलभमानः शाण्डिल्यः पञ्चरात्रतन्त्रमधीतवानिति वेदाच्छेद्यवचनं पञ्चरात्रस्य वेदविरोधख्यापकं न कथमित्यत्राह । वेदादिति । द्विधा ह्यत्र गतिः इतिहास-

Digitized by Google

पुराणवदर्थवैशद्यादित्येका शाण्डिल्यस्य पञ्चरात्रशास्त्राभ्यासपर्य्यन्तं वेदवाक्यादर्थप्रतिपत्तिर्विशदा नाभूदित्यपरा तदेव दृष्टान्तेनाह । भूमविद्येति । यथा भूमविद्योपक्रमे भूमविद्याप्रशंसार्थम् ऋग्वेदं भगवोऽध्येमीत्यादिना कृत्स्नस्यापि वेदस्य अनादरेण ज्ञानहेतुत्वाभावमुक्त्वा भूमविद्याया एव ज्ञानहेतुत्वं स्वीक्रियते नैतावता भूमव्यतिरिक्तविद्यानिन्दा अपि तु भूमविद्याप्रशंसैव तद्वद्त्रापीति ॥ १२१ ॥

तर्हि वासुदेवात् संकर्षणो नाम जीवो जायत इत्यादिना पञ्चरात्रे जीवोत्पत्त्यादिकं वेदविरुद्धमभिधीयत इत्याशङ्क्य परिहरति । जीवेति ।

मू० जीवोत्पत्त्यादिवादो निगमवदिह तन्नित्यतोक्तेश्च साम्याज्जीवाद्याख्यानिरूढिस्त्वभिमतिभिदया स्याच्च संकर्षणादौ । मन्वादेश्चोपजीव्यं हिततममिदमित्यादिकं भारतोक्तं तत्त्वाप्रैक्यं विकल्पः क्वचिदभिमतवत्तादृशाम्नायभेदात् ॥ १२२ ॥

टी० निगमवत्—यथा निगम एव इमानि भूतानि जायन्त इत्यादिना जीवोत्पत्त्यादिकमभिधीयते तद्वत् नित्यो नित्यानामित्यादिना जीवनित्यत्वादिकमपि निगमे निगद्यत इति चेत्तुल्यम् अत्रापि अचेतना परार्था च नित्या सततविक्रियेत्यादिना प्रकृतेरपि नित्यत्वमभिधीयते किं पुनर्जीवस्य नित्यत्वमनित्यत्वञ्च प्रकारभेदेन घटत इत्यर्थः । द्रव्यस्वरूपनित्यत्वान्नित्यत्वमचेतनस्य स्वरूपे नामान्तरभजनार्हावस्थान्तरयोगादनित्यत्वं जीवस्यापि स्वरूपनित्यत्वेऽपि नानादेहपरिग्रहात् ज्ञानसंकोचविकासयोगमात्राच्चानित्य-

Digitized by Google

त्वमिति । किञ्च वासुदेवात् संकर्षणो नाम जीवो जायत इत्यादिवचनं जीवाद्यभिमानिसंकर्षणाद्याविर्भावपरम् अतो न विरोध इत्याह । जीवाद्याख्येति । मन्वादेरिति इदं श्रेय इत्यादिना ऋग्यजुस्सामभिर्जुष्टमिदं पञ्चरात्रं मन्वादेरप्युपजीव्यमित्युक्तं महाभारते सात्वतं विधिमास्थाय गीतस्संकर्षणेन य इत्यादिना च ब्राह्मणादीनां सर्वेषामुपजीव्यत्वञ्च तत्रतत्रोक्तं तत्काप्यैक्यम् अविरुद्धतयैव संप्रतिपन्नस्थले आपाततो विरुद्धतया प्रतिपन्ने स्थले ग्रहणाग्रहणवद्विकल्प एव तदिदमाह । अभिमतवदिति । तत्रोभयथापि गृह्णाति न गृह्णाति चेति वेदवाक्यमस्तीति चेत् अत्राप्यस्ति, अत्रापि पञ्चरात्रमूलभूताया मूलश्रुतेरधीयमानत्वादिति तुल्यं सा मूलश्रुतिः प्रचुरन्नाधीयत इति चेत् किं कुर्मः अद्धैतृणामेव परिमितत्वेनायं दोषः यथोपनिषदामिति एतच्चागमप्रामाण्ये भाष्यादौ च विस्तरेणानुसन्धेयम् ।

इति पञ्चरात्रप्रामाण्यम् ॥ १२२ ॥

अथ सिद्धान्तान्तरप्रतिवन्दिमाह । सर्वे इति ।

मू० सर्वे सर्वज्ञबुद्धेर्ननु विषयतया नित्यसिद्धाः कृतान्तास्तस्मात्तेन प्रवर्त्ये सति समयगणे कस्यचित्को विशेषः । मैवं तत्त्वे विकल्पत्यजि विहतिमतामेकशेषत्वमानात्तन्निष्ठा स्यात् कनिष्ठा न मतिनविदुषो नामिकादिः परस्मै ॥ १२३ ॥

टी० सिद्धान्तान्तरप्रतिवन्दिमाह । सर्वे इति । सिद्धान्तान्तरमीश्वरबुद्धेर्नित्यमेव विषयः तस्मादीश्वरप्रवर्त्ये सर्वस्मिन्नपि सिद्धान्ते सति कस्यचित् पञ्चरात्रस्य को विशेषः अत्रोत्तरम् । मैव-

मिति । परस्परविरुद्धतत्त्वप्रतिपादकेषु ग्रन्थेषु सर्वेच प्रामाण्यं दुरुपपादम् अतः क्वचित्प्रामाण्ये पञ्चरात्रस्यैव प्रामाण्यं भगवत्प्रोक्तत्वात् शाण्डिल्यादिसत्त्वोत्तराधिकारिपरिग्रहाद्वेदविरोधाभावात् अन्यस्मादपि शतशः प्रतिपादिताद्वैषम्यत् सिद्धमिति, ईश्वरस्य सर्वज्ञत्वेन तद्बुद्धिस्तत्त्वं वेदानां बुद्धागमादीनामपि समानं नैतावताच साम्यं तद्वदन्यापीति भावः । अयमर्थः अप्रमाणत्वेन तन्त्रान्तराणीश्वरबुद्धिस्थानि प्रमाणत्वेन पञ्चरात्रमिति अयञ्च न्यायो वेदबाह्यागमयोरपि समान इति ।

इति परसिद्धान्तप्रतिबन्दिनिस्तारः ॥ १२३ ॥

एवं प्रामाण्यप्रक्रियामुपपाद्य स्मृतेरयाथार्थ्यवादिनं प्रतिक्षेप्तुं स्मृत्युत्पत्तिप्रकारानाह । अर्थे इति ।

मू० अर्थे पूर्वानुभूते सहमितसदृशख्यात्यदृष्टप्रभेदैस्संस्कारानुग्रहे या परिणमति मता सा स्मृतिस्त्रिप्रकारा । याथार्थ्येऽपि स्वपूर्वानुभवमनुसरेद् बाह्यशून्या न चैषा हेतुश्चार्थक्रियादेः स्मृतिवदनुभवोऽप्यस्ति नष्टादिकेषु ॥ १२४ ॥

टी० पूर्वानुभूतेऽर्थे सहदृष्टिसदृशदृष्ट्यदृष्टप्रभेदैस्संस्कारानुग्रहे संस्कारोद्बोधे या परिणमति मतिस्सा स्मृतिः सा च स्वकारणवैविध्यात् त्रिप्रकारा अथवा स्वकारणभूतप्रमितिभ्रान्तिसंशयानुरोधेन स्वयमपि तादृग्रूपा सती त्रिप्रकारा । अत्र कश्चिदाह सर्वापि स्मृतिरयथार्थेति तमुत्तरश्लोके निराकर्त्तुं स्मृतेः पूर्वानुभवानुसरणमाह । याथार्थ्येऽपीति । यथा स्मृतिरयाथार्थ्येऽपि पूर्वानुभवमनुसरेत् तथा याथार्थ्येऽपीत्यपिशब्दार्थः अर्थशून्या स्मृतिः कथं यथार्थेत्याशङ्क्य

Digitized by Google

परिहरति । बाह्यशून्येति स्मर्तव्यस्यापि स्वकाले सत्त्वादित्यर्थः अर्थक्रियादिहेतुत्वाच्च स्मृतिर्यथार्थेत्याह । हेतुश्चेति । ननु स्मृतिर्नष्टविषया नष्टश्चासदेव कथं याथार्थ्यं स्मृतेरित्याशङ्क्य प्रतिबन्द्या परिहरति । स्मृतिवदिति । अतीतानागतानुमानागमयोगिप्रत्यक्षेषु नष्टविषयत्वेऽपि याथार्थ्यं भवानेवाङ्गीकरोतीत्यर्थः ॥

इति स्मृतिहेतुविभागादिः ॥ १२४ ॥

उक्तमपि स्मृतियाथार्थ्यं प्रतिवाद्युक्तहेतुप्रतिक्षेपेण स्वाभिमतप्रमाणविशेषेण चोपपादयति । पूर्वमिति ।

मू० पूर्वं श्यामत्वमात्राद् भवति न हि मितिः पाकरक्तेऽपि तद्धीस्तत्ताभानं तथा चेत् प्रसजति तदिदं प्रत्यभिज्ञादिकेऽपि । याथार्थ्यं पारतन्त्र्यान्न च गलति न चेदभ्युपेतातिवृत्तिर्वेदे मानैस्सहोक्ता स्मृतिरपि विफला त्वदपादाद्यनुक्तिः ॥ १२५ ॥

टी० इत्थं किल परवादी स्वमतमाह न हि पाकरक्ते श्यामतामतिर्य्यथार्था इत्थं निवृत्तपूर्वावस्थे वस्तुनि तत्तामुल्लिखन्ती स्मृतिरयथार्थेति अयं पुनरपरामर्शवादः, न हि स्मृतिर्निवृत्तामपि पूर्वावस्थां वर्तमानत्वेनोल्लिखति तथा चेदिदमित्येवोल्लिखेत् । अपि तु निवृत्तत्वेनैव अन्यथा तत्तोल्लेखाभावप्रसङ्गात् पाकरक्ते तु श्यामताप्रत्ययो निवृत्तस्यापि श्यामत्वस्य वर्तमानत्वेनोल्लिखति अतो विषमो दृष्टान्तः । उक्तमर्थं प्रतिबन्द्योपपादयति । तत्तेति । तथा चेद्वर्तमानत्वेन तत्तायाः स्मृतौ भानञ्चेत् प्रत्यभिज्ञायामपि तादृगेव भानमिति तथाप्ययाथार्थ्यप्रसङ्गः आदिशब्देनानुवादो गृह्यते तथापि

यत्तच्छब्दप्रयोगभूयस्त्वात् तर्हि पारतन्त्र्यात् स्मृतेरयाथार्थ्यं वदाम इति चेत्तच्च नेत्याह । याथार्थ्यमिति । उक्तार्थानङ्गीकारे दोषमाह । न चेदिति । अभ्युपेतातिवृत्तिः—स्वाभ्युपेतव्याघात इत्यर्थः, न हि प्रत्यक्षपारतन्त्र्यादनुमानमयथार्थं नाप्यनुमानपारतन्त्र्यादागमः, न च संस्कारपारतन्त्र्यात् प्रत्यभिज्ञानम् अन्यदप्येतादृशमुदाहर्त्तव्यम् इत्थं स्मृतेर्याथार्थ्यं युक्तिभिरुपपाद्य तत्र प्रमाणमपि वक्ति । वेद इति । स्मृतिः प्रत्यक्षमैतिह्यमनुमानं चतुष्टयमिति वाक्ये स्मृतिः प्रथममेव प्रमाणत्वेनोपादीयते कथन्तर्हि स्मृतेरक्षपादो न प्रामाण्यमाचष्टे तत्राह । विफलेति । न ह्यक्षपादः कणादः कपिल इत्यादयः प्रामाणिकत्वेन परिग्राह्याः युक्तियुक्तन्तु गृह्णीमः, न पुनरस्तद्वाक्यगौरवादित्यर्थः ॥

इति स्मृतियाथार्थ्योपपत्तिः ॥ १२५ ॥

अस्तु स्मृतिर्भवतु च यथार्था तथाऽपि पूर्वानुभूतविषयमात्रत्वे किन्नियामकमित्याशङ्कते । जात इति ।

मू० जातः पूर्वानुभूत्या स्मृतिमुपजनयेत्क्वापि संस्कार एव प्राग्दृष्टव्यक्तिमात्रप्रतिनियतिमती कीदृशादन्वयात्स्यात् । मैवं कार्य्ये त्वबाध्ये ननु तदनुगुणः कल्प्यते हेतुयोगस्तज्ज्ञानोत्पाद्यभावस्स इति च विदितः किन्तदन्येन नाम्ना ॥ १२६ ॥

टी० पूर्वानुभूत्या जातस्संस्कारः क्वापि स्मृतिं जनयेदेव अथापि सैषा स्मृतिर्दृष्टव्यक्तिमात्रविषयेति कीदृशादन्वयात् संबन्धात्स्यादिति अन्वानरम् । मैवमिति । उक्तं हि बहुशः कार्य्ये निर्बाधे

Digitized by Google

नैव प्रमाणेन स्फुटदृष्टे तदनुगुणो हेतुयोगः कल्प्यत इति । अस्माभिरवगन्तव्यो हेतुरित्यत्राह । तज्ज्ञानोत्पाद्यभावस्स इति च विदित इति । या स्मृतिर्येन ज्ञानेनोत्पद्यते तद्विषयमेव सा गृह्णातीति नियमः किन्तदन्येनेति हेतुहेतुमद्भावनाम्नि जायति किमन्येन विशेषनाम्नेत्यर्थः ।

इति स्मृतेरनुभूतव्यक्तिनियतविषयत्वम् ॥ १२६ ॥

इत्थं स्मृतेः प्रामाण्यमुपपाद्य परोक्तोपमानानां स्मृत्याद्यतिरेकमाह । तुल्यादिति ।

मू० तुल्यात्तुल्यान्तरे धीः स्मृतिरियमिव गौस्स्येति बोधोऽनुमानं यत्तुल्यो यस्य चैतत्सम इति निजयोर्हस्तयोर्व्याप्तिसिद्धेः । चिह्नोन्नीते निमित्ते पदमपि विदितं शक्तमाप्तातिदेशे व्युत्पत्तिर्लक्षणैः स्वैः क्वचिदपि न भवेदन्यथाऽतीन्द्रियेषु ॥ १२७ ॥

टी० अत्रैवमाहुः उपमानप्रक्रियां केचित् तुल्यं दृष्ट्वा तत्तुल्यस्य देशान्तरस्थस्य प्रतीतिरुपमानमिति तत्र विकल्पयामः किं स्वरूपप्रतीतिरुत सादृश्यप्रतीतिरिति पूर्वत्र सा धीः स्मृतिरित्याह । स्मृतिरिति । उत्तरत्र सादृश्यप्रतीतिरनुमानमित्याह । इयमिवेति । अनेन सदृशी मदीया गौरिति बोधोऽनुमानमेव इयमिव–इयं गवयव्यक्तिरिवेत्यर्थः । अत्र कथं व्याप्तिग्रह इत्यत आह । यत्तुल्य इति । अयमत्रानुमानक्रमः गौर्गवयसदृशः गवयस्य सादृश्यप्रतियोगित्वात् योयद्गतसादृश्यप्रतियोगी स तत्सदृशः यथा वामहस्तो दक्षिणहस्तेनेति । अस्तु तर्ह्यन्यदेवोपमानलक्षणं श्रुतातिदेशवाक्यस्य संज्ञिनि प्रत्यक्षप्रत्य-

भिज्ञानमुपमानं संज्ञासंज्ञिसंबन्धप्रतिपत्तिरुपमितिरिति स च संबन्ध एव उपमानप्रमाणावगम्यः अतिदेशवाक्यञ्च त्रिप्रकारं गोसदृशो गवय इति साधर्म्योपमाने, गवादिवद् द्विशफो न भवत्यश्व इति वैधर्म्योपमाने,दीर्घग्रीवः प्रलम्बोष्ठः कठोरकण्टकाशी पशुः क्रमेलक इति धर्ममात्रोपमान इति, तदिदमुपमानमाप्तोपदेशान्नातिरिच्यत इत्याह । चिह्नोन्नीत इति । यथाऽयं गौरिति व्यक्तिविशेषे गोशब्दव्युत्पादनेऽपि वक्तुरभिप्रायमालोच्य न्यायानुसारात् सार्वत्रिकीं गोशब्दव्युत्पत्तिं प्रतिपद्यन्ते बालाः, न हि यावदुक्तमेव गृह्णन्ति निरूपणधुरन्धराः प्रेक्षावन्तः । एवमेवातिदेशवाक्येऽपि प्रेक्षावन्तो न्यायपर्य्यालोचनेन गोसादृश्यादिचिह्नोन्नीते गवयत्वादौ श्रोतारो व्युत्पद्यन्ते अतिदेशवाक्यश्रवणकाले गवयत्वादेरप्रत्यक्षत्वात् यदि शब्दतो व्युत्पत्तिं प्रतिक्षिपति कश्चित् पश्चादुपमानञ्चापेक्षते स कथन्तैस्तैर्लक्षणैरिन्द्रोपेन्द्रादिशब्दानां व्युत्पत्तिकोटिमाटीकेत । अव्युत्पन्नो वा कथं वैदिकवाक्यार्थान् प्रतिपद्येत अप्रतिपन्नवाक्यार्थः कथन्तरामनुतिष्ठेत् । अननुष्ठानः कथन्तमां पुरुषार्थमाप्नुयादिति सर्वमपि दुर्वचम् अतस्तत्तल्लक्षणोपदेशादेव प्रजापतिपशुपतिसुरपतिप्रभृतीनां स्वरूपेषु तत्तदनुबन्धेष्वर्थान्तरेष्वपि व्युत्पत्तिरिति सर्वमवदातम् ॥

इत्युपमानान्तर्भावः ॥ १२० ॥

एवमुपमानस्यागमान्तर्भावमुक्त्वा तद्वदेवार्थापत्तेरनुमानान्तर्भावमाह । अर्थापत्तिरिति ।

मू० अर्थापत्तिः परीक्षा न पृथगनुमितेर्व्याप्तिबोधादिसाम्यादव्याप्यानामयुक्तिर्न हि भवति न चाव्यापकाः स्यापकाः स्युः । जीवन्

क्वापीति बोधो न गृह इति मतिं निश्चितां नोपहन्धे नातस्तच्छान्तये सा न यदि सममिदं सम्मते चानुमाने ॥ १२८ ॥

टी० व्याप्तिज्ञानादिसाम्यात् परोक्तार्थापत्तिर्नानुमानात् पृथग् भवति, आदिशब्दात् पक्षधर्मत्वमप्याह । जीवन् देवदत्तो बहिरस्ति विद्यमानत्वे सति गृहे असत्त्वादिति देवदत्तनिष्ठतया हि हेतुरभिधीयते अत्र व्याप्तिमनियम्यस्य नायुक्तिरित्युक्तप्रकारेण विशदयति । अव्याप्यानामिति । जीवनवत्त्वे सति यो यत्र नास्ति स ततोऽन्यत्रास्तीति हि व्याप्तिप्रकारः तमेवानुस्मृत्यानुपपद्यमानदर्शनादुपपादकभूतार्थान्तरकल्पनमर्थापत्तिरित्यभिधीयते अनुपपद्यमानं व्याप्यं व्यापकमन्तरेण व्याप्यस्यानवस्थानात् तदिदमाह । अव्याप्यानामयुक्तिर्न हि भवतीति । उपपादकाश्च नाव्यापकाः तदप्याह । न चाव्यापकाः स्यापकाः स्युरिति । अनेनानियम्यस्येत्यादिश्लोके पूर्वार्द्धं विवृतम् अनियम्यस्याव्याप्यस्य नायुक्तिः—नानुपपद्यमानता, नानियन्तोपपादकः—नाव्यापक उपपादक इत्यर्थः तथा च व्याप्तिरेव नामान्तरेणानुपपत्तिरित्युच्यतेऽर्थापत्तिवादिभिः । ननु प्रमाणद्वयविरोधपरिहारोऽर्थापत्तिकार्यं तदर्थमर्थापत्तिरिति किमपि प्रमाणमन्वेषणीयं जीवनप्रमाणं तावद्देशसामान्यसंबन्धाद् गृहेऽपि देवदत्तसद्भावमावेदयति प्रतिक्षिपति च प्रत्यक्षमिति प्रमाणद्वयविरोधात् । मैवं द्वयोरपि प्रमाणत्वे कथं विरोधः विरोधे वा कथं प्रामाण्यं तदिदमुक्तं न मानयोर्विरोधोऽस्तीति, तद्वेवाचष्टे । जीवन् क्वापीति बोधो न गृह इति मतिं निश्चितां नोपहन्धे । इति अतः परस्परविरोधाभावाद्विरोधशान्तये अत्रावर्थापत्तिर्नाङ्गीकरणीयेत्याह । नात इति । इत्थमनङ्गीकारे धूमानु-

Digitized by Google

मानेऽप्यर्थापत्तित्वं कल्पयितुं शक्यत इत्याह । न यदीति । अयमर्थः पूर्वोक्तसंवादश्लोकान्तिमपादेनोच्यते प्रसिद्धं चाप्यसौ समः इति, ॥

इत्यर्थापत्त्यन्तर्भावः ॥ १२८ ॥

मा भूदर्थापत्तिः अभाव इति किमपि प्रमाणमन्यदेव परिगृह्यतामित्याशङ्क्य परिहरति । तत्तद्भिति ।

मू० तत्तद्भावैरभावव्यवहृतिनियतौ मानमन्यत् किमर्थं स्मर्त्तव्यस्मृत्यभावात् परमनुमिमते प्रातरश्वाद्यभावम् । स्यादक्षाद् भावधीवद्विमतिविषयधीरन्वयादेस्समत्वाद् भावग्राहीण्यभावं तदुचितसहकार्य्यागमे बोधयन्ति ॥ १२९ ॥

टी० भावान्तराभावस्य प्रसाधितत्वाद् भावेषु च भावस्येव प्रमाणत्वात् अभावप्रामाणापेक्षा नास्तीति । यत्तु प्रातर्गजाद्यभावप्रतिपत्त्यर्थं प्रमाणान्तरमपेक्षन्ते तदनुभाष्य परिहरति । स्मर्त्तव्येति । प्रातर्गजाद्यभावः स्मर्तव्यस्य स्मरणाभावादनुमीयते इदमिहानुमानं विप्रतिपन्नः प्रदेशः प्रातर्गजवत्तया मयाऽननुभूतः स्मर्त्तव्यत्वे सति तद्वत्तया इदानीमस्मर्य्यमाणत्वादिति तथा च स्मरणाभावादनुभवाभावः अनुभवाभावाच्च विषयाभाव इति प्रातर्गजाद्यभावसिद्ध्यर्थं न प्रामाणान्तरमन्वेषणीयम् अभावस्य प्रत्यक्षगम्यत्वे सर्वाविगीतमनुमानमप्याह । स्यादक्षादिति । अभावज्ञानमिन्द्रियजम् इन्द्रियान्वयव्यतिरेकानुविधायित्वादित्यनुमानम् । ननु भावग्राहिप्रमाणस्य कथमभावग्राहित्वमित्याशङ्क्य परिहरति । भावग्राहीणीति । एकस्यापि

Digitized by Google

कारणस्य सहकारिभेदेन नानाकारणत्ववद् बोधकस्यापि सहकारिभेदेन नानार्थबोधकत्वं योयुज्यत इति भाव: ॥

इत्यभावप्रमाणान्तर्भाव: ॥ १२६ ॥

एवमैतिह्यस्याप्यागमान्तर्भाव: प्रामाण्ये, प्रामाण्याभावे तु प्रमाणाभावत्वमित्याह । ऐतिह्यमिति ।

मू० ऐतिह्यं वृद्धवाक्यं बहुदिवसगतेर्यत्त्वनि-
र्द्धार्य्यमूलं मानञ्चेदागमस्तत्तदितरदपि च
स्यात्तदाभास एव । लक्षादिभ्यश्शतादि-
प्रमितिरनुमितिर्व्याप्यतादेरबाधाच्चेष्टालि-
प्यादिलिङ्गं श्रितमतिभिरतश्शिष्टमप्येवमू-
ह्यम् ॥ १३० ॥

टी० मानञ्चेदागम: तदितरत् अमानञ्चेदाभास एवेत्यर्थ: । तदिदमाहु: ।

जगति बहु न तथ्यं नित्यमैतिह्ययुक्तम् ।
भवति तु यदि सत्यं नागमाद् भिद्यते तत् ॥ इति,

लक्षादिभ्यश्शतादिज्ञानमनुमानमेवेत्याह । लक्षादिभ्य इति । तत्र हेतुमाह । व्याप्यतादेरिति ।

विप्रतिपन्नं लक्षं शतवत् लक्षत्वादित्यनुमानम् ।
एतदप्याहु: पूर्वपठितस्यार्द्धस्य पूर्वार्द्धेन ।
इह भवति शतादो संभवाद्यासहस्रान्म-
तिरवियुतिभावात् साऽनुमानादभिन्ना ॥

इति एवं चेष्टया पुरुषाभिप्रायविशेषाऽनुमानं संकेतविशेषयुक्तया

Digitized by Google

लिप्या लिङ्गभूतया वर्णविशेषबोधनम् अन्यत्त्वेनादृशं सर्वं सांकेतिकं शितमतिभिर्बुद्धिमद्भिः अनुमानविशेषतया भाव्यमिति ।

इत्यैतिह्यसंभवाद्यन्तर्भावः ॥ १३० ॥

ननु ।

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः ॥

इति प्रत्यक्षादिभेदेन प्रमाणत्रित्वे मन्वादीनामभिमते कैश्चिदाप्तैराधिक्यमप्यभिधीयते तत्कथमिति चोद्यमनुभाषते । मानत्रित्व इति ।

सू० मानत्रित्वे तु मन्वाद्यनुमतिविषये तत्र यत्कैश्चिदाप्तैराधिक्यं क्वाप्यधीतं तदपि सुघटितं गोबलीवर्दनीत्या । उक्तार्थोदाहृतिर्वा भवतु बहुमुखी शिष्यमेधामहिम्ने सर्वे च स्वेष्टतन्त्रेष्वनुकथनशतं निर्वहन्त्येवमूहैः॥१३१॥

टी० तत्परिहरति । तदपीति । अधिककथनन्तात्पर्य्यविशेषेण गोबलीवर्दन्यायेनाविरुद्धमित्यर्थः । अथवा उक्तस्यैवार्थस्य शिष्यमेधामहिम्ने बहुमुखमुदाहरणं तद् भवत्वित्याह । उक्तेति । अयं निर्वाहः सर्वेष्वपि शास्त्रेषु पौनरुक्त्यपरिहारे साधारण इत्याचष्टे । सर्वे चेति ।

इत्यधिकप्रमाणपरिगणननिर्वाहः ॥ १३१ ॥

कथन्तर्हि भाष्यकारैः प्रमाणत्रयमभिधाय शिष्टं प्रमाणं न प्रतिक्षिप्तं तस्मादाधिक्यमिति कश्चिन्मनुते तस्योत्तरम् । प्रत्यक्षेति ।

Digitized by Google

मू० प्रत्यक्षादित्रिकं यत्पृथगभिदधता भाष्यकारेण शेषं नैव क्षिप्तं न चोपस्कृतमिह न ततः स्यात्तदाधिक्यसिद्धिः । रीतिस्सर्वादितानामियमिति हि तथोदासि संख्याविवादे तेनान्वारुह्य तत्तत्समधिकगणना स्वीकृता नस्सयूथ्यैः ॥ १३२ ॥

टी० न चोपस्कृतमिहेति । क्षेपाभावत्तदुपस्काराभावादाधिक्यं न सिद्ध्यतीत्यर्थः । अत एव सगुणविषयत्वेन प्रमाणत्रयमुपन्यस्य सर्वादितानां प्रमाणानामियमेव हि रीतिरिति भाष्यकारैरुदासि अतोऽस्मत्सयूथ्यानामाधिक्यकथनमन्वारुह्य वादेन पुनः स्वपक्ष इति संप्रदायनिर्णयः ॥

इति प्रमाणसंख्यानियमसंप्रदायः ॥ १३२ ॥

इत्थं प्रमाणत्रयं विविच्य तद्विवेकप्रयोजनमाह । मानमिति

मू० मानं सर्वोपजीव्या प्रथममिह भवेदक्षजन्या मनीषा तन्मूला चानुमा स्यात्तदुभयजनितस्त्वागमो द्विप्रकारः । मूलं न क्वापि बाध्यं क्वचिदधिकबलैर्मूलजातीयबाधः स्यादेतैः कर्ममालाघटितभवघटीयन्त्रजभ्रान्तिशान्तिः ॥ १३३ ॥

टी० अनुमानागमयोरपि मूलत्वात् सर्वोपजीव्यं प्रत्यक्षमेव प्रथमं, तन्मूलमनुमानं ततस्तदुभयनियतस्त्वागमः पश्चान्निश्चीयते । स चागमो द्विप्रकारः दृष्टार्थोऽदृष्टार्थश्चेति दृष्टार्थः कारीर्यादिप्रतिपादकः

अदृष्टार्थैः स्वर्गादिसाधनप्रतिपादकः । अथवा द्विप्रकारः प्रवृत्तिधर्मप्रतिपादकोभागो निवृत्तिधर्मप्रतिपादको भाग इति । अत्राहुर्मृषावादिनः उपजीव्यमपि प्रत्यक्षमुपजीवकेन बाध्यते एवमनुमानेनापि तत्प्रतिविपति । मूलं न क्वापि बाध्यमिति । स्वमूलबाधे स्वस्यैव बाधेन व्याघातादित्यर्थः । कथन्तर्हि प्रत्यक्षोपजीविना ज्वालाभेदानुमानेन प्रत्यक्षोपमर्द इत्याशङ्क्याह । क्वचिदिति । अमयर्थः अधिकबलैर्विजातीयैः प्रमाणैर्मूलजातीयस्यैव बाधः क्रियते न पुनः स्वमूलस्यैव, न हि ज्वालाभेदानुमानं ज्वालैक्यप्रत्यक्षमुपजीवति अपि तु वर्त्तितैलादिसामस्त्यप्रत्यक्षम् इयं खलु तत्रानुमानप्रक्रिया विप्रतिपन्ना प्रदीपसामग्री स्वानन्तरभाविप्रदीपवती प्रदीपसामग्रीत्वात् प्रथमप्रदीपसामग्रीवत्, विप्रतिपन्नः प्रदीपसामग्रीनाशः स्वानन्तरभाविप्रदीपनाशवान् प्रदीपसामग्रीनाशत्वात् चरमप्रदीपसामग्रीनाशवदिति । तत्र यत्प्रत्यक्षमनुमानेनोपजीव्यते न तद् बाध्यते, यत्तु बाध्यते न तदुपजीव्यत इति विवेकः । अत एव तैः प्रमाणैर्निपुणं निरूपितैः कर्म्ममालाघटितभवघटीयन्त्रभ्रान्तेरज्ञानस्य शान्तिरित्यर्थः । अयमत्र बाध्यबाधकभावनिर्णयः द्वयोः प्रमाणयोर्विरोधे यत् संभाव्यमानान्यथासिद्धि तद्बाध्यम् अनन्यथासिद्धमितरद् बाधकमिति, सावकाशत्वनिरवकाशत्वाभ्याम् अन्यथासिद्ध्यनन्यथासिद्धिविवेकः, सावकाशत्वञ्च क्वचिदप्रमाणकोटिनिवेशात् इदं रजतमित्यादौ, क्वचिद्विषयान्तरलाभात् न हिंस्यात् सर्वाभूतानीत्यादौ, निरवकाशत्वन्तु तदुभयाभावेन सिद्ध्यति नेदं रजतं पशुमालभेतेत्यत्र अप्रमाणकोटिनिवेशश्च कारणदोषाद् बाधकप्रत्ययाच्च भवति, उभयञ्च यत्र नास्ति तत्प्रमाणमेव अतः प्रपञ्चग्राहिणः प्रत्यक्षस्य काचकामलादिकारणदोषाभावात् काल्पनिकबाधस्य बुद्ध्यादिकल्पितबाधेन मृषावादिप-

Digitized by Google

स्याप्युन्मूलनहेतुत्वान्निर्दोषमेव प्रत्यक्षादिकमवतिष्ठत इति निर्मूलोऽयं मृषावादिवादः ॥ १३३ ॥

न केवलं मृषादिवादिवादस्यैकस्यैवोन्मूलनार्थं प्रत्यक्षादिप्रमाणलक्षणपरिशोधनं सर्वेषामपि तद्‌गोत्रनिष्ठानां दुर्वादिनामुन्मूलनायेत्याह । सर्वमिति ।

मू० सर्वं सन्दिग्धसत्त्वं क्षणिकमगुणकं नित्यमाकस्मिकं वा बुद्धिः कृत्स्नानुमानं निखिलमपि ततः स्यान्मृषा धीतरद्वा । प्रख्योपाख्यादवीयः किमपि नियतिमन्नामरूपञ्च नेत्याद्युद्वेलापार्थजल्पानुपहसितुमसौ वर्णितो मानभेदः ॥ १३४ ॥

टी० सर्वं सन्दिग्धसत्त्वमिति विश्वखण्डकः क्षणिकमिति वैभाषिकसौत्रान्तिकयोगाचाराः, अगुणकमित्यपि त एव, अथ वा मृषावाद्यपि, नित्यमिति सांख्याः अवस्थानामप्यनागन्तुकत्वात्, आकस्मिकमिति चार्वाकाः, बुद्धिः कृत्स्नानुमानमिति स एव खण्डकः निखिलमपि ततः स्यान्मृषेति तद्‌गुरुर्माध्यमिकः धीतरद्वेत्यद्वैतवादी प्रख्योपाख्यादवीयः किमपीति स एव माध्यमिकः, प्रख्या बुद्धिः उपाख्या व्यवहारः । तच्छिष्यसंप्रदायपातिनोऽन्येऽपि नियतिमन्नामरूपञ्च नेत्यनेकान्तवादिनः, इत्याद्युद्वेलसप्तभङ्गयादिनानाजल्पानुपहसितुमसौ प्रमाणभेदो वर्णितः ॥

इति प्रमाणविवेकप्रयोजनम् ॥ १३४ ॥

इत्थं प्रमाणैरर्थपरीक्षणं कृत्वा प्रकृतमर्थं निगमयति । प्रख्येति ।

Digitized by Google

मू० प्रख्याव्युत्पत्तिपाकव्यवहरणफलश्रेणिनिश्रे-
णिकायामारूढा निष्प्रकम्पा प्रमितिगुणक-
रालम्बनात्सत्परीक्षा । मिथ्याऽलीकादिशापै-
रपि न न भवति प्राप्तविस्रम्भसौधा तत्सा-
क्ष्याद्वाह्यपाटच्चरमुषितमिदं सद्धनं प्रत्य-
नैष्म ॥ १३५ ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीम-
द्वेङ्कटनाथस्य वेदान्ताचार्यस्य कृतिषु तत्त्व-
मुक्ताकलापे बुद्धिसरश्चतुर्थः ॥

टी० अथ प्रख्याव्युत्पत्त्यादिनिश्रेणिका तस्यामारूढा परीक्षा कथञ्चिन्निष्प्रकम्पा प्रमितिगुणकरालम्बनात् इयं परीक्षा फलप्राप्तिविस्रम्भसौधमधिरुह्य मृषावादिप्रभृतिभिरभिहितैर्मिथ्यालीकादिशापैर्न भवति तेषां व्यवहारः शापमात्रमेव न युक्तियुक्तमित्यर्थः सुरक्षितस्थलेऽवस्थिता तेषां वचनैरनर्थकेर्न न भवति सुरक्षितपरीक्षासाक्ष्याद्वेदवाह्यपाटच्चरापहृतं तत्त्वज्ञानरूपं सद्धनं प्रत्यनैष्मेत्यर्थः ।

इति परीक्षाफलविशेषः ॥ १३५ ॥

इति कवितार्किकसिंहस्य सर्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कट-
नाथस्य वेदान्ताचार्य्यस्य कृतिषु तत्त्वमुक्ताकला-
पव्याख्यायां सर्वार्थसिद्धौ बुद्धिसरश्चतुर्थः ।

श्रीमते रामानुजाय नमः ।

श्रीमते निगमान्तमहागुरवे नमः ।

अथाद्रव्यसरः पञ्चम आरभ्यते ।

इत्थं द्रव्यवर्गं विचार्य अद्रव्यं विचारयिष्यंस्तद्विचारस्य प्रधानप्रयोजनमाह । तत्तदिति ।

मू० तत्तद्द्रव्येषु दृष्टं नियतिमदपृथक्सिद्धमद्रव्यजातं तद्वद्विश्वं परस्य व्यवधिनियमनान्न स्वरूपेऽस्य दोषः । इत्थं निर्धार्य्यभाव्ये भगवति विविधोदाहृतिव्यक्तिसिद्धौ निर्बाधान् द्रव्यधर्मान्निरनुगतिगलद्दुर्नयान्निर्णयामः ॥१॥

टी० तेषुतेषु द्रव्येषु दृष्टं नियतिमद् यस्य द्रव्यस्य यदुचितं तत्तत्रैव नियतमित्यर्थः, तच्च तत्रतत्राापृथक्सिद्धमद्रव्यजातं, तद्वदेव विश्वमपि परस्यापृथक्सिद्धम् । एवञ्च सति विशेषणगतानां विकारादीनां व्यवधिनियमनात् तत्तद्द्रव्यव्यवधानेन भगवद्विशेषणत्वान्न स्वरूपे भगवतो दोषः—न विकारादिसंबन्ध इत्यर्थः । इत्थं निर्धार्य्य भाव्ये—ध्यातव्ये भगवति विविधोदाहरणव्यक्तिसिद्धे निर्बाधान् प्रामाणिकान् बाधकप्रमाणरहितांश्च धर्मान्निरनुगतिगलद्दुर्नयान् अनुगतिः—व्याप्तिः, निरनुगतिः—अव्याप्तिः व्याप्त्यभावेन स्वयमेव गलद्दुर्नयान्निर्णयामः ॥

इत्यद्रव्यविचारप्रधानप्रयोजनम् ॥ १ ॥

इत्थं द्रव्यषट्के व्याख्याते तदनुबन्धि अद्रव्यप्रमाणादिकमुच्यत इत्याह । व्याख्यातमिति ।

Digitized by Google

मू० व्याख्यातं द्रव्यषट्कं व्यतिभिदुरमथाद्रव्यचिन्ताऽस्य सत्ताधीभेदादेः पुरोक्ता निजगदुरनुपादानतां तस्य लक्ष्म। द्रव्यादत्यन्तभिन्नन्त्विदमनुपधिकं तद्विशिंष्यात् स्वभावाद् दृष्टे न ह्यस्त्ययुक्तं न कथमितरथा विश्वतत्त्वापलापः ॥ २ ॥

टी० द्रव्यषट्कं चिदचिदीश्वरधर्मभूतज्ञानकालनित्यविभूतिरूपं व्यतिभिदुरं-परस्परलक्षणासंकरेण भिन्नस्वभावम् । अथाद्रव्यचिन्ता प्रवर्त्तते अस्याद्रव्यस्य सत्ताबुद्धिभेदादेः प्रागेवोक्ता तस्य चाद्रव्यस्यानुपादानत्वं लक्षणं निजगदुः अवस्थावद् द्रव्यं तद्व्यतिरिक्तमद्रव्यम् आगन्तुरपृथक्सिद्धधर्मोऽवस्थेति प्रागेवोक्तम्। इदञ्चाद्रव्यं द्रव्यादत्यन्तभिन्नं न पुनः कौमारिलजैनादिवद् भिन्नाभिन्नम्। इदञ्चानुपाधिकं समवायादिसंबन्धाभावेन स्वभावादेव तद् द्रव्यं विशिंष्यात् यथा समवायः स्वयं संबन्धान्तराभावेऽपि स्वभावादेव तावेव संबन्धिनौ संघटयति नान्यौ, नापि स्वयंसंबन्धः । एवमेव द्रव्याद्रव्ये स्वभावादेव विशिष्टव्यवहारमातन्वाते अपर्य्यनुयोज्यत्वाद्वस्तुस्वभावानां, स्वभावो नाम प्रामाणिकं रूपम् । अपृथक्सिद्धविशेषणत्वेनोपलभ्यन्ते द्रव्यं प्रत्यद्रव्याणि, अन्यथा भवतापि कथमवश्यमेकमपराश्रितमेवावतिष्ठत इत्यादिकमुद्घुष्यते। अयमर्थः भवता ययोरयुतसिद्धा समवायः कल्प्यते तयोरयुतसिद्धिरेव संबन्धः, न पुनस्तत्कल्पनीयसमवायः कल्पनागौरवात् स्वाभाविकापृथक्सिद्धिव्यतिरेकेण समवायस्यानुपलम्भात् अतः स्वभावादेव द्रव्याद्रव्ययोरुपश्लेषः, न हि दृष्टेऽनुत्पन्नं नाम दृष्टापलापे विश्वमपि लोलुप्येत दृष्टमित्येव दृष्टं तावद्

गृह्यते अनुमेयमपि दृष्टसजातीयत्वेन तथापि विशेषतो दृष्टं दृष्टमेव सामान्यतो दृष्टमपि सामान्याकारेण दृष्टमेव अतो दृष्टानुरोधित्वमनुमानस्यापि । आगमोऽपि व्युत्पत्त्यादिसमये दृष्टमपेक्षते इत्थं साधनसमये दृष्टानतिलङ्घनमुक्तम्, एवं दूषणसमयेऽपि दूषणमप्यभिधीयमानं दृष्टानुरोधि चेद् भवत्येव दूषणं, न चेद्दूषणमेव न भवति, व्याघातो हि सर्वदूषणानां सीमाभूमिः, स च दृष्टविरुद्धाभिधानेन व्याप्यते अतीतमस्ति सर्वम्मिथ्या माता मे वन्ध्या यावज्जीवमहम्मौनीत्यादिषु व्याघातवचनं दृष्टविरोधोत्पादनमेव अतोदर्शनानुरोधानङ्गीकारे सर्वापलापप्रसङ्गः ॥

इत्यद्रव्यप्रमाणादि ॥ २ ॥

अथ कश्चिद्विश्वापलापवादी द्रव्याद्रव्यविभागमप्यपलपति । अद्रव्यमिति ।

मू० अद्रव्यं द्रव्यसिद्धौ तदुपहिततया तच्च लक्ष्येत तस्मादेकासिद्धौ द्वयं नेत्यपि न सदुभयान्योन्यवैशिष्ट्यदृष्टेः । आधारे द्रव्यशब्दस्तदधिकरणकेनाश्रये त्वन्यदित्थं व्युत्पत्तिर्विश्वहृद्या न तदपलपति स्वर्गकर्णी सुतोऽपि ॥ ३ ॥

टी० द्रव्यसिद्धावेव अद्रव्यसिद्धिः अद्रव्यस्य द्रव्यप्रतियोगित्वेन तदसिद्धावसिद्धेः तथा द्रव्यमप्यद्रव्यसिद्धिपूर्वकमेव अवस्थावद् द्रव्यमिति हि द्रव्यं लक्ष्यते अवस्था चाद्रव्यमेव तथा चान्योन्यसापेक्षत्वाद् द्रव्यमद्रव्यं द्वयमपि न सिद्ध्यतीति तदेतदनुभाषितं सर्वापलापहेतुत्वादसदिति दूषयति । न सदिति । अयमभिसन्धिः

किं द्रव्याद्रव्ययोरुपलम्भानुपपत्तिरन्योन्यापेक्षयोच्यते उत व्यवहारानुपपत्तिः उभयमपि नास्ति एकस्मिन्नेव क्षणे विशेषणविशेष्ययोरेकज्ञानग्रहणयोग्ययोर्विशेषणविशेष्यभावेनोपलम्भात् तदिदमाह । उभयान्योन्यवैशिष्ट्यदृष्टेरिति । एवं व्यवहारेऽपि नान्योन्याश्रयः व्युत्पत्त्यायत्तो हि व्यवहारः, व्युत्पत्तिश्च द्रव्याद्रव्यशब्दयोर्विशेषणविशेष्यविषययोर्युगपदेव उपलभ्यमानयोराधाराधेययोरनयोरनुक्रमाद् द्रव्याद्रव्यशब्दौ वाचकाविति आधाराधेयौ च युगपदुपलभ्येते तच्छब्दौ च युगपदेव व्युत्पद्येते अतो द्रव्याद्रव्यशब्दयोर्व्युत्पत्तौ व्यवहारे तत्प्रतिपत्तौ च परस्परपौर्वापर्य्याभावान्न विरोधः तदिदमाह । आधार इति । अनाश्रये—स्वयमाश्रयव्यतिरिक्त इत्यर्थः इयमेव हि व्युत्पत्तिः पामराणामपि व्यवहारे निदानं बालाः खलु विशेषणविशेष्यभावेन वस्तुस्वरूपं युगपदुपलभन्ते अनादौ संसारे पूर्वपूर्वव्यवहारैर्युगपदेव शिक्ष्यन्ते अन्यथा कथमिव तेषां व्यवहारनियमः प्रवृत्तिनियमो वा, न चान्योन्याश्रयादिविभीषिकेयं लोकव्यवहारनियमं निरोद्धुं शक्नोति, एवं व्यवहारादेव व्युत्पन्नाः पश्चाद्वाक्येनापि व्युत्पाद्यन्ते अतो लोकदृष्टेयं व्युत्पत्तिरित्याह । व्युत्पत्तिरिति । न चात्यन्ताव्युत्पन्नाश्शास्त्रैर्व्युत्पाद्यन्ते अपि तु लोकेनैव व्युत्पन्नाः व्युत्पत्तिविशेषपरिपूरणाय शास्त्रेष्वधिकुर्वते । अतो लोकदृष्टविशेषणविशेष्यादिविभागानुसारेण द्रव्याद्रव्यादिविभागपरिकल्पनं न्याय्यम् । अन्यथा सर्वापलापवादिनः स्वव्याघातादिदोषोपघातेन वादित्वमेव भज्येतेति, न हि वादिनः प्रमाणप्रमेयविभागं वाच्यवाचकविभागं वा वादिप्रतिवादिविभागं वा परिहृत्य वादिनो भवन्ति, न च प्रमाणनिरूपणे प्रमेयनिरूपणं प्रमेयनिरूपणे प्रमाणनिरूपणमित्यादिकं प्रलप्य वा प्रतिपाद्य वा तूष्णीमासते अतः सर्वेऽपि भेदाः

सेनावनताराममण्डलादिविभागदर्शनन्यायेन युगपदुपलभ्यन्ते युगपच्च व्यवह्रियन्ते केवलं वाचः क्रमवृत्तित्वाद् भावाभावाधाराधेयवाच्यवाचकादिव्यवहारेषु क्रमोपलम्भः, अभावो हि क्वचिद् भावपूर्वकोपलम्भोऽपि योग्यदशायां युगपदेवोपलभ्यते यथा घटसद्भावासद्भावविशिष्टभूतलयोर्युगपदिन्द्रियसन्निकर्षे केवलं घटाभावोल्लेखनं घटोल्लेखननान्तरीयकमित्यविनाभावात् प्रतियोगिग्रहणसध्रीची प्रतीतिः न पुनः प्रतियोगिग्रहणस्य पूर्वभावनिर्बन्धः । एवंभूतोपाधिकसंबन्धानां विशेषणविशेष्यभावप्रमाणप्रमेयभाववाच्यवाचकभावादीनां निर्वाहाभावेऽप्यन्ततो दूष्यदूषणभावमपि निर्वोढुं न शक्नोति दुर्वैतण्डिकः । अतो लक्ष्यलक्षणादिखण्डनचण्डचण्डमारुतोव्याघातशेषफणिमुखसहस्रेण परिपीतो जाठरदहनेन भस्मीभवतीति सर्वमवदातम् । स्वर्गकर्णीसुतोऽपि अपत्या लुण्ठाकाः शून्यवादिप्रभृतयः अतोऽपि विशिष्टो यद्यस्ति स्वर्गवासी सोऽपीति भावः ॥ ३ ॥

धर्मधर्मिभावानङ्गीकारे सकललोकव्यवहारविरोध इत्यद्वयवर्गस्य सर्वदुरपह्नवत्वं द्रढयति । सामान्यात्मेति ।

मू० सामान्यात्मा विशेषाकृतिरपि यदि न स्वीकृतो धर्मवर्गः स्यातां न भ्रान्तिबाधौ न किमपि कथकास्साधयेयुः स्वसाध्यम् । यस्मिन् बाधानवस्थे क्वचन न खलु तं नीतिरन्यत्र दृष्टे नोचेन्निश्शेषकुक्षिम्भरिरुपनिपतन् दुस्तरश्शून्यपक्षः ॥ ४ ॥

टी० यदि सामान्यात्मा विशेषाकृतिश्च न स्वीकृतो धर्मवर्गस्सामान्याभावाद् भ्रान्त्यभावः विशेषाभावाद् बाधाभावः तदु-

Digitized by Google

भयाभावे कथका वादिनः स्वसाध्यमपि न साधयेयुः, एक एव धूमवत्त्वादिको हेतुः पक्षसपक्षयोस्सामान्यं विपक्षाच्च विशेषः, इत्थं साधर्म्यवैधर्म्यात्मानस्सर्वे धर्मास्तानेवालम्ब्य साध्यसाधनभावोबाध्यबाधकभावश्च प्रवर्त्तते अन्यथा मौनमेव शरणं वादिनामिति भावः । ननु यथा द्वितीयसत्ताभेदादिपरिक्लृप्त्यभावेऽपि व्यवहारनिर्वाहः एवं प्रथमसत्ताभेदादिपरित्यागेऽपि व्यवहारनिर्वाहः स्यात् तथा च सर्वधर्मोच्छेद इति कश्चिदाह तं प्रतिक्षिपति । यस्मिन्निति । अयमर्थः द्वितीयसत्ताभेदादिक्लृप्तावनुपलम्भस्तावद् बाधकः अनवस्था च तन्नीतिरन्यत्र दृष्टे प्रत्यक्षदृष्टे प्रथमसत्ताभेदादौ न भवति अनुपलम्भबाधाभावात् अनवस्थाप्रसञ्जकत्वाभावाच्च सजातीयापेक्षायामेवानवस्था न तूपलब्धस्य प्रथमस्यापि स्वीकारे अतः प्रथमधर्मापलापः कर्त्तुं न शक्यत इत्यर्थः, यस्मिन् क्वचन द्वितीयसत्तादौ बाधानवस्थे भवतः न तन्नीतिरन्यत्र दृष्टे प्रमाणप्रतिपन्ने प्रथमसत्तादावपीति शब्दयोजना । इत्थं प्रथमस्यापि धर्मस्यानङ्गीकारेण सर्वधर्माणां सांवृतत्वकल्पने धर्म्यपलापोऽपि तेनैव सांवृतत्वेन कल्पयितुं शक्यत इति शून्यवाद एव परिशिष्येतेत्याह । नो चेदिति ॥ ४ ॥

ननु सत्त्वं द्रव्यमसत्त्वमद्रव्यमिति वदद्भिरभिहितत्वादद्रव्याणां मृषात्वमिति यदि कश्चिन्मनुते तन्मतमनूद्य प्रतिक्षिपति । चादीनामिति ।

मू० चादीनां वृत्तियोग्यं यदुत पदविदोऽसत्त्व-
मद्रव्यमाहुर्नैतावत्तन्मृषात्वं गमयति न
च तद्बाधकं किञ्चिदस्ति । तात्पर्य्यञ्चान्य-
दत्र स्फुटविदितमतस्तत्र सत्त्वेतरत्वादन्यः

कश्चिन्नञर्थः परमिह निपुणैर्द्योतकत्वादिचिन्त्यम् ॥ ५ ॥

टी० कुत इत्यत आह । न च तदिति । बाध एव ह्यसत्वे कारणं न च चाद्यर्थानां समुच्चयादीनां बाधोऽस्ति तदभावेऽपि तन्मिथ्यात्वे सर्वपदार्थानां मिथ्यात्वं स्यादिति भावः । कस्तर्हि पदविदां वाक्याभिप्राय इत्यत्राह । तात्पर्य्यमिति । किन्तत्तात्पर्य्यमित्यत्र सामान्येन तात्पर्य्यार्थमाह । अत इति । प्रमाणबलात् सत्वेतरत्वादन्यथैव तात्पर्य्यमिति सामान्यतो निर्णीतमित्यर्थः तात्पर्य्यविशेषं प्रकाशयति । परमिहेति । द्योतकत्वादि चिन्त्यम् । चादीनां द्योतकत्वमन्येषां वाचकत्वं यद् द्योत्यं तस्य विशेषणसंबन्धानर्हत्वं यद्वाच्यं तस्य विशेषणसंबन्धार्हत्वमित्यादिविभागो यथाप्रमाणं चिन्तनीयः, अतोऽसत्वशब्दकथनमात्राद्द्रव्याणां मिथ्यात्वप्रसङ्गाभाव इत्यर्थः ॥ ५ ॥

अथ क्षपणका गुणपर्य्यायभेदेन गुणानेव विभजन्ते तन्न युक्तमित्याह । आहुरिति ।

मू० आहुर्द्रव्येषु धर्मान् कतिचन गुणपर्य्यायवैषम्यभिन्नान् पर्य्यायाणां गुणत्वे स्थितवति सहजागन्तुतामात्रमेतत् । मिथ्याभूतान् विकारानभिदधति परे सत्यरूपान् स्वभावांस्तानेकद्व्यादिरूपानभिदधतु कथं निर्गुणानां गुणानाम् ॥ ६ ॥

टी० सहजागन्तुतामात्रमेतदिति सहजा धर्मा गुणा इत्युच्यन्ते आगन्तवः पर्य्याया इति क्षपणकपरिभाषा गुणत्वे तुल्ये

Digitized by Google

किमनेन विशेषकथनेनेत्यर्थः । बौद्धास्तु केचित् सर्वानप्यवस्थाभेदान् गुणशब्दाभिधेयान्मिथ्याभूतानभिदधति तेष्वेवापरे सत्यभूतान् स्वभावांस्तांश्चैकद्व्यादिरूपान् रूपरसगन्धस्पर्शस्वभावा पृथिवी रूपरसस्पर्शस्वभावं जलं रूपरसस्पर्शस्वभावं तेजः स्पर्शस्वभावो वायुरिति, एतत्सर्वं निर्गुणानां न घटत इत्याह । अभिदधत्विति । आरोपो हि सगुणेष्वेव तिरोहितातिरोहितस्वरूपसापेक्षत्वात् रूपरसादीनां स्वभावभावत्वे धर्मधर्मिणोर्भिन्नेन्द्रियग्राह्यत्वविरोधात् भिन्नेन्द्रियग्राह्याणां रूपरसादीनां बहूनां स्वभावानामेकवस्त्वात्मकत्वे बहुविरोधसंकलनाच्च सगुणत्वमेव न्याय्यमिति द्रव्याद्द्रव्यविभागोऽनतिलङ्घनीय इत्यर्थः ॥ ६ ॥

बाह्यार्थ इति ।

मू० बाह्येऽर्थे बौद्धतो*क्ताः किल जननजराभङ्गरूपान् विकारानाद्यन्तौ चित्तचैत्तेष्वपि जगदुरमी तत्स्वरूपं न वा स्युः । पूर्वस्मिन्नक्रमः स्यादुपरि तु न कथन्तस्य धर्मास्त एते तन्मिथ्यात्वे तु नित्यं निखिलमपि भवेत्तुच्छमेवान्यदा स्यात् ॥ ७ ॥

टी० अथ केचिद् बौद्धाभासा बाह्यार्थेषु जननजराभङ्गरूपान् विकारानाहुः, चित्तचैत्तेषु जननभङ्गावेव द्वौ विकारौ तत्र विकल्पनीयम्—एतद्विकारजातं वस्तुनः स्वरूपं धर्मो वा तत्र पूर्वस्मिन् पक्षे जननादीनां क्रम एव न स्यात्, न हि स्वरूपं क्रमेण भवति स्वरूपत्वव्याघातात् उत्तरत्र धर्मधर्म्मिभावं स्वयमेव वद-

* बौद्धबाला इत्यर्थः ।

सीत्याह । उपरीति । तर्हि जननादयो मिथ्येति चेन्नेत्याह । तन्मिथ्यात्व इति । जननादीनां मिथ्यात्वे तस्य वस्तुनो नित्यत्वमेव स्यात् यदि वा तुच्छत्वमिति यथाऽऽहुः ।

नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्षणात् ।

अपेक्षातो हि भावनां कादाचित्कत्वसंभवः ॥ इति,

अपाहेतोरित्युपलक्षणम् । अजननस्येत्यर्थः हेतोरपि जनन एवोपयोगात् अन्यथा जननादीनां मिथ्यात्वे सति एकदा नित्यत्वम् अन्यदा तुच्छत्वमेवेत्यर्थः, स्यादेव न स्यादेव वा न तु कदाचित् स्यादिति ह्याहुः ॥ ७ ॥

एवमद्रव्यं साधयित्वा द्रव्याद्रव्ययोर्भेदाभेदवादस्याप्रामाणिकत्वमाह ।

आदाविति ।

मू० आदावैक्येन बुद्धिर्द्वयमपि मिलितं गृह्णती व्यक्तिजात्योर्भेदाभेदाविरोधं दिशति यदि न तत्तद्विशिष्टैक्यबुद्धेः । इत्यन्त्वेदन्त्वशून्यं न हि किमपि कदाऽप्यर्भकोऽपि प्रतीयात्तद्वैशिष्ट्यप्रतीतिर्निरुपधिरपृथक्सिद्धिमात्रेण सिध्येत् ॥ ८ ॥

टी० प्रथमपिण्डग्रहणेषु भेदेनाप्रत्ययात् मत्वर्थीयप्रत्ययनिरपेक्षसामानाधिकरण्यात् सहोपलम्भनियमादेकशब्दानुविद्धप्रत्ययाच्च भेदाभेदं समर्थयन्ते तत्र भेदाभेदयोः किं प्रत्यक्षगम्यत्वमुतानुमानगम्यत्वमिति विकल्प्य प्रत्यक्षगम्यत्वपक्षमनुवदति गोरियमित्यैक्येन बुद्धिरुत्पद्यमाना मिलितामेव जातिं व्यक्तिञ्च गृह्णाति। भेदाभे-

Digitized by Google

दयोर्विरोधमुपशमयति । दिशतीति । तन्निराचष्टे । न तदिति । तत्र हेतुमाह । तद्विशिष्टेति । तद्विवृणोति । इत्थन्त्वेति । इद-मित्थमिति हि सर्वा प्रतीतिरुपजायते तत्रेदमंशो धर्मी इत्थमंशो धर्मः अर्भकोऽपीति बालिशादपि बालिशो भवानित्यर्थः कथन्तर्ह्य-त्यन्तभिन्नयोर्धर्मधर्म्मिणोर्विशिष्टप्रतीतिः समवायाङ्गीकारे चापसिद्धा-न्तप्रसङ्गादित्याशङ्क्याह । तदिति । तत्—तस्मात्, निरुपधिः उपा-धित्वेन स्वीकृतसमवायाभावेऽपि स्वाभाविकापृथक्सिद्धिमात्रेण वैशि-ष्ट्यप्रतीतिः सिद्ध्येदिति ॥

इति प्रत्यक्षभेदाभेदभङ्गः ॥ ८ ॥

लिङ्गादपि भेदाभेदवादो न सिद्ध्यतीति वक्तुं परोक्तानुमाना-न्यनुवदति । व्यक्त्येति ।

सू० व्यक्त्या जातेरभेदं यदि वदसि पृथक्सिद्ध्य-भावादिलिङ्गैर्भेदाभावोऽत्रबाध्यस्तव च न हि मतो नान्यथात्रास्य युक्तिः । धर्म्यैक्यादे-कवाक्यान्न तु भवति ततो धर्मधर्म्यैक्य-बुद्धिस्तद्बाधश्चाप्युपाधिर्न स इह भवता दूष्य इत्यभ्युपेते ॥ ९ ॥

टी० पृथक्सिद्ध्यभावादिलिङ्गैः—सहोपलम्भनियमादिलिङ्गैः धर्मधर्मिणोरभेदः कालात्ययादिष्ट इत्याह । भेदाभाव इति । तवाप्ययं दोषोऽभिमत इत्याह । तव चेति । अन्यथा सहोपल-ब्धिनियमयुक्तिरेव न स्यादित्याह । नान्यथेति । साहित्यं भेद एव नियतम् अभेदगन्धमपि न सहत इति भावः । कथन्तर्हि मत्वर्थी-यप्रत्ययनिरपेक्षसामानाधिकरण्यमित्याशङ्क्य सामानाधिकरण्यलक्ष-

Digitized by Google

धानुरोधेनैव परिहरति । धर्म्म्यैक्यादिति । न पुनस्सामानाधिकरण्यात् तत्र धर्मधर्मिणोरैक्यबुद्धिरित्याह । न तु भवतीति । यत्र पुनरैक्यं तत्र तद्बुद्धिरेव उपाधिः न स इह बुद्धिरूपोपाधिर्नास्तीत्यर्थः । नन्व- दृश्यविषये बुद्धिमन्तरेणाप्यर्थोऽस्ति तत्कथं बुद्ध्यभावादर्थाभाव इत्याशङ्क्याह । भवता दृश्य इत्युभ्युपेत इति । दृश्यत्वेनैव हि भवता धर्मधर्मिणावुभावपि परिगृह्येते तथा च धर्मधर्मिणोरै- क्यमपि यद्यस्ति योग्यत्वादुपलभ्येत न चोपलभ्यते, तस्मान्नास्ति एतेनैवैकशब्दानुविद्धप्रत्ययोऽपि निरस्तः एकोदण्डीतिवत् एक- शब्दस्य विशिष्टविषयत्वादिति ॥

इत्यनुमेयभेदाभेदभङ्गः ॥ ६ ॥

अथानेकान्तवादी प्रत्यवतिष्ठते । सत्त्वादिति ।

मू० सत्त्वान्नैकान्तमाहुर्विमतमितरवत् केऽपि तद्धीविरुद्धं न ह्यत्राकारभेदात् परिहृति- रनवस्थानदोषप्रसङ्गात् । स्वव्यापारोक्ति- चर्य्या समयनियतयोऽप्येवमेवाकुलाः स्युर्दृ- ष्टान्तेऽपि ह्युपाधिद्वयवति नियतस्थौल्यसौ- क्ष्म्यादियोगः ॥ १० ॥

टी० सर्वमनेकान्तं सत्त्वात् घटाकाशमहाकाशवदिति तत्प्र- तीतिविरुद्धमित्याह । तद्धीविरुद्धमिति । सामान्याकारेणाभेदः व्यक्त्याकारेण भेद इति विरोधं परिहराम इत्याशङ्क्य निराकरोति । न हीति । कुत इत्यत आह । अनवस्थानेति । व्यक्तीनामभेदनिर्वा- हार्थे जातिः परिगृह्यते जातिव्यक्त्योरत्यन्तविरुद्धस्वभावयोरभेदनि- र्वाहार्थे धर्मान्तरस्वीकारे अनवस्था अस्वीकारे विरुद्धाकारेण प्रति-

Digitized by Google

भावमानयोः । कथमभेदः उक्तार्थबाधकानतिप्रसङ्गानाह । स्वव्यापारेति । सर्वेषानेकान्तवादे व्यापारनियमो व्यवहारनियमस्सिद्धान्तनियम इत्यादयस्सर्वे नियमा व्याकुलीभवेयुः आकाशेऽपि घटकरकाद्यवच्छेदकभेदेनैव स्थूलसूक्ष्मादिव्यवहारः तथोपाधीनां भिन्नत्वमेव उपाधिमतः पुनरभिन्नत्वमेव केवलमुपाधिगतो भेद उपाधिमत्पर्य्यन्तम् उपाधिद्वारेण व्यवह्रियत इति न विरोधः ॥ १० ॥

कथन्तर्ह्यनेकान्ताभावे सर्वैरपि वादिभिरेकस्मिन् सिद्धान्ते पक्षद्वयोपवर्णनं क्रियते यथा स्मृतेर्याथार्थ्यमयाथार्थ्यञ्चेति न्यायवादिनः एवन्तेषुतेषु सिद्धान्तेषु मतभेदोपवर्णनं द्रष्टव्यं यथा भवन्त एवान्विताभिधानमभिहितान्वयञ्चाभिदधत इत्याशङ्कते । सिद्ध इत्यादिना ।

मू० सिद्धे वस्तुन्यशेषैः स्वमतमुभयथा वर्ण्यते
तत्रतत्र स्यादर्थस्यैकरूप्ये कथमिदमिति
चेत्तन्न भिन्नाशयोक्तेः । मन्तव्या वैभवोक्तिः
क्वचिदनभिमते संशयोक्तिः क्वचिद्वा भाग-
द्वन्द्वान्नृसिंहप्रभृतिषु घटते चित्रसंस्थान-
योगः ॥ ११ ॥

टी० परिहरति । तन्नेति । तत्र हेतुमाह । भिन्नाशयोक्तेरिति । तत्तच्छास्त्रप्रवक्तृणामाशयभेदेन पक्षभेदोपवर्णनं न्याय्यमित्यर्थः, अस्मिन्नर्थे परिहारान्तरमप्याह । मन्तव्येति । एकस्यैव वक्तुः क्वचिद्वैभवोक्तिः क्वचित् परमार्थोक्तिरिति । तृतीयमपि परिहारमाह । संशयोक्तिरिति । अर्थानवधारणेन वादिभिस्संभावितकोटिद्वयोपादानमिति अतो नानेकान्तवादप्रसङ्गः । कथन्तर्हि नृसिंहादिरूपेष्वपि

विरुद्धाकार इति चेत् अंशभेदादविरोध इत्याह । भागद्वन्द्वादिति ।

इत्यनेकान्तानुमानभङ्गः ॥ ११ ॥

इत्थमनेकान्तवादप्रतिक्षेपमसहमानोऽनेकान्तवादी सप्तभङ्गीं पुरस्कुरुते । स्यादस्ति स्यान्नास्ति स्यादस्ति च नास्ति च स्यादस्ति नास्ति विलक्षणम् अस्ति स्यादस्ति नास्तिविलक्षणं नास्तिस्यादस्ति नास्ति विलक्षणम् अस्ति च नास्ति स्यादस्तिनास्ति विलक्षणमिति सप्तभङ्ग्या संवलितमेव विश्वमिति द्रव्यं हि वस्तुस्वरूपं पर्य्यायश्चागन्तुकधर्मः द्रव्यपर्य्यायात्मना सदसद्रूपे च जगति सर्वमपि रूपान्वयव्यतिरेकाभ्यां संघटत इति तदिदमनुभाषते । स्यादस्तीति ।

मू० स्यादस्ति स्यान्न नास्ति द्वितयमनुभयं स्यात्त्रिभिश्चान्तिमं त्रिस्सैषोक्ता सप्तभङ्गी-जिनसमयजडैर्द्रव्यपर्य्यायवर्गे । इष्टां सार्वश्रीकीं तां स्वपरमतकथा तत्फलादौ विवक्षन् कक्षीकुर्वीत धूतः कथकपरिषदा कान्दिशं कान्दिशीकः ॥ १२ ॥

टी० स्यात्त्रिभिश्चान्तिमं चिरिति अन्तिमम्—अनुभयं त्रिभिः स्यादस्तीत्यादिभिस्त्रिभिः प्रत्येकमन्वितमित्यर्थः अस्ति नास्ति विलक्षणं प्रत्येकं स्यादस्तीत्यादिभिस्त्रिभिरन्वितमिति पक्षत्रयं पूर्वं चत्वारः पक्षाः अतस्सप्तभङ्गी सैषा सप्तभङ्गी द्रव्यपर्य्यायवर्गेऽनेकान्तवादिभिरुक्ता जिनसमयजडैरिति अस्यार्थस्य उपक्षेप एव वक्तृणां जाड्यं प्रकटयतीत्यर्थः । अथोत्तरमाह । इष्टामिति । अनियतार्थोपपादनस्वभावामेनां सप्तभङ्गीं विवक्षन् परस्परविरुद्धभाषणेन विद्वद्भिर्निष्कासितः शुष्कतर्कवादी कान्दिशीको भयद्रुतः कान्दिशं कक्षीकु-

र्तीत न काञ्चिदपि दिशं प्राप्नुयादित्यर्थः । अनियतवादिनां हि स्वपक्ष एव परपक्षः दूषणमेव भूषणं विजय एव पराजयः व्यवहार एव मौनमिति सर्वोव्याघातस्संपनीपद्यतेति भावः ।

इति सप्तभङ्गीभङ्गः ॥ १२ ॥

इत्थं भेदाभेदवादे निरस्ते भेदोऽपि तद्वदेव निरस्यता-मिति वदतः परपक्षवादिनः पक्षमनुवदति । भेद इति ।

मू० भेदे वस्तुस्वरूपे भ्रम इह न भवेद्धर्मपक्षेऽनव-स्था स्याद्वाऽन्योन्याश्रयादिस्तदयमनृत इत्यु-क्तिबाधादिदुःस्थम् । धर्म्मः क्वापि स्वरूपं क्वचिदिति च यथादृष्टिमोक्तप्रसङ्गौ यद्-दृष्ट्या यत्र यस्याध्यसनपरिहृतिस्सोऽस्य तस्मात्तु भेदः ॥ १३ ॥

टी० तन्निराकरोति । उक्तेति । अयमत्र पूर्वपक्षसिद्धान्त-योरनुक्रमः किं भेदो वस्तुनः स्वरूपमथ वा धर्म्मः यदि स्वरूपं स्वरूपभूते भेदे गृहीते सत्यध्यासो न स्यात् । अथ न गृह्यते तथा-ऽप्यध्यासो न स्यात् धर्मिग्रहणमन्तरेणाध्यासाभावात् तथा च स्वरूपभूतभेदस्य ग्रहणाग्रहणयोरध्यासाभाव इति स्वरूपभेदवाद-निरासः । किञ्च स्वरूपस्यैव भेदत्वे स्वरूपं भेद इति व्यवह्रियेत न पुनर्भिन्नमिति स्वरूपस्य प्रतियोगिनिरपेक्षत्वाद् भेदस्य तत्सापेक्ष-त्वाच्च विरुद्धधर्माध्यासोऽपि स्वरूपभेदवादमपाकरोति, नापि धर्मो भेदः तस्य धर्मिप्रतियोगिभ्याममभेदे व्याघातः धर्मधर्मिभावादेर्भेदनि-ष्ठत्वात्, भेदे पुनरात्मनैव भेदाङ्गीकारे तावदात्माश्रयः, द्वितीय-भेदमङ्गीकृत्य परस्परभेदकत्वकथने परस्पराश्रयः, तृतीयादिभेद-

मङ्गीकृत्य परिवर्त्तने चक्रकम्, उत्तरोत्तरमपि धावने अनवस्था । उत्तरोत्तरभेदानां पूर्वपूर्वभेदेभ्यो भेदानङ्गीकारे द्वितीयादीनां भेदानां प्रथमभेदाद् व्यतिरेकाभावेन तदङ्गीकारानङ्गीकारयोरविशेष इति धर्मभेदोऽपि दुर्वचः । किञ्च किं धर्म्मिप्रतियोगिग्रहणपूर्वको भेदग्रहः उत स्वतन्त्रः । यदि स्वतन्त्रः भेदग्रहणमेव तन्न स्यात् कस्य कस्माद् भेद इति । यदि धर्मिप्रतियोगिग्रहणपूर्वकस्तथापि विकल्पयामः किं धर्मिप्रतियोगिनो परस्परविलक्षणत्वेन गृह्यमाणो तथा भवतः, उताविलक्षणत्वेन, यद्यविलक्षणत्वेन घटाद् घटो भिन्न इत्येव स्यात् न च तद्युक्तम् । विलक्षणत्वेन चेद् अन्योन्याश्रयकुविनिक्षेपणेन निर्दह्यते भेदवादः, भेदे गृहीते सति धर्म्यादिग्रहणं तद्ग्रहणे सति भेदग्रहणमिति अन्योन्याश्रयम् । उक्तिबाधादि दुःस्थमिति । अयमत्र भावः—यस्तु भेदः स्वरूपं धर्मो वेति विकल्पयति स पुनस्तृतीयकोट्यङ्गीकारेण विकल्पयति किं वा तदनङ्गीकारेण । यद्यङ्गीकारेण अयावत्संभवी तावदयं विकल्पयतीति न्यूनं नाम निग्रहस्थानं, संभवन्ति च स्वरूपधर्मव्यतिरिक्तास्सहस्रमप्यर्थाः, न हि घटस्य स्वरूपं नापि धर्मः पटकुड्यकुसूलादयः तृतीयकोटितयाऽपि भेदं वदन्ति भेदवादिनः ज्ञानाभावसंबन्धानां विषयप्रतियोगिसंबन्धिभिरेव व्यावृत्तव्यवहारात्, तेषामपि भेदलक्षणलक्षितत्वस्य भवद्भिरप्यङ्गीकार्य्यत्वात् । यदि तृतीयकोट्यनङ्गीकारेण वैयर्थ्याद्विकल्पयसि तथापि तर्काभासोऽयं प्रसङ्गः स्वरूपञ्चेत्तदेवं स्यात् न चैवं तस्मान्न स्वरूपं धर्मश्चेदेवं स्यात् न चैवं तस्मान्न धर्म इति परस्परविरुद्धयोस्तर्कयोर्विपर्य्यये पर्य्यवसानं यद्यस्ति तदा मिथोविरोधात्तर्काभासत्वं, यदि नास्ति तथाऽपि तर्काभासत्वं विपर्य्यये पर्य्यवसानाभावेनाङ्गशून्यत्वात् उभयोरपि तृतीयकोटौ पर्य्यवसानमस्त्विति

चेत् अहो न भवानात्मोक्तमेव प्रस्मरति तृतीयकोट्यसद्भावेन हि भवानालपति यदि कोट्यन्तरमस्ति अस्माकमपि तद्रूपेणोपतिष्ठतां भेदः, अतो न भेदतत्त्वापलापः, तथा च न विवक्षितार्थसिद्धिः स्वरूपञ्चेदध्यासानुपपत्तिः स्यादिति भवतां मूलशैथिल्यम् अनृतजडपरिच्छिन्नव्यावृत्तीनां ब्रह्मस्वरूपत्वेऽपि भवद्भिरेव प्रपञ्चाध्यासाङ्गीकाराद् व्यावृत्तीनां धर्मत्वे भवतैव धर्मभेदवादोऽङ्गीकृत इति धर्मभेदवादप्रतिक्षेपकाणां तर्काभासानामङ्गान्यतमवैकल्यं भवतैव प्रतिपादितं स्यात् । आस्तामयं तर्काभासप्रसङ्गः प्रतिबन्द्यापि दूषयामः अभेदः स्वरूपं धर्मो वा, धर्मश्चेदनवस्था स्वरूपातिरिक्तस्य धर्मस्याभेदत्वव्याघातश्च आत्माश्रयान्योन्याश्रयचक्रकाश्रयाद्यभिधानमप्यस्माभिरभिधातुं शक्येत स्वरूपञ्चेदभेदः अभेदो ब्रह्मेति स्यात् न पुनरभिन्नं ब्रह्मेति । किञ्चाभेदस्वरूपस्य नित्यस्वप्रकाशत्वेन भेदप्रपञ्चाध्यासो न स्यात् स्वरूपान्तरमभेद इति चेद् भेदवादमेवोद्गिरसि । किञ्च स्वस्य रूपं स्वरूपमिति यदि वदसि सोऽपि च भेद एवावसीयते स्वयमेव रूपमिति वचने स्वरूपातिरिक्ताभेदानभिधानात् अध्यासानुपपत्तिस्तदवस्थैव, अतो भेदवदभेदस्यापि त्वदुक्तेनैव दूषणकलापेन दुर्निरूपत्वात् स्वरूपधर्मयोर्भेदत्वानुपपत्तिरिति रिक्तं वचः । कस्तर्हि भेदः अनृतजडपरिच्छिन्नव्यावृत्तीनां स्वरूपत्वे स्वरूपभेदवादमङ्गीकृत्य मूकीभव धर्मत्वे पुनर्धर्मभेदवादमङ्गीकुर्वन् निर्वैरमेव संचर । अथापि कथं भेदस्य भेदाभावे स्वरूपसिद्धिरिति चेत् स्वस्य स्वयमेव भेदः स्वपरनिर्वाहकत्वात् यो हि यत्र यदध्यासविरोधी स तस्माद् भेदः तथा च स्वाश्रये पटादावध्यासविरोधी शौक्ल्यादिधर्म एव स्वस्मिन्नपि कार्ष्ण्याद्यध्यासविरोधित्वात् स्वस्यापि स्वयमेव भेदः तथा च धर्मिप्रतियोगिभ्यामपि शौक्ल्यादेः

स्वरूपमेव भेदः, स्वरूपस्यैव स्वात्मनि तत्तदध्यासविरोधित्वात् यत्पुनरुक्तम्भेदग्रहणस्य धर्म्मिप्रतियोगिग्रहणपूर्वकत्वात्परस्पराश्रय इति तदपि चानिरूपकाणामाघोषणं घटपटौ हि गृह्यमाणौ युगपदेव घटत्वपटत्वाश्रयावेव गृह्येते तावेव धर्मौ भेदौ इतरेतराध्यासविरोधित्वात् स्वस्मिन्नपि तदध्यासविरोधित्वात् स्वात्मनोरपि भेदस्तावेव अतो नान्योन्याश्रयणशङ्काऽप्यङ्कुरति। कथन्तर्हि प्रतियोगिनिरपेक्षाणां धर्माणां भेदत्वमिति चेत् इत्थं यदा शुक्लत्वकृष्णत्वादयः स्वरूपेण प्रतीतिविषयाः परस्पराध्यासं व्यावर्तयन्ति तदा शुक्लत्वकृष्णत्वादय इति व्यवह्रियन्ते, कुर्वन्ति चाध्यासनिवृत्तिं तेनैव स्वरूपेण, यदा पुनरध्यासनिवर्तकत्वरूपधर्मान्तरवैशिष्ट्येन व्यवह्रियन्ते तदा भेदा इत्युच्यन्ते तेन तेषामेव धर्माणां वस्तुस्वरूपेण व्यवह्रियमाणानां न प्रतियोगिसापेक्षत्वम् अध्यासनिवर्तकत्वरूपधर्मान्तरवैशिष्ट्येन व्यवह्रियमाणानां प्रतियोगिसापेक्षत्वमिति न कश्चिद्विरोधः, यथा घटे दण्डादीनां व्याप्रियमाणानां दण्डादिव्यवहारे न प्रतियोग्यपेक्षा घटकारणत्वव्यवहारे प्रतियोग्यपेक्षेति। एतेन ग्राहकानुपपत्तिप्रलापोऽपि दूरोत्सारितः जात्यादीनामेव भेदत्वात् तेषां वस्तुना सह युगपदेव ग्रहणेन स्वरूपभेदयोर्ग्रहणपौर्वापर्याभावात्, अतः प्रत्यक्षमेव युगपदुभयं गृह्णाति अतो भेदस्य न विकल्पग्राह्यत्वं तदिदं सर्वमभिप्रेत्याह। धर्मः क्वापीति। घटादीनां धर्मो भेदः स्वरूपं क्वचिद् भेदे पुनः स्वरूपमेव भेदः यथादृष्टि यथा दर्शनमित्यर्थः। तेन नोक्तप्रसङ्गो न स्वरूपभेददूषणम्। नापि धर्मभेददूषणम्। उक्तस्यार्थस्योपपत्त्यर्थं भेदलक्षणमेव परिशोधयति। यस्य दृष्ट्या यच्च यदध्यासनिवृत्तिः स तस्य तस्माद् भेद इति। अतः शौक्ल्यादिरसाधारणो धर्म एव भेदः, अतस्तदतिरिक्तभेदकल्पनमल्प-

बुद्धीनां कल्पनागौरवहेतुत्वादनादरणीयमेवेति भावः । तदयं संक्षेपः भेदप्रतीत्यपलापे तवापसिद्धान्तः प्रतीत्यभावे कथं बाधार्थं प्रयतसे तत्कारणापलापे भेदप्रतीतेः कार्य्यत्वमेव परिपन्थि न ह्यकारणं कार्य्यमुत्पद्यते कारणनिरूपणापलापे कार्य्यविशेष एव कारणविशेषं निरूपयति तत्तत्कार्य्यविशेषसमुचितत्वेनैव कारणविशेषस्य प्रतीतेः, भेदप्रतीतेर्विषयापलापे भेदप्रतीतिर्निर्विषयेति व्याघातः प्रतीतेस्सविषयत्वनियमात्, न हि निर्विषयं ज्ञानमिति जाघटीति । विपरीतज्ञानमपि सविषयमेव अपि तु बाधितविषयमिति विशेषः, अतोभेदज्ञानस्य विषयबाधोपपादनमेव तवावशिष्यते तच्च प्रत्यक्षेण बाधोपपादने सर्वस्यापि प्रत्यक्षस्य सविशेषविषयत्वान्न बाधकत्वम् । अनुमानन्त्वत् सुतरां सविशेषविषयमेव पक्षहेतुदृष्टान्तसाध्यतज्ज्ञानादिबहुभेदसंवलितत्वात् । आगमोऽपि पदपदार्थवाक्यवाक्यार्थादिभेदगर्भः, एवं तर्कोऽपि व्याप्याङ्गीकारे व्यापकानिष्टप्रसञ्जनं व्याप्यव्यापकभावश्च भेदात्मक एव अङ्गपञ्चकोपेतत्वाच्च, अतो भेदखण्डनप्रसङ्ग एव भेदमुपपादयति एतेन प्रत्यक्षं धर्मिग्राहि उत भेदग्राहि उतोभयग्राहि स्वरूपग्राहित्वेऽस्मत्पक्ष एव, भेदग्राहित्वे धर्मिप्रतियोगिसापेक्षस्य भेदग्रहणस्य तद्ग्रहणमन्तरेण ग्रहणं न स्यात् उभयग्राहित्वेऽपि युगपदुभयग्राहि वा क्रमेण वा, युगपद्ग्रहणं न संभवति सापेक्षनिरपेक्षयोर्यौगपद्यायोगात्, क्रमेणोभयग्राहित्वे ऽपि भेदपूर्वकं धर्मिग्रहणं न संभवति सापेक्षस्य पूर्वभावित्वायोगात् धर्मिग्रहणस्य पूर्वभावित्वे तस्मिन्नेव क्षणे प्रत्यक्षस्य नष्टत्वात् न तद्भेदग्राहकं न च प्रत्यक्षान्तरं भेदग्राहकं परस्परवार्तानभिज्ञत्वात् अतोभ्रान्तिरेव प्रत्यक्षञ्चापि भेदं गृह्णातीति दत्तोत्तरम् ॥

इति भेददूषणनिस्तारः ॥ १३ ॥

भेदग्रहणे पूर्वोक्तां ग्राहकानुपपत्तिं प्रतिबन्द्या दूषयति । भेद इति ।

मू० भेदो गृह्येत बुद्धाधिकरणमवधिं चेति न ह्यक्रमोऽस्मिन् प्रत्यक्षस्य क्रमोऽपि क्षणभिदुरतया नेति तुल्यं भ्रमेऽपि । अक्षान्धादिव्यवस्थाक्षतिरपि युगपद्योग्यधर्मैर्ग्रहोऽतस्तदुक्ते भिन्नशब्दः कथिततदुपधित्र्यपेक्षः क्रमात्स्यात् ॥ १४ ॥

टी० धर्मिभेदयोरन्योन्यापेक्षत्वनिरपेक्षत्वाभ्यां युगपद्ग्रहणमनुपपन्नं प्रत्यक्षज्ञानस्य क्षणिकत्वात्, क्रमग्रहणञ्च न जाघटीति परस्परवार्तानभिज्ञत्वात्, प्रत्यक्षान्तरेण ग्रहणमपि न स्यादिति ह्युक्तम् एतत्काल्पनिकभेदपक्षेऽपि तुल्यं कल्पनायामप्यधिकरणप्रतियोगिसापेक्षत्वस्यावश्यंभावित्वात् धर्मिज्ञाने क्षणिकत्वस्य तुल्यत्वात् कल्पनारूपभेदग्रहणेऽपि परस्परवार्तानभिज्ञत्वस्यानिवारणात्, न हि कल्पनापि धर्मिप्रतियोगिनावन्तरेण भेदं गृह्णाति । नापि धर्मिज्ञानवार्तामभिजानाति तस्य तस्माद् भिन्नत्वात्, अतः काल्पनिकभेदज्ञानस्य संघटने पारमार्थिकमपि भेदज्ञानं तेनैव न्यायेन संघटेत तस्यासंघटने काल्पनिकमपि भेदज्ञानं न संघटेतेति वीवधघटन्यायः । तर्हि काल्पनिकमपि भेदज्ञानं माभूदिति चेत्तर्हि लोकव्यवहारोच्छेदप्रसङ्गः कृत्स्नवेदान्तानारम्भप्रसङ्गश्च, भेदप्रतिभासनिरासायैव हि सर्वे वेदान्ता आरभ्यन्त इति ब्रूषे तदिदमाह । तुल्यं भ्रमेऽपीति । किञ्च भेदस्य प्रत्यक्षत्वाभावे सति इन्द्रियव्यवस्था न स्यात् रूपादिग्रहणमिन्द्रियकृत्यं विषयभेदव्यवस्थयैव हि चक्षुरादिव्यवस्थामाहुः

Digitized by Google

एवमन्धादिव्यवस्थापि न स्यात् तत्तद्विषयभेदग्राहकेन्द्रियभेदविनाशादेव ह्यन्धादिव्यवस्था तदिदमाह । अत्रान्धादीति । अतो युगपदेव तत्तद्विशेषणभेदविशिष्टवस्तुग्रहणमिन्द्रियकृत्यं, ते च विशिष्टा युगपदेव सन्निधाने युगपदेव गृह्यन्ते यथा सेनावनताराममण्डलादिज्ञान इत्युक्तं, तथा च परस्परासंकीर्णनानाधर्मविशिष्टाः पदार्था युगपदेव गृह्यन्ते घटः पटः शुक्लं कृष्णं चलं निश्चलमित्यादि तत्र घटत्वपटत्वशुक्लत्वकृष्णत्वादयः स्वरूपेण गृह्यमाणाः परस्पराश्रयं व्यावर्तयन्ति तच्च व्यावर्तनं तत्तद्धर्मस्वरूपग्रहणकृत्यं, तेनैव कृत्येन विशेष्यमाणास्त एव धर्माः प्रतियोग्यपेक्षया भेदा इति व्यवह्रियन्त इति प्रागुक्तमेवार्थं प्रतिपत्तॄणां बुद्धिसौकर्याय प्रकटयति । तद्युक्त इति । भेदव्यवहारेऽपि युगपद्व्यवहारे न पौर्वापर्यापेक्षा यथा पञ्चाप्यङ्गुलयः परस्परं भिन्ना इति, यत्र पुनः क्रमव्यवहारस्तत्र वाचः क्रमवृत्तित्वादस्तु वाङ्मात्रे पौर्वापर्य्यम् अङ्गुष्ठात् कनिष्ठा भिन्नेति, अत्रापि प्रतिपत्तिपौर्वापर्यं न निर्बन्धनीयः, अतो न भेदप्रत्ययत्वानुपपत्तिः ।

इति भेदप्रत्ययत्वानुपपत्तिनिरासः ॥ १४ ॥

एवं भेदतत्त्वं प्रसाध्य प्रामाणिकत्वेनाभिमतान् गुणभेदान् यथाप्रमाणं विभज्य दर्शयति । अद्रव्य इति ।

मू० अद्रव्ये नैकरूपे ह्यगणिषत गुणाः सत्त्वमुख्या द्विधाद्यं शुद्धं तन्नित्यभूतौ त्रितयमिह चतुर्विंशतौ व्याप्तितः स्यात् । पञ्चान्ये शब्दपूर्वा अपि परिगणिता भूतवर्गेष्वथान्यस्संख्यानादिश्च भेदः परिणमति यथासंभवं द्रव्यवर्गे ॥ १५ ॥

टी० तस्मिन्नद्रव्यवर्गे सत्त्वं रजस्तम इति प्रधानभूता गुणाः सत्त्वञ्च द्विविधं मिश्रसत्त्वं शुद्धसत्त्वञ्चेति शुद्धसत्त्वं नित्यविभूतौ तदिदमाह । शुद्धं तन्नित्यभूताविति । त्रितयमिति मिश्रसत्त्वं रजस्तमसी चेति त्रितयम् इदं चतुर्विंशतितत्त्वे सर्वत्रापि स्यादित्याह । व्याप्तितः स्यादिति । एवं शब्दादयः पञ्च गुणाः आकाशादिपञ्चभूतेषु उत्तरोत्तरमाधिक्येन दृश्यन्त इत्याह । पञ्चेति । संख्यादिरन्यो गुणवर्गो यथाप्रमाणमुपलभ्यमानो न्यूनाधिकभावेन तत्रतत्रावतिष्ठत इति दर्शयति । अथान्य इति । यथासंभवमिति प्रमाणगतिरेव पदार्थपरिकल्पनायां शरणं न पुनर्वैशेषिकादीनां सांकेतिकसंव्यवहार इत्यर्थः ॥

इत्यद्रव्यावान्तरविभागादिः ॥ १५ ॥

मू० स्थित्युत्पत्त्यन्तलीलाविधिषु भगवताऽधिष्ठिताः शास्त्रवेद्यास्सत्त्वाद्याः स्थूलसूक्ष्मप्रकृतिगतगुणा हेतुभूतास्सुखादेः । साम्ये तेषां त्रयाणां सदृशपरिणतिः स्यादिहान्यान्यथात्वे क्षुप्रान्यैर्द्रव्यतैषां श्रुतिपथविहता कुत्रचित्तूपचारः ॥ १६ ॥

पूर्वोक्तानां सत्त्वरजस्तमसां । स्थितीति । स्थित्युत्पत्तिप्रलयेषु विशेषेण भगवताऽधिष्ठितत्वं तेषुतेषु शास्त्रेषूच्यते ते च स्थूलसूक्ष्मप्रकृतिगतास्सुखदुःखमोहानां हेतवो भवन्तीति च शास्त्रसिद्धं तेषाञ्च साम्ये प्रलयावस्थायां सदृशपरिणतिः वैषम्येण सृष्ट्यवस्थायां विसदृशपरिणतिश्च शास्त्रैकसमधिगम्या अन्या—विसदृशपरिणतिः अन्यथात्वे वैषम्ये । सांख्याः पुनरेषां द्रव्याभेदेन द्रव्यत्वमाहुः तद्गुणत्वप्रतिपा-

दकश्रुतिस्मृतीतिहासादिविरुद्धं प्रमाणेषु च क्वचिद्यदस्ति द्रव्याभेदव्यवहारः स पुनरौपचारिकः । व्यक्तमन्यत् ॥

इति सत्त्वरजस्तमसामुपयोगादिरद्रव्यता च ॥ १६ ॥

प्रधाने बुद्धित्वादीन् कतिचन प्रकारानुक्त्वा प्रकारान्तराण्यपि अनन्तत्वान्न परिगणयन्ते अथापि प्रामाणिकत्वात् प्रधाने कार्य्यकारणरूपे परिगृह्यन्त इति दर्शयति । बुद्धीति ।

मू० बुद्धित्वादिः प्रधाने समपरिणतिरित्येवमागन्तुधर्मा द्रव्येष्वन्येषु चान्ये कतिचन कथिताः केचिदध्यक्षसिद्धाः । आनन्त्यादर्थमान्द्याद् दुरवगमतया सूक्ष्मवैषम्यभेदैरेकैकश्येन चिन्तामिह जहति बुधा निश्चितापेक्षितार्थाः ॥ १७ ॥

टी० प्रधाने बुद्धित्वादयो धर्माः सृष्ट्यवस्थायां विषमरूपाः प्रलयावस्थायां समपरिणतयः, एवमन्येष्वपि द्रव्येषु कतिचिद्धर्माः शास्त्रसिद्धाः कतिचित् प्रत्यक्षसिद्धाः अतोऽनुमानशरणानां साधनबाधनयोरत्रानवकाशः । न हि नरशिरःपवित्रत्वाद्यनुमानं शास्त्रप्रतिपत्तिशैलीमुल्लिलङ्घयिषति तर्हि सर्वेऽपि धर्माः प्रत्येकं प्रतिपाद्या इत्याशङ्क्य परिहरति । आनन्त्यादिति । अद्रव्याणान्तरभेदानामानन्त्यात् विविच्य प्रतिपादने पुनरर्थमान्द्यात् सूक्ष्मवैषम्यभेदैर्दुरवगमत्वाच्च निश्चितापेक्षितार्था मनीषिण एकैकश्येन चिन्तामिह जहति न तावता तेषां प्रकारभेदानामप्रामाणिकत्वमित्यर्थः ॥

इति विचित्रावस्थानन्त्यम् ॥ १७ ॥

Digitized by Google

अनन्तरं शब्दादीनां ग्राहकनियममाधारनियमञ्चोक्त्वा भूतान्तरे तत्तद्गुणप्रतिभासस्य उपाधिनियमञ्चाह । शब्दाद्या इति ।

मू० शब्दाद्यास्तत्तदक्षप्रतिनियतिजुषस्सर्वतन्त्रप्रसिद्धास्तैरेकद्व्यादिसंख्यैर्वियदुपवनहुतभुग्वारिभूम्यस्समेताः । पञ्चीकारादिनैषां विनिमितगुणता व्योमनैल्यादिबोधे तद्योगात्तत्र तत्तद्गुणजनिरिति चेन्नान्यथाऽत्रोपपत्तेः ॥ १८॥

टी० शब्दादीनां श्रोत्रादिग्राह्यत्वनियमस्सर्वतन्त्रसिद्धः शब्दादीनामाकाशादिषु उत्तरोत्तरगुणाधिक्यं शास्त्रसिद्धमुपलम्भसिद्धञ्च गुणविनियमस्तु पञ्चीकरणादिभिरेव स्यात् तत्रोदाहरणमाह । व्योमेति । गगनतले नैल्यादिप्रतिभासः पञ्चीकृतपृथिव्यादिसंबन्धेनैव स्यात् एवमुष्णं जलं सुरभिस्समीर इत्यादिषु संसर्गविशेषाद् गुणान्तरप्रतिभासः पञ्चीकृतपृथिव्यादिसंबन्धेनैव स्यात् एवमुष्णं जलं सुरभिस्समीर इत्यादिषु संसर्गविशेषाद् गुणान्तरप्रतिभासः स्वयमेवोहनीयः भूतान्तरसंसर्गाद् भूतान्तरे तत्तद्गुणोत्पत्तिकल्पनं कल्पनागौरवान्न योयुज्यते अतो रक्तं नभः धूम्रा दिश इत्यादयो व्यवहारा औपाधिका इति पटमलिनिमवत् यथा पटस्य मालिन्याभावेऽपि शङ्खस्य पीतिमाभावेऽपि मलिनः पटः, पीतश्शङ्खः, उष्णं जलमित्यादि ।

इति शब्दादिगुणभेदग्राहकाधारनियमः ॥ १८ ॥

लीलाविभूतिवन्नित्यविभूतावपि शब्दादिसंभवं तस्य च सर्वोत्तमाण्युत्कर्षशालित्वञ्चोपपादयति । कस्तूरीति ।

मू० कस्तूरीचम्पकादौ समविषमतया सम्मतस्सौरभादिस्तद्वच्छब्दादयोऽमी त्रिगुणतद-

Digitized by Google

धिकद्रव्यनिष्ठा गुणाः स्युः । निष्कृष्टे शास्त्रदृष्ट्या न कथमपि मिथस्संकरश्शङ्कनीयः स्वाच्छन्द्याच्छङ्कमानः स्व*मिह सुरगुरुं किन्न शङ्केत मुग्धम् ॥ १९ ॥

टी० यथा कस्तूरीचम्पकप्रभृतिषु गन्धसाम्ये सत्यपि सौरभविशेषस्तत्रतत्रोपलभ्यते एवं त्रिगुणे शुद्धे सत्त्वे च शब्दादिसद्भावेऽपि धर्मिग्राहकप्रमाणसिद्धं वैषम्यमनतिलङ्घनीयमेव न हि वीणावेणुप्रभृतीनामेकरूप्येण स्वरनियमः सुखविशेषहेतुत्वञ्चान्यथाऽन्यथोपलभ्यते एतत् सर्वं प्राकृतेष्वेव, अप्राकृते पुनर्विभूत्यन्तरे श्रुतिस्मृतीतिहासपुराणप्रसिद्धाः प्रकारविशेषाः तत्तदनुभवाधीनानन्दविशेषास्त्वौपलब्धुं न शक्यन्त इति भावः । तदधिकद्रव्यं—त्रिगुणद्रव्याधिकं नित्यविभूतिद्रव्यं निष्कृष्ट इत्यादि शास्त्रदृष्ट्या निर्णीते वैषम्ये सामान्यधर्ममात्रात् संकरो न शङ्कनीयः अन्यथा सर्वत्रातिशङ्कायां निर्मूलशङ्कायास्सुलभत्वात् स्वयमिव सुरगुरुरपि मूढ इत्येव शङ्केत अतो विलक्षणस्वरूपे शुद्धसत्त्वद्रव्ये विलक्षणाः शब्दादय इति न संकटं किञ्चित् ॥

इति विभूतिद्वयेऽपि शब्दादिसंभवः ॥ १६ ॥

अथ केचित् शब्दस्याकाशमात्राश्रितत्वमाहुः तन्नेति प्रतिपादयति । शब्द इति ।

मू० शब्दोऽनेकेषु युक्त्याप्युचित इह पुनः पारिशेष्यन्तु मन्दं वायुश्शब्दस्वभावश्श्रुतिशिरसि यतः स्मर्यते च स्वरात्मा । गन्धालोकादिनीतिं यदिह निजगदुर्व्योमगुणाद्यास्ततोऽपि

* स्वमिवेति प्रा० ।

स्पष्टो भेर्य्यादिनिष्ठोऽयमिति गतिवचोग-
न्धवत्तद्विशि*ष्टे ॥ २७ ॥

टी० युक्त्याप्युचित इति युक्तिरन्वयव्यतिरेकोपलम्भः पृथिवी-जलादावपि शब्दान्वयव्यतिरेकोपलम्भो हि दृश्यते तेन शब्दः क्वचिदाश्रित इति सामान्येनाधिकरणोपलम्भेऽपि स्वविवक्षिताकाश-भावपरिशेषो न स्यात् तादृशस्य परिशेषस्यानियतत्वाद् यथा युक्त्या-भावेन द्रव्यान्तरनिषेधः एवमाकाशनिषेधस्यापि केनापि तादृशेन युक्त्याभासेन कर्तुं शक्यत्वात् तदिदमाह । इहेति । युक्त्यापीत्यपि-शब्देन प्रत्यक्षादिकमपि प्रमाणयति मेघो गर्जति शङ्खो नदति भेरी ध्वनतीत्यादिलोकोपलम्भात् अस्तु वायमानुमानिकोपलम्भः अथापि भेर्यादिनिष्ठ एवायमुपलभ्यत इति न केवलमाकाशैकनिष्ठत्वम् । अपि च श्रुतिरेव शब्दस्य भूतान्तरनिष्ठत्वमुपपादयति अध्ययनोपक्रमपरि-पाठे शन्नो मित्र इत्यस्मिन्मन्त्रे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि त्वामेव प्रत्यक्षं ब्रह्म वदिष्यामि इति वायोरेव वेदात्मना परिणतिरु-पलभ्यते तत्तु वायोश्शब्दाधारत्वमन्तरेण न संजाघटीति एवन्तस्य ह वा एतस्य महतो भूतस्य निश्वसितमेतदृग्वेद इत्यादिकमपि भाव्यं, स्मर्यते च स्वरात्मा स्वरूपेण वायुरेव स्मर्य्यते ॥

वेणुरन्ध्रविभेदेन भेदः षड्जादिसंज्ञितः ।
अभेदव्यापिनो वायोस्तथाऽसौ परमात्मनः ॥

इति, एवं नाभिदेशादेव निर्गतस्य वायोस्ताल्वादिस्थानसंब-न्धेन तत्तच्छब्दपरिणतिहेतुत्वं स्मृत्यादिप्रसिद्धं स्वयमेवानुसन्धेयम् उपलम्भस्तु पञ्चभूतसाधारणत्वान्नाकाशस्यैव शब्दाश्रयत्वमुपपादयितुं

* तद्विशेषे इति पा० ।

Digitized by Google

शक्नोति । तर्कोऽपि तादृशः । अनुमानमप्यव्यवस्थितमिति प्रागेवोक्तं शब्दस्यापि गन्धवदालोकवच्च स्वाश्रयानुवर्तित्वमशेषदेशव्यापित्वञ्च लोकदृष्ट्या श्रीयामुनाचार्य्यादिभिरुपपादितं ततः शब्दस्य भेर्य्यादिनिष्ठत्वमुपपादितं भवति । कथन्तर्हि शब्दस्य गतिव्यवहारः भेरीध्वनिरुज्जृम्भते अध्ययनशब्दस्सर्वतः प्रवर्तत इति अयमपि पूर्वोक्तेनैव दृष्टान्तेन संघटते गन्धाद्याश्रयद्रव्यप्रसरणवत् शब्दाश्रयद्रव्यस्यापि सर्वतः प्रसरणात् यथा परपक्षे निमित्तकारणभूतवायोः प्रसरणेन सर्वतश्शब्दोपलम्भः एवं तत्तद्द्रव्यप्रसरणेन तत्तद्द्रव्यनिष्ठशब्दोपलम्भस्यापि संभव इति, आकाशनिष्ठत्वन्तु शब्दस्य भूतान्तर्गतत्वेनास्माभिरप्यनुमन्यते ॥

इति शब्दस्य सर्वभूताश्रितत्वम् ॥ २० ॥

अथ केचिद्रूपादिकञ्चतुष्टयमस्ति शब्दस्तु तच्चतुष्टय एव वर्तते स च श्रोत्रगम्यः तथाऽपि तेभ्यो न भिद्यत इत्याहुः तदिदमनुभाषते । सत्यानिति ।

मू० सत्यान् सत्यापयन्तः कतिचन चतुरः स्पर्शरूपादिधातूँश्शब्दं स्वाश्रयासिद्धं चतुरधिकरणं प्राहुरेभ्यो न भिन्नम् । किन्तद्भेदाप्रतीतेः प्रबलविहतितस्संमतैक्यप्रमातः स्वाच्छन्द्याद्देशनाया विभवत इति वा वीक्ष्य शिष्टा विजह्युः ॥ २१ ॥

टी० अथ धातुशब्दः परसिद्धान्तप्रयोगप्रसिद्धमनुवदति अतिरोहितमन्यत् । अनुभाषितमर्थं विकल्प्य दूषयति । किन्तदिति । किञ्चतुभ्यो धातुभ्यो व्यतिरिक्तपदार्थभेदाप्रतीतेः किं वा प्रबलव्या-

Digitized by Google

घातदर्शनाद् यद्वा चतुर्भिरुपरितनानामैक्यप्रतीतेः, यदि वा स्वाच्छन्द्यात्, केवलसुगतगुरूपदेशाद्वा तादृशं मतं स्वीक्रियते तत्सर्वमसिद्धादिदोषदूषितत्वाच्चतुर्भ्यो धातुभ्यो व्यतिरिक्तार्थग्रहणे हेतुर्न भवतीत्यर्थः ॥

इति सौगतोक्तशब्दकृप्तिभङ्गः ॥ २१ ॥

अथ केचिदाहुः शब्दस्य गुणत्वमेव नास्ति अपि तु द्रव्यत्वमेव यथाहुः ॥

वर्णात्मकाश्च ये शब्दा नित्यास्सर्वगतास्तथा ।
पृथग्द्रव्यतया ते तु न गुणाः कस्यचिन्मताः ॥

इति, एतत्तु वाय्वाद्यवस्थाविशेषरूपशब्दप्रतिपादकश्रुतीतिहासपुराणादिविरुद्धत्वादनादर्तव्यमित्याह । शब्द इति ।

मू० शब्दोऽवस्थाविशेषः श्रुतिभिरभिहितस्तेन नैष स्वनिष्ठोऽव्योमादेश्चाविभुत्वात् क्वचिदपि न तु तत्सन्निधिस्तद्विदूरे । साक्षादक्षाप्तिसाक्षात्कृत इति घटवद् द्रव्यमित्यप्यसारं साध्यात् प्राग्घेत्वसिद्धेर्न हि परमतवन्नाभसं श्रोत्रमत्र ॥ २२ ॥

टी० नैष स्वनिष्ठस्स्वतन्त्रं द्रव्यन्न भवतीत्यर्थः । अस्य च शब्दस्य स्वाधारभूतव्योमादेरविभुत्वात् व्योमादिरहिते देशे पुनरसन्निधानं न दोषायेत्याह । व्योमादेरिति । परमाकाशे तु प्राकृताकाशाभावेऽपि शब्दसद्भावो युज्यत इति प्रागेवोक्तं तर्हि शब्दो द्रव्यं साक्षादिन्द्रियसम्बन्धेन गृह्यमाणत्वात् घटवदित्यनुमानं प्रयुञ्ज्महे इति चेत्तदप्यसारमित्याह । साक्षादिति । कुत इत्य-

Digitized by Google

माह । साध्यादिति । अयमर्थः शब्दस्य द्रव्यत्वे साक्षादिन्द्रियसंबन्धेन साक्षात्कारसिद्धिः तत्सिद्धौ तत्सिद्धिरितीतरेतराश्रयत्वम् अथापि द्रव्यत्वसिद्धिमन्तरेण साक्षादिन्द्रियसंबन्धस्सिद्ध्यति श्रोत्रस्याकाशत्वात् शब्दस्याकाशगुणत्वादिति चेत् अत्र केचिदाहुः हेतुसिद्ध्या साध्यसिद्धिर्व्याहन्यत इति । तथा हि शब्दस्याकाशगुणत्वाङ्गीकारेण साक्षादिन्द्रियसंबन्धस्सिद्ध्यति तथा च हेतुरेवायं साध्यं व्याहन्तीति । तदिदं सर्वमभिप्रेत्याह । साध्यादिति । हेत्वसिद्धिमुपपादयति । न हीति । अस्मत्पक्षे श्रोत्रस्याकाशत्वायोगात् नैयायिकादिमतवत्साक्षादिन्द्रियसंबन्धप्रसङ्गोऽपि नास्तीत्यर्थः ॥

इति शब्दद्रव्यत्वभङ्गः ॥ २२ ॥

सध्वनीनां वर्णानां पुद्गलरूपत्वमाहुः क्षपणकाः तदिदमनुवदति । वर्णानामिति ।

मू० वर्णानां सध्वनीनामभिदधति हरिद्वाससः
पुद्गलत्वं नाशादेस्सिद्धमेतन्न च तदभि-
मते शब्दितः शब्दशब्दः । सूक्ष्मद्रव्ये हि
धर्मः श्रुतिविषयदशालक्षणोदुत्यजस्तैस्तस्मा-
न्नास्मत्समीक्षामतिपतितुममी शक्नुयुस्तद्व-
दन्ये ॥ २३ ॥

टी० हरिद्वसना नग्नाटाः । दूषयति । नाशादेरिति । अयमर्थः न तावत्प्रत्यक्षादिप्रमाणसिद्धत्वादयमर्थोऽवगम्यते नापि लोकव्यवहारानुरोधेनायमर्थ नास्ति तदाह । न चेति । तदभिमते पुद्गले न शब्दशब्दः शब्दितः न व्युत्पन्नः पुद्गलेषु शब्दशब्दस्य

Digitized by Google

व्याकरणाभिधानपाठलोकव्यवहारशिष्टप्रयोगेष्वन्यतमस्याप्यभावात् उपजीव्यानुमानाभावात् तदनुग्राहकतर्काभावाच्चेत्यर्थ: ॥

इति शब्दपुद्गलत्वभङ्ग: ॥ २३ ॥

वर्णात्मकशब्दस्वरूपनित्यत्वमाहु: कौमारिला: तदिदमाह । वर्णा इति ।

मू० वर्णा स्थैर्य्ये विरुद्धान्वयविरहवति प्रत्यभिज्ञा नियच्छेत्तैव्रयादिव्यञ्जकस्थं भ्रमवशघटितं तत्र कल्प्येत दिग्वत् । एकाक्षग्राह्यसंवित्प्रतिनियतिरपि ह्यञ्जनादाविव स्याद्व्यक्त्या स्यात् कार्य्यताधीर्य्यदि न निगदिता नैगमैरस्य नाश: ॥ २४ ॥

टी० पूर्वं द्रव्यत्वं निराकृतम् इदानीं नित्यत्वमिति विभागान्न पौनरुक्त्यम् । ननु तीव्रमन्दादिभेदेन विरुद्धधर्मग्रस्तत्वात् कथमस्मिन्नित्यत्वमित्याशङ्क्याह । विरुद्धान्वयेति । तीव्रमन्दादिभावो व्यञ्जकस्य एव न पुन:शब्दस्य इत्याह । तैव्रयादीति । कथन्तर्हि शब्दतैव्रयादिप्रत्यय इत्यत्राह । भ्रमवशघटितमिति । तत्र दृष्टान्तं दर्शयति । दिग्वदिति । यथा नित्यविभुशब्दवादिनां पूर्वश्शब्दोऽपरश्शब्द इति दिक्प्रत्यय: काल्पनिक: एवन्तीव्रादिप्रत्ययोऽपीति अनेनैव दृष्टान्तोपादानेन दिक्प्रत्ययस्यापि शब्दे काल्पनिकत्वं स्थापितं भवति । अथवा अनित्याविभुशब्दवादिनामपि शब्दे दिक्प्रत्यय: काल्पनिक एव भेर्य्याद्युपाधीनामेव तत्तद्दिक्संबन्ध: उपाधिसंबन्धादाकाशनिष्ठतामापेक्ष्य शब्दे दिक्संबन्धव्यवहार: । ननु कथं समानेन्द्रियग्राह्याणां समानदेशस्थानामित्यादिना प्रति-

Digitized by Google

नियतव्यञ्जकाभिव्यङ्ग्यत्वं प्रतिषिद्धं शब्दानाम् अतस्ताल्वादिव्यापारोत्पाद्यत्वं शब्दस्येति तन्न अञ्जनादिभिर्व्यभिचारात्, दृष्टं खलु प्रतिनियताञ्जनाभिव्यङ्ग्यत्वं पिशाचादौ निहितनिध्यादौ च तद्वदिहापि ताल्वादिव्यापाराणामकारणत्वेऽपि न दोषः तदिदमाह । अञ्जनादाविवेति । कथन्तर्हि कविः काव्यन्निर्ममे प्रोवाच ब्रह्मविद्यामिति शब्दे कार्य्यत्वप्रतिपत्तिरित्यत आह । व्यक्त्येति । इत्थमङ्गीकारे श्रुतिविरोधमाह । यदि नेति । श्रुतिस्मृतीतिहासपुराणेषु शब्दस्य विनाश एव सर्वत्र प्रतिपाद्यत इत्यर्थः । नेगमेर्निगमसंश्रयेर्वचनैश्शब्दनाशो निगदितः ॥ २४ ॥

मू० ध्वन्यात्मा वायुभेदः श्रुतिविषयतयाऽपाठि तौतातितार्द्यैस्तद्वत् पञ्चाशदेते समकरणतया वर्णिताः किन्न वर्णाः । तैव्रादिर्वर्णधर्मो नियत इति यथादर्शनं स्थापनीयं स्पर्शादौ चैवमिष्टं तदिह न सुलभा द्रव्यता नित्यता च ॥ २५ ॥

टी० किञ्च ये शब्दस्य द्रव्यत्वं नित्यत्वञ्च वर्णयन्ति तैरेव तौतातिताद्यैः कौमारिलाद्यैः ध्वन्यात्मा वायुभेद एव श्रुतिविषयतयाऽपाठि एवमेव पञ्चाशदेते वर्णाः किन्न वर्णिताः समकरणतया समानेन्द्रियग्राह्यतया समानताल्वादिव्यापारजन्यतया च तेषामेव वर्णानां वायुभेदानां स्वाभाविक एव तीव्रादिभावः । न पुनरौपाधिकः यथादर्शनं व्यवस्थापनीयं यथा दुरालभास्पर्शस्य दुःखहेतुत्वं दहनस्पर्शस्य दाहहेतुत्वं तस्मादवर्णात्मकशब्दवत् वर्णात्मकोऽपि शब्दो वाय्ववस्थाभेद इति स्वीकारे को विशेषः । अवस्था चागन्तु-

रपृथक्सिद्धो धर्म इत्युक्तम् अतो द्रव्यत्वं नित्यत्वञ्च वर्णानामिति वर्णितमेतदप्रामाणिकमिति वर्णयामः विस्तरस्त्वन्यत्रानुसन्धेयः ।

इति वर्णानित्यत्वम् ॥ २५ ॥

कथन्तर्हि वर्णानित्यत्वे वेदनित्यत्वं सिद्ध्यतीत्यत्यन्तभीतस्यात्यास्तिक्यनिमित्तचोद्यं परिहरति । शब्देति ।

मू० शब्दानित्यत्वतोऽपि श्रुतिषु न विलयः स्यात् क्रमव्यक्तिनीत्या तन्नित्यत्वे च काव्यादिकमपि न कथं नित्यमित्यभ्युपैषि । तस्मान्नित्यैकरूपक्रमनियमवशान्नित्यभावः श्रुतीनामीशोऽप्यध्यापको नः परमतिचकितैर्वर्णनित्यत्वमुक्तम् ॥ २६ ॥

टी० शब्दानित्यत्वेऽपि श्रुतिषु न विलयः स्यात् यथा शब्दानां नित्यत्वेऽपि नित्यविभूनां तेषां देशतः कालतो वा कश्चित् क्रमो नास्ति क्रमविशेषविशिष्टस्यैव शब्दस्य पदत्वं वाक्यत्वञ्चानुवर्ण्यते स पुनः क्रमः कीदृग्रूप इति चिन्तने शब्दानां क्रमाभिव्यक्तिमात्रमेव, अभिव्यक्तिश्चोपलम्भसामग्री सान्निध्यं वा तदधीनोपलम्भो वा तदनुक्रमोऽपि तत्कालपरम्परासंपातः सर्वमेतदनित्यमेव एवञ्च यथाक्रमाभिव्यक्त्या वेदनित्यत्वं भवद्भिरभिव्यक्तिनियममात्रेणाङ्गीक्रियते एवं क्रमविशेषविशिष्टशब्दोत्पत्तिपारम्पर्य्यमेवोच्चारणक्रमनियमः तेनैव वेदनित्यत्वमस्माकं सिध्यति, वर्णनित्यत्वमप्रयोजकमेव वर्णानामवेदत्वात् वाक्यसंघातविशेषो हि वेदः पदसंघातविशेषो वाक्यं पदञ्च वर्णसंघातविशेषः सर्वमेतदनित्यमेव वाक्यानां सजातीयत्वमात्रं त्ववशिष्यते तदेव नित्यत्वमिति अन्यथा वर्णानां नित्यत्वमात्रेण

Digitized by Google

काम्यादिकमपि नित्यमिति कथं नाभ्युपैषीत्याह । तन्नित्यत्वे चेति । कथन्तर्हि वेदनित्यत्वमित्यत्र नित्यत्वे प्रयोजकं निगमयति । तस्मादिति । इदं खलु वेदानां नित्यत्वं यन्नित्यैकरूपक्रमविशेषोच्चार्यमाणत्वं, स पुनः क्रमः निपुणं निरूपयतामुच्चारणमात्रनिष्ठ एवेति एतेनाध्यापकानां पूर्वपूर्वोध्यापकाध्ययनानुक्रमानुसरणमेव वेदनित्यत्वमिति सिद्धे सतीश्वरोऽपि पूर्वकल्पानुसरणं स्वसंकल्पसिद्धं स्वयमप्यनुसरतीति वेदेऽपि पूर्वकल्पोच्चारणानुसरणमनुवर्तयतीति वेदनित्यत्वसिद्धिः । वर्णनित्यत्ववादिभिस्तु तदनित्यत्वे वेदानित्यत्वभ्रान्त्या तद्भ्रान्तिनिबन्धनभीत्या वा वर्णनित्यत्वमुक्तमिति न तानप्यधिक्षिपामः ।

इति वर्णानित्यत्वेऽपि वेदनित्यत्वप्रकारः ॥ २६ ॥

एवं शब्दं निरूप्य स्पर्शे विशेषान् निरूपयति नैवेति ।

मू० नैवोष्णौ नापि शीतौ क्षितिसततगती तत्र तोयादियोगाच्छीतत्वादिप्रतीतिस्तदुपधिकतया तत्रतत्रैव दृष्टेः । आयुर्वेदे तुषारो मरुदिति कथनं त्वद्भिराप्यायिकाभिर्वृद्धिह्रासौ समाद्योर्भवत इति परं तच्चिकित्सानियत्यै ॥ २७ ॥

टी० यथोपलम्भमनुष्णाशीतस्पर्शौ पृथिवीवायू तत्र तोयादियोगात् शीतत्वादिप्रतीतिः शीतं स्थलं शीतोवायुरित्यादि तत्र हेतुमाह । तदुपधिकतयेति । दर्शनं हि सर्वत्र व्यवस्थापकम् उष्णा भूरुष्णं स्थलमित्यादिष्वातपाद्युपाधिवशादेव तत्र तत्रोष्णत्वादेर्दर्शनात् कथन्तर्हि आयुर्वेदे तुषारोमरुदित्युच्यते तुषारः शीत इत्यर्थः तत्त्वाप्यायिकाभिरद्भिरेव कथं वा तर्हि वृद्धिह्रासौ समाद्योर्भवत इति तुल्य-

मुख्ययोगेन विद्रूपाणामपि तथैवायुर्वेदे साम्यादिकमुच्यते तत्पुनश्चिकित्सानियमार्थम् अयमत्र भावः अस्य धातोरनेन हेतुना ऽभिवृद्धिः अनेन च परिक्षय इत्यादि शास्त्रसिद्धं दृष्टं च, सर्वेषां धातूनां यथोचितं चिकित्सा अनादिसिद्धा शास्त्रेण तत्र तत्र चिकित्साविशेषनियमसिद्ध्यर्थं तानितानि रूपाणि कल्पितान्यकल्पितानि व्यवह्रियन्त इति नैतावता पदार्थतत्त्वनियमसिद्धिरिति ॥ २७ ॥

इत्यनुष्णाशीतस्पर्शाधारनियमः ।

एवं शीतोष्णभूतनियमोऽपि यथोपलम्भं द्रष्टव्य इति दर्शयति । स्यादिति ।

मू० स्यादुष्णः कृष्णवर्त्मा सलिलमपि तथा शीतमस्तु प्रकृत्या स्पर्शोऽन्योऽप्यत्र दृष्टस्तु भवतु रुमाद्विमलावण्यवच्चेत् । नैवं संसृष्टवस्तूपधिनियततया तद्विवेकस्य युक्तेः प्रायश्शीतोभवेति प्रभृतिकमपि तद्ग्राहकत्वादिरोधात् ॥ २८ ॥

टी० उष्णः कृष्णवर्त्मा तथैव जलमपि शीतमित्युपलभ्यते प्रकृत्या अत्र कश्चिदाह अन्योऽपि स्पर्शो दहने सलिले च कदाचिदुपलभ्यते स तु रुमाद्विप्रकाष्ठादिलवणन्यायेन तस्यैव परिणतिविशेष इति तदिदमाह । स्पर्श इति । तन्निराकरोति । नैवमिति । रुमाद्विप्रकाष्ठादेर्लवणत्वपरिणतिः प्रत्यक्षसिद्धगुणवैषम्यनियमेन युक्ता अत्र त्वौष्ण्यादिसंसर्ग एव जलादेरौष्ण्यं तथा सलिलसंसर्ग एव भूतान्तरे शैत्यमित्युपाधिसंसर्गो दृश्यत इति विशेषः । इदमेव स्फोरयति । संसृष्टेति । कथन्तर्हि शीतो भव इत्यनुमत इति वक्तुरपि शीतत्व-

Digitized by Google

मित्याशङ्क्याह । प्राय इति । अयमत्र भावः न पुनर्वह्नेश्शीतत्वं जायतेऽपि तु सीतासंकल्पविशेषेण दाहकत्वमेवोपहन्यत इत्यर्थः ।

इति शीतोष्णाभ्रमनियमः ॥ २८ ॥

एवं रूपमपि परिशोधयति । पीतेति ।

मू० पीता भूः श्वेतमम्भो हुतवहपवनौ रक्तधूम्रौ तथा द्यौर्नीलेति क्वापि शिष्टं तदिह न नियतां वर्णसत्तां ब्रवीति । ध्यानार्थम्मन्त्रवर्णेष्विव कथितमिदं व्योमवातौ ह्यरूपौ पीतैकान्त्यं भुवोऽक्षश्रुतिहतमथ तत्प्राचुरी सास्तु मा वा ॥ २९ ॥

टी० अत्र कश्चिदचूचुदत् पीता भूमिः श्वेतमम्भः वह्निपवनौ रक्तधूम्रौ द्यौर्नीलेति मन्त्रशास्त्रे वर्णविशेषो विविच्यते तच्च शास्त्रं नाग्रहनिबन्धनम् अतस्तदनुसारेण नियता वर्णसिद्धिरनुसरणीयेति तदिदं निराचष्टे । तदिहेति । कथमित्यत आह । ध्यानार्थमिति । केवलं ध्यानार्थमेव तत्तद्वर्णकथनं तेषुतेषु भूतेषु तत्र । दृष्टान्तमाह । मन्त्रवर्णेष्वित्रेति । अत्रैव हेतुमाह । व्योमेति । अरूपावेव ह्याकाशवायू रूपवत्तयाऽत्र निर्दिश्येते । किञ्च अनेकरूपयुक्ताया भुवः पीतैकान्त्यवचनं प्रत्यक्षविहतं श्रुतिविहतञ्च श्रूयते हि यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत् कृष्णन्तदन्नस्येति तर्हि प्राचुर्य्यविशेषात्तत्तद्वर्णोक्तिरिति चेत् साऽप्यस्तु मा वा नास्माकं काचिद्धानिरित्याह । प्राचुरीति ॥

इति भूतपञ्चकवर्णोक्तिनिर्वाहः ॥ २९ ॥

Digitized by Google

तर्हि कथं श्रुत्या पृथिव्याः कृष्णत्वनियम इत्याशङ्क्य परिहरति । कृष्णामिति ।

मू० कृष्णामाम्नासिषुः क्ष्मां तदिह न विरहं वक्ति रूपान्तराणां प्रत्यक्षादेर्विरोधात्पचनविषमितं स्पर्शगन्धादि चास्याः । पाथस्तेजोविशेषे स्फुरति वसुमती भागतोवर्णभेदो न ह्यम्भः क्वापि दृष्टं विपरिणतगुणं पाकसंस्कारतोऽपि ॥ ३० ॥

टी० यत्कृष्णं तदन्नस्येति श्रुतिर्न पृथिव्या रूपान्तरविरहं वक्ति प्रत्यक्षादिविरोधादुपलभ्यते हि रूपान्तरमपि पृथिव्याम्, एवं पाकभेदविषमितः स्पर्शगन्धादिनियमोऽप्यङ्गीकार्य्य इति दर्शयति । पचनविषमितमिति । क्वचित्तु कलुषजलादौ पलालवह्न्यादौ च पृथिवीसंसर्गविशेषात् वर्णभेदो दृश्यते सोऽपि संसर्गविशेषकृत इति यथोपलम्भमङ्गीकार्य्य इत्याह । पाथ इति । अम्भसि पुनः पाके सत्यपि गुणपरिणतिर्न क्वाप्युपलभ्यत इति युक्तमेकरूप्यमेव तथाभिधातुमिति दृष्टप्रक्रियामात्रानुसरणेन सर्वमेतदुपपादितमिति दर्शयति । न ह्यम्भ इति ।

इति पाकजापाकजरूपादिविभागः ॥ ३०

एवमुक्तेषु शुक्लकृष्णादिषु चित्रमिति किमपि रूपान्तरमस्तीति केचिन्मन्यन्ते तदनुभाषते । आरब्धमिति ।

मू० आरब्धं रूपभेदैरवयवनियतैश्चित्रमन्यत्तु रूपं काणादाः कल्पयन्तः क्व तदिति कथयन्त्वंशतस्तद्विकल्पे । नांशेष्वेतत्तदिष्टं न च तदभिहितः कश्चिदंशीति तूक्तं स्वाधार-

Digitized by Google

व्यापकत्वं सुगममिह तथा स्पर्शगन्धादि-चैत्र्यम् ॥ ३१ ॥

टी० तद्विकल्पयति । क्वेति । अवयवरूपादिभिरारब्धं चित्ररूपं क्व वर्तते अंशेषु वा अंशवति वा विकल्पितमर्थं दूषयति । नांशेष्विति । अंशेषु चित्ररूपं वर्तत इति कापालादानामेव नेष्टं तेषां प्रागेव रूपवत्त्वात् तस्य च रूपस्यानिवृत्तेः तस्मादवयविनि चित्रं रूपादि वर्तत इति वक्तव्यं तदपि नेत्याह । न चेति । अवयविभङ्गस्य प्रागेव कृतत्वादित्यर्थः । कथन्तर्ह्यंशनिष्ठानां रूपभेदानां स्वाधारभूतपटव्यापकत्वमिति चेत् तदस्माकमेव सुगमं पटस्याभावात् अंशनिष्ठानां रूपभेदानां तत्तदंशव्यापकत्वाच्च उक्तमर्थं स्पर्शादावपि तुल्यमिति निगमयति । तथेति । यथा चित्रं रूपं तथैव चित्रस्पर्शः चित्रो रसः चित्रो गन्ध इति व्यवहारोऽपीति तत्तदंशे वैचित्रीभेदात् नापूर्वरूपादिक्लृप्तिरिति सर्वमप्यर्थं समुच्चित्य निगमितवान् ।

इत्यतिरिक्तचित्ररूपादिभङ्गः ॥ ३१ ॥

अथ केचित् स्नेहाख्यगुणान्तरमाहुः । अपरे पुनस्तद्रूपादावन्तर्भावयन्ति उभयमपि पक्षमनुक्रमादुपपादयति उभयोरपि पक्षयोरेकदेशिमतत्वेन स्वीकारात् तत्र प्रथमपक्षे प्रत्यक्षं प्रमाणयति । स्नेह इति ।

मू० स्नेहः प्रत्यक्षसिद्धो यदुपधिरुदके स्निग्धधीस्सद्रवत्वात्तोयत्वाच्चातिरिक्तः क्वचिदिह यदसौ भाति ताभ्यां विनापि । सौवर्णादिद्रवाणां न च भवति यतः पांसुसंग्राहकत्वं पर्य्यायानुक्तिरस्मिन् भवति विषमता चेति केचिद् गृणन्ति ॥ ३२ ॥

Digitized by Google

टी० यदुपधिहृदके स्निग्धधीरिति उदके स्निग्धधीर्य्यदुपो-पाधिकेत्यर्थः । नन्वसौ स्नेहो द्रवत्वात्तोयत्वाच्च नातिरिक्त इति कश्चित् तन्नेत्याह । अतिरिक्त इति । तत्र । हेतुमाह । क्वचिदिति । असौ—स्नेहः, क्वचित्—पृथिव्यां ताभ्यां—द्रवत्वतोयत्वाभ्यां विनाऽपि प्रतिभातीति यतः अतः द्रवत्वतोयत्वाभ्यामतिरिच्यते स्नेह इत्यर्थः अयञ्चात्र हेतुः द्रवत्वमेव स्नेहश्चेत् सौवर्णादिद्रवाणां पांसुसंग्राह-कत्वं स्यात् न च तद् दृश्यते अतो द्रवत्वातिरिक्तः स्नेहस्तदिद-माह । सौवर्णादीति । अपि च पर्य्यायानुक्तिरपि द्रवत्वस्नेहयोर्भेदं साधयति यत्रयत्र स्निग्धत्वं तत्र सर्वत्र द्रवत्वमिति व्यवहाराभावात् यथा मणिकृपाणदर्पणादौ सुवर्णे च स्नेहाभावस्य द्रवत्वस्य च भव-तैवोक्तत्वात् विषमता चेति द्रवत्ववैधर्म्ये स्नेहवैधर्म्यं नास्ति स्नेह-वैधर्म्ये द्रवत्ववैधर्म्यञ्चास्तीति केषाञ्चित् पक्षः ॥

इति स्नेहाख्यगुणान्तरसद्भावपक्षः ॥ ३२ ॥

अन्ये पुनरन्यथा आहुरित्याह । अन्य इति ।

मू० अन्ये स्नेहन्तु रूपं किमपि निजगदुः स्निग्ध-
वर्णात्ययबाधाद् दृष्टत्वाद् दुस्त्यजन्तद् भवति
खलु भिदा कापि गन्धादिकेऽपि । अप्त्वादेः
पांसुसङ्गस्सुगममिदमयस्कान्तजात्यादिनीत्या
न ह्यन्यत्तत्र क्लृप्तं न च न दृढमितं पार्थिवे
पिच्छिलत्वम् ॥ ३३ ॥

टी० इत्थं किल ते मन्यन्ते स्निग्धवर्णात्ययबाधात् स्नेहाख्यं रूपं किमप्यधिगच्छाम इति तदेवोपपादयति । दृष्टत्वादिति । अथापि रूपसामान्यात् स्नेहाख्यरूपविशेषे वैषम्यं दृश्यत इत्याशङ्क्य

Digitized by Google

तत् प्रतिबन्द्या निराकरोति । भवतीति । दृष्टं खलु गन्धादिष्वपि तत्तद्धर्मिग्राहकप्रमाणसिद्धं वैषम्यं न हि कस्तूरीकरीषादिष्वेकरूपो गन्धः न च दुरालभाशतपत्रादिष्वेकरूपः स्पर्शः, एवं रसादिष्वपि द्रष्टव्यं, कथन्तर्हि स्नेहमन्तरेण पांसुसंग्रह इत्याह । अम्बादेरिति । अम्बं स्नेहश्च समानाधिकरणमिति हि भवता प्रतिपाद्यते तथा च सत्य-ब्रमेव स्नेहकार्य्यपांसुसंग्रहे नियामकमस्तु कथं जातिरेव गुणविशेष-मन्तरेण कार्य्यविशेषनियामिकेत्यत्र दृष्टान्तमाह । अयस्कान्तजा-त्यादिनीत्येति । अयस्कान्तजातिविशेष एवायस्संग्रहणे निमित्तं न ह्यन्या तत्र कारणक्लृप्तिः । एवमत्रापि तोयत्वजात्यतिरिक्तस्नेहरूपगुण-क्लृप्तिर्न युक्तेत्यर्थः । किञ्च स्नेहो जलैकनियत इति स्नेहवादिभिर-भिधीयते अथापि पार्थिवे पिच्छिलत्वं दृश्यते अतस्तत्तद्वस्तुनियत-रूपविशेषाद्व्यतिरेकेण स्नेहो नाम कश्चिन्नास्तीत्यपरेषां पक्षः ॥

इति स्नेहस्य रूपविशेषान्तर्भावपक्षः ॥ ३३ ॥

एवं द्रवत्वेऽपि पक्षभेदानाह । मास्रुण्यादीति ।

मू० मासृण्यादिप्रभेदोपहितगुरुतया ऽबादिनि-म्नाभिमुख्यं माषव्रीह्यादिराशौ भवति च पतने तादृशन्तारतम्यम् । किञ्चादृष्टान्य-क्लृप्तिर्ज्वलनपवनयोर्न क्रियायां तथाऽस्मि-न्नित्येकेऽन्ये तु दृष्ट्वा गुणमधिकमुशन्त्यादि-मस्यन्दहेतुम् ॥ ३४ ॥

टी० मास्रुण्यादिप्रभेदावच्छिन्नगुरुत्वमेवाबादीनां निम्नाभि-मुख्ये कारणं न पुनर्द्रवत्वं नाम कश्चिद् गुणः इदञ्च पतने तार-तम्यं माषव्रीह्यादिराशौ दृष्टमिति यथादर्शनमेवानुसरामः न हि

Digitized by Google

माषादिराशौ पतनाद्यर्थं गुणान्तरं परिकल्प्यते भवद्भिः । किञ्चाग्ने-रूर्ध्वज्वलनं वायोस्तिर्य्यग्गम*नमित्यषादृष्टातिरेकेण गुणान्तरं भव-द्भिर्न कल्प्यते एवं सलिलस्यापि निम्नाभिमुख्येन सरणमित्यषादृष्टव्य-तिरेकेण गुणान्तरं कल्पनीयं तदिदमाह । किञ्चेति । दृष्टान्तदृष्टं पक्षे योजयति । तथेति । एवमेकदेशिनां पक्षं परिसमाप्यान्येषां पक्षमनुवदति । अन्ये त्विति ॥

इति द्रवत्वान्तर्भाववहिर्भावपक्षौ ॥ ३४ ॥

उक्तस्य द्रवत्वस्य स्वाभाविकास्वाभाविकादिविभागं दर्शयति । तोय इति ।

मू० तोये दृष्टं स्वभावाद् घृतकनकमुखे पाक-जन्यं द्रवत्वं तैलादौ नैव पाकानुगम इति भवेत्तादृशावंशक्लृप्तिः । भस्मीभावाद्यनर्हं यदुत कणभुजा सूत्रितं तैजसत्त्वं हेमा-दिश्लिष्टभौमावयवमयविदामित्यमेतन्न हृद्य-म् ॥ ३५ ॥

टी० स्वभावादेव तोये द्रवत्वं दृष्टं घृतकनकमुखे पाकजन्यं द्रवत्वं दृष्टम् उभयमपि तथैवाङ्गीकर्त्तव्यं तैलादौ पाकानुगमो न दृष्ट इति तादृशावंशक्लृप्तिः एवं दृष्टप्रक्रियामुक्त्वा कणभुगभिमत-मार्थान्तरमनूद्य दूषयति । भस्मीभावादीति । अत्यन्तानलसंयोगेऽनु-च्छिद्यमानद्रवत्वेन हेमादीनां तैजसत्वमुक्तं कणभुजा तद्धेमादि-श्लिष्टभौमावयवे व्यभिचाराद् दुःस्थमेव, तुल्यं खलु हेम्ना तच्छ्लि-ष्टभौमावयवानामत्यन्ताग्निसंयोगेऽपि भस्मीभावानर्हत्वम् । अथापि

* तिर्यक्पवनमिति पा० ।

यथा तेषां भौमत्वं तद्गुद्धेम्नोऽपि तैजसत्वमेव साधयितुं न शक्यत इत्यर्थः । अन्यत् सर्वं न्यायपरिशुद्धौ विस्तरेणोक्तमस्माभिरिति नेह प्रतन्यते ॥

इति सांसिद्धिकपाकजद्रवत्वाधारनियमादिः ॥ ३५ ॥

गुरुत्वाख्यस्य गुणस्यानुमानगम्यत्वं प्रतिबन्द्या प्रतिक्षिपति पात इति ।

मू० पातस्तुल्यो ऽम्बुभूम्योः पवनदहनयोस्तिर्य्यगूर्द्ध्वप्रवृत्त्या पाते भेदात् पलादिप्रतिनियतिरपि ह्यंशवैषम्यतः स्यात् । भागानां तारतम्याज्जलशिखिमरुतां स्यन्दनादे*र्विशेषस्तस्मात् सर्वोऽप्यदृष्टादिह भवतु न चेत् स्याद् गुणोऽन्यो ऽनलादौ ॥ ३६ ॥

टी० "अग्नेरूर्द्ध्वज्वलनम्" इत्यादिना पवनदहनयोस्तिर्य्यक्प्रवृत्तिरूर्द्ध्वप्रवृत्तिर्यथाकेवलमदृष्टात् परिकल्प्येते एवमम्बुभूम्योरपि पातः केवलमदृष्टादेवास्तु किमनेन कल्पितेन गुरुत्वेन तत्कल्पने गौरवात् कथन्तर्हि गुरुत्वाभावे मानवेलायां द्विपलादिव्यवहारः पातभेदात् परिकल्प्येत तदपि चांशवैषम्याद्योयुज्यत इत्याह । पाते भेदादिति । पञ्चपणनिक्षेपाद्दशपणनिक्षेपे हि पातवैषम्यं दृश्यते तत्तदाधिक्यमन्तरेण न भवति निष्कनिक्षेपेऽप्यंशाधिक्यमस्त्येव निष्कार्द्धनिक्षेपात् अन्यथा गुरुत्वाधिक्यस्याप्ययोगात् तथा च तेनैवांशवैषम्येण पातभेदः तथा च किमजागलस्तनवदप्रयोजकेन गुरुत्वाधिक्येन, दृष्टा च भूतान्तरेषु गुणान्तरकल्पनामन्तरेणांशाधिक्यादेव कार्य्यभिदा यथा

* देर्भिदेष्टेति पा० ।

अग्नेरूर्द्धज्वलनादौ जाज्वल्यते हि वह्निरंशाधिक्ये तदभावे केवलं ज्वलति एवं पोपवीति च मरुदंशाधिक्येन तदभावे केवलं पवते । एवं जलमप्यंशाधिक्ये क्रियासमभिहारेण स्यन्दते तदभावे स्यन्दत एव । तस्मात् सर्वोऽप्यदृष्टादेव भवतु अन्यथा अग्न्यादावपि गुणान्तरं कल्प्यं स्यादित्याह । न चेदिति । न ह्यग्न्यादावूर्द्धज्वलनादिकारणं भवद्भिः कल्प्यते अतो गुरुत्वस्यानुमानिकत्वमनुमानवार्त्तानभिज्ञतानिबन्धनमिति ॥

इति गुरुत्वाख्यगुणानुमानभङ्गः ॥ ३६ ॥

तर्हि गुरुत्वस्य प्रत्यक्षत्वमस्त्विति वदन्तमपि प्रतिक्षिपति । त्वक्संवेद्यमिति ।

मू० त्वक्संवेद्यं गुरुत्वं कतिचिदभिदधुस्तत्तु तेषां गुरुत्वं नोर्द्धं स्पृष्ट्वा प्रतीमस्तदिह परधृतेनाप्यधस्तात्स्पृशन्तः । न ह्यन्यालम्बितोऽर्थो भवति लघुतरः स्पर्शनं नोपरुद्धं तेनाक्रान्तौ प्रणुत्ति क्रम इति गुरुणा तर्कितस्तोलनाद्यैः ॥ ३७ ॥

टी० त्वचा गुरुत्वं संवेद्यत इति ये ह्यभिदधुः तत्तु तेषां गुरुत्वमित्यधिक्षेपवादः । तत्र हेतुमाह । नोर्द्धमिति । यदि गुरुत्वं त्वचा गृह्येत रुचकादिष्वधः स्पर्शवदूर्द्धस्पर्शेऽपि गुरुत्वं प्रतीयेत न च तथा प्रतीमः । किञ्चाधस्तादपि स्पर्शनेन क्वचिद् गुरुत्वं न प्रतीयते न हि परधृते वस्तुन्यधस्तादपि स्पृशन्तो गुरुत्वं प्रतियन्ति । नन्वन्यालम्बिते लघुत्वमेव तदा जातमितिवक्तुं न शक्यते अन्यस्य प्रयासेन धारणाभावप्रसङ्गात् अस्तु गुरुत्वमनुवर्त्तेत इति अथाऽप्य-

Digitized by Google

न्यानमिति स्प्रष्टुः स्पर्शनमुपहन्तुमिति च वक्तुं न शक्यमित्याह । स्पर्शनमिति । स्पर्शनेन्द्रियोपरोधे गुणान्तरोपलम्भस्याप्यभावप्रसङ्गा-दित्यर्थः । कथन्तर्हि लोके गैरवतारतम्यं हस्तेन परीक्ष्यत इत्य-त्राह । तेनेति । गुरुणा द्रव्येण हस्ताद्याक्रान्तौ प्रणोदनक्रमविशेषस्य उपलब्धत्वात् हस्ततोलनाद्यैः प्रणोदनक्रमस्तर्कित इत्यर्थः । यदि गुरुत्वमस्ति तदा गुरुत्वनिमित्तकः प्रणोदनक्रमः यदि वा गुरुत्वं नास्ति तदा गुरुत्वाश्रयत्वेन परिकल्पितद्रव्याधिक्यनिबन्धनः प्रणो-दनक्रमः सर्वथा गुरुत्वप्रत्यक्षत्वं नास्तीति भावः ॥

इति गुरुत्वप्रत्यक्षत्वभङ्गः ॥ ३० ॥

इत्थमनुमानगम्यत्वं प्रत्यक्षगम्यत्वञ्च गुरुत्वस्य प्रतिक्षिप्तम्, एवन्तर्हि गुरुत्वमेव प्रतिक्षिप्तं भवति तथा चागमविरोधः । सांख्यास्तु गुरु वरणकमेव तम इति तमस्कार्य्यत्वेन गुरुत्वमुपपादयन्ति, यत्सां-ख्योक्तं न तत्सर्वमपि प्रतिक्षिप्यते अनुकूलमविरुद्धं चाङ्गीक्रियते वेद-वादिभिरिति एतत्प्रतिबन्द्या निराकर्तुमनुवदति । क्षित्यादाविति ।

मू० क्षित्यादौ सांख्यदृष्ट्या यदि किमपि तम*-
स्कार्यमिष्टं गुरुत्वं तद्वत् कल्प्येत वह्निप्रभृ-
तिषु न कथं सत्त्वकार्य्यं लघुत्वम् । यादृगभू-
ताद् गुणात्तद्वदपि च पतनं तादृशादस्तु
तस्मात् क्लृप्तिस्त्वन्यस्य गुर्वी भवतु तदधिकं
काममाप्तोपदेशात् ॥ ३८ ॥

टी० तदेव प्रतिबन्द्या प्रतिक्षिपति । तद्वदिति । यदि सांख्योक्तमिति गुरुत्वं स्वीक्रियेत तर्हि सत्त्वं लघुप्रकाशकमिति तैरेवोक्तं सत्त्वकार्य्यं लघुत्वमपि वह्न्यादैा स्वीक्रियेत न च तथा स्वीकृत-

तमः*कार्यमिति गौड़द्रविड़पुस्तकपाठं स्वपाणिनीयत्वादुपेक्षिष्महि

मति भावः । किञ्च पतनानुपपत्त्या हि गुरुत्वं कल्प्यते प्रकृतिपरिणा-
मविशेषे पृथिव्यादौ तच्च गुरुत्वं यादृग्भूतात्तमसो भवतीति वदसि
तादृशादेव तस्मात् तमसः पतनमस्तु किमनेन मध्ये परिकल्पितेन
गुरुत्वेनेत्याह । यादृग्भूतादिति । अन्यथा लघुत्वमपि परिकल्प्येतेति
प्रतिबन्दिरनुवर्तते तस्मादधिकस्य गुरुत्वस्य परिकॢप्तिर्लघुत्वकॢप्तिवत्
गुर्वी, अथापि तेषु तेषु शास्त्रेषु माषसर्षपादीनामन्येषामपि पर्वतपरमा-
ण्वादीनां गौरवतारतम्यव्यवहारो दृश्यत इति चेत् तर्हि आगमि-
कमेव गुरुत्वमङ्गीकुर्म्महे अतो नास्माकं क्वचिद्विरोधः, अविरोधमे-
वाह । काममिति । आगमप्रमाण्यावलम्बनेन अतिरिक्तगुरुत्वाङ्गीका-
रेऽपि नास्माकं काचित् क्षतिः तस्याप्यागमस्य पूर्वोक्तप्रक्रियया विष-
यभेदाङ्गीकारेऽपि नास्माकं प्रधानार्थविरोधः ॥

इत्यागमिकगुरुत्वनिर्वाहः ॥ ३८ ॥

अथ संख्यायाः परिशोधनार्थं प्रागेव संख्याविषयां प्रक्रिया-
मनुवदति । एकेति ।

**मू० एकद्व्यादिप्रतीतिव्यवहृतिविषयो योगुणस्सा
तु संख्या क्वाप्यैक्यं नित्यसिद्धं क्वचिदवयव-
गैर्जन्यते तत्तदैक्यैः । द्वित्रित्वाद्यं त्वनेका-
वगतिसहकृतैकैकनिष्ठैक्यजन्यं तत्तत्पुम्मा-
त्रदृश्यं क्षणिकमिति कथा कापि कौतस्कु-
तानाम् ॥ ३९ ॥**

टी० एकद्व्यादिप्रतीतिव्यवहारविषयो यो गुणस्सा संख्या सा
पुनः क्वापि परमाण्वादौ नित्यसिद्धा, क्वचिद् द्व्यणुकत्र्यणुकादौ तत्त-
त्कारणगतैरैक्यैर्जन्यते द्वित्वत्रित्वादिकन्तु अनेकावगतिसहकृतैकैक-

निष्ठैक्यजन्यं तादृशी चावगतिरपेक्षाबुद्धिरित्यभिधीयते सा चापेक्षा बुद्धिः तत्तत्पुरुषमात्रनिष्ठेति तज्जन्यद्वित्वपृथक्त्वादिकं तत्तत्पुरुषैरेव दृश्यते तत्कालमात्रभावित्वात्, तच्च वैगाकमिति कोतस्कुतानां तार्किकाणां कथा कापि श्रूयत इति शेषः ॥

इति कणादोक्तसंख्याप्रक्रिया ॥ ३९ ॥

अनूदितेऽर्थे द्वित्वादिकं निराकरोति । तत्रेति ।

मू० तत्र द्वित्वाद्यपेक्षामतिविषयभिदामात्रमेवा-
स्त्वभीष्टं द्वित्वाद्युत्पत्तिमूलं यदभिलपसि
तद्ग्राहृतेरस्तु मूलम् । द्वित्वादिप्रागभावैर्ध्रु-
वमिह हि विना धीविशेषोऽभ्युपेयस्तन्मूलं
निर्गुणानां विगणनमपि च स्थापनीयं गुणा-
नाम् ॥ ४० ॥

टी० यादृशादपेक्षाबुद्धिविषयाद् द्वित्वाद्युत्पत्तिं वदसि तादृशापेक्षाबुद्धिविषयवस्तुविशेषोपलम्भ एव द्वित्वादिव्यवहारमातनोतु किमनेन द्वित्वादिकल्पनेन तदिदमाह । द्वित्वाद्युत्पत्तिमूलमिति । अयं भावः न ह्यपेक्षाबुद्धिर्निर्विषया अज्ञानत्वप्रसङ्गात्, नापि प्रकृतानुपयोगिवस्तुविषया प्रकृतासंगतिप्रसङ्गात्, तथा सविषयत्वे प्रकृतसंगतत्वे च सिद्धे कोऽयं विषयविशेष इति निरूपणीयमित्यवशिष्यते स पुनर्विषयविशेष एव द्वित्वादिस्थाने निविश्य द्वित्वादिव्यवहारमातनोत्विति तर्हि द्वित्वादिप्रागभाव एव विशेषः स एव द्वित्वाद्युत्पत्तौ मूलं स चाभावत्वादेव भावमपेक्षते, न हि द्वित्वादिकमन्तरेण द्वित्वादिप्रागभावो वक्तुं शक्यत इति चेत् तदपि मन्दं प्रागभावस्यानादित्वेन द्वित्वादेरनादित्वप्रसङ्गात्, तद्ध्यनेकावगतिसह-

कृतैकैकनिष्ठैक्यप्रतीतिनिरपेक्षा बुद्धिरिति विशेषयाम इति चेत् तर्हि-
प्रागभावातिरिक्तो विषयविशेषो भवद्भिरेवाभ्युपेय इति तदेव द्वित्वा-
दिकमस्त्विति पुनरेवायातं तदिदमाह । धीविशेषोऽभ्युपेय इति ।
अभ्युपेयते च भवद्भिरप्ययमर्थो गुणादीनां गणनाविशेष इति प्रतिबन्दीं
पुरस्कुरुते । तन्मूलमिति । न हि गुणादीनां द्वित्वादिकं भवद्भिर-
भ्युपगम्यते गुणानां गुणाभावात् । न च द्रव्यगतेन संख्याविशेषेण
गुणानां संख्यैकार्थसमवायेन द्वित्वत्रित्वादिव्यवहार इति वाच्यं
विरुद्धत्वात् संख्यायाः नव द्रव्याणि चतुर्विंशतिर्गुणाः पञ्च कर्म्माणि
द्वे सामान्ये इत्यादिर्हि भवद्व्यवहारः, ते च परस्परविरुद्धाः कथं
गुणेषु संघटेरन् । अथापि द्रव्यावान्तरेषु घटपटादिषु चतुर्विंशतित्वम-
प्यस्ति तदेव गुणेषु व्यवह्रियते, पञ्चत्वमपि कुत्रचिदङ्गुलीप्रभृतिषु
तत्कर्म्मस्विति नियमोऽस्त्विति चेन्न अनियमात् । न हि चतुर्विंशति-
त्वमेव गुणेषु व्यवहर्त्तव्यं पञ्चत्वमेव कर्म्मस्विति नियामकमस्ति
संख्याया अभावात् । अथापि बहुलक्षणविशेषपरिगृहीतेषु गुणेषु चतुर्विं-
शतित्वव्यवहारः कतिपयलक्षणपरिगृहीतेषु पञ्चत्वव्यवहार इति चेन्न
लक्षणबहुत्वस्य लक्षणाल्पत्वस्य च तत्तदपेक्षाबुद्धिविषयत्वव्यतिरे-
केण निरूपयितुमशक्यत्वात्, अन्यथा मुख्यसंख्याङ्गीकारप्रसङ्गात्,
एवञ्च सति तत्तदपेक्षाबुद्धिविषयतारतम्यमात्रेण त्रिचतुरादिव्यवहारो
गुणादिष्विव द्रव्येष्वपीत्यभ्युपेत्य इति निर्णयः ॥

इति परोक्तद्वित्वादिनिरासः ॥ ४० ॥

एवं द्वित्वादिसंख्यां निरस्य एकत्वसंख्यां स्वरूपतः परिशो-
धयति । कैवल्यमिति ।

मू० कैवल्यं नैकसंख्यापरविरहतया नापि मुख्या-
न्यभावो संघातैक्यन्तु राशिक्रममवयवि तु

प्राङ्निरस्तं ततोऽन्यत् । तेनासंघातरूपे क्वचन निरुपधिः स्यादसावेकसंख्या स्वाधारैकायुरेषा परमुपचरिता सेयमद्रव्यवर्गे ॥४१॥

टी० मुख्यान्यकेवलेष्वेकमिति बहुषु विषयेषु एकशब्दं प्रयुञ्जते प्रयोक्तारः, तत्र कैवल्यं नैकत्वसंख्या परविरहरूपत्वात् कैवल्यस्य, न ह्येकत्वसंख्या वस्त्वन्तरवैधुर्य्यरूपतया प्रतीयते एकमिति भावत्वेनैव प्रतीयमानत्वात् । नापि मुख्यत्वमेकत्वसंख्या अमुख्येष्वप्येकत्वव्यवहारदर्शनात् । नाप्यन्यभाव एकत्वं स्वस्मिन्नप्येकत्वव्यवहारात् । अतो मुख्यत्वमसहायत्वमन्यत्वञ्चापहायान्यदेव किञ्चिदेकत्वं तच्च नावयविनि वर्त्तते अवयविन एवाभावात् । संघातैक्यन्तु राशिवदौपचारिकमेव तदिदमाह संघातैक्यमित्यादिना, ततोऽन्यदित्यन्तेन, तेनासंघातरूपे परमाण्वादौ निरुपाधिरसावेकत्वसंख्या स्वीक्रियते एषा चैकत्वसंख्या स्वाधारैकायुः यावद्द्रव्यभाविनीत्यर्थः अद्रव्येषु कथमेकत्वसंख्येति चेत्तत्राह । परमिति । द्विविधो ह्येकत्वव्यवहारो मुख्य औपचारिक इति परमाण्वादौ मुख्यः संघातरूपे पुनरवयव्यादौ औपचारिकः, औपाधिकत्वात्तद्व्यवहारस्य, एवमद्रव्येष्वेकत्वव्यवहार औपचारिकः अन्यथा अनवस्थादिदोषप्रसङ्गादिति अयमत्र निर्णयः—द्वित्वादिकं नास्त्येव अपेक्षाबुद्धिविषयतामात्रेण प्रतीतिव्यवहारयोरन्यथासिद्धत्वात् । एकत्वन्तु विद्यते तत्पुनर्यत्र बाधोऽस्ति गुणादौ तत्र त्वौपचारिक इति ॥

इत्येकत्वसंख्यास्वरूपाश्रयादिनिरूपणम् ॥ ४१ ॥

इत्थमेकत्वं प्रसाध्य तस्य मतभेदेन स्वरूपमेव विविच्य दर्शयति । ऐक्यमिति ।

मू० ऐक्यं स्वाभेदमाहुः कतिचन न भिदाऽस्त्ये-

कमेवेति दृष्टेर्भेदादृष्टैक्यमोहस्तदिति च वचनं तत्रतत्राभ्युपेतम् । अन्ये त्वेतत्स्वसत्त्वं विदुरितरसमुच्छ्रित्यवस्थानुवृत्तं तत्पक्षेऽपि स्वरूपादधिकमिदमिह द्वित्वमोहादिसिद्धेः ॥ ४२ ॥

टी० आचार्य्याः केचित् स्वाभेदमेवैक्यमाहुः तत्र हेतुमाह । न भिदास्त्येकमेवेति दृष्टेरिति । अयं भावः ऐक्यविवरणे प्रवृत्ता निर्णेतारो भेदाभावरूपतयैव ह्यैक्यं विवृण्वन्तीति व्यवहारान्तरमप्यत्रानुकूलमित्याह । भेदेति । ऐक्यभ्रमो भेदादर्शनादभूदिति भ्रान्तिविषये व्यवहरन्ति व्यवहर्तारः, तच्चैक्यस्य भेदाभावरूपत्वानुकूलं तत्रतत्राभ्युपेतमितीदृशो व्यवहारो भूयान् स च व्यवहारस्सर्वैरप्यभ्युपेयः अतो भेदाभाव एव ऐक्यमिति केचिदाचार्य्या निरणैषुः । अन्ये तु स्वसत्त्वमेवैक्यम् इतरसद्भावेऽपि तद्नुवृत्ते तच्च स्वसत्त्वं स्वरूपादधिकमेव अन्यथा स्वरूपे प्रकाशमाने द्वित्वादिमोहानुपपत्तेः, एकत्वे तिरोहिते हि द्वित्वादिव्यामोहः द्वौ चन्द्रमसावित्यत्र स्वरूपं प्रकाशते एकत्वं तिरोहितमिति वाच्यं तथा चैक्यस्य भेदाभावरूपत्वेऽपि स्वसत्त्वरूपत्वेऽपि स्वरूपादतिरेकः स्वीकार्य्यः, अन्यथा द्वित्वादिव्यामोहायोगादिति ॥

इत्येकत्वविषयमतभेदः ॥ ४२ ॥

अतः परम् अभिज्ञाप्रत्यभिज्ञाविषययोरेकत्वयोर्वैषम्यमाह । अन्यदिति ।

मू० अन्यद् गृह्णात्यभिज्ञा तदिदमिति पुनः प्रत्यभिज्ञाऽन्यदैक्यं कालदेशादिभेदग्रहजनित-

Digitized by Google

भिदाभ्रान्तिशान्तिस्ततःस्यात् । मोहस्तत्रै-कताधीर्ज्वलन इव भवेत् प्रत्यभिज्ञात्वत-श्चेत् स्वव्याघातोऽनुमाया भ्रम इह निखिला स्यादभिज्ञापि तद्वत् ॥ ४३ ॥

टी० इदमिति गृह्णती तावदभिज्ञा खल्वेकदेशकालवर्त्तिनि स्वस्मिन्नैक्यं गृह्णाति तदिदमिति पुनः प्रत्यभिज्ञा देशकालभेदप्रसक्त-भेदविरोध्यन्यदैक्यं गृह्णाति अतो विषयभेदाद् भेदभ्रान्तिशान्तिः स्यात् । ननु विप्रतिपन्ना प्रत्यभिज्ञा भ्रान्तिः प्रत्यभिज्ञात्वात् प्रदीप-प्रत्यभिज्ञावदिति प्रत्यभिज्ञायास्सार्वत्रिकं भ्रान्तित्वमाशङ्कते । मोह इति । परिहरति । स्वव्याघात इति । तथा च अयमिति ह्यनुमाने प्रवर्त्तते तत्रापि प्रतिसन्धानरूपत्वेन स्वव्याघातः प्रसज्यत इति भावः । बाधाबाधविवेकाभावेन प्रत्यभिज्ञामात्रतया सर्वत्रापि भ्रान्ति-त्वसाधने शुक्तिरजताभिज्ञावत् स्थलत्रयाभिज्ञायामपि भ्रान्तित्वं साधयितुं शक्यत इत्याह । भ्रम इहेति ।

इत्यभिज्ञाप्रत्यभिज्ञाविषयैकत्वविशेषसत्यत्वम् ॥ ४३ ॥

वैशेषिकोक्तसंख्यातोऽव्यतिरिक्तसंख्यावादिनं प्राभाकरं प्रति-बन्द्या प्रतिक्षेप्तुमारभते । अद्रव्य इति ।

मू० अद्रव्येऽप्यस्ति संख्याव्यवहृतिबलतस्सा त-तोऽन्या गुणादेर्मैवं संख्यासु संख्याव्यवहृति-वदियं स्यात्त्विहोपाधिसाम्यात् । नोचेत्सा-मानऽवस्थाव्यवहृतिनियतिस्थापनं तुल्य-चर्च्चं तस्मात् काणादकॢप्तिर्गुरुमतकथकै-र्युक्तमत्रापि सोढुम् ॥ ४४ ॥

Digitized by Google

टी० इत्थं किल तेषामाशयः संख्याव्यवहृतिरद्रव्येऽप्यस्ति अतो व्यवहारबलात् सा संख्या पुनरद्रव्याद् गुणादेरन्येति तद् दूषयति । मैवमिति । तत्र प्रतिबन्दिमाह । संख्यास्विति । अद्रव्यत्वे समानेऽपि संख्यासु संख्याव्यवहारो भवद्भिरप्यङ्गीकार्य्यः, द्रव्यत्ववैधुर्य्ये ह्यद्रव्यत्वं तच्च संख्यायामपि समानं तथा च संख्यायां संख्याव्यवहारवत् अन्येष्वप्यद्रव्येषु संख्याव्यवहार औपाधिकः स्यादेवेति । तत्र हेतुमाह । उपाधिसाम्यादिति । स्वाभाविकसंख्याङ्गीकारे पुनरनवस्थेत्याह । नोचेदिति । गुणादाविव संख्यायामपि संख्याव्यवहारो मुख्यः स्यादिति भावः । संख्यायाममुख्यसंख्याव्यवहृतिनियमस्थापनञ्चेत् तद्गुणादावपि तुल्यचर्चमित्याह । व्यवहृतिनियतिस्थापनमिति । उक्तमर्थं निगमयति । तस्मादिति । काणादक्लृप्तिमङ्गीकुर्वाणस्य प्राभाकरस्य संख्यायामपि तत्क्लृप्तिरङ्गीकार्येत्यर्थः ॥

इति प्राभाकरोक्तसंख्यानिरासः ॥ ४४ ॥

अथ कश्चिदाह गुणेषु संख्याव्यवहृतिवद् द्रव्येष्वपि परिमाणव्यवहारोऽप्युपाधिभेदादेव स्यात् न पुनः स्वाभाविकं परिमाणमिति तदाह । देशाधिक्यादीति ।

मू० देशाधिक्यादिसिद्धावुपधिभिरिह तद्युक्तसंयोगभेदाद्देशव्याप्तिप्रभेदः परिमितिरिति चेन्नोपधीनाम्मितत्वात् । देशैस्तन्न्यूनतादौ प्रसजति हि मिथस्संश्रयस्तत्स्वतस्सा मन्तव्या क्वापि राशिप्रभृतिषु तु परं देशसंबन्धभेदः ॥ ४५ ॥

Digitized by Google

टी० उपाधिभिर्मणिकघटकरकादिभिराकाशदेशाधिक्यादिसिद्धौ तत्तदुपाधियुक्ताकाशदेशसंयोगतारतम्यात्तत्तद्गतानां द्रव्याणां तत्तद्देशव्याप्तिप्रभेद एव परिमाणं न पुनः परिमाणमिति गुणान्तरमिति चेन्न उपाधीनामेव मणिकादीनां स्वभावतः परिमितत्वात् अतः स्वाभाविकं परिमाणम् उपाधिष्वन्यत्राप्यङ्गीकरणीयमित्यर्थः । ननु देशैरेवोपाधीनां परिमाणमस्तीति यदि वदसि तर्हि परस्पराश्रयः आकाशादिदेशैरुपाधिद्रव्यपरिमाणम् उपाधिभिश्चाकाशादिदेशपरिमाणमिति । उक्तमर्थं निगमयति । तदिति । स्वतः क्वापि सा परिमितिर्मन्तव्या क्वापीत्यसंघातरूपद्रव्यमुच्यते संघातरूपेषु राशिप्रभृतिषु देशसंबन्धविशेषमात्रमेव परिमाणस्य व्यवहारकारणमित्याह । राशीति । न हि क्वचिदौपचारिकत्वे सर्वत्राप्यौपचारिकत्वमित्यर्थः ॥

इति परिमाणसिद्धिः ॥ ४५ ॥

अथ बौद्धपरिकल्पितां तुच्छरूपां परिमितिं दूषयति । बौद्धा इति ।

मू० बौद्धास्तुच्छामणूनामभिदधति परिच्छित्ति-
माकाशधातुं वस्तुस्थित्या परिच्छित्त्यभवन-
वशतस्स्यादमीषां विभुत्वम् । अन्यत्रासत्त्व-
रूपा परिमितिरिति हि स्थापितं सा मृषा
चेत् प्राप्तं सर्वत्र सत्त्वं प्रथमसरगता
स्मर्य्यतां व्योम्नि युक्तिः ॥ ४६ ॥

टी० बौद्धाः खल्वाकाशधातुरूपत्वादाकाशस्य च तुच्छत्वादणूनां परिमितिं तुच्छरूपामभिदधति आकाशपरिवृतत्वमेवा-

Digitized by Google

णूनां परिमितिः आकाशं चाभावरूपतया तुच्छमेव अपरेत्तरम् । वस्तु-स्थित्येति । एवं तद्वयणूनां परमार्थतः परिच्छिन्नत्यभाववशाद् विभुत्व-मेव स्यादित्यर्थः । न हि परस्परविरोधे कोट्यन्तरमस्ति द्रव्यस्य सतः परिमाणावश्यंभावात् । उक्तमर्थं विवृणोति । अन्यथेति । बौद्ध-पक्षे हि एकत्र देशेऽवच्छिन्नस्य देशान्तरासत्त्वमेव हि परिमाणं सा चेन्मृषा परिमितिस्तर्हि देशान्तरेऽपि सत्त्वं स्यात् तर्हि कथमाका-शादौ परिमितत्वमपरिमितत्वञ्चेत्यादिचोद्यं प्रथमसर एव परिहृतमु-पाधिभेदादिति तदत्रापि स्मर्यतामित्यर्थः ॥

इति सौगतोक्ततुच्छपरिमितिनिरासः ॥ ४६ ॥

ननु सर्वपरिमाणनिषेधो ब्रह्मणि दृश्यते अस्थूलमनण्वह्र-स्वमिति तत्कथं विरुद्धपरिमाणनिषेधसमुच्चय इति कश्चिच्चोदयति । स्थूलेति ।

मू० स्थूलाणुह्रस्वदीर्घेतरदुपनिषदि स्थापितं ब्रह्म तस्मिन् सर्वोत्कृष्टं महत्त्वं श्रुतमपि तदिह स्थूलतान्या निषिद्धा । अन्ये त्वाहु-र्विभूनामपरिमितवचःप्रत्ययान्नित्यभावं भा-वैकात्मन्यभावे परिमितिविरहोऽप्यत्र भा-वान्तरं स्यात् ॥ ४७ ॥

टी० तत्र परिहारमाह । तस्मिन्निति । सर्वोत्कृष्टं महत्त्वं ब्रह्मणि श्रुतं विहितव्यतिरिक्तविषयो निषेध इति न्यायविदुं तेन ब्रह्मणि अस्थूलता पर्वतादितुल्यपरिमाणराहित्यमेव न पुनस्सर्वव्या-पित्वरूपपरिमाणराहित्यं विषयभेदेन व्यवस्थासिद्धौ विरुद्धार्थकल्पना-योगादिति विभुत्वरूपं परिमाणं भावरूपमेवाङ्गीकृत्य केचिदाचार्याः

प्राहुः । अन्ये पुनर्विभूनामपरिमितवचोविषयत्वात् परिमाणाभावमेव विभुत्वं प्रतिपादयन्ति, सर्वव्यापिनः परस्य ब्रह्मणः परिमितो माना-भावादिति अभावरूपपदार्थाङ्गीकारेणायं निर्वाहोभावाख्यपदार्थान्त-राङ्गीकारेण भावान्तराभाववादे तु परितो मानविरहोऽपि भावात्मक एवेत्याहु । भावेति । भावैकात्मन्यभावेऽपि भावरूपतया स्वीकृते सतीत्यर्थः ॥ ४७ ॥

ननु तव मते महत्त्वमेव न संजाघटीतीति चोदयति । नात्यन्तेति ।

मू० नात्यन्ताणोर्म्महत्त्वास्त्यवयविनि हृते मध्यमं क्वास्तु मानं तद्धेतुष्वेव तद्धीरपि तव घटते लाघवोत्कण्ठितस्य । एवं त्यक्ते महत्त्वे परममहदपि त्याज्यमेवेति चेन्न त्यागाभा-वात्तदिष्टादधिकमनधिकं वाऽस्तु न क्वापि दोषः ॥ ४८ ॥

टी० अत्यन्ताणोर्जीवस्य न तावन्महत्त्वमस्ति अवयविवा-दानङ्गीकारात् त्र्यणुकाद्यभावेन मध्यमपरिमाणरूपं महत्त्वमपि भवतां नास्ति तदिदमाह । अवयविनीति । घटादिषु महत्त्वप्रतीतिश्च लाघवोत्कण्ठितस्य तव च पक्षे पटघटादिहेतुषु तन्तुकपालादि-संघातेष्वेव घटते, एवं मध्यममहत्त्वे त्यक्ते परममहत्त्वमपि भवतः परित्याज्यं स्यात्, परमशब्दस्य व्यवच्छेद्याभावेन विशेषप्रतीतेर-भावादिति चेत् अनूदितमर्थं दूषयति । नेति । तत्र हेतुमाह । त्यागाभावादिति । तदेवोपपादयति । तदिति । तन्महत्त्वं परे-

स्तुतिव्यपदेशमङ्गेन विप्रतिषिद्धं व्रतवत् ॥ ४३ ॥

तेन च संस्तवादित्यस्योत्तरमाह । स्तुतीति । अङ्गेन समुदायैकदेशस्तुत्या अङ्गिनि समुदाये स्तुतिव्यपदेशस्तमप्रतिषिद्धं वदन्ति व्रतवत् । महाव्रतवत् । गवामयने चरमं महाव्रतसंज्ञं तस्य यन्ति वा एते मिथुनाद्ये संवत्सरमुपयन्त्यन्तर्वेदि मिथुनौ सम्भवतस्तेनैव मिथुनाच्च यन्ति इति । अस्यार्थः । संवत्सरसाध्ये चिरकालब्रह्मचर्येण मिथुनाद्वियुक्ताः अन्तर्वेदि मिथुनीभावेन गतं मिथुनीभावं प्राप्नुवन्तीति महाव्रतस्तुत्या संवत्सरसाध्यसत्रस्तुतिस्तथा दशमाहःशेषमानसस्तुत्या द्वादशाहस्तुतिरिति भावः ॥ ४३ ॥

वचनादतदन्तत्वम् ॥ ४४ ॥

अहरन्ताच्च परेण चोदनेत्यस्योत्तरमाह । वचनादिति । पत्नीः संयाज्य मानसाय प्रसर्पन्तीति वचनादतदन्तत्वम् । पत्नीसंयाजान्तत्वाभावो दशमस्याह्नः । संस्थावचनं तद्विचाहःस्विति भावः ॥ ४४ ॥

सत्रस्य बहुकर्तृकत्वम् । अधि॰ १४ ।

सत्रमेकः प्रकृतिवत् ॥ ४५ ॥

सत्रे कर्तैको बहवो वेति संशये पूर्वपक्षमाह । सत्रमिति । स्पष्टम् ॥ ४५ ॥

बहुवचनात्तु बहूनां स्यात् ॥ ४६ ॥

सिद्धान्तमाह । बहुवचनेति । ऋद्धिकामाः सत्रमासीरन्निति बहुवचनात् । शेषं स्पष्टम् ॥ ४६ ॥

अपदेशः स्यादिति चेत् ॥ ४७ ॥

ननु यदि धनलाभः तदा बहवो ब्राह्मणा यजेरन्नित्यत्र पृथक्कर्तृके ऽपि बहुवचनं तद्वद्बहुवचनमुपपन्नमिति शङ्कते । अपदेश इति । अपदेशः केवलं क्रियासंबन्धमभिलक्ष्य बहुवचनप्रयोगः स्यात् ॥ ४७ ॥

नैकव्यपदेशात् ॥ ४८ ॥

दूषयति । नेति । एकव्यपदेशादिति । द्वादशाहो द्विविधः । सत्ररूपः अहीनरूपश्च । इत्थं च एष ह वै कुणपमत्तिः यः सत्रे प्रतिगृह्णा-

Digitized by Google

तीत्यनेन सत्रे प्रतिग्रहं निन्दन् इतरत्वादशाहएक एव यजेतेति वचने-नैककर्तृव्यपदेशात् सत्रे बहव इति सिद्धम् ॥ ४८ ॥

सन्निवापं च दर्शयति ॥ ४९ ॥

साधकान्तरमाह । सन्निवापमिति । सावित्राणि होष्यन्तः सन्नि-वपेरञ्चिति बहुयजमाना ये अग्नयः तेषामेकत्र मेलनं दर्शयति । अतो बहुकर्तृकम् ॥ ४९ ॥

बहूनामिति चैकस्मिन्विशेषवचने व्यर्थम् ॥ ५० ॥

बहूनामिति । यो वै बहूनां यजमानानां गृहपतिः स सत्रस्य प्रत्येता स हि भूयिष्ठां समृद्धिमाप्नोतीति एकस्मिन् गृहपतौ बहुभिर्य-जमानैः सह प्रवृत्ते फलविशेषं दर्शयति । यद्येक एव कर्ता तदेदं व्यर्थम् ॥ ५० ॥

सत्रे यजमानानामेव ऋत्विक्त्वम् । अधि० १५ ।

अन्ये स्युर्ऋत्विजः प्रकृतिवत् ॥ ५१ ॥

एवं सिद्धेषु बहुकर्तृषु ऋत्विग्विचारे पूर्वपक्षमाह । अन्यइति । स्पष्टोऽर्थः ॥ ५१ ॥

अपि वा यजमानाः स्युर्ऋत्विजामभिधानसंयोगा-त्तेषां स्याद्यजमानत्वम् ॥ ५२ ॥

सिद्धान्तमाह । अपि वेति । यजमाना एव ऋत्विजः । ऋत्विजां यानि अभिधानानि नामानि तत्संयोगात् । यजमानसंस्कारवत्त्वादिति शेषः । अयं भावः । अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयतीति वाक्येन ब्रह्माणमिति ऋत्विजो नाम गृहीत्वा तत्रैव दीक्षारूपं यजमा-नसंस्कारं विधत्ते । अतः तेषाम् ऋत्विजां यजमानत्वं स्यात् ॥ ५२ ॥

कर्तृसंस्कारो वचनादाधातृवदिति चेत् ॥ ५३ ॥

ऋत्विजां नाम गृहीत्वा दीक्षाविधानमृत्विक्संस्कार इति शङ्कते । कर्त्रिति । आधातृवदिति । यथा ऽऽधाने श्वो ऽग्नीनाधास्यमानस्य एतां

रात्रिं व्रतं चरेदिति न मांसमश्नीयान्न स्त्रियमुपेयादिति यजमानसंस्कार ऋत्विक्संस्कारत्वेन विहितस्तथा ॥ ५३ ॥

स्याद्विशये तन्न्यायत्वात्प्रकृतिवत् ॥ ५४ ॥

दूषयति । स्यादिति । विशये संशये अन्ये वेति तन्न्यायत्वात् । अपि वा यजमानाः स्युरितिन्यायवत्त्वात् । प्रकृतिवत् । प्रकृतौ ज्योतिष्टोमे दीक्षाकार्यं यजमानसंस्कारस्तथा ऽत्रापीति । स्यादित्यनेनाधानवदित्यस्य वैषम्यं दर्शितम् । तथा हि द्वादशाहे दीक्षा प्रकृतितः प्राप्ता । तस्य प्रकृतौ यत्कार्यं तदेव विकृतौ भवितुमर्हति । आधाने वचनेनापूर्वविधानात् कर्तृसंस्कार इति कल्पयितुं शक्यमिति ॥ ५४ ॥

स्वाम्याख्याः स्युर्गृहपतिवदिति चेत् ॥ ५५ ॥

पुनः शङ्कते । स्वाम्येति । यथा गृहपतिशब्दः योगशक्त्या यजमानपरः । एवं ब्रह्मादिशब्दा अपि कथं चिद्योगेन स्वाम्याख्याः स्युः ॥ ५५ ॥

न प्रसिद्धग्रहणत्वादसंयुक्तस्य तद्धर्मेण ॥ ५६ ॥

आशङ्कामुद्धरति । नेति । क्रियाविशेषवत्स्विति शेषः । तत्र प्रसिद्धं रूढ्यात्मकं ग्रहणं शक्तिः येषां तानि अध्वर्य्वादिपदानि तत्त्वात् । तद्धर्मेण क्रियाविशेषेणासंयुक्तस्य असंबद्धस्य यजमानस्य तत्पदवाच्यत्वं नेति योज्यम् । अयं भावः । ब्रह्मादिपदशक्यतावच्छेदकाः क्रियाविशेषास्तद्रहितो न तेन पदेन बोधयितुं शक्यते । केवलयोगेन बोधस्तु न सम्भवति । रूढेर्योगापहारित्वादिति ॥ ५६ ॥

बहूनामिति तुल्येषु विशेषवचनं नोपपद्यते ॥ ५७ ॥

साधकान्तरमाह । बहूनामिति । बहूनां यजमानानां गृहपतिः सत्रस्य प्रत्येतेति श्रूयते । तत्र तुल्येषु केवलयजमानेषु ऋत्विक्कर्मरहितेषु सर्वेषु पृथग्गृहपतिरिति वचनं नोपपद्यते । मन्मते षोडशर्त्विग्यजमानोभये कर्तारः केवलयजमानक्रियाकर्ता स गृहपतिरिति वचनमुपपन्नम् ॥ ५७ ॥

Digitized by Google

दीक्षितादीक्षितव्यपदेशश्च नोपपद्यते ऽर्थयो-र्नित्यभावित्वात् ॥ ५८ ॥

गमकान्तरमाह । दीक्षितेति । दीक्षिताः सत्रैर्यजन्ते अदीक्षिता अहीनेनेति । अत्र पूर्वपक्षिमते दीक्षितादीक्षितव्यपदेशो निर्देशो ऽनुपपन्नः । अर्थयोर्दीक्षितत्वं यजमाने ऽदीक्षितत्वमृत्विक्षु उभयं नित्यमस्ति । अतस्तेन निर्देशो व्यर्थः । सिद्धान्ते सत्रे यागकर्तृषु दीक्षितत्वमसिद्धम् । अतस्तेन रूपेण निर्देश उपपन्नः ॥ ५८ ॥

अदक्षिणत्वाच्च ॥ ५९ ॥

अदक्षिणेति । स्पष्टम् ॥ ५९ ॥

सत्राहीनयोर्विवेकः । अधि० १६ ।

द्वादशाहस्य सत्रत्वमासनोपेयिचोदनेन यजमानबहुत्वेन च सत्रशब्दाभिसंयोगात् ॥ ६० ॥

द्वादशाहवृत्ति सत्रत्वमहीनत्वं च । तयोः परिज्ञानाय लक्षणम् । प्रथमं सत्रस्याह । द्वादशेति । आसनोपेयिचोदनेन, आसीरन् उपेयुरितिशब्दघटितविधिवाक्यविहितत्वेन यजमानबहुत्वेन च द्वादशाहसंबन्धि सत्रत्वं ज्ञेयम् । गावो वा एतत्सत्रमासत सप्तदशावराः सत्रमासीरन्निति वाक्ये आसनघटितेषु बहुयजमानबोधकेषु च सत्रशब्दस्य दृष्टत्वात् ॥ ६० ॥

यजतिचोदनादहीनत्वं स्वामिनां चास्थित-परिमाणत्वात् ॥ ६१ ॥

अहीनलक्षणमाह । यजेति । स्पष्टम् ॥ ६१ ॥

पौण्डरीके सकृदेव दक्षिणादानम् । अधि० १७ ।

अहीने दक्षिणाशास्त्रं गुणत्वात्प्रत्यहं कर्मभे-दात् स्यात् ॥ ६२ ॥

अहीनः पौण्डरीक एकादशरात्रः । तत्र अयुतं पौण्डरीके दद्यादिति । इयं दक्षिणा प्रत्यहं सकृद्वेति संशये पूर्वपक्षमाह । अहीन-

इति । अहीने दक्षिणाशास्त्रं प्रत्यहं प्रवर्तते । तस्या गुणत्वात् । अहरङ्गत्वात् । प्रत्यहं कर्मभेदात् ॥ ६२ ॥

सर्वस्य वैककर्म्यात् ॥ ६३ ॥

सिद्धान्तमाह । सर्वस्येति । सर्वस्य अह्नां समूहस्यैकैव दक्षिणा कर्मैक्यात् । एकादशानामभ्यासरूपत्वादिति भावः ॥ ६३ ॥

पृषदाज्यवद्वा ऽह्नां गुणशास्त्रं स्यात् ॥ ६४ ॥

पूर्वपक्षं द्रढयति । पृषदाज्यवद्वा ऽह्नामिति । अह्नां गुणशास्त्रमिदमतः प्रत्यहं पृषदाज्यवत् । यथा पृषत्स्वरूपो गुणः प्रत्यनूयाजमावर्तते तथेति ॥ ६४ ॥

ज्यौतिष्टोम्यस्तु दक्षिणाः सर्वासामेककर्मत्वात्प्रकृतिवत्तस्मात्तासां विकारः स्यात् ॥ ६५ ॥

दूषयति । ज्योतिष्टोम्येति । सर्वक्रतौ दक्षिणा ज्योतिष्टोमसंबन्धिन्यः । एवं प्रकृतौ ज्योतिष्टोमे सर्वदक्षिणानां विशिष्टक्रतुसंपत्तये ऋत्विगानतिरूपैककर्मत्वं दृष्टं तथा ऽत्रापि सर्वदक्षिणानां तादृशैकफलत्वात् तासां स्वकार्येण सह प्राप्तप्राकृतदक्षिणानां विकारमात्रं स्यात् । न त्वहरङ्गत्वेन दक्षिणाविधिः । यत आवृत्तिः स्यादिति भावः ॥ ६५ ॥

द्वादशाहे तु वचनात्प्रत्यहं दक्षिणाभेदस्तत्प्रकृतित्वात्परेषु तासां विकारः स्यात् ॥ ६६ ॥

पौण्डरीकस्य द्वादशाहप्रकृतिकतया द्वादशाहे अन्वहं द्वादशशतं ददातीति विहितत्वेनात्रापि अन्वहं प्राप्तदक्षिणांशमयुतादिविकारमात्रमिति पूर्वपक्षमुत्थापयति । द्वादशेति । परेषु पौण्डरीकादिषु तासामहःसंबन्धिदक्षिणानाम् । शेषसूत्रं व्याख्यातप्रायम् ॥ ६६ ॥

परिक्रयाविभागाद्वा समस्तस्य विकारः स्यात् ॥ ६७ ॥

Digitized by Google

सिद्धान्तं साधयति । परीति । परिक्रयाविभागात् । ऋत्विक्परिक्रयैक्यात् समस्तस्य निखिलक्रतुदक्षिणाद्रव्यस्य विकारः स्यात् ॥ ६७ ॥

भेदस्तु गुणसंयोगात् ॥ ६८ ॥

ननु द्वादशाहे दिवसभेदेन दक्षिणाभेदो दृष्टः तद्विकृतिभूते ऽत्र कथमैक्यमित्याशङ्क्य तत्रापि दक्षिणाभेदो गुणसंयोगाच्च वास्तवो भेद इति समाधत्ते । भेदेति । द्वादशाहे दक्षिणाभेदः गुणसंबन्धात् । दिवससंबन्धात् । तत्रापि परिक्रयस्यैकत्वादिति भावः ॥ ६८ ॥

पौण्डरीके सर्वासां दक्षिणानां विभज्य नयनम् । अधि॰ १८ ।

प्रत्यहं सर्वसंस्कारः प्रकृतिवत्सर्वासां सर्वशेषत्वात् ॥ ६९ ॥

ज्योतिष्टोमे माध्यन्दिने सवने दक्षिणा नीयन्तइति वचनेन दक्षिणाया नयनरूपः संस्कारो विहितः । अयं पौण्डरीके अतिदेशेन प्राप्तः संस्कारः प्रत्यहं निखिलायाः कार्यं उत विभज्येति संशये पूर्वपक्षमाह । प्रत्यहमिति । सर्वसंस्कारः सर्वदक्षिणासंस्कारः सर्वासां दक्षिणानां सर्वशेषत्वात् । सकलमाध्यन्दिनसवनशेषत्वात् ॥ ६९ ॥

एकार्थत्वान्नेति चेत् ॥ ७० ॥

तटस्थः शङ्कते । एकेति । न प्रत्यहं निखिलदक्षिणासंस्कारः दक्षिणाया एकार्थत्वात् । ऋत्विगानतिरूपैककार्यत्वात् । किं तर्हि इच्छया एकमाध्यन्दिने निखिलदक्षिणानयनमिति फलितम् ॥ ७० ॥

उत्पत्तौ कालभेदात् ॥ ७१ ॥

इमं पक्षं दूषयति । उत्पत्ताविति । उत्पत्तौ स्वप्रकृतौ द्वादशाहे कालभेदात्संस्कारस्य भेदस्य दृष्टत्वादिति पूरणीयम् ॥ ७१ ॥

विभज्य तु संस्कारो वचनाद् द्वादशाहवत् ॥ ७२ ॥

सिद्धान्तमाह । विभज्येति । विहितदक्षिणा एकादशधा विभज्य प्रत्यहं संस्कारः । यथा द्वादशाहे ऋत्विगानतिफला विशिष्टदक्षिणा

चतुश्चत्वारिंशत्सहितत्रयोदशात्मिका पूर्वदर्शितवचनादन्वहं विभज्य दीयते तथा ॥ ७२ ॥

मनोर्ऋचः इत्यनेन यावदर्थमृचामुपादानम् । अधि॰ १६ ।

लिङ्गेन द्रव्यनिर्देशे सर्वत्र प्रत्ययः स्याल्लिङ्गस्य सर्वगामित्वात् ॥ ७३ ॥

क्व चित्कर्मविशेषे मनोर्ऋचः सामिधेन्यो भवन्तीति । मानव्यो यावत्यः ग्राह्या उत परिमिता इति संशये पूर्वपक्षमाह । लिङ्गेनेति । लिङ्गेन द्रव्यस्य शब्दस्य निर्देशे क्रियमाणे सर्वत्र तल्लिङ्गलक्ष्यसर्वविषयः प्रत्ययः ज्ञानं स्यात् । लिङ्गस्य सर्वगामित्वात् । सर्ववृत्तित्वात् । आग्नेयवत् । आग्नेयेन संवत्सरमिष्टका उपदधातीत्यत्र यथा यावदाग्नेयसूक्तानि गृह्यन्ते तथा ॥ ७३ ॥

यावदर्थं वा ऽर्थे शेषत्वादतो ऽर्थेन परिमाणं स्यात्तस्मिंश्च लिङ्गसामर्थ्यम् ॥ ७४ ॥

सिद्धान्तमाह । यावदिति । यावदर्थं यावता कार्यसिद्धिर्भवति तावत् । अर्थं कार्ये शेषत्वादङ्गत्वात्सामिधेनीनामतः अर्थः कार्यं तत्प्रमाणेन समं मन्त्रपरिमाणं स्यात् । यावता कार्यनिष्पत्तिः तावत्यः पञ्चदश सप्तदश वा ग्राह्या इति भावः । तस्मिन् तावत्परिमाणके गृह्यमाणे ऽपि लिङ्गसामर्थ्यमबाधितमिति शेषः ॥ ७४ ॥

आग्नेये कृत्स्नविधिः ॥ ७५ ॥

पूर्वपक्षे दर्शितदृष्टान्तवैषम्यं दर्शयति । आग्नेयइति । कृत्स्नविधिः निखिलमन्त्राणामङ्गत्वबोधकविधिः प्रत्यक्षवचनं प्रतिसूक्तमुपदधातीति अस्तीह नेति ॥ ७५ ॥

ऋजीषस्य प्रधानत्वादहर्गणे सर्वस्य प्रतिपत्तिः स्यात् ॥ ७६ ॥

ननु ऋजीषमप्सु प्रतिपेदित्यत्राहर्गणे एकदिवससंबन्ध्यृजीषप्रक्षेपेणापि कार्यसिद्धिः स्यात् । प्रकृतन्यायेन किंचिद्ग्रहणे बाधकाभावादत

Digitized by Google

आह । ऋजीषस्येति । अहर्गणे द्वादशरात्रादौ ऋजीषस्य अभिषवादिना गतसारसोमाावापस्य द्वितीयया विभक्त्या प्राधान्यावगतेः तदङ्गं प्रक्षेपः प्रतिपत्तिसंस्कारः प्रतिप्रधानमङ्गावृत्तिन्यायेन सर्वस्य स्यात् ॥ ७६ ॥

वाससि मानोपावहरणयोरनुष्ठानम् । अधि० २० ।

वाससि मानोपावहरणौ प्रकृतौ सोमस्य वचनात् ॥ ७७ ॥

ज्योतिष्टोमे सोमस्य वाससि मानं वाससोपावहरणं प्रत्यक्षवचनक्लृप्तमुत्तराधिकरणोत्थानार्थं सिद्धान्तरूपं स्मारयति । वाससीति । स्पष्टो ऽर्थः ॥ ७७ ॥

अहर्गणे ऽर्थाद् वासोऽन्तरोत्पादनम् । अधि० २१ ।

तत्राहर्गणे ऽर्थाद्वासःप्रक्लृप्तिः स्यात् ॥ ७८ ॥

द्वादशाहाद्यहर्गणे चोदकप्राप्तवाससः अन्यत्र संपादनीयमिति पूर्वपक्षे सिद्धान्तमाह । तत्रेति । अर्थाद् अर्थापत्त्या ऽनुपपत्त्येत्यर्थः । वासःप्रक्लृप्तिः अन्यवासःसंपादनं स्यात् । अयं भावः । अहर्गणे तावद्दिनपर्याप्तसोमक्रयः प्रथमं जातः । प्रकृतौ क्लृप्तवाससि क्रीतः सोमो ऽस्ति ततः तत्तदहःपर्याप्तं सोमं पृथक्कृत्य वाससा उपावहरेयुः तदुपावहरणं नवीनवासःक्लृप्तिं विना ऽनुपपन्नमिति ॥ ७८ ॥

उपावहरणार्थमेव वासोऽन्तरोत्पादनम् । अधि० २२ ।

मानं प्रत्युत्पादयेत्प्रकृतौ तेन दर्शनादुपावहरणस्य ॥ ७९ ॥

तद्वासःसंपादनं सोमक्रयानन्तरं मानकालएव कार्यमिति पूर्वपक्षमाह । मानं प्रतीति । मानं प्रति मानोपलक्षितकालएवोत्पादनीयः । प्रकृतौ येन मानं तेन वाससा हरणस्य दर्शनात् ॥ ७९ ॥

हरणे वा श्रुत्यसंयोगादर्थाद्विकृतौ तेन ॥ ८० ॥

सिद्धान्तमाह । हरणे वेति । हरणे हरणसमये उत्पाद्यमित्यनुवर्तते मानकाले संपाद्यमिति श्रुत्या असंयोगादबोधनात् । ननु प्रकृतौ तेनैव मानसाधनवाससा हरणं किंमूलमिति चेदाह । अर्थात् । प्रकृतौ अह्नः एकत्वात्तस्मिन्मानं तेनैव हरणे बाधकाभावादार्थिकम् । इह तु मान-

वाससः द्विषसान्तरसोमधारणे व्यावृत्तत्वेन तेन नयनासंभवाद् विकृतौ तेन संपादितवाससा हरणमार्थिकं, तच्च यस्मिन्काले प्रयोजनमपेक्षते तस्मिन्काल एव संपाद्यत इति लोकक्लृप्तो न्यायः । अतस्तत्काल इति भावः ॥ ८० ॥

इति जैमिनिसूत्रवृत्तौ दशमस्याध्यायस्य षष्ठः पादः ॥ ६ ॥

ज्योतिष्टोमे प्रत्यङ्गं हविर्भेदः । अधि. १ ।

पशावेकहविष्ट्वं समस्तचोदितत्वात् ॥ १ ॥

अस्मिन्पादे प्राधान्येन पश्वङ्गबाधश्चिन्त्यते । अग्नीषोमीयं पशुमालभेतेत्यत्र पूर्वपक्षमाह । पशाविति । पशौ यागसाधनत्वेन श्रूयमाणे एकहविष्ट्वं समस्तस्य देवतासंबन्धचोदनात् ॥ १ ॥

प्रत्यङ्गं वा ग्रहवदङ्गानां पृथक्कल्पनत्वात् ॥ २ ॥

सिद्धान्तमाह । प्रत्यङ्गमिति । प्रत्यङ्गं हविः । अङ्गानां हृदयादीनां पृथग् हविष्ट्वेन कल्पना यस्मात्तस्मात् । हृदयस्याग्रे ऽवद्यत्यथ जिह्वाया इत्यादितः । ग्रहवत् । यथा सोमेन यजेतेत्यनेन सोमलतायाः साधनत्वश्रुतावपि ऐन्द्रवायवं गृह्णात्यच्छावा धारया गृह्णातीत्यादिविधिभिः रसप्राधान्या साधनत्वं तथा ॥ २ ॥

पशोर्हृदयादिभिरेवाङ्गविशेषैर्यागानुष्ठानम् । अधि॰ २ ।

हविर्भेदात्कर्मणो ऽभ्यासः तस्मात्तेभ्यो ऽवदानं स्यात् ॥ ३ ॥

एवमङ्गेषु हविष्ट्वे सिद्धे किं निखिलाङ्गानामवदानमुतैकादशानामिति संशये पूर्वपक्षमाह । हविर्भेदादिति । अङ्गभेदेन हविर्भेदाद् यावदवयवं कर्मणो ऽभ्यासः क्लृप्तस्तस्मात् तेभ्यः सर्वेभ्यः अवदानं स्यात् ॥ ३ ॥

आज्यभागवद्वा निर्देशात्परिसंख्या स्यात् ॥ ४ ॥

सिद्धान्तमाह । आज्येति । एकादशाज्यभागवत् । गृहमेधीयाज्यभागाधिकरणे पञ्चमपक्ष इव एकादशावदानानि इति निर्देशाद् इतरपरिसंख्या स्यात् ॥ ४ ॥

तेषां वा द्व्यवदानत्वं विवक्षन्नभिनिर्दिशेत्पशोः पञ्चावदानत्वात् ॥ ५ ॥

पूर्वपक्ष्याशङ्कते । तेषामिति । पशोः सर्वेषां पञ्चावत्तमिति वचनसिद्धम् एकादशेति वाक्ये यानि हृदयादीन्येकादश तानि तदनुवादेन द्विरवदानं विवक्षन् विधास्यन् इति अभिनिर्दिशेत् तात्पर्यं ज्ञेयम् । यतः पशोः पञ्चावत्तत्वं क्लृप्तम् । तथा च न परिसंख्या किं तु सर्वमवदेयमिति भावः ॥ ५ ॥

अंसशिरोऽनूकसक्थिप्रतिषेधश्च तदन्यपरिसंख्याने ऽनर्थकः स्यात् प्रदानन्यायत्वात्तेषां निरवदानप्रतिषेधः स्यात् ॥ ६ ॥

अत्र साधकमाह । अंसेति । यदि एकादशातिरिक्तपरिसंख्यानं तर्हि अंसादीनां तत एव व्यावृत्तत्वेन पृथक् प्रतिषेधो ऽनर्थकः स्यात् । स्वमते उपपत्तिमाह । प्रदानं न्यायसिद्धं येषां सक्थ्यादीनां तत्त्वात् । तेषां प्रदेयत्वस्य क्लृप्तत्वादिति भावः । नितरां विशेषेण अवदानम् । द्विरवदानमिति यावत् । तस्य प्रतिषेधः हृदयादीनि द्विरवदेयानि अंसादीनि सकृदिति भावः ॥ ६ ॥

अपि वा परिसंख्या स्यादनवदानीयशब्दत्वात् ॥ ७ ॥

सिद्धान्तसाधकं दर्शयति । अपि वेति । अनवदानीयशब्दत्वात् । वाजपेये सुराग्रहांश्चानवदानीयान्वाजसृद्भ्य इति श्रुतम् । यदि पशोरङ्गानि निखिलानि तर्ह्यनवदानीयाप्रसिद्ध्या तदनुवादो न स्यात् । परिसंख्यापक्षे उपपन्नमिति भावः ॥ ७ ॥

अब्राह्मणे च दर्शनात् ॥ ८ ॥

साधकान्तरमाह । अब्राह्मणइति । ककुभो राजपुत्रः प्राश्नातीति अब्राह्मणे भक्षो ऽवयवविशेषस्य विहितः । यदि सर्वावयवावदानं तर्हि भक्षो विरुध्येतेति भावः ॥ ८ ॥

Digitized by Google

श्रृताश्रृतोपदेशाच्च तेषामुत्सर्गवदयज्ञशेषत्वं सर्वेषां न श्रपणं स्यात् ॥ ९ ॥

सिद्धान्तमाह । श्रृतेति । द्वयान्यङ्गान्यभिमृशति श्रृतान्यश्रृतानि चेति । तेषामश्रृतानां पर्यग्निकृतं पात्नीवतमुत्सृजतीत्यत्र यथा उत्सर्गश्रवणेनायज्ञशेषत्वाच्छ्रपणं नास्ति तथा परिसंख्यापत्ते एकादशानां श्रपणमन्येषां नेति उपपन्नम् ॥ ९ ॥

ज्योतिष्टोमे ऽनिज्याशेषैस्त्र्यङ्गैः स्विष्टकृद्धोमः । अधि० ३ ।

इज्याशेषात्स्विष्टकृदिज्येत प्रकृतिवत् ॥ १० ॥

पशौ इज्याशेषाद् हृदयादिभ्यः स्विष्टकृत्प्रकृतिवद् दर्शपूर्णमासवदिति पूर्वपक्षः । त्र्यङ्गैः स्विष्टकृतं जुहोतीति सर्वहविर्निवृत्तिपरमिति भावः ॥ १० ॥

त्र्यङ्गैर्वा शरवद्विकारः स्यात् ॥ ११ ॥

त्र्यङ्गैः दोःपूर्वार्धस्य गुदमध्यतः श्रोणिजघनार्धस्येति विहितैर्विकारः प्राकृतेज्याशेषबाधः शरवच्च शरैः कुशवत् ॥ ११ ॥

अध्यूध्न्या इडाभक्षविकारत्वम् । अधि० ४ ।

अध्यूध्नी होतुस्त्र्यङ्गवदिडाभक्षविकारः स्यात् ॥ १२ ॥

पशौ श्रूयते । अध्यूध्नीं होत्रे हरतीति । अत्र सिद्धान्तेनारभते । अध्यूध्नीति । अध्यूध्नी तद्विषयकं शास्त्रं प्रकृतितः प्राप्तहोतृकेडाभक्षविकारः स्यात् । बाधकः स्यात् । त्र्यङ्गवत् । पूर्वाधिकरणसिद्धान्तवदिति यावत् ॥ १२ ॥

शेषे वा समवैति तस्माद् द्रव्यवन्नियमः स्यात् ॥ १३ ॥

अनस्थिभिरिडां वर्धयतीत्यनेन शेषनिखिलमांसस्य हरणं प्राप्तम् । अनूद्याध्यूध्नीं होतृसंबन्धः पक्षे प्राप्तो नियम्यत इत्यभिप्रायवतः पूर्वपक्षिणो मतमाह । शेषे वेति । शेषे इडायां गृह्यमाणे अनस्थिभिरित्यनेन विधीयमाने हुतशेषमांसे समवैति अन्तर्भूतं तस्माद् द्रव्यवत् । वाजपेये सप्तदशरथमध्ये यजुर्युक्तो रथो ऽध्वर्योरेवेतिवद् नियमः स्यात् ॥ १३ ॥

Digitized by Google

अशास्त्रत्वात्तु नैवं स्यात् ॥ १४ ॥

अनस्थिभिरिडां वर्धयतीति न विधायकं लटः श्रूयमाणत्वात् । अतो ऽध्वर्यूप्रापकं शास्त्रं नास्ति येन पूर्वपक्षसिद्धिः स्यादित्यभिप्रायवान् सिद्धान्त्याह । अशास्त्रत्वादिति । स्पष्टम् ॥ १४ ॥

अपि वा दानमात्रं स्याद्भक्षशब्दानभिसंबन्धात् ॥ १५ ॥

तटस्थः शङ्कते । अपि वेति । उक्तवाक्ये भक्षशब्दानभिसंबन्धादश्रवणात् । होतृसंप्रदानकं दानमात्रं विधीयते । अतो नेडाभक्षविकार इति भावः ॥ १५ ॥

दातुस्त्वविद्यमानत्वादिडाभक्षविकारः स्याच्छेषं प्रत्यविशिष्टत्वात् ॥ १६ ॥

सिद्धान्तं द्रढयति । दातुरिति । शेषं प्रति हुतशेषं प्रति अविशिष्टत्वात् । यजमानस्य होतुश्च समानत्वात् । समानत्वं यथा प्रपञ्चितं तृतीये । तदुपरि उभयोरपि स्वत्वाभावेन दातुरविद्यमानत्वादभावाद् दानविधिर्न संभवति किं तु भक्षविधिरिति तद्विकारः स्यात् ॥ १६ ॥

वनिष्ठोर्भक्षविकारत्वम् । अधि० ५ ।

अग्नीधश्च वनिष्ठुरध्यूध्नीवत् ॥ १७ ॥

वनिष्ठुमग्नीधे प्रयच्छतीत्यत्र इममेव सिद्धान्तमतिदिशति । आग्नीध इति । स्पष्टम् । अत्रातिदेशबीजं भाष्यादवगन्तव्यम् ॥ १७ ॥

मैत्रावरुणस्यापि शेषभक्षास्तित्वम् । अधि० ६ ।

अप्राकृतत्वान्मैत्रावरुणस्याभक्षत्वम् ॥ १८ ॥

पशौ मैत्रावरुणस्य भक्षो ऽस्ति न वेति संशये पूर्वपक्षमाह । अप्राकृतत्वादिति । अप्राकृतत्वाद् मैत्रावरुणस्य अभक्षत्वं न विद्यते भक्षो यस्येति व्युत्पत्त्या अभक्षो मैत्रावरुणस्तस्मिन् तत्त्वं, मैत्रावरुणस्य दर्शपूर्णमाससंबन्धाभावात् प्राकृतभक्षस्याप्यभाव इति भावः ॥ १८ ॥

स्याद्वा होत्रध्वर्युविकारत्वात्तयोः कर्माभिसंबन्धात् ॥ १९ ॥

सिद्धान्तमाह । स्यादिति । मैत्रावरुणस्य प्रैषकर्तृत्वेनाध्वर्युविकारः अनुवचनेषु होतृविकारः तस्मात्तयोः होत्रध्वर्य्वोः प्राकृतकर्माभिसंबन्धादस्ति मैत्रावरुणस्य भक्ष इति ॥ १९ ॥

मैत्रावरुणस्यैकभागत्वम् । अधि० ७ ।

द्विभागः स्याद् द्विकर्मत्वात् ॥ २० ॥

तत्रैव होतृकर्मकारित्वादध्वर्युकर्मकारित्वान्मैत्रावरुणो द्विकर्मा अतः द्विभागः स्यादिति पूर्वपक्षः ॥ २० ॥

एकत्वाद्वैकभागः स्याद्भागस्याश्रुतिभूतत्वात् ॥ २१ ॥

सिद्धान्तमाह । एकत्वादिति । भागस्याश्रुतिभूतत्वात् । पशौ होतुर्भागं भक्षयेद् अध्वर्युभागं चेति शास्त्राविषयत्वाद्भक्षस्य चोदकशास्त्रेण प्राप्तं भक्षणं कर्मनिमित्तं भक्षणं तत्कर्तुरेकत्वाद् एकभागः स्यात् ॥ २१ ॥

प्रतिप्रस्थातुर्भक्षाभावः । अधि० ८ ।

प्रतिप्रस्थातुश्च वपाश्रपणात् ॥ २२ ॥

पशौ प्रतिप्रस्थातुर्वपाश्रपणरूपाध्वर्युकर्मकारित्वान्मैत्रावरुणवत्प्रतिप्रस्थातुरपि हुतशेषभक्ष इति पूर्वपक्षमाह । प्रतीति । व्याख्यातप्रायम् ॥ २२ ॥

अभक्षो वा कर्मभेदात्तस्याः सर्वप्रदानत्वात् ॥ २३ ॥

सिद्धान्तमाह । अभक्षो वेति । प्रतिप्रस्थातुरभक्षः भक्षाभावः । तस्या वपायाः सर्वप्रदानत्वात् । सर्वं प्रदानं यस्याः तत्त्वात् । यद्द्रव्यश्रपणं तत्कर्तृकं तस्य सर्वस्य हुतत्वेन शेषाभावादिति भावः । ननु पश्वङ्गवपाहोमानां निखिलानामेककर्मत्वेनैकापूर्वजनककर्मकर्तृत्वं प्रतिप्रस्थातुरस्तीत्यत आह । कर्मभेदादिति । शब्दान्तराभ्यासाभ्यामिति शेषः ॥ २३ ॥

आज्यभागौ यजतीत्यनेनापूर्वयक्ष्ममेधीयाज्यभागविधानम् । अधि० ९ ।

विकृतौ प्राकृतस्य विधेर्ग्रहणात्पुनः श्रुतिरनर्थकः स्यात् ॥ २४ ॥

Digitized by Google

चातुर्मास्ये गृहमेधीये आज्यभागौ यजति यज्ञस्यैव चक्षुषी नान्तरेतीति श्रुतम् । अत्र नानापक्षानुत्थाप्य निराचिकीर्षुः आद्यपक्षमाह । विकृताविति । विकृतौ गृहमेधीये प्राकृतस्य दर्शपूर्णमासस्य विधेः आज्यभागविधेः पुनर्ग्रहणाच्च श्रुतिः प्रकृतवाक्यमनर्थकमनुवादरूपं स्यात् ॥ २४ ॥

अपि वाऽऽग्नेयवद् द्विशब्दत्वं स्यात् ॥ २५ ॥

पक्षान्तरमुत्थापयति । अपि वेति । संभवति सार्थकत्वे निरर्थकत्वकल्पनमनुचितमिति पूर्वकल्पे अपि वेत्यनेनास्वरसः सूचितः । द्विशब्दत्वमेकशाब्दबोधजनकैकार्थकशब्दद्वयं स्यात् । द्वाभ्यां मिलित्वैकः शाब्दबोधः । तथा च नानर्थक्यम् । यथाऽग्निमग्नआवहेत्यत्र द्वाभ्यामग्निशब्दाभ्यामेको बोधः तथा चोदकशास्त्रेण प्रत्यक्षशास्त्रेण च मिलित्वा एको बोधः । स चेत्थं, प्रकृतिवत्कर्त्तव्यं तत्र सादृश्यं केन रूपेणेत्याकाङ्क्षायामाज्यभागवत्त्वेन सदृशं कार्यमिति दर्शपूर्णमासधर्मप्रापकं लिङ्गमिति फलितम् ॥ २५ ॥

न वा शब्दपृथक्त्वात् ॥ २६ ॥

यश्चोपदर्शितोऽग्निशब्ददृष्टान्तः स विषमः संबोधनान्त आवोऽग्निपरः द्वितीयान्तेन बोढव्योऽग्निरुच्यते । भिन्नार्थकाविमौ प्रकृते न तथेति न पूर्वपक्षसिद्धिरिति पुनः प्रत्यक्षपाठः आज्यभागस्तुत्यर्थमित्यभिप्रायेण तृतीयपक्षमाह । न वेति । अशब्दपृथक्त्वात् । अभिन्नार्थकाद् न पूर्वपक्षः ॥ २६ ॥

अधिकं वाऽर्थवत्त्वात्स्यादर्थवादगुणाभावे वचनादविकारे तेषु हि तादर्थ्यं स्यादपूर्वत्वात् ॥ २७ ॥

दर्शपूर्णमासप्रकरणस्थाज्यभागविधेः गृहमेधीयप्रकरणे स्तुतिरसाम्प्रतमित्यभिप्रायेण तुरीयं पक्षमाह । अधिकमिति । अधिकं प्राकृतादधिकं विधीयते । आमनहोमवत् । कुतः अर्थवत्त्वात् । कार्यसाधनत्वबोधकत्वात् । नन्वेतावता स्तुतिगुणविधिप्राकृतधर्मबाधरूपार्थवत्त्वमस्तु

Digitized by Google

किमधिककल्पनेनेत्यत आह । अर्थवादगुणाभावे अविकारे च सति वचनात् । अर्थवादश्च गुणश्चेति द्वन्द्वः । अर्थवादासंभवश्च दर्शितः । अप्सुमन्तावाज्यभागावित्यत्र गुणविधानाद्वचनमर्थवदन्यथा तथा प्रकृते गुणाभावः । शरादिवत्प्राकृतधर्मबाधकतया वचनमर्थवद्वाच्यं तदभावे च सति आज्यभागौ यजतीति वचनादर्थवत्त्वकल्पनम् । एमर्थवत्त्वेसिद्धे क्लृप्तार्थाभावादप्राकृतापूर्वसाधनमधिकं कर्म भवितुमर्हति । ननु अप्सुमन्तावाज्यभागावित्यत्राप्यधिकं स्यादत आह । तेष्वित्यादि । तेषु स्तुतिगुणविधिप्राकृतधर्मबाधेषु सत्सु हि तेषामपूर्वत्वात् तदर्थता तदर्थतात्पर्यकता स्यात् । प्रकृते तेष्वन्यतमाभावादधिकर्मिति भावः ॥ २७ ॥

प्रतिषेधः स्यादिति चेत् २८ ॥

तृतीयपक्षो न समीचीनः आज्यभागौ यजतीत्यस्य महाग्निहोत्रवद् आज्यभागधर्मकं कर्म कुर्यादिति लक्षणापत्तेरतः आज्यभागातिरिक्तं न कुर्यादिति निषेधाभिप्रायमिति पञ्चमं पक्षमुपस्थापयति । प्रतिषेध इति । स्पष्टम् ॥ २८ ॥

नाश्रुतत्वात् ॥ २९ ॥

परिसंख्यायां दोषत्रयं दर्शयन् षष्ठपक्षमाह । नेति । द्वाभ्यां न पञ्चमः अश्रुतत्वात् । अश्रुतकल्पनापत्तेरित्यर्थः । इदं स्वार्थत्यागप्राप्तबाधोपलक्षणम् ॥ २९ ॥

अग्रहणादिति चेत् ॥ ३० ॥

तर्हि वाक्यस्य का गतिरत आह । अग्रहणादिति । चोदकशास्त्रेणेति शेषः । अयं भावः । आज्यभागयोः प्रत्यक्षश्रुतत्वाच्चोदकशास्त्रमेतदतिरिक्ताङ्गकलापमेव प्रापयति । एतद्ग्रहणं न करोतीति ॥ ३० ॥

न तुल्यत्वात् ॥ ३१ ॥

इमं पक्षं दूषयति । नेति । तुल्यत्वात् सर्वधर्मप्रापकवाक्यस्य प्रकृतिवदित्यस्य तुल्यत्वात् । यदि पृथग्वाक्यप्रापिता धर्माः तदा भवेदेवम् एकवाक्यप्रापिते ग्रहणाग्रहणासंभवादिति भावः ॥ ३१ ॥

तथा तद्ग्रहणे स्यात् ॥ ३२ ॥

Digitized by Google

ननु यथा सप्तदश सामिधेनीरनुब्रूयादित्यनारभ्याधीतस्य अध्वरकल्पासन्निधौ पठितसप्तदशसामिधेनीरन्वाहेति विधावुपसंहारः तथा प्रकृतिवदित्यस्य आज्यभागरूपविशेषधर्मावच्छिन्नउपसंहार इति सप्तमं पक्षमुत्सूत्रमाशङ्क्य निराकरोति । तथेति । यथा सप्तदशसामिधेनीस्थले वाक्यद्वयं प्रत्यक्षं तथा तद्ग्रहणे आज्यभागग्रहणे सति पूर्वोक्तं स्यात् । इह तु चोदकशास्त्रमानुमानिकमिति वैषम्यमिति भावः ॥ ३२ ॥

अपूर्वतां तु दर्शयेद्ग्रहणस्यार्थवत्त्वात् ॥ ३३ ॥

सिद्धान्तमाह । अपूर्वेति । तद्ग्रहणस्याज्यभागग्रहणस्यार्थवत्त्वात् । सफलत्वात् । अपूर्वतां दर्शपूर्णमासप्रकृतिकभेदं दर्शयेत् ॥ ३३ ॥

गृहमेधीये स्विष्टकृदाद्यनुष्ठानम् । अधि॰ १० ।

ततोऽपि यावदुक्तं स्यात् ॥ ३४ ॥

तर्हि यथाऽऽज्यभागश्रवणं तथैव स्विष्टकृदिडाभक्षणं च श्रूयते अत्रैकेनाकाङ्क्षानिवृत्तेर्विकल्प इति पूर्वपक्षे सिद्धान्तमाह । तत इति । ततः कथंभावाकाङ्क्षानिवारकतया युगपदन्वितत्वाद्यावदुक्तं सर्वं स्यात् । अन्यथा प्रकृतौ प्रयाजानूयाजयोर्विकल्पापत्तेरिति भावः ॥ ३४ ॥

गृहमेधीये प्राशित्रादिभक्षणाभावः । अधि. ११ ।

स्विष्टकृति भक्षप्रतिषेधः स्यात्तुल्यकारणत्वात् ॥ ३५ ॥

आज्यभागौ यजतीति परिसंख्येति पक्षमङ्गीकृत्य चिन्त्यते । तत्रसिद्धान्तसूत्रम् । स्विष्टकृति श्रूयमाणे इति शेषः । भक्षप्रतिषेधः निवृत्तिः तुल्यकारणत्वात् । एकफलजनकत्वात् । अयं भावः । येन वाक्येनेतरनिवृत्तिः प्रतीयते तत्र समानजातीयमेव निवर्तते । आज्यभागवाक्येन सजातीयहोममात्रनिवृत्तिः कृता स्विष्टकृद्वाक्यं सजातीयभक्षं निवर्तयति उभयोरपि शेषप्रतिपत्तिरूपसंस्कारफलत्वादिति ॥ ३५ ॥

अप्रतिषेधो वा दर्शनादिडायां स्यात् ॥ ३६ ॥

पूर्वपक्षमुत्थापयति । अप्रतिषेधो वेति । इडायां भक्षस्य दर्शनात् । यथा स्विष्टकृत्स्वसजातीयं व्यावर्तयत्येवं भक्षविधिः स्वसजातीयं व्यवस्थापयतीति भावः ॥ ३६ ॥

Digitized by Google

प्रतिषेधो वा विधिपूर्वस्य दर्शनात् ॥ ३७ ॥

सिद्धान्तं द्रढयति । प्रतिषेधो वेति । विधिः पूर्वं यस्य स विधिपूर्वः तस्य दर्शनाद् विधानात् । अयं भावः । प्रथमं चोदकशास्त्रेण हविःशेषप्रतिपत्तिसामान्यप्राप्तिः पश्चात्स्विष्टकृद्विधिना परिसंख्या स्वातिरिक्तनिवृत्तौ पुनरिडाविधिः तावन्मात्रे ऽभ्यनुज्ञारूपः नेतरप्रापक इति ॥ ३७ ॥

प्रायणीयातिथ्ययोः शंय्विडान्ततानियमः । अधि॰ १२ ।

शंय्विडान्तत्वे विकल्पः स्यात्परेषु पत्न्यनूयाजप्रतिषेधो ऽनर्थकः स्यात् ॥ ३८ ॥

शंय्वन्ता प्रायणीया संतिष्ठते न पत्नीः संयाजयन्तीति । इडाऽन्ताऽऽतिथ्या नानूयाजेश्चरन्तीति । अत्र पूर्वपक्षमाह । शंय्विति । शंय्विडान्तत्वे एतत्प्रतिपादकवाक्यद्वये परेषु शंय्विडोत्तरवर्तिकर्मसु विकल्पः विकल्पतात्पर्यम् । तथा च विकल्पेनानुष्ठानपक्षे पत्नीसंयाजानूयाजप्राप्त्या अधिमेण तत्पर्युदासः स्यात् । यदि शंय्वन्तत्वमिडान्तत्वं नियतं तर्हि तदुत्तरवृत्तिपत्नीसंयाजानूयाजयोः प्राप्त्यभावेन पत्नीसंयाजादिविषयनिषेधो ऽनर्थकः स्यात् ॥ ३८ ॥

नित्यानुवादो वा कर्मणः स्यादशब्दत्वात् ॥ ३९ ॥

सिद्धान्तमाह । नित्येति । शंय्वन्तेत्यनेन पत्नीसंयाजाभावस्य क्लृप्तत्वाचान्तरिते चिन्वीतेतिवचित्यानुवादः स्यात् । कर्मणः शंयूत्तरकर्मणः अशब्दत्वात् । अविहितत्वात् ॥ ३९ ॥

प्रायणीयातिथ्ययोः पूर्वाभ्यामेव शंय्विडाभ्यां संस्थानम् । अधि॰ १३ ।

प्रतिषेधवचोत्तरस्य परस्तात् प्रतिषेधः स्यात् ॥ ४० ॥

दर्शपूर्णमासयोः एकः शंयुर्गार्हपत्ये परः । एक आहवनीये प्रथमः । एवमिडाद्वयं श्रूयते । तत्र शंय्वन्तेत्यनेन को वा शंयुर्ग्राह्यः केडेति संशये पूर्वपक्षमाह । प्रतीति । उत्तरस्य द्वितीयस्य गार्हपत्यसंबन्धिनः परस्ताद्यानि प्राकृतकर्माणि तेषां प्रतिषेधः स्यात् । एवं सति प्रतिषेधवत् प्रतिषेधप्रतिपादकवचनम्, अर्थवद्भवतीति शेषः । पत्नीसं-

याज्ञानूयाजयोरुत्तरशंय्विडापूर्वदेशत्वेन परिसंख्याऽभावात्प्राप्ते निषेधः सफल इति भावः ॥ ४० ॥

प्राप्तेर्वा पूर्वस्य वचनादतिक्रमः स्यात् ॥ ४१ ॥

सिद्धान्तमाह । प्राप्तेरिति । वचनाच्च शय्वन्तेति वचनात् प्रथमशंयोः उपरमनिमित्तस्य प्राप्तेः उक्तवाक्ये शंयुपदेन पूर्वस्य ग्रहणमन्यथा निमित्तातिक्रमः स्यात् । अयं भावः । शय्वन्तेति वाक्येन प्रायणीयां कुर्यादित्यनेन च यदि शंय्वन्ताङ्गकलापद्वारा प्रधानयागेन प्रायणीयाऽपूर्वं भावयेदिति बोधः कथंभावाकाङ्क्षाया गृहमेधीयाज्यभागवत् तेनैव निवृत्तत्वाच्चोदकशास्त्रं न प्रवर्तते इति पत्नीसंयाजप्राप्त्यभावाद् निषेधो व्यर्थ एवेति श्रुतं परित्यज्य वाक्यविध्यनुसरणं व्यर्थम् । तस्मात्पर्यग्निकृतं पात्नीवतमुत्सृजतीतिवद्ङ्गरोतिर्विधिमपहायैकपदश्रुत्या संपूर्वकस्याधात्वर्थ उपरम एव शंयुवाके निमित्ते विधीयते । चोदकशास्त्रेण निखिलाङ्गप्राप्तौ उक्तनिमित्ते सत्युपरमविधाने शेषनिवृत्तिरर्थसिद्धा । तथा च निमित्तं हि उपरमे शंयुवाकः । तत्र विशेषाश्रवणात्प्रथमो ऽपि । निमित्तप्राप्तौ नैमित्तिकोपरमाकरणे निमित्तातिक्रमः स्यादिति ॥ ४१ ॥

प्रतिषेधस्य त्वरायुक्तत्वात्तस्य च नान्यदेशत्वम् ॥ ४२ ॥

उक्तार्थे साधकतया लिङ्गमपि दर्शयति । प्रतिषेधस्येति । तस्य विवक्षितशंयुवाकस्य अन्यदेशवृत्तित्वं पत्नीसंयाजोत्तरदेशवृत्तित्वं नेष्टम् । प्रतिषेधस्य त्वरायुक्तत्वात् । अयं भावः । देवासुरा युद्धार्थे सन्नद्धाः । तत्र स्वजयाय अज्ञातेन्द्रज्ञानार्थं च प्रायणीयादीष्टीः असुरा आगमिष्यन्तीति भीत्या त्वरया समाप्यर्थं खण्डाश्चक्रुरिति ब्राह्मणे ऽर्थवादः श्रूयते । तत्र त्वरया समापनं प्रथमशंयुवाकग्रहणे स्वरसतरम् ॥ ४२ ॥

उहुपसद इत्यादिना ऽपूर्वोपसत्कर्मविधानम् । अधि० १४ ।

उपसत्सु यावदुक्तमकर्म स्यात् ॥ ४३ ॥

उपसत्सु श्रूयते । अप्रयाजास्ता अननूयाजा इति । अत्र प्रयाजानूयाजनिषेधाच्च चोदकशास्त्रं प्रवृत्तमिति सिद्धम् । तथा च निषिद्धं त्यक्त्वा

प्राकृतं यावत्कर्म कर्तव्यमित्यभिप्रायेण पूर्वपक्षमाह । उपसत्स्विति । अत्र चोदकशास्त्रेणेति प्रतिषिद्धस्येति पदद्वयं पूरणीयम् । तथा च चोदकेन उक्तं यावत् स्यात् प्रतिषिद्धस्य प्रयाजादेरकर्म अननुष्ठानम् ॥ ४३ ॥

स्त्रौवेण वा ऽगुणत्वाच् शेषप्रतिषेधः स्यात् ॥ ४४ ॥

सिद्धान्तमाह । स्रौवेणेति । उपसत्प्रकरणे यावच्छ्रुतं तदतिरिक्त-शेषप्रतिषेधः स्यात् । स्रौवेण स्रुवेण आघारमाघारयतीतिवाक्यश्रवणेन आज्यभागवचनवत् । ननु गुणविधाने चरितार्थं किं न भवेदत आह । अगुणत्वात् । अप्राकृतगुणबोधकत्वात् ॥ ४४ ॥

अप्रतिषेधो वा प्रतिषिध्य प्रतिप्रसववत् ॥ ४५ ॥

स्रुवेणाघारमित्यस्य पूर्वपक्षस्यान्यथा सार्थक्यं दर्शयति । अप्रति-षेध इति । स्रुवेणेति वाक्यं प्रतिषिध्य प्रतिप्रसवरूपम् । तथा हि नान्या-माहुतिं पुरस्ताज्जुहुयादिति उपसत्प्रधानहोमात्प्राग् होमसामान्यनि-षेधः । ततः स्रुवेणाघारमाघारयतीति अस्य प्रतिप्रसव इति न वाक्य-वैयर्थ्यमतः शेषस्याप्रतिषेधो ऽनेन वाक्येन ॥ ४५ ॥

अनिज्या वा शेषस्य मुख्यदेवतानभीज्यत्वात् ॥ ४६ ॥

सिद्धान्तं द्रढयन्, नान्यामाहुतिमित्यस्य तात्पर्यमन्यथा दर्शयति । अनिज्या वेति । शेषस्य अश्रूयमाणप्राकृतहोमानामनिज्या अकरणं स्रुवे-णाघारमाघारयतीति वाक्यवैयर्थ्यापत्तेः । ननु दर्शिता वाक्यगतिरत आह । मुख्येति । नान्यामाहुतिमित्यस्य मुख्या या अग्निसोमविष्णुरूपा देवताः तत्संप्रदानकाहुतिमध्ये आज्यातिरिक्तदेवताकाहुतेरेव प्राथम्यनिषे-धतात्पर्यकत्वात् । सूत्रे मुख्यदेवतेत्यत्र मुख्याग्निर्भिन्नदेवतार्थकं तस्या या इज्या प्रथमेज्या मुख्यदेवता ऽनभीज्या तात्पर्यं न विद्यते यस्मि-न्वाक्ये तस्वादिति सूत्रं योज्यम् । वाक्यस्यैतादृशतात्पर्यनिर्णायकबीजं तन्त्र-रत्नादवगन्तव्यं विस्तरभयान्नेह लिख्यते ॥ ४६ ॥

आग्नेयेनैककपालेनेत्यादिना ऽपूर्वस्यावभृथस्य विधानम् । अधि० १५ ।

अवभृथे बर्हिषः प्रतिषेधाच्छेषकर्म स्यात् ॥ ४७ ॥

Digitized by Google

अवभृथे अपबर्हिषः प्रयाजान्यजतीति श्रुतम् । अत्र चोदकशास्त्रं यदि प्रथमं न प्रवृत्तं तर्हि बर्हिषः प्राप्त्यभावादपबर्हिष इत्यनर्थकम् अतः चोदकशास्त्रं प्रवर्ततइत्यभिप्रायेण पूर्वपक्षमाह । अवभृथइति । शेषकर्म बर्हिर्भिन्नं प्राकृतं कर्म ॥ ४७ ॥

आज्यभागयोर्वा गुणत्वाच्छेषप्रतिषेधः स्यात् ॥ ४८ ॥

परिसंख्यापक्षमाह । आज्येति । आज्यभागयोः गुणत्वाद् गुणत्वश्रवणाद् अवभृथएवाज्यभागौ यजतीति श्रवणाच्छेषप्रतिषेधः ॥ ४८ ॥

प्रयाजानां त्वेकदेशप्रतिषेधवाक्यशेषत्वं तस्मान्नित्यानुवादः स्यात् ॥ ४९ ॥

परिसंख्यापक्षे दोषं वदन्पूर्वपक्षं संपादयति । प्रयाजानामिति । प्रयाजानामेकदेशो बर्हिः तस्य यः प्रतिषेधः तद्बोधकवाक्यस्य शेषत्वं विधित्वं, नावकल्प्यते इति शेषः, परिसंख्यापक्षे । अतः नित्यानुवादरूपता स्यात् । अयं भावः । आज्यभागौ यजतीत्यनेनेतरनिषेधे प्रयाजस्यापि निषेधः । तथा सति अपबर्हिष इति वाक्यं बर्हिष्प्रतिषेधं प्रयाजविधिं च करोतीति वाच्यम् । तथा च वाक्यं भिद्येत । मत्पक्षे चोदकशास्त्रेण प्राप्तप्रयाजानुवादेन बर्हिष्प्रतिषेधमात्रमिति लाघवम् । तस्मादाज्यभागौ यजतीति चोदकप्राप्तस्य नित्यानुवादरूप इति ॥ ४९ ॥

आज्यभागयोर्ग्रहणं नित्यानुवादो वा गृहमेधीयवत्स्यात् ॥ ५० ॥

सिद्धान्तमाह । आज्येति । अत्र वाशब्दो नञर्थे । आज्यभागग्रहणं न नित्यानुवादः । किं तु गृहमेधीयवत्स्यात् । अत्रापि यावदुक्तं, न चोदकप्रवृत्तिः । अपबर्हिष इत्यनेन बर्हिर्भिन्नप्रयाजा अपूर्वं विधीयन्त इति न को ऽपि दोषः ॥ ५० ॥

वाजपेयादौ यूपादीनां खादिरत्वादिनियमः । अधि० १६ ।

विरोधिनामेकश्रुतौ नियमः स्याद्ग्रहणस्यार्थवत्त्वाच्छरवच्च श्रुतितो विशिष्टत्वात् ॥ ५१ ॥

Digitized by Google

त्रैधातवीयायां श्रूयते । यवमयो मध्य इति । अस्यार्थः । बहूनां पुरोडाशानां मध्ये मध्यमः पुरोडाशो यवमयः कार्य इति । अत्र पक्षे प्रकृतितः प्राप्तयवानुवाद उत प्राकृतं विकल्पं बाधित्वा नियमविधिरिति संशये सिद्धान्तमाह । विरोधिनामिति । विरोधिनां प्रकृतौ विकल्पितानामेकस्य श्रुतौ नियमः स्यात् । ग्रहणस्य एकग्रहणशास्त्रस्य अर्थवत्त्वात् सफलत्वात् । श्रुतितः श्रुत्या पक्षश्रुत्या विशिष्टाः प्रबला यवाः । अतः शराः कुशानिव चोदकतः पक्षे प्राप्तान् व्रीहीन् बाधेरन् ॥ ५१ ॥

उभयप्रदेशादिति चेत् ॥ ५२ ॥

पूर्वपक्ष्याशङ्कते । उभयेति । आगतयोः द्वयोः कथमेकबाधकत्वमिति पूरणीयं सूत्रे । उभयप्रदेशात् प्रकृते व्रीहियवरूपोभयप्रदेशात् ॥ ५२ ॥

शरेष्वपीति चेत् ॥ ५३ ॥

सिद्धान्ती शरेण कुशबाधः कथमिति पृच्छति । शरेष्वपीति ॥ ५३ ॥

विरोध्यग्रहणात्तथा शरेष्वपीति चेत् ॥ ५४ ॥

पूर्वपक्षी शरस्थले उपपत्तिमाह । विरोध्यग्रहणादिति । प्रकृतौ कुशविरोधिशराणामग्रहणात्तयोर्विकल्पाभावादिति भावः । शरेषु तथा कुशबाधकत्वम् ॥ ५४ ॥

तथोत्तरस्मिन् ॥ ५५ ॥

ननु प्रकृतौ विरोध्यग्रहणं न बीजं किं तु विकृतौ विरोधिग्रहणं तच्च कुशविरोधिशरेष्विव व्रीहिविरोधियवे तुल्यमित्यभिप्रायेण सिद्धान्ती चोदयति । तथेति ॥ ५५ ॥

श्रुत्यामर्थक्यमिति चेत् ॥ ५६ ॥

ननु प्रकृतौ श्रूयमाणव्रीहिविरोधियवग्रहणेनैव व्रीहिबाधे यवमयो मध्य इतिश्रुत्यानर्थक्यमिति पूर्वपक्षी शङ्कते । श्रुतीति ॥ ५६ ॥

ग्रहणस्यार्थवत्त्वादुभयोरप्रवृत्तिः स्यात् ॥ ५७ ॥

यवमयो मध्य इत्यस्य नियमविधानरूपार्थवत्त्वाद् व्रीहियवयोरुभयोः प्रवृत्तिर्नेति समाधत्ते । ग्रहणस्येति । ग्रहणस्य यवग्रहणस्य ॥ ५७ ॥

काम्येष्टिषु प्राकृतद्रव्यदेवतस्य निवृत्तिः । अधि॰ १७ ।

सर्वासां च गुणानामर्थवत्त्वाद्ग्रहणमप्रवृत्ते स्यात् ॥ ५८ ॥

ऐन्द्राग्नमेकादशकपालं निर्वपेत् प्रजाकाम इत्यत्र प्राकृतद्रव्यदेवते निवृत्ते उत नेति संशये सिद्धान्तेनोपक्रमते । सर्वासामिति । सर्वासां काम्येष्टिसंबन्ध्युत्पत्तिचोदनानां काम्यकाण्डोत्पत्तिविधीनामिति यावत् । गुणानां देवतादीनामर्थवत्त्वात्तत्तत्फलभावनया संबद्धत्वात् । चोदकदेवताद्रव्ययोराकाङ्क्षाऽभावेनाप्रवृत्तेः । तद्ग्रहणं वैकृतद्रव्यदेवताग्रहणं स्यात् ॥ ५८ ॥

अधिकं स्यादिति चेत् ॥ ५९ ॥

समुच्चयं प्राकृतवैकृतयोराशङ्कते । अधिकमिति ॥ ५९ ॥

नार्थाभावात् ॥ ६० ॥

नेति । अर्थस्य आकाङ्क्षाया अभावात् । न समुच्चयः ॥ ६० ॥

सोमापौष्णपशौ खादिरयूपस्य नियमः । अधि॰ १८ ।

तथैकार्थविकारे प्राकृतस्याप्रवृत्तिः प्रवृत्तौ हि विकल्पः स्यात् ॥ ६१ ॥

क्व चिद् औदुम्बरो यूपो भवतीति । तत्र खादिरौदुम्बरयोः समुच्चय उत प्राकृतबाध इति संशये सिद्धान्तमाह । तथेति । यथा पूर्वाधिकरणे प्राकृतदेवताबाधस्तथा एकार्थविकारे एकफलकप्राकृतखादिरद्रव्यविरुद्धौदुम्बरद्रव्यविधौ सति प्राकृतस्य खादिरस्याप्रवृत्तिः । प्रवृत्तावनिष्टमाह । प्रवृत्तौ विकल्पापत्तेः ॥ ६१ ॥

यावच्छ्रुतीति चेत् ॥ ६२ ॥

विकल्पदोषमुद्धरति पूर्वपक्षी । यावच्छ्रुतीति । चोदकश्रुतं प्रत्यक्षश्रुतं द्वयं ग्राह्यं, तथा च न विकल्प इति भावः ॥ ६२ ॥

न प्रकृतावशब्दत्वात् ॥ ६३ ॥

दूषयति । प्रकृताविति । विकृतावित्यस्याप्युपलक्षणम् । इत्थं च प्रकृतौ विकृतौ च अशब्दत्वात् । अविहितत्वात् । प्रकृतौ खादिरे पशुनि-

योजनं विहितं, विकृतौ औदुम्बरे, उभयत्र नियोजनं शास्त्रद्वयविरुद्धमिति भावः ॥ ६३ ॥

ब्रह्मवर्चसकामैर्व्रीहिभिरेव यागः । अधि० १६ ।

विकृते त्वनियमः स्यात्पृषदाज्यवद्ग्रहणस्य गुणार्थत्वादुभयोश्च प्रदिष्टत्वाद्गुणशास्त्रं यदेति स्यात् ॥ ६४ ॥

अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणामिति श्रुतम् । अत्र व्रीहिभिरेव यागः उत व्रीहियवान्यतरेणेति संशये पूर्वपक्षमाह । विकृते इति । विकृतौ विरोधिनामन्यतरस्मिन् गृह्यमाणे अनियमः व्रीहियवयोः स्यात् । प्रकृतवाक्ये ग्रहणस्य व्रीहिग्रहणस्य गुणार्थत्वात् । कृष्णरूपगुणविध्यर्थत्वात् । यथा पृषदाज्येनानूयाजान्यजतीत्यत्राज्यग्रहणं गुणविध्यर्थं तथा व्रीहिग्रहणस्य नियमार्थत्वाभावात् । उभयोर्व्रीहियवयोः प्रदिष्टत्वात् । चोदकशास्त्रेण प्राप्तत्वात् । गुणशास्त्रं कृष्णानां व्रीहीणामिति शास्त्रं यदा यस्मिन्काले व्रीहिशास्त्रं तदा स्यात् । यवशास्त्रप्रवृत्तौ बाधाच्च प्रवर्ततइति भावः ॥ ६४ ॥

ऐकार्थ्याद्वा नियम्येत श्रुतितो विशिष्टत्वात् ॥ ६५ ॥

सिद्धान्तमाह । ऐकार्थ्यादिति । ऐकार्थ्यात् पुरोडाशरूपैककार्यार्थं प्रवृत्तयोः व्रीहियवयोर्मध्ये श्रुतितः प्रत्यक्षश्रवणेन विशिष्टत्वात् । आनुमानिकयवशास्त्रप्राप्तयवापेक्षया बलवत्त्वात् । नियम्येत । व्रीहीणामयोगव्यवच्छेदं कुर्यात् । ननु व्रीहीणामनुवादो गुणार्थमित्युक्तं प्राक् । तथा च तद्विधेरभावात् तद्विधिः प्रत्यक्ष इति कथनं संदर्भविरुद्धमिति चेन्न । फलोद्देशेन यागविधिः तत्रैव व्रीह्युद्देशेन गुणविधौ वाक्यं भिद्यते । तस्माद्गुणद्रव्यविशिष्टयागविधिरित्येव वाच्यम् । तथा च न काऽप्यनुपपत्तिर्नियमविधौ व्रीहिनियमे यवा वर्तन्तएव ॥ ६५ ॥

विरोधित्वाच्च लोकवत् ॥ ६६ ॥

साधकान्तरमाह । विरोधित्वादिति । एकस्मिन्कार्ये ये कल्पेन साधकाः ते परस्परं विरोधिनः तेषां न सह प्रवृत्तिः विरोधित्वात् । लोकव्यवहारो दृष्टान्तः ॥ ६६ ॥

Digitized by Google

ऋतोश्च तद्गुणत्वात् ॥ ६७ ॥

ननु व्रीहीणां विकारेण संबन्धे कथं गुणेनापि संबन्धः । विरुद्ध-त्रिकद्वयापत्तेरत आह । ऋतोरिति । प्राथमिकबोधवेलायां कृष्णत्वं न व्रीहिगुणः प्रतीयते निखिलगुणविशिष्टक्रतुविधानात् । क्रतोः तद्गुणत्वा-सः कृष्णत्वं गुणः विशेषणं यस्य तत्त्वात् । व्रीहिगुणताबोधश्च पार्ष्ठिक इति नोक्ताशङ्कावकाश इति भावः* ॥ ६७ ॥

पृषदाज्ये समुच्चयाद् ग्रहणस्य गुणार्थत्वम् ॥ ६८ ॥

ननु पृषदाज्यस्थले ऽपि आज्यग्रहणं गुणार्थं न स्यादत आह । पृषदाज्यइति । पृषदाज्ये दधिघृतयोः समुच्चयात् । उक्तवैषम्येण ग्रहणस्य आज्यग्रहणस्य गुणार्थत्वम्† ॥ ६८ ॥

ऋत्वन्तरे वा ऽतन्न्यायत्वात्कर्मभेदात् ॥ ६९ ॥

ननु यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्येत्यत्र उक्तयुक्त्या चतुरवत्तिग्रहणं गुणार्थं न स्यादित्यत आह । ऋत्वन्तरइति । ऋत्वन्तरे दर्शपूर्णमासयोश्चतुरवत्तं पञ्चावत्तं च ऋत्वन्तरे पशौ उभयोः कर्मभेदात् । अतन्न्यायत्वात् । विरोधित्वाच्च लोकवदिति न्यायस्या प्रसरात् ॥ ६९ ॥

पञ्चावत्तैव वपा कार्येत्यनेनाङ्गेष्वपि पञ्चावत्तविधानम् । अधि॰ २० ।

यथाश्रुतीति चेत् ॥ ७० ॥

चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्येति । अत्र वपायामेव पञ्चावत्तत्वमुत अङ्गहोमे ऽपीति संशये पूर्वपक्षमाह । यथेति । वपायामेव पञ्चावत्तश्रवणाद् यथाश्रुति कार्यमिति ॥ ७० ॥

न चोदनैकत्वात् ॥ ७१ ॥

सिद्धान्तमाह । नेति । चोदनैकत्वात् । यदग्नीषोमीयं पशुमालभ-तइत्येकचोदनाविहितयागरूपत्वाद्दुपाङ्गयागयोः । अयं भावः । पञ्चा-

* इत उत्तरं, विरोधिनां च तच्छ्रुतावशब्दत्वाद्विकल्पः स्यात्, इति सूत्रं शाब-रभाष्ये ऽधिकं दृश्यते ।

†. यद्यपि चतुरवत्तीति तु नियमे नोपपद्यते इति शाबरभाष्यपुस्तके सूत्रत्वे-नाधारि ।

Digitized by Google

वत्सैव वपा कार्येत्यत्र न संख्याविशिष्टवपासंबन्ध्यवदानं विधीयतइति शक्यते वक्तुम् । अवदानस्य प्रकृतितः प्राप्तत्वात् । नापि वपासंबन्ध्यवदानमुद्दिश्य पञ्चसंख्या विधातुं शक्यते, विशिष्टोद्देश्यत्वे वाक्यभेदप्रसङ्गात् । अतः केवलावदानमुद्दिश्य पञ्चसंख्याविधिः । प्रकरणात्प्रकृतयागसंबन्धीति लब्धम् । प्रकृतौ यो यदग्नीषोमीयमित्यनेन विहितो यागः तत्संबन्ध्यवदानं पञ्चावत्तं संपादयेदिति फलितम् । यदग्नीषोमीयवाक्यविहितयागस्याभ्यासरूपो वपायागो ऽङ्गयागश्च । तस्माद्वपायागे ऽङ्गयागे च पञ्चावत्तमिति । एवकारस्य वपापदस्योच्चारणफलमाकरे ज्ञेयम् । विस्तरभयान्नेह लिख्यते ॥ ७१ ॥

इति जैमिनिसूत्रवृत्तौ दशमस्याध्यायस्य सप्तमः पादः ॥ ७ ॥

प्रदेशानारभ्यविधानयोर्निषेधस्य पर्युदासत्वम् । अधि॰ १ ।

प्रतिषेधः प्रदेशे ऽनारभ्यविधाने प्राप्तप्रतिषिद्धत्वाद्विकल्पः स्यात् ॥ १ ॥

अस्मिन्पादे नञर्थविचारः प्राधान्येन क्रियते । महापितृयज्ञे नार्षेयं वृणीतइति । एवमनारभ्य यजतिषु येयजामहं करोति नानूयाजेष्विति । अत्र विकल्प एककल्पो वेति संशये पूर्वपक्षमाह । प्रतिषेध इति । प्रतिषेधः प्रदेशे पितृयज्ञसमोपे प्रदेशेन चोदकेनेति यावत् । आर्षेयवरणविधाने अनारभ्य पठिते यजतिष्विति वाक्ये येयजामहविधाने द्वाभ्यां प्रत्यक्षातिदेशशास्त्राभ्यां प्राप्तस्य प्रतिषिद्धरूपत्वाद्विकल्पः स्यात् ॥ १ ॥

अर्थप्राप्तवदिति चेत् ॥ २ ॥

एतत्पक्षोपरि अत्यन्तबाधं शङ्कते । अर्थेति । अर्थेन रागेण प्राप्ते अर्थे यथा निषेधो बाधकः यथा न कलञ्जं भक्षयेदिति तद्वदिति ॥ २ ॥

न तुल्यहेतुत्वादुभयं शब्दलक्षणम् ॥ ३ ॥

इमं पक्षं दूषयति । नेति । उभयं प्रवृत्तिनिवृत्तिरूपं शब्दलक्षणं शब्दप्रमाणकं तुल्यम् । इदं तुल्यहेतुत्वादित्यस्य विवरणरूपम् । तत्र प्रवृत्तौ रागः दुर्बलः निवृत्तौ शब्द इति युक्तो ऽत्यन्तबाध इति भावः ॥ ३ ॥

Digitized by Google

अपि तु वाक्यशेषः स्यादन्याय्यत्वाद्विकल्पस्य विधीनामेकदेशः स्यात् ॥ ४ ॥

सिद्धान्तमाह । अपि त्विति । न विकल्पः विकल्पस्यान्याय्यत्वादष्टदोषदुष्टत्वात् । अपि तु वाक्यशेषः सन् एकवाक्यतापन्नः सन् विध्येकदेशः । आर्षेयवरणभिन्नं प्रकृतिवत्कार्यमनूयाजातिरिक्तेषु ये यजामहइति वाच्यमिति ॥ ४ ॥

न तौ पशौ करोतीत्यादिनिषेधस्यार्थवादत्वम् । अधि २ ।

अपूर्वे चार्थवादः स्यात् ॥ ५ ॥

आज्यभागौ प्रकृत्य श्रुतं, न तौ पशौ करोति न सोमे ऽध्वरइति । अस्मिन् वाक्ये न सोमे ऽध्वरइति वाक्यं न तौ पशौ करोतीति विधिशेषो ऽर्थवादः न पर्युदासो न वा प्रतिषेध इत्यभिप्रायेण सिद्धान्तमाह । अपूर्वे इति । अपूर्वे केनापि प्रमाणेन प्राप्त्यभावे यो निषेधः सो ऽर्थवादः स्यात् सोमे आज्यभागप्रापकप्रमाणाभावाद् अर्थवादत्वम् ॥ ५ ॥

नातिरात्रे षोडशिनमिति निषेधस्य विकल्परूपत्वम् । अधि॰ ३ ।

शिष्ट्वा तु प्रतिषेधः स्यात् ॥ ६ ॥

प्रथमाधिकरणेन अर्थपर्युदासस्वरूपं विधीनामेकदेश इत्यनेन दर्शितं, द्वितीये ऽर्थवाद इत्युक्तम् । तृतीये प्रतिषेधस्वरूपमाह । शिष्ट्वेति । प्रमाणान्तरेण प्राप्त्यनन्तरं यः नञर्थः स प्रतिषेधः । यथा ऽतिरात्रे षोडशिनं गृह्णाति नातिरात्रइति ॥ ६ ॥

अनाहुतिर्वै जर्तिलाश्चेत्यादिनिषेधस्यार्थवादत्वम् । अधि॰ ४ ।

न चेदन्यं प्रकल्पयेत्प्रक्लृप्तावर्थवादः स्यादानर्थक्यात्परसामर्थ्यात् ॥ ७ ॥

अग्निचयने श्रूयते, जर्तिलयवाग्वा वा जुहुयाद्गवीधुकयवाग्वा वा न ग्राम्यान्पशून्हिनस्ति नारण्यानथो खल्वाहुरनाहुतयो वै जर्तिलाश्च गवीधुकाश्चेत्यजक्षीरेण जुहोतीति जर्तिलयवाग्वादीनां विधिनिन्दाश्रवणेन पूर्वाधिकरणवद्विकल्पे प्राप्ते सिद्धान्तमाह । न चेदिति । अन्य-

विधेयं न विन्देच्चेद् न कल्पयेच्चेद् विकल्पो भवेत् । प्रकृतौ अजक्षीरविधिप्रकृप्तौ तच्छेषो ऽर्थवादः स्यात् । परद्रव्यविधानसामर्थ्याद्विकल्पे व्रीहियववत्सिद्धे आनर्थक्याद् निषेधो व्यर्थः स्यादन्यथा ॥ ७ ॥

त्रैयम्बकादावभिघारणानभिघारणादीनामर्थवादत्वम् । अधि. ५ ।

पूर्वैश्च तुल्यकालत्वात् ॥ ८ ॥

आधाने होतव्यमग्निहोत्रं न होतव्यमित्यत्र पूर्वन्यायमतिदिशति । पूर्वैरिति । पूर्वैः पूर्वन्यायैः तुल्यकालत्वात् । तुल्ययोगक्षेमत्वात् ॥ ८ ॥

आधाने उपवादस्य विकल्पत्वम् । अधि· ६ ।

उपवादश्च तद्वत् ॥ ९ ॥

उपवीता वा एतस्याग्नयो भवन्ति यस्याग्न्याधेये ब्रह्मा सामानि गायतीति । तत्र ब्रह्मपदमुख्यार्थस्य गानप्राप्त्यभावाविधासम्भवाद्ब्रह्म जानातीति योगेनोद्गातुर्गाननिषेधाद्गानविधानाच्च शिष्टा तु प्रतिषेधः स्यादिति न्यायमतिदिशति । उपेति । उपवादः उपवीता इति वाक्यप्रतिपादितो वादः । तद्वद्व्रीहियववत् ॥ ९ ॥

प्रतिषेधादकर्मेति चेत् ॥ १० ॥

प्रतिषेधादिति । स्पष्टम् ॥ १० ॥

न शब्दपूर्वत्वात् ॥ ११ ॥

नेति । शब्दपूर्वत्वाद्विधिविहितत्वात् । रथन्तरमभिगायते गार्हपत्यआधीयमानइति ॥ ११ ॥

दीक्षितो न ददातीत्यादिनिषेधस्य पर्युदासत्वम् । अधि· ७ ।

दीक्षितस्य दानहोमपाकप्रतिषेधे ऽविशेषात्सर्वदानहोमपाकनिषेधः स्यात् ॥ १२ ॥

दीक्षितो न ददाति न जुहोति न पचतीत्यत्र विशेषाश्रवणात्सर्वदानादिनिवृत्तिरित्यभिप्रायेण पूर्वपक्षमाह । दीक्षितेति । स्पष्टम् ॥ १२ ॥

Digitized by Google

अक्रतुयुक्तानां वा धर्मः स्यात् क्रतोः प्रत्यक्ष-शिष्टत्वात् ॥ १३ ॥

पक्षान्तरमाह । अक्रत्विति । क्रतुसंयुक्ता ये दानादयः आत्रेयाय हिरण्यं ददाति दाक्षिणानि जुहोतीत्यादयः तद्भिन्ना ये पुरुषार्थाः अग्नि-होत्रादयः तेषां निषेधो धर्मः स्यात् । अन्यथा क्रतोः क्रत्वर्थस्य प्रत्यक्ष-शिष्टत्वाद् विहितत्वात् तस्य वैयर्थ्यं स्यादिति भावः ॥ १३ ॥

तस्य वा ऽप्यानुमानिकमविशेषात् ॥ १४ ॥

पक्षान्तरमाह । तस्येति । तस्य निषेधशास्त्रस्य विषयः आनुमानिकं दीक्षणीयादिषु चोदकप्राप्तप्रयाजादिकम् अपिशब्दादग्निहोत्रादि उभ-योरविशेषात् ॥ १४ ॥

अपि तु वाक्यशेषत्वादितरपर्युदासः स्यात् प्रतिषेधे विकल्पः स्यात् ॥ १५ ॥

सिद्धान्तमाह । अपि त्विति । न पूर्वपक्षाः अपि तु अहरहर-ग्निहोत्रं जुहोतीत्यत्र अदीक्षितेन होतव्यमिति पर्युदासः । वाक्यशेष-त्वाद्विधिवाक्यशेषत्वात् । प्रतिषेधे विकल्पापत्तेः ॥ १५ ॥

वर्त्महोमादिभिराहवनीयस्य बाधः । अधि० ८ ।

अविशेषेण यच्छास्त्रमन्याय्यत्वाद्विकल्पस्य तत्संदिग्धमाराद्विशेषशिष्टं स्यात् ॥ १६ ॥

यदाहवनीये जुहोतीति सामान्यशास्त्रं सप्तमे पदे जुहो-तीति विशेषशास्त्रम् अनयोर्ज्योतिष्टोमे होमार्थत्वेन युगपत्प्राप्तौ एका-र्थत्वाद्विकल्प इति पूर्वपक्षे सिद्धान्तमाह । अविशेषेणेति । सामान्यविशे-षशास्त्रसंनिपाते विशेषेण शिष्टं यत्तदेव स्यात् । अविशेषेण सामान्यतः यच्छास्त्रमाहवनीयशास्त्रं तदाराद्दूरम् । अतः तत्र प्रवर्तत इति फलितम् । अतः संदिग्धं सामान्यशास्त्रं यावद्विषयं यत्किञ्चिद्विषयं वेति । ननु विशे-षेण सामान्यस्यात्यन्तबाधात् पक्षे बाध एव युक्तो ऽत आह । विकल्प-स्यान्याय्यत्वात् । बहुदोषत्वात् ॥ १६ ॥

वैमधादिषु साप्तदश्यविधेर्वाक्यशेषत्वम् । अधि० ९ ।

अप्रकरणे तु यच्छास्त्रं विशेषे श्रूयमाणमविकृतमाज्यभागवत् प्रकृतप्रतिषेधार्थम् ॥ १७ ॥

अनारभ्य श्रूयते, सप्तदश सामिधेनीरन्वाहेति । अध्वरकल्पां प्रकृत्य पुनस्तथैव श्रूयते । तत्प्रकरणे पाठस्य वैयर्थ्यभिया गृहमेधीयाज्यभागवत्प्राकृताङ्गनिवर्तकमिति पूर्वपक्षमाह । अप्रकरणइति । अप्रकरणे यच्छास्त्रं साप्तदश्यशास्त्रं तदेव विशेषे प्रकरणविशेषे अध्वरकल्पादौ श्रूयमाणमविकृतम् अविलक्षणं चेत् प्राकृतानां प्रतिषेधार्थमाज्यभागविधिवत्* ॥ १७ ॥

वाक्यशेषो वा क्रतुना ग्रहणात्स्यादनारभ्यविधानस्य ॥ १८ ॥

सिद्धान्तमाह । वाक्येति । प्रकरणपठितवाक्यशेषः उभयं मिलित्वैकमेवार्थं ब्रूतइति फलितम् । ननु द्वयोरप्यविलक्षणार्थबोधकत्वेनान्यतरवैयर्थ्यमत आह । अनारभ्यविधानस्येति । क्रतुना सह संबन्धाग्रहणात् । अयं भावः । विधीयमानसाप्तदश्यस्य क्रतुसंबन्धः सामिधेनीसंबन्धो ऽपि ग्राह्यः तत्र प्राकरणिकवाक्यं क्रतुसंबन्धबोधकमपरवाक्यं सामिधेनीसंबन्धबोधकमिति न वैयर्थ्यमिति । इतो विस्तरः तन्त्ररत्ने सोमनाथीये च द्रष्टव्यः ॥ १८ ॥

पृथिव्यै स्वाहेत्यादिविधिना ऽविहितस्वाहाकारेषु प्रदानेषु स्वाहाकारविधानम् । अधि० १० ।

मन्त्रेष्ववाक्यशेषत्वं गुणोपदेशात्स्यात् ॥ १९ ॥

अनारभ्यश्रुतं, स्वाहाकारेण देवेभ्यो ऽन्नं ददातीति । क्व चित्प्रकरणे पृथिव्यै स्वाहेति श्रुतं तत्र पूर्वन्यायेन यत्र स्वाहाकारान्तो मन्त्रः श्रुतः तत्रानारभ्याधीतवाक्यस्योपसंहार इति पूर्वपक्षे सिद्धान्तमाह । मन्त्रेष्विति । अवाक्यशेषत्वं नोपसंहारः गुणोपदेशात् । वर्णानुपूर्वी-

* इत उत्तरं, विकारे तु तदर्थं स्यादिति सूत्रमधिकं शाबरभाष्ये दृश्यते ।

Digitized by Google

रूपगुणोपदेशात् । अयं भावः । पूर्वाधिकरणे वाक्यवैयर्थ्यभिया तथा कल्पितम् । अत्र मन्त्रे स्वाहाकारपाठस्य स्वाहा पृथिव्यामिति विपरीत-क्रमनिवर्तकत्वेन सफलत्वादिति ॥ १९ ॥

अनाम्नाते दर्शनात् ॥ २० ॥

उक्तार्थे साधकमाह । अनाम्नातइति । अनाम्नाते अपठितस्वाहाकारे ऽपि दर्शनात् । विधानात् । घृतेन द्यावापृथिवी आपृणेथामित्यौदुम्बर्यां जुहोतीत्युक्त्वा भूमिप्राप्ते घृते स्वाहा करोतीति । यदि पठितमन्त्रे उपसंहारस्तदा ऽत्र विधानमसंगतम् ॥ २० ॥

प्रतिषेधाच्च ॥ २१ ॥

प्रतिषेधादिति । क्वचित् स्वाहा करोतीति प्रतिषेधो वर्तते । स उपसंहारपक्षे व्यर्थः अतो नोपसंहारः ॥ २१ ॥

अग्न्यतिग्राह्यस्य विकृतावुपदेशः । अधि० ११ ।

अग्न्यतिग्राह्यस्य विकृतावुपदेशादप्रवृत्तिः स्यात् ॥ २२ ॥

अथातो ऽग्निष्टोमेन यजेत तं द्विरात्रेणेति । एवं पृष्ठ्ये ऽतिग्राह्या गृह्यन्तइति । अत्र पूर्वपक्षमाह । अग्न्यतीति । अग्न्यतिग्राह्ययोः विकृतौ द्विरात्रादिषु उपदेशात्पाठात् । अग्न्यतिग्राह्यविषयचोदकशास्त्रस्याप्रवृत्तिः ॥ २२ ॥

मासिग्रहणं च तद्वत् ॥ २३ ॥

क्वचिन्मासि मास्यतिग्राह्या गृह्यन्तइति श्रुतम् । तदपि तद्वत् प्राकृतनिवर्तकम् ॥ २३ ॥

ग्रहणं वा तुल्यत्वात् ॥ २४ ॥

सिद्धान्तमाह । ग्रहणमिति । इतराङ्गवदनयोरपि चोदकशास्त्रेण ग्रहणं तुल्यत्वात् ॥ २४ ॥

लिङ्गदर्शनाच्च ॥ २५ ॥

लिङ्गेति । इदं च लिङ्गं कङ्कचितं चिन्वीत यः कामयेत शीर्षण्वानमुष्मिँल्लोके स्यामिति । यथा पञ्चेन्द्रानतिग्राह्यान्गृह्णातीति कङ्का-

कारतामैन्द्रतां च ब्रुवन् आन्यतियाह्रयोः विकृतौ प्राप्तिं दर्शयति ॥ २५ ॥

ग्रहणं समानविधानं स्यात् ॥ २६ ॥

ननु विकृतावुपदेशो व्यर्थो ऽत आह । ग्रहणमिति । ग्रहणं विकृतौ स्वातन्त्र्येण विधानं समानविधानं ज्योतिष्टोमे यथा तथैव द्विरात्रइति । अयं भावः । यदि ज्योतिष्टोमे विधाय द्विरात्रे स्वातन्त्र्येण विधानं न स्यात्तदा छन्दश्चितं चिन्वीत पशुकाम इत्यादिगुणफलसंबन्धविधीनामप्रवृत्तिः स्यात् । गुणफलसंबन्धविधीनामतिदेशो नास्तीति पूर्वमभिहितत्वात् । यदि ज्योतिष्टोमसमानविधिर्द्विरात्रे तदा पशुकामविधीनां प्रवृत्तिरिति तदर्थमुपदेश इति ॥ २६ ॥

मासिग्रहणमभ्यासप्रतिषेधार्थम् ॥ २७ ॥

मासिग्रहणमिति । अभ्यासप्रतिषेधार्थं प्रत्यहं नाभ्यासः किं तु मासि मासीत्येतदर्थम् ॥ २७ ॥

उपस्तरणाभिघारणाभ्यां सहैव चतुरवदानम् । अधि० १२ ।

उत्पत्तितादर्थ्याच्चतुरवत्तं प्रधानस्य होमसंयोगादधिकमाज्यमतुल्यत्वाल्लोकवदुत्पत्तेर्गुणभूतत्वात् ॥ २८ ॥

दर्शपूर्णमासयोः श्रूयते, चतुरवत्तं जुहोतीति । अत्र पूर्वपक्षमाह । उत्पत्तीति । उत्पत्तेः पुरोडाशोत्पत्तेः तादर्थ्याद् होमार्थत्वात् प्रधानस्य पुरोडाशस्य चतुरवत्तं कर्तव्यम् । प्रधानस्य चतुरवदानसंस्कृतस्य होमसंयोगात् । होतव्यस्यैव चतुरवत्तदानं सिद्धमिति भावः । आज्यं त्वतुल्यत्वात्पुरोडाशेन अधिकं चतुरवत्तादधिकं तदुत्पत्तेः उपस्तरणाभिघारोत्पत्तेर्गुणभूतत्वात्पुरोडाशसंस्काररूपत्वात् । अयमतुल्यत्वे हेतुः लोकवत् । यथा लोके चैत्रः प्रस्थं भुङ्क्ते इति मांसमवस्य शाकादिकमधिकं तद्वत् ॥ २८ ॥

तत्संस्कारश्रुतेश्च ॥ २९ ॥

Digitized by Google

गुणभूतत्वादित्युक्तं तत्र प्रमाणमाह । तत्संस्कारेति । तस्य पुरोडाशस्य संस्कारश्रुतेः यदुपस्तृणात्यभिघारयत्यमृताहुतिमेवैनां करोतीति श्रुतिः ॥ २९ ॥

ताभ्यां वा सह स्विष्टकृतः सहत्वे द्विरभिघारणेन तदाप्तिवचनात् ॥ ३० ॥

सिद्धान्तमाह । ताभ्यामिति । ताभ्यामुपस्तरणाभिघाराभ्यां सह चतुरवत्तं स्विष्टकृत्प्रकरणे सकृत्सकृदवद्यतीति पुरोडाशात्सकृदवदानं विधाय द्विरभिघारयतीति विधिफलं चतुरवत्तस्याप्त्याइति तदाप्तिः चतुरवत्ताप्तिस्तस्य वचनाच्च श्रवणात् ॥ ३० ॥

तुल्यवच्चाभिधाय सर्वेषु भक्त्यनुक्रमात् ॥ ३१ ॥

गमकान्तरमाह । तुल्यवदिति । चत्वारि वा एतानि देवदधान्यवदानानि यदुपस्तृणाति तदनुवाक्यायै यत्पूर्वमवदानं तद्याज्यायै यदुत्तरं तद्देवतायै तदभिघारयतीति तद्वषट्कारायेति । अत्र तुल्यवदवदानान्यभिधाय सर्वेषु भक्त्यनुक्रमात् तत्तद्भागानुक्रमात् ॥ ३१ ॥

उपांशुयागे ऽपि चतुरवत्तस्यावश्यकत्वम् । अधि॰ १३ ।

साप्तदश्यवन्नियम्येत ॥ ३२ ॥

चतुरवत्तं जुहोतीति श्रुतम् । तत्कथं कर्तव्यमिति जिज्ञासायां सकृदुपस्तृणाति द्विरादधाति सकृदभिघारयतीति कथंभावाकाङ्क्षापरिपूरकं सत्तदेकवाक्यतापन्नम् । उपांशुयागे ऽस्याप्रसक्त्या यत्र पुरोडाशः सान्नाय्यं वा तत्रैव साप्तदश्यनियमवच्चतुरवत्तनियम इति पूर्वपक्षमाह । साप्तेति । स्पष्टम् ॥ ३२ ॥

हविषो वा गुणभूतत्वात्तथाभूतविवक्षा स्यात् ॥ ३३ ॥

सिद्धान्तमाह । हविष इति । हविषो गुणभूतत्वाद् विधेयत्वात् । तथाभूता होमसामान्ये चतुरवत्तहविषो गुणत्वविवक्षा स्यात् । अयं भावः । यदि अवदानमुद्दिश्य चतुःसंख्याविधिर्भवेत् तदा कथं चतुष्ट्वसंपादनमित्याकाङ्क्षा भवेत् । तदेव न । सकृदुपस्तृणातीत्यपूर्वोक्तवाक्यैः

Digitized by Google

प्राप्तं यच्चतुरवदानं तत्संस्कारविशिष्टद्रव्यस्यैव होमोद्देशेन विधानाच पूर्वपक्षसिद्धिरिति ॥ ३३ ॥

दर्शपूर्णमासयोराग्नेयैन्द्राग्नयोरनुवादत्वम् । अधि॰ १४ ।

पुरोडाशाभ्यामित्यधिकृतानां पुरोडाशयोरुपदेशस्तच्छ्रुतित्वाद्वैश्यस्तोमवत् ॥ ३४ ॥

पुरोडाशाभ्यामेवासोमयाजिनं याजयेद्याविताबाग्नेयश्चैन्द्राग्नश्च सान्नायेन तु सोमयाजिनमिति । अत्र नानापक्षानुत्थापयन् प्रथमपक्षमाह । पुरोडाशेति । पुरोडाशाभ्यामित्यनेन अधिकृतानामसोमयाजिनां पुरोडाशयोः उक्तयोः उपदेशः विधिः तच्छ्रुतित्वात् । असोमयाजिनं स्वर्गकाममित्यधिकारिविशेषणतया श्रुतत्वात् । यथा वैश्यं वैश्यस्तोमेन याजयेदिति तद्वत् । तथा च सोमयाजिभिन्नस्वर्गकामं पुरोडाशाभ्यां याजयेदिति सिद्धम् । नित्यदर्शपूर्णमासे नायं नियम इति भावः ॥ ३४ ॥

न त्वनित्याधिकारो ऽस्ति विधेर्नित्येन संबन्धस्तस्माद्वाक्यशेषत्वम् ॥ ३५ ॥

प्रथमपक्षं दूषयन् द्वितीयमुत्थापयति । न त्विति । यतः नानित्याधिकारो ऽस्ति न स्वर्गकामाधिकारो ऽस्ति अतः विधेर्नित्यप्रयोगेणैव संबन्धः । तस्मात्फलवाक्येन संबन्धाभावात्तद्वाक्यशेषत्वं न संभवति ॥ ३५ ॥

सति न चैकदेशेन कर्तुः प्रधानभूतत्वात् ॥ ३६ ॥

एवं फलाधिकाराभावादधिकारिविशेषणं दूषयित्वा प्रकारान्तरेण दूषयति । सतीति । सति तथा सति अधिकारिविशेषणत्वइति फलितम् । अधिकारिणः प्रधानत्वेन तद्विशेषणस्य असोमयाजिनः कर्तुरपि प्राधान्यात्पुरोडाशावुद्दिश्य सोमयाजिकर्तुः संबन्धो नोपपद्यते । ननु मा ऽस्तु पुरोडाशावुद्दिश्य कर्तृसंबन्धविधिः किं तु असोमयाज्यभिन्नकर्तृकफलमुद्दिश्यैव पुरोडाशविधिरास्तामत आह । न चेति । एकदेशेन दर्शपूर्णमासपदवाच्यैकदेशेन यागद्वयेन सह फलसंबन्धः संभवतीति पूरणीयम् । षड्भिर्मिलित्वैव फलजननादिति भावः ॥ ३६ ॥

Digitized by Google

कृत्स्नत्वात्तु तथा स्तोमे ॥ ३७ ॥

वैश्यस्तोमवैषम्यमाह । कृत्स्नत्वादिति । स्तोमे वैश्यस्तोमे कृत्स्नत्वात् । संपूर्णत्वाद्वैश्याभिन्नकर्तृकफले स्तोमसंबन्धो युक्तः । तस्मादत्रासोमयाजिकर्तृकपुरोडाशद्वयकरणकयागो ऽपूर्वो विधीयतइति द्वितीयपक्षाभिप्रायः ॥ ३७ ॥

कर्तुः स्यादिति चेत् ॥ ३८ ॥

अपूर्वकर्मविधौ एवकारवैयर्थ्यं चिन्तयन् पक्षान्तरं वदति । कर्तुरिति । कर्तुः गौणकर्तुः ऋत्विजो विधिः स्यात् ॥ ३८ ॥

न गुणार्थत्वात्प्राप्ते न चोपदेशार्थः ॥ ३९ ॥

दूषयति । नेति । गुणार्थत्वात् । कर्मानुष्ठानार्थमाध्वर्यवादिसमाख्यया प्राप्तत्वात् । उपदेशे पुनरुपदेशे ऽर्थः प्रयोजनं न च । तस्मात्कर्मान्तरमेवेति ॥ ३९ ॥

कर्मणोस्तु प्रकरणे तन्न्यायत्वाद्गुणानां लिङ्गेन कालशास्त्रं स्यात् ॥ ४० ॥

पक्षान्तरमाह । कर्मणोरिति । कर्मणोः पुरोडाशयागयोः प्रकरणे लिङ्गेन असोमयाजिपदप्रयोगरूपलिङ्गेन लक्षितं कालशास्त्रं स्यात् । तन्न्यायत्वात् । अपि वा कालशास्त्रं स्यात् प्रदर्शनाद्विशेषस्येतिन्यायवत्त्वात् ॥ ४० ॥

यदि तु सान्नाय्यं सोमयाजिनो न ताभ्यां समवायो ऽस्ति विभक्तकालत्वात् ॥ ४१ ॥

कालविधिपक्षे दूषणमाह । यदीति । यदि तु साज्ञायं सोमयाजिनः तर्हि सोमयाजिनः ताभ्यां पुरोडाशाभ्यां समवायः संबन्धो न । कुतः, साज्ञायपुरोडाशयोः विभक्तकालत्वात् । अतः अर्थात् पुरोडाशयोः पूर्वकालः सिद्धः न विधातुं शक्यः । तस्मदर्तातिरिक्तं कर्मेति भावः ॥ ४१ ॥

अपि वा विहितत्वाद्गुणार्थायां पुनः श्रुतौ संदेहे श्रुतिर्हि देवताऽर्था स्याद्यथा ऽनभिप्रेतस्तथा ऽऽग्नेयो दर्शनादेकदेवते ॥ ४२ ॥

पक्षान्तरमाह। अपि वेति। विहितत्वात्। आग्नेयस्य दर्शपूर्णमासयोरुभयत्र विहितत्वात्। गुणार्थायां देवतारूपगुणार्थायां पुनः श्रुतौ पुनः श्रुतिः किमर्थमिति संदेहे द्विदेवतार्था पौर्णमास्यामैन्द्राग्नदेवतार्था स्यात्। एकदेवते अग्नौ अनभिप्रेतः यथा ऽऽग्नेयो ऽनभिप्रेतः केवलमनुवादरूपस्तथा क्व चिद्दर्शनात्। यथा यदाग्नेयो ऽष्टाकपालो ऽमावास्यायां भवत्यैन्द्रं दधीति तद्वत्सकृतौ आग्नेयमनूद्य पौर्णमास्यामैन्द्राग्नविधिरिति भावः॥ ४२॥

विधिं तु बादरायणः॥ ४३॥

अत्रापि पक्षे एवकारवैयर्थ्यभिया पक्षान्तरमाह। विधिमिति। विधिं कालविधिं बादरायणः मनुते॥ ४३॥

प्रतिषिद्धविज्ञानाद्वा॥ ४४॥

सोमयाजिनं सान्नाय्येन याजयेदिति विधिनैव पूर्वं पुरोडाशमात्रं न सान्नाय्यमिति सान्नाय्यप्रतिषेधज्ञानाच्च कालविधिः। सर्वो ऽप्यनुवादरूपः सन् सान्नाय्यविधिशेषो ऽर्थवादः॥ ४४॥

तथा चान्यार्थदर्शनम्॥ ४५॥

उक्तार्थे साधकमाह। तथा चेति। अन्यार्थेन अन्यप्रमाणेन तद्दर्शनं तन्निर्णयः। चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामिति। आहवनीये चतुरवत्ताहुतयः पौर्णमास्यां चतुर्दश, पञ्च प्रयाजा द्वे आज्यभागाहुती प्रधानत्रयं स्विष्टकृत्त्रयो ऽनूयाजाश्चेति। दर्शे उपांशुयागाभावाद्दधिघृतयोस्तन्त्रेण होमाच्च त्रयोदश। उक्तवाक्येनापूर्वाहुतिविधाने उक्तसंख्या विरुध्येतेति भावः॥ ४५॥

उपांशुयागस्य ध्रौवाज्यद्रव्यकत्वम्। अधि॰ १५।

उपांशुयाजमन्तरा यजतीति हविर्लिङ्गाश्रुतित्वाद् याथाकामी प्रतीयेत॥ ४६॥

पौर्णमास्यामुपांशुयाजमन्तरा यजतीति श्रुतम्। तत्र पूर्वपक्ष-

Digitized by Google

माह । उपांश्विति । हविर्लिङ्गस्य हविर्विशेषनियामकलिङ्गस्याश्रुतित्वा-द्याथाकामी प्रतीयेत ॥ ४६ ॥

ध्रौवाद्वा सर्वसंयोगात् ॥ ४७ ॥

सिद्धान्तमाह । ध्रौवादिति । सर्वसंयोगात् । सर्वस्मै वा एतद्य-ज्ञाय गृह्यते यद् ध्रुवायामाज्यमिति वाक्ये सर्वशब्दयोगाद् ध्रुवाया आज्यम् ॥ ४७ ॥

उपांशुयागस्य प्रकृतदेवतानियमः । अधि॰ १६ ।

तद्वच्च देवतायां स्यात् ॥ ४८ ॥

हविर्विषये यः पूर्वपक्षः स देवताविषय इति पूर्वपक्षमाह । तद्व-दिति ॥ ४८ ॥

तान्त्रीणां प्रकरणात् ॥ ४९ ॥

सिद्धान्तमाह । तान्त्रीणामिति । प्रकरणाद्दर्शपूर्णमासतन्त्रपठिता-नामन्यतमा ॥ ४९ ॥

उपांशुयागस्य विष्णवादिदेवताकत्वं पौर्णमासीकर्तव्यत्वं च । अधि॰ १७ ।

धर्माद्वा स्यात् प्रजापतिः ॥ ५० ॥

एवं दर्शपूर्णमासतन्त्रपठितान्यतमेति सिद्धे तान्त्रीणां मध्ये कत-मेति विचारे प्रथमपक्षमाह । धर्मादिति । धर्माद् उपांशुयाजमन्तरा यजतीति अत्र उपांशुत्वं श्रुतम् । प्रजापतेरपि धर्मः उपांशुत्वमिति प्रजा-पतिः स्यात् ॥ ५० ॥

देवतायास्त्वनिर्वचनं तत्र शब्दस्येह मृदुत्वं तस्मादिहा-धिकारेण ॥ ५१ ॥

अस्मिन्पक्षे दोषमुत्थापयन् पक्षान्तरमाह । देवताया इति । तत्र उत्पत्तिवाक्ये देवताया अनिर्वचनमकथनम् । इह प्राजापत्ये शब्दस्य उपांशुधर्मवाचकशब्दस्य मृदुत्वं स्पष्टमश्रवणम् । यत्तूष्णीं तत्प्राजापत्य-मिति तूष्णींशब्दस्य श्रवणात् तस्माद्धर्मसादृश्याभावात् । इह उपांशुयागे ऽधिकारेण देवतानां मध्ये मुख्यत्वेन श्रेष्ठत्वेनाग्निः । अग्निरग्ने प्रथमो देवतानामिति श्रुतिः ॥ ५१ ॥

Digitized by Google

विष्णुर्वा स्याद्धौत्राम्नानादमावास्याहविश्च स्याद्धौत्रस्य तत्र दर्शनात् ॥ ५२ ॥

पक्षान्तरमाह । विष्णुर्वेति । दर्शयागसन्निधौ हौत्रस्य इदं विष्णुः प्रतद्विष्णुरिति याज्यापुरोऽनुवाक्यायुगलस्याम्नानात् । अत एवामावास्या हविः तत्र अमावास्यासंनिधौ ॥ ५२ ॥

अपि वा पौर्णमास्यां स्यात्प्रधानशब्दसंयोगाद्गुणत्वान्मन्त्रो यथाप्रधानं स्यात् ॥ ५३ ॥

सिद्धान्तमाह । अपि वेति । पौर्णमास्यामेवोपांशुयागः प्रधानशब्दसंयोगात् । विधायकवाक्ये पौर्णमास्यां यजेरन्निति पौर्णमास्यामितिशब्दसंयोगात् । गुणत्वान्मन्त्रस्य, मन्त्रः यथा यया रीत्या प्रधानं भवेन्न भवेद्वेत्यर्थः । अयं भावः । यत्र विधिविहितं कर्म तत्र मन्त्रः । न यत्र मन्त्रः तत्र कर्मेति पौर्णमास्यामेव ॥ ५३ ॥

आनन्तर्यं च सान्नायस्य पुरोडाशेन दर्शयत्यमावास्याविकारे ॥ ५४ ॥

पौर्णमास्यामेवेत्यत्र लिङ्गमपि दर्शयति । आनन्तर्यमिति । अमावास्याविकारे साकम्प्रस्थायीये आग्नेयेन पुरोडाशेन प्रचर्य सह कुम्भीभिरभिक्रामन्नाहेति वाक्येन पुरोडाशेनानन्तर्यं सान्नाय्यस्य दर्शयति नोपांशुयाजस्य । अतो नामावास्यायाम् ॥ ५४ ॥

अग्नीषोमविधानात्तु पौर्णमास्यामुभयत्र विधीयते ॥ ५५ ॥

यश्च तावब्रूतामग्नीषोमौ पौर्णमास्यां नौ यजेरन्नित्यत्र पौर्णमासीशब्दसंयोगः साधकः स नेत्याह । अग्नीषोमेति । तेन वाक्येन पौर्णमास्यामग्नीषोमीयदेवताविधिः न उत्पत्तिविधिः । इत्थं चोभयत्र पौर्णमास्याममावास्यायां च उपांशुयागः पौर्णमास्यामग्नीषोमीयः अमावास्यायां विष्णुः ॥ ५५ ॥

Digitized by Google

प्रतिषिध्य विधानाद्वा विष्णुः समानदेशः स्यात् ॥ ५६ ॥

उक्तपक्षं दूषयति । प्रतिषिध्येति । प्रतिषिध्य, जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजति विष्णुरुपांशु यष्टव्यो ऽजामित्वाय प्रजापतिरुपांशु यष्टव्यो ऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यावजामित्वायेति वाक्ये जामि वा इत्यनेन पुरोडाशं प्रतिषिध्य, मध्यमवाक्येन विधानात् । अजामित्वायेति त्रयेण स्तुत्या विष्णावग्नीषोमयोः समानदेशः एकः कालः न भिन्नकालः ॥ ५६ ॥

तथा चान्यार्थदर्शनम् ॥ ५७ ॥

तथेति । अन्यार्थेन च अन्यलिङ्गेन च दर्शनं ज्ञानं तथा पौर्णमास्यामेवेति नियामकं, चतुर्दश पौर्णमास्यां त्रयोदशामावास्यायामिति पूर्वदर्शितं लिङ्गम् । यद्यमावास्यायामुपांशुयागः तदा चतुर्दश भवेरन् त्रयोदशेति विरुद्धम् ॥ ५७ ॥

न वा ऽनङ्गं सकृच्छ्रुतावुभयत्र विधीयेतासंबन्धात् ॥ ५८ ॥

साधकान्तरमाह । न वेति । अनङ्गं प्रधानं सकृच्छ्रुतमुभयत्र न विधीयते । प्रधानानां परस्परसंबन्धाभावात् । अन्यथा आग्नेयवाक्ये ऽमावास्यायां पौर्णमास्यां चेति श्रवणं व्यर्थं स्यादिति भावः* ॥ ५८ ॥

विकारे चाश्रुतित्वात् ॥ ५९ ॥

विकारे दर्शविकारे दाक्षायणयज्ञे ॥ ५९ ॥

एकपुरोडाशायामप्युपांशुयागः । अधि० १८ ।

द्विपुरोडाशायां स्यादन्तरालगुणार्थत्वात् ॥ ६० ॥

पौर्णमास्यां सोमादूर्ध्वं पुरोडाशद्वयं प्रागेकः । उभयत्रायं किं सोमादूर्ध्वमिति संशये पूर्वपक्षमाह । द्वीति । द्विपुरोडाशायां पौर्णमास्यां स्यादुपांशुयागः । अन्तरालगुणार्थत्वात् । एकपुरोडाशे तदसंभवादिति भावः ॥ ६० ॥

* गुणानां च परार्थत्वात् प्रवृत्तौ विधिलिङ्गानि दर्शयति, इति सूत्रत्वेनाधारि शाबरभाष्यपुस्तके ।

Digitized by Google

अजामिकरणार्थत्वाच्च ॥ ६१ ॥

अजामीति । अजामित्वायेति तादर्थ्यचतुर्थ्या तादर्थ्यप्रतीते-रिति ॥ ६१ ॥

तदर्थमिति चेन्न तत्प्रधानत्वात् ॥ ६२ ॥

तदिति । नेत्यन्तं पूर्वपक्षोपसंहारः । तदर्थमन्तरालतासंपत्त्यर्थम-जामित्वसंपत्त्यर्थं वा याग इति न । तस्य अन्तरालत्वस्य अन्तरालत्व-निरूपितप्रधानत्वात् ॥ ६२ ॥

अशिष्टेन च संबन्धात् ॥ ६३ ॥

युक्त्यन्तरमाह । अशिष्टेनेति । अशिष्टेनाश्रुतत्वेन अन्तरालार्थेन उपांशुयागस्य संबन्धः कर्तव्यः स्यात् । तथा सति यागेन फलस्य संबन्धः अन्तरालगुणेन च सबन्ध इति विरुद्धत्रिकद्वयापत्तिरिति भावः ॥ ६३ ॥

उत्पत्तेस्तु निवेशः स्याद्गुणस्यानुपरोधेनार्थस्य विद्यमान-त्वात् विधानादन्तरार्थस्य नैमित्तिकत्वात्तदभावेऽश्रुतौ स्यात् ॥ ६४ ॥

अन्तरालगुणस्याविधानादिति पक्षं दूषयति । उत्पत्तेरिति । उत्पत्तेरुत्पत्तिवाक्यएव अन्तरालगुणविधानात् । विशिष्टविधानाच्च विरुद्ध-त्रिकमिति भावः । निवेशः अन्तरालगुणनिवेशः स्याद् गुणस्य अन्तरालस्य अनुपरोधेन अबाधेन अर्थस्य अन्वयिनः विद्यमानत्वात् । उभयपुरोडाश-स्थले संभवादिति भावः ।

अन्तरार्थस्य विधानात् । नैमित्तिकत्वादपूर्वसाधनत्वात्तदभावे अन्तरगुणाभावे यागस्याश्रुतौ, हेतौ सप्तमी, स्याद्गुणवत्येव स्यात् ॥ ६४ ॥

उभयोस्तु विधानात् ॥ ६५ ॥

सिद्धान्तमाह । उभयोरिति । उभयोरेकपुरोडाशे द्विपुरोडाशे चोपांशुयागः पौर्णमासीमात्रे विधानात् ॥ ६५ ॥

Digitized by Google

गुणानां च परार्थत्वादुपवेषवद्यदेति स्यात् ॥ ६६ ॥

गुणानामिति । गुणानामङ्गानां परार्थत्वात् । प्रधानार्थत्वात् । यथा राज्ञः पाकार्थं देवदत्तः कल्पितः । तत्र देवदत्ताभावे न राज्ञः पाको लुप्यते । गुणस्य तदर्थत्वात् । गुणानामित्यनेन कृप्तन्यायो दर्शितः । उपवेषवदिति । शाखामूलं हि उपवेषः । पौर्णमास्यां शाखाभावादुपवेषाभावः । तथा च उपवेषेण कपालान्युपदधातीति विधिः । अनेन यदा उपवेषः तदा तेनोपधानं तदभावे ऽन्येन येन केनापि । न उपवेषाभावे कपालोपधाननिवृत्तिस्तथा यदा ऽन्तरालं तदा तत्र स्यात् । अन्यत्रापि ॥ ६६ ॥

अनपायश्च कालस्य लक्षणं हि पुरोडाशौ ॥ ६७ ॥

ननु विहितस्यान्तरालस्य लोपएकपुरोडाशप्रयोगे वैगुण्यमपरिहार्यम् । अन्यथा यदा आलस्याद्यभावः तदा प्रयाजानुष्ठानं तत्सत्त्वे न, गुणानां च परार्थत्वादिति न्यायादत आह । अनपाय इति । कालस्य उपांशुयागकालस्य लक्षणं पुरोडाशद्वयम् । अयं भावः । जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशावुपांशुयाजमन्तरा यजतीति वाक्येन पुरोडाशयागद्वयमनूद्य तयोरानन्तर्ये जामितादोषं प्रतिपाद्य प्रथमयागध्वंसोत्तरयागप्रागभावविशिष्टः कालः लक्षयित्वोपांशुयागाङ्गत्वेन विधीयते । तस्य एकपुरोडाशे ऽप्यनपायः सत्त्वम् ॥ ६७ ॥

प्रशंसार्थमजामित्वम् ॥ ६८ ॥

नन्वेवं सति तादर्थ्यचतुर्थीप्रतिपादितजामित्वाभावो ऽनुपपन्नः एकपुरोडाशे जामित्वाप्रसक्तेरत आह । प्रशंसेति । अजामित्वकथनं प्रशंसार्थमर्थवाद इति भावः ॥ ६८ ॥

इति श्रीमज्जैमिनिसूत्रवृत्तौ दशमस्याध्यायस्य अष्टमः पादः ॥ ८ ॥

समाप्तश्च दशमो ऽध्यायः ॥ १० ॥

Digitized by Google

भ्रान्तेः पुरुषधर्मत्वाद् दोषः स्यादेव सर्वथा ।
तामुद्धरन्तु कृपया विद्वांसो गतमत्सराः* ॥

आग्नेयादीनां समुदितानां तन्त्रेण स्वर्गफलकत्वम् । अधि० १ ।

प्रयोजनाभिसंबन्धात्पृथक्सतां ततः स्यादैककर्म्य-मेकशब्दाभिसंयोगात् ॥ १ ॥

दशमे ऽध्याये ऽतिदेशप्राप्तानामङ्गानां बाधाभ्युच्चयविचारेण विकृतावङ्गपरिमाणं चिन्तितम् । एकादशे प्रकृतिविकृतिसाधारण्येन प्रयोगपरिमितिज्ञानार्थं तन्त्रावापौ चिन्त्येते । तत्र यत्सकृत् कृतं बहूनुपकरोति तत्तन्त्रम् । यथा बहूनां मध्ये स्थापितो दीपः । यस्त्वावृत्त्योपकरोति स आवापः । यथा बहूनां भोजनम् । तदुक्तमाकरे । साधारणं भवेत्तन्त्रं परार्थे त्वप्रयोजक इति । अस्यार्थः । यच्चाङ्गमनुष्ठितं बहूनां साधारणमुपकारकं तत्तन्त्रम् । यच्चाङ्गमनुष्ठितमेकस्यैवोपकारकं परार्थे ऽपरप्रधानार्थे ऽप्रयोजकः अनुपकारकम् अतः पृथगावृत्तिः स आवाप इति । तत्र दर्शपूर्णमासे षड्यागानां फलस्य तन्त्रमुत भेद इति ज्ञानमन्तरा प्रयोगपरिमाणज्ञानं न भवति । तथा हि । यदि तन्त्रं दर्शे प्रधानत्रिकाङ्गानां सकृदनुष्ठानं द्वितीये त्रिवारमनुष्ठानमिति । अतः प्रयोगपरिमितिज्ञानोपोद्घातत्वेन प्रथमं फलतन्त्रविचारं कुर्वन् सिद्धान्तसूत्रमाह । प्रयोजनेति । पृथक्सतां पृथग्भूतानामपि आग्नेयादीनामपि ऐककर्म्यं, क्रियतइति व्युत्पत्त्या कर्मशब्दः फलम्, एकं कर्म येषां तान्येककर्माणि तेषां भाव ऐककर्म्यं स्यात् । एकफलकत्वमिति फलितम् । अत्र हेतुमाह । प्रयोजनेति। समेतानामिति शेषः । यतः समेतानां मिलितानां प्रयोजनेन फलेन संबन्धः अतः । अत्र किं मानमत आह । एकशब्दाभिसंयोगात् । एषां समुदायानां वाचकेन दर्शपूर्णमास इति शब्देन निर्दिश्य

* नन्दबाणाद्रिभूशाके शुच्यां भूते सिते रवौ । रचितो ग्रन्थसन्दर्भो विश्वेश्वरणे ऽर्पितः ॥ १ ॥ सूत्रस्य शाबरं भाष्यं तन्त्ररत्नं विलोक्य च । टुप्टीकां शास्त्रदीपं तट्टीकामन्यान् विलोक्य च ॥ २ ॥ अविरुद्धं च तल्लेखे रामेणालेखि धीमता । इति सार्धश्लोकद्वयमधिकं पुस्तकान्तरे ऽस्ति ।

फलेन साकमभिसंबन्धात् । अन्वयाभिधानात् । दर्शपूर्णमासाभ्यां स्वर्गकाम इत्यनेन समुदायवाचकशब्देन फलान्वयबोधस्य दर्शनात् । यथा ग्रामेण खन्यते कूप इत्यत्र पुरुषभेदे ऽपि यथा एकः कूपस्तथा ऽत्रापीति भावः ॥ १ ॥

शेषवद्वा प्रयोजनं प्रतिकर्म विभज्येत ॥ २ ॥

ननु यत्र यत्रैव शब्दाभिसंबन्धस्तत्र तत्र पृथग्भूतानामपि समुदायत्वेनैवान्यपदार्थसंबन्ध इतिव्याप्तिसिद्धौ भवेदेवं, सैव न । ब्राह्मणगणं पूजयेत्यादौ पूजायाः प्रत्येकान्वयदर्शनात् । न च विषमो दृष्टान्तः, स्वर्गकामवाक्ये समुदायत्वेन शेषग्रहणम् इह तु शेषिग्रहणं द्वितीयया शेषित्वबोधादिति वाच्यं, शेषशेषित्वाभ्यां वैलक्षण्ये ऽपि परस्परान्वयवेलायां शेषस्य शेषिणा साकमन्वये विभज्यैव शेषिणो ऽपि शेषेण संबन्धवेलायां विभज्य संबन्धे बाधकाभावादित्यभिप्रायवानाह । शेषवद्वेति । प्रयोजनं प्रतिकर्म विभज्येतेति सूत्रतात्पर्यं नन्वित्यनेनैव दर्शितम् ॥ २ ॥

अविधानात्तु नैवं स्यात् ॥ ३ ॥

पूर्वहेतौ उक्तं दोषं परिहरति । अविधानादिति । एवं पूर्वोक्तरीत्या शेषशेषिणोः साम्येन अविधानात् । अयं भावः । अविधेयत्वेन हेतुनोद्देश्यत्वे सिद्धे उद्देश्यविशेषणानामविवक्षेति पूर्वं व्यवस्थितत्वात् । ब्राह्मणगणत्वं ब्राह्मणव्यक्तीनां परस्परसाहित्यम् । इदं यदुद्दिश्य विशेषणं तदविवक्षितं तदा प्रत्येकान्वयो विधेयपूजायां युक्तः । दर्शपूर्णमासाभ्यां स्वर्गकाम इत्यत्र फलमुद्दिश्य यज्ञागविधानाद् द्वन्द्वावगतसाहित्यं विवक्षितम् । अतः समुदितानामेव फले ऽन्वय इति ॥ ३ ॥

शेषस्य हि परार्थत्वाद्विधानात्प्रतिप्रधानभावः स्यात् ॥ ४ ॥

संप्रति दर्शितमेव भावं दर्शयति । शेषस्य हीति । शेषस्याङ्गस्य परार्थत्वात् । प्रधानार्थत्वात्तत्र प्रतिप्रधानभावः प्रतिप्रधानमङ्गावृत्तिरिति लोकसिद्धो न्यायो दर्शितः । दृश्यते च लोके प्रतिघटं चक्रभ्रमणं तथेति

भावः । यागस्य शेषत्वे प्रमाणमाह । विधानात् । यत्र विधेयत्वं तत्र शेषत्वमिति व्याप्तेरिति भावः ॥ ४ ॥

अङ्गानामेककार्यत्वम् । अधि० २ ।

अङ्गानां तु शब्दभेदात्क्रतुवत्स्यात्फलान्यत्वम् ॥ ५ ॥

एकमर्धिकरणं चतुःसूत्रम् । भवत्वत्र समुदायवाचकशब्देन द्वन्द्वेन चावगतसाहित्यस्य विवक्षणात् फलं समुदायस्यैकम् । अङ्गानां नैवं किं तु क्रतुवत् । ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः ऐन्द्रं चरुं निर्वपेत्पशुकामः इतिवत् फलान्यत्वं भिन्नफलत्वं स्यात् । शब्दभेदात् । समिधो यजति तनूनपातं यजतीत्यादिशब्दभेदात् । अयं भावः । अङ्गविधयः परस्परानपेक्षा अङ्गविधिं संपादयन्ति न सहिताः । अतस्तेषां पृथगेव संबन्धो युक्त इति द्वितीयाधिकरणपूर्वपक्षाभिप्रायः ॥ ५ ॥

अर्थभेदस्तु तत्रार्थेह्यैकार्थ्यादैककर्म्यम् ॥ ६ ॥

सिद्धान्तमाह । अर्थेति । तत्रार्थभेदः यत्र भिन्नफलप्रतिपादकः शब्दः । इहाङ्गेषु ऐकार्थ्यात् प्रधानोपकारकत्वैकार्थ्याद् ऐककर्म्यमेकफलम् ॥ ६ ॥

शब्दभेदान्नेति चेत् ॥ ७ ॥

ननु फलवाचकशब्दभेदाभावे ऽपि विधिप्रत्ययभेदात्फलभेद इत्याह । शब्देति । स्पष्टम् ॥ ७ ॥

कर्मार्थत्वात्प्रयोगे ताच्छब्द्यं स्यात्तदर्थत्वात् ॥ ८ ॥

अस्योत्तरमाह । कर्मार्थत्वादिति । प्रयोगस्येत्यस्मात्प्राक् प्रधानानामिति तदुत्तरमुच्यमाने इति पूरणीयम् । इत्थं च कर्मार्थत्वात् प्रधानप्रयोगे उच्यमाने अङ्गानामपि ताच्छब्द्यं प्रयोग उक्तः स्यात् । अयं भावः । समिधो यजतीत्यादिवाक्यानि यदि विधायकानि स्युः तर्हि भवेत्प्रत्येकं फलाकाङ्क्षा । तदेव न । तथा हि । दर्शपूर्णमासाभ्यां स्वर्गं कुर्यादिति ज्ञाते कथमित्याकाङ्क्षापरिपूरकतया यावदङ्गकलापानां प्रधानभावनयैव संबद्धत्वात् । सर्वेषामङ्गानां न पुनर्विधिः । समिदादिवाक्यैः अङ्गस्वरूपमाख्यायते ईदृशो याग इति । ननु प्रधानविधिनैवाङ्गानां

Digitized by Google

विधाने प्रधानस्य फलार्थत्वात् तत्प्रत्यप्रधानत्वम् अङ्गानां प्रधानार्थत्वात् तन्निरूपितं प्राधान्यमिति विरुद्धत्रिकद्वयापत्तिरिति चेन्न । असर्वविशिष्टभावनाविधानादवैरूप्यात् । नन्वङ्गवाक्येषु प्रत्येकं विधिश्रवणात्तत्रैव विधिः किमिति न कल्प्यतइति चेन्न । विधिस्वीकारे अंशत्रयाकाङ्क्षायां करणाकाङ्क्षानिवर्तको धातुरस्ति, किं कथमित्याकाङ्क्षानिवर्तकाभावेनापरिपूर्तेः । न चैवं सति विधिप्रत्ययानर्थक्यं, यद्यङ्गवाक्येषु विधिप्रत्ययो न स्यात् तदा सर्वाख्यातसाधारणतया प्रतीयमानाया अर्थभावनाया भाव्यापेक्षायां समानपदोपात्ततया धात्वर्थ एव तथा स्यात् । विधिप्रत्यये च सति प्रधानवाक्ये इत्थंभावेन विषयीभूता एते ऽमी इति ज्ञातुं शक्यते । अतः प्रधानविहितानुवादकतयैव सार्थक्यं बोध्यम् । उक्तं च पार्थसारथिमिश्रैः । यद्यपि प्रत्येकं विधिः श्रूयते तथा ऽप्यंशत्रयालाभादसावुदास्ते । भाव्यांशस्तु विध्यवगमबलादेव पुरुषार्थो ऽपेक्ष्यते । तावानेव च तत्र विधेरुपयोगः । तदभावे धात्वर्थभाव्यांशो निविशेत । सत्यां च फलाकाङ्क्षायां प्रकृतभावनया युगपत्संबन्धात् तस्याश्च सर्वाङ्गविशिष्टाया युगपत्प्रधानविधानादङ्गानामपि तत एवानुष्ठानसिद्धेः । तस्मिन्नंशे ऽङ्गविधीनामनुवादकत्वमित्यादिना । तस्मादत्रोक्तरीत्या फलाकाङ्क्षाया अभावाच्च प्रत्येकं फलेन संबन्धः । किं तु सर्वेषां केवलप्रधानार्थतेति ॥ ८ ॥

कर्तृविधेर्नानार्थत्वाद्गुणप्रधानेषु ॥ ९ ॥

पूर्वसूत्रव्याख्याने आशङ्कितविरुद्धत्रिकं साङ्गप्रधानविधिपक्षे पूर्वपक्षी दर्शयति । कर्तृविधेरिति । गुणप्रधानेषु तद्विषयकः कर्तुर्यो विधिः प्रयोगविधेः गुणानुष्ठानस्य प्रधानानुष्ठानस्य चेति फलितम् । नानार्थत्वात् । नानोद्देश्यकत्वात् । तथा च पूर्वोक्तविरुद्धत्रिकमिति पूरणीयम् ॥ ९ ॥

आरम्भस्य शब्दपूर्वत्वात् ॥ १० ॥

विरुद्धत्रिकद्वयापत्तिं परिहरति । आरम्भस्येति । अत्रारम्भशब्दो व्यापारवाची । आरम्भो व्यापार इति भाष्ये विवरणात् । इत्थं चारम्भस्यारम्भान्वयबोधजनिकाया आकाङ्क्षायाः शब्दपूर्वत्वात् । भावनावाचक-

Digitized by Google

शब्दजन्यत्वात् । अयं भावः । भावनावाचकशब्दस्य कुर्यादित्यस्य श्रवणे केन किं कथमिति तिस्र आकाङ्क्षा उत्पद्यन्ते, न तु यागशब्दउच्चारित इति कथंभावाकाङ्क्षापरिपूरकतया भावनायामेवान्वयो न तु यागानुवादेनेति न वैरूप्यम् । एवं सति फलाङ्गत्वपरिहारादिकथनमाकरे द्रष्टव्यम् । विस्तरभयाचेह लिख्यते । भाष्यकारमते षट्सूत्रमेकमधिकरणम् । अपरं नवसूत्रम् ॥ १० ॥

दर्शपूर्णमासादिकाम्यकर्मणां सर्वाङ्गोपसंहारः । अधि॰ ३ ।

एकेनापि समाप्येत कृतार्थत्वाद्यथा क्रत्वन्तरेषु प्राप्तेषु चोत्तरावत्स्यात् ॥ ११ ॥

अग्निहोत्रादीनां नित्यप्रयोगाणां सर्वाङ्गोपसंहारो नेति षष्ठे साधितम् । तथा काम्ये तु सर्वाङ्गोपसंहार इति तमाक्षिपन्पूर्वपक्षमाह । एकेनापीति । एकेनाप्यङ्गेन समाप्येत । प्रयोग इति शेषः । कृतार्थत्वात् । कथंभावाकाङ्क्षायाः पूर्णत्वात् । यथा क्रत्वन्तरेषु स्वर्गसाधनेषु ज्योतिष्टोमाग्निहोत्रदर्शपूर्णमासादिषु सत्सु एका स्वर्गभावना एकेनैव क्रतुवाचकेन शब्देन निराकाङ्क्षा तथा । ननु तत्संनिधानाविशेषेण विनिगमनाविरहात्सर्वाङ्गाण्याकाङ्क्षापरिपूरकाणीत्यत आह । उत्तरावदिति । सर्वाङ्गानां संबन्धे ऽपि न नियमेन संबन्धः किं तु यावदङ्गानुष्ठानं तावत्फले उपकाराधिक्यं यथा वा सान्नाय्ये तिस्रो वाग्यतो दोहयित्वा विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयतीत्यत्र गवामनियमः उत्तरासां गृहे यावत्यस्तथा यथाशक्ति अनुष्ठानमिति भावः ॥ ११ ॥

फलाभावादिति चेत् ॥ १२ ॥

यजेत स्वर्गकाम इति फलं प्रति सर्वेषामविशेषेण विधानादेकदेशानुष्ठाने फलाभावप्रसङ्ग इति शङ्कते । फलाभावादिति । फलाभावात्फलानुत्पत्तेः ॥ १२ ॥

न कर्मसंयोगात्प्रयोजनमशब्ददोषं स्यात् ॥ १३ ॥

पूर्वशङ्कां दूरीकरोति । नेति । कर्मणा प्रधानकर्मणा फलस्य

Digitized by Google

संयोगाच्च पूर्ववद्दोषः । इत्थं सति प्रयोजनं फलमशब्ददोषं शब्ददोषरहितमबाधितमर्थमिति यावत् । अयं भावः । यजेत स्वर्गकाम इति वाक्येन प्रधानकर्मणा फलं संबद्धं नाङ्गैः । यदि चाङ्गान्यपि फलेन संबध्येरन् तर्हि दर्शपूर्णमासाभ्यामिति तृतीयानुपपत्तिः । करणत्वस्य प्रकृत्यर्थेतरसापेक्षत्वात् तृतीयानुपपत्तिः । विस्तरो व्रीहियवयोः समुच्चयखण्डनावसरे ज्ञेयः । तृतीयासहितवाक्यादितरनैरपेक्ष्यं प्रधानकर्मणः फलसंबन्धे प्रतीयमानं संबध्येत ॥ १३ ॥

ऐकशब्द्यादिति चेत् ॥ १४ ॥

पुनर्युक्त्यन्तरेणाशङ्कते । ऐकेति । ऐकशब्द्याद् एकविधिविषयत्वाद्, निखिलाङ्गानामिति शेषः । इत्थं चोभयोः फलसंबन्ध आवश्यक इति भावः ॥ १४ ॥

नार्थपृथक्त्वात्समत्वादगुणत्वम् ॥ १५ ॥

इमं पक्षं दूषयित्वा पूर्वपक्षं दृढयति । नेति । न सर्वेषां फलसंबन्धः । कुतः, अर्थपृथक्त्वादर्थभेदात् । प्रधानस्य फलार्थत्वात् । अङ्गानां प्रधानार्थत्वात् । यद्यङ्गानां प्रधानस्य च फलसंबन्धः तदा समत्वात्प्रधानाङ्गयोः तुल्यत्वादगुणत्वमेको गुणः अपरं प्रधानमिति विवेको न स्यादिति भावः । तस्माच्च सर्वाङ्गोपसंहार इति पूर्वपक्षः ॥ १५ ॥

विधेस्त्वेकश्रुतित्वादपर्यायविधानान्नित्यवच्छ्रुतभूताभिसंयोगादर्थेन युगपत्प्राप्तेर्यथाक्रमं निर्वीतवत्तस्मात्सर्वप्रयोगे प्रवृत्तिः स्यात् ॥ १६ ॥

सिद्धान्तमाह । विधेरिति । सर्वाङ्गानुष्ठानं सर्वप्रयोगेष्विति प्रतिज्ञावाक्यं पूरणीयम् । कुतः, विधेः यावदङ्गानुष्ठानबोधकविधेः एकश्रुतित्वात् प्रधानविधिगम्यत्वाद् यावदङ्गप्रयोगविधेरिति भावः । नन्वेकविधिगम्यत्वे ऽपि पर्यायेण प्रयोगभेदेन सर्वेषां निवेशो ऽस्त्वत आह । अपर्यायविधानादिति । एतस्यैवार्थं विवृणोति । नित्यवदिति । नित्यवच्छ्रुतात्भावनावाचकशब्दाद् भूता उत्थिता आकाङ्क्षा कथंभावाकाङ्क्षा तया

Digitized by Google

ऽभिसंबन्धात् । यथा प्रधानकरणाकाङ्क्षया नित्यं यावत्प्रयोगेषु संबन्धः तथा नित्यं यावदङ्गानां कथंभावाकाङ्क्षया संबन्धात्र पर्यायेणानुष्ठान-मिति भावः । ननु नित्यवत्त्कुतस्यापि पर्यायेणानुष्ठाने किं बाधकमित्यत आह । अर्थेनेति । अर्थेन प्रधानोपकारेण युगपदेककालं प्राप्तेः संब-न्धात् । यथाक्रमं प्रथमं यथा ऽऽकाङ्क्षापूरकतया ऽन्वितं तथैवानुष्ठानम् । अयं भावः । भावनावाचकशब्दश्रवणे उत्थितायाः कथंभावाकाङ्क्षायाः पूरकतया खलेकपोतन्यायेन युगपत्सर्वेषामङ्गानामन्वितत्वात्पर्यायेण प्रयोगे ऽङ्गानां संबन्धे प्राथमिकयुगपदन्वयो बाधितः स्यादिति । अत्र दृष्टान्तमाह । निवीतवदिति । निवीता ऋत्विजः प्रचरन्तीत्यत्राविशेषा-त्सर्वेषां सन्निधानात्सर्वर्त्विक्साधारणं तथा सर्वप्रधानप्रयोगसाधारणं सर्वा-ङ्गम् । प्रतिज्ञातमर्थं निगमयति । तस्मादिति ॥ १६ ॥

तथा कर्मोपदेशः स्यात् ॥ १७ ॥

उक्तार्थे उपष्टम्भकं दर्शयति । तथेति । तथा सति यावदङ्गानां यावत्प्रयोगेष्वनुष्ठाने सति कर्मोपदेशः चतुर्दश पौर्णमास्यामाहुतयो हूयन्ते त्रयोदशामावास्यायामित्याहुतिसंख्योपदेशः संगतः स्यात् । पौर्ण-मास्यां चतुर्दशत्वं च द्वे चतुषी पञ्च प्रयाजास्त्रीणि प्रधानानि स्विष्टकृत् त्रयो ऽनूयाजा इति अमावास्यायामैन्द्रयागयोरेकाहुतित्वाच्चत्र-योदशत्वम् । इयं संख्या नित्यं सर्वाङ्गेष्वनुष्ठितेष्वेवोपपद्यतइति भावः ॥ १७ ॥

क्रत्वन्तरेषु पुनर्वचनम् ॥ १८ ॥

एतदधिकरणप्रारम्भसूत्रे क्रतुदृष्टान्तो दर्शितः । तद्वैषम्यं दर्श-यति । क्रत्वन्तरेष्विति । पुनर्वचनम् । ज्योतिष्टोमदर्शपूर्णमासादिषु स्वर्ग-काम इति पुनः पुनः श्रुतमतः प्रत्येकं फलेन संबन्धो युक्त इति भावः ॥ १८ ॥

उत्तरास्वश्रुतित्वाद्विशेषाणां कृतार्थत्वात्स्वदोहे याथाकामी प्रतीयेत ॥ १९ ॥

उत्तरासु दृष्टान्तवैषम्यं दर्शयति । उत्तरास्विति । उत्तरासु तिसृभ्यो गोभ्य उत्तरासु अश्रुतित्वात् । विसृष्टवागनन्वारभ्य तूष्णीमुत्तरा दोहयतीत्यनेन दोहनस्याविहितत्वात् । ननु तर्हि वाक्यं व्यर्थमत आह । विशेषाणां वाग्विसर्गादीनां विधानेन कृतार्थत्वात् । स्वदोहे स्वीयस्वत्वं यावत्सु तावद्दोहे याथाकामी यथेच्छं प्रतीयते नास्यैतां रात्रिं कुमाराः पयो लभन्तइत्यनेन स्वत्वाश्रयसकलगोदोहप्राप्तिरिति भावः ॥ १९ ॥

काम्यकर्मणां भूयो ऽभ्यासः । अधि० ४ ।

कर्मण्यारम्भभाव्यत्वात्कृषिवत्प्रत्यारम्भफलानि स्युः ॥ २० ॥

काम्यं कर्म सकृदेव कर्तव्यं फलाधिक्यमिच्छता ऽपि अथवा ऽसकृदनुष्ठेयमिति संशये प्रथमं सिद्धान्तसूत्रमाह । कर्मणीति । कर्मणि फले आरम्भेण कर्मानुष्ठानेन भाव्यत्वात् । उत्पाद्यत्वात् । प्रत्यारम्भं प्रत्यनुष्ठानं फलानि स्युः फलाधिक्येच्छावता आवृत्तिः कार्येति भावः । यथा कृषिः प्रतिसंवत्सरं कर्षणाद्यनुष्ठाने धान्यात्पत्त्यावृत्तिः ॥ २०

अधिकारश्च सर्वेषां कार्यत्वादुपपद्यते विशेषः ॥ २१ ॥

उक्तार्थे साधकं लिङ्गमप्याह । अधिकार इति । सर्वेषां बहूनां कार्यत्वादनुष्ठेयत्वात् । विशेषः अधिकारः, प्रथमं यजेरन् द्वितीयं यजेरन् इति क्व चित्कुतः उपपद्यते ॥ २१ ॥

सकृत्तु स्यात्कृतार्थत्वादङ्गवत् ॥ २२ ॥

पूर्वपक्षी स्वाभिप्रायमाह । सकृदिति । सकृदेवानुष्ठानं स्यात् । यथा एकप्रयोगे सकृदङ्गानुष्ठानेन कृतार्थत्वात् ॥ २२ ॥

शब्दार्थश्च तथा लोके ॥ २३ ॥

स्वमते ऽप्युपष्टम्भकमाह । शब्दार्थ इति । लोके लोकव्यवहारे तथा सकृत्काष्ठान्यानयेति गुरुणोक्ते शब्दार्थः शब्दानुष्ठानं काष्ठाहरणं सकृदेव करोतीति भावः ॥ २३ ॥

अपि वा संप्रयोगे याथाकामी प्रतीयेताश्रुतित्वाद्विधिषु वचनानि स्युः ॥ २४ ॥

Digitized by Google

उक्तपक्षं दूषयन् सिद्धान्तं दृढीकरोति । अपि वेति । अपि वेति पक्षान्तरद्योतकम् । संप्रयोगे प्रयोगानुष्ठाने याथाकामीति प्रतीयेत ज्ञातव्यम् । कुतः, अश्रुतित्वात् सकृदेव कर्तव्यमिति शास्त्राभावात् । विधिषु अनुष्ठानमात्रविषयाणि विधिवचनानि स्युः । न सकृदसकृद्वेत्यत्रापि तात्पर्यमिति भावः ॥ २४ ॥

ऐकशब्द्यात्तथाऽङ्गेषु ॥ २५ ॥

नन्वङ्गेष्वपि सकृदसकृदिति शास्त्राभावादभ्यासः स्यादत आह । ऐकशब्द्यादिति । अयं भावः । अङ्गानां प्रधानानां च विधायक एको विधिप्रत्ययस्तत्र कथंभावाकाङ्क्षा सकृदेवेति । फले तु फलेच्छाया यदा यदा सत्त्वं तदा तदा उपायाकाङ्क्षा किं साधनमित्याकारिकेति तदावृत्तिरिति भावः ॥ २५ ॥

लोके कर्मार्थलक्षणम् ॥ २६ ॥

यश्च लोकदृष्टान्तः पूर्वपक्षिणोक्तः तं निवारयति । लोकइति । लौकिकं कर्म अर्थलक्षणं लौकिकप्रत्यक्षविषयकार्यकम् । अयं भावः । लोके काष्ठान्यानयेत्युक्ते सकृदानयनेन पाकनिष्पत्तौ सकृदेवाहरति तदनिष्पत्तौ द्विवारं त्रिवारमानयति तेन विना ऽपि कार्यसिद्धौ नानयति च । अत्र बीजं फलदर्शनमस्तीति । स्वर्गादिस्थले तददर्शनाल्लौकिकदृष्टान्तो ऽनुचित इति ॥ २६ ॥

अवघातादीनामातण्डुलनिर्वृत्त्यभ्यासः । अधि॰ ५ ।

क्रियाणामर्थशेषत्वात्प्रत्यक्षमतस्तन्निर्वृत्त्या ऽपवर्गः स्यात् ॥ २७ ॥

व्रीहीनवहन्तीत्यत्रावहननं सकृदनुष्ठेयमुत आ तण्डुलनिष्पत्तेरिति संशये अङ्गानां सकृदनुष्ठानमिति पूर्वाधिकरणे सिद्धान्तात्सकृदेवेति पूर्वपक्षे सिद्धान्तमाह । क्रियाणामिति । क्रियाणामवहननादिकर्मणामर्थशेषत्वात् । तण्डुलनिष्पत्तिरूपार्थजनकत्वात् । क्रियाफलं प्रत्यक्षमतस्तन्निवृत्त्या तण्डुलोत्पत्त्या ऽपवर्गः क्रियोपरमः स्यात् ॥ २७ ॥

Digitized by Google

अदृष्टफलस्यावघातादेः सकृदनुष्ठानम् । अधि॰ ६

धर्ममात्रे त्वदर्शनाच्छब्दार्थेनापवर्गः स्यात् ॥ २८ ॥

एवं दृष्टफलावहनने आवृत्तिमुक्त्वा ऽदृष्टे तादृशक्रियास्थले सकृदनुष्ठानं दर्शयति । धर्मेति । धर्ममात्रे केवलादृष्टसाधने ऽवहनने फलस्यादर्शनात् प्रत्यक्षाभावाच्छब्दार्थेन सकृत्कृतः शास्त्रार्थ इति न्यायेन सकृदनुष्ठानेनापवर्गः विरामः स्यात् । यथा ऽग्निचयने औदुम्बरमुलूखलं सर्वौषधिपूर्णमवहत्य तदुपदधातीत्यत्र ॥ २८ ॥

प्रयाजादीनामङ्गानां सकृदनुष्ठानम् । अधि॰ ७ ।

क्रतुवद्वा ऽनुमानेनाभ्यासे फलभूमा स्यात् ॥ २९ ॥

प्रयाजादीनामपि असकृदनुष्ठानमुत सकृदिति संशये पूर्वपक्षमाह । क्रतुवदिति । प्रयाजानामभ्यासे फलभूमा फलाधिक्यं स्यात् । कुतः, अनुमानं चेत्थं, प्रयाजाद्यभ्यासः अधिकोपकारसाधनं क्रियावृत्तित्वात् काम्यक्रतुवदिति ॥ २९ ॥

सकृद्वा करणैकत्वात् ॥ ३० ॥

सिद्धान्तमाह । सकृदिति । करणैकत्वात् । प्रधानरूपैककरणत्वात् । सकृदेवानुष्ठानम् । अयं भावः । यथा मृत्पिण्डादिना घटे जननीये यावता चक्रभ्रमेणोपकारः कृतस्तद्द्विगुणभ्रमणानुष्ठाने उपकारो न दृश्यते भ्रमणस्यान्यत्कार्यं नास्ति तावतैव कृतार्थस्तद्वत् ॥ ३० ॥

परिमाणं चानियमेन स्यात् ॥ ३१ ॥

उक्तार्थे साधकान्तरमाह । परिमाणमिति । परिमाणं पौर्णमास्याममावास्यायां च चतुर्दश त्रयोदशेति नित्यवत्कृतप्रयाजाद्यभ्यासे अनियमेन कदा चित्पञ्चदश कदा चित्षोडश सप्तदशेत्यनियमः स्यात् ॥ ३१ ॥

फलारम्भनिर्वृत्तेः क्रतुषु स्यात्फलान्यत्वम् ॥ ३२ ॥

क्रतुवदित्युक्तम् । तद्वैषम्यं दर्शयति । फलेति । फलस्य स्वर्गादेः आरम्भनिर्वृत्तेः आरम्भनिष्पत्तेः । पृथक् पृथग् उत्पत्तेरिति भावः । क्रतुषु काम्यक्रतुषु फलान्यत्वं फलभेदः स्यात् ॥ ३२ ॥

Digitized by Google

अर्थवांस्तु नैकत्वादभ्यासः स्यादनर्थको यथा भोजनमेकस्मिन्नर्थस्यापरिमाणत्वात्प्रधाने च क्रियार्थत्वादनियमः स्यात् ॥ ३३ ॥

यदुक्तं सिद्धान्तिना सकृत्कृतेनाङ्गेन कृतार्थत्वादभ्यासानर्थक्यमिति तत्परिहरन्पूर्वपक्षं द्रढयति । अर्थवानिति । अभ्यासोऽङ्गाभ्यासः अर्थवान्सफलः नैकत्वादनेकत्वात्कार्यस्येति शेषः । एकस्मिन्नेककार्यविषयः अभ्यासः अनर्थको विफलो भवेत् । यथा भोजनमेकतृप्त्यर्थं तृप्तिसमये तदभ्यासो व्यर्थस्तथा प्रकृते न फलानेकत्वं दर्शयति । अर्थस्य प्रधानफलस्यापरिमाणत्वाद् अनियतत्वात् । अङ्गानां प्रधाने यत्क्रियाफलजननसाधनरूपक्रिया तदर्थत्वात् । अयं भावः । प्रधानस्य फलमियदित्यनियतं स च नियमः अङ्गानुष्ठानकृतः । अङ्गोपकारभूयस्त्वे फलभूयस्त्वं तदल्पत्वे तदल्पत्वमिति अनियमः सकृदसकृदिति ॥ ३३ ॥

पृथक्त्वाद्विधितः परिमाणं स्यात् ॥ ३४ ॥

आहुतिसंख्याविरोधं पूर्वं दर्शितं परिहरति । पृथक्त्वादिति । उक्तरीत्या अर्थस्य पृथक्त्वात्तदनुरोधेन विधितः विधिपरं परिमाणं संख्या स्यात् । आहुत्युत्पत्तिवाक्यगतसंख्यायां तात्पर्यमिति ॥ ३४ ॥

अनभ्यासो वा प्रयोगवचनैकत्वात्सर्वस्य युगपच्छास्त्रादफलत्वाच्च कर्मणः स्यात्क्रियार्थत्वात् ॥ ३५ ॥

पुनः सिद्धान्तं द्रढयति । अनभ्यासो वेति । अङ्गानामनभ्यासः प्रयोगवचनैकत्वात् । ननु प्रयोगवचनैक्येऽपि यथा काम्यप्रयोगावृत्तिस्तथाऽङ्गावृत्तिः किं न स्यादत आह । कर्मणोऽङ्गस्याफलत्वात् । अफलत्वेनाभ्यासात्फलाधिक्यं नेति भावः । अफलत्वे हेतुमाह । युगपदिति । युगपदेकभावनायामन्वयवेलायां पदश्रुत्या फलकरणत्वेन प्रधानक्रियैवान्वितेति भावः । नन्वङ्गानुष्ठानं तर्हि व्यर्थमत आह । क्रियार्थत्वात् । प्रधानक्रियोपकारार्थत्वात् ॥ ३५ ॥

Digitized by Google

अभ्यासो वा छेदनसंमार्गावदानेषु वचनात्स-
कृत्त्वस्य ॥ ३६ ॥

पूर्वपक्षमन्यसाधनेन द्रढयति। अभ्यासो वेति। पितृयज्ञे सकृदाच्छिनत्तीति तथा परिधीन्सकृत्संमार्ष्टीति स्विष्टकृति सकृदवद्यतीति। एषु सकृत्त्ववचनादन्यत्राभ्यासः। अन्यथा सकृद्वचनं व्यर्थमिति भावः ॥ ३६ ॥

अनभ्यासस्तु वाच्यत्वात् ॥ ३७ ॥

सिद्धान्तमाह। अनभ्यास इति। अनभ्यास एव पूर्वोक्तयुक्तेः छेदनादिषु फलान्तरतात्पर्येण वाच्यत्वात्। तथा हि। दर्शपूर्णमासयोरसकृदाच्छिनत्तीति श्रुतं, तस्यातिदेशतः प्राप्तौ, एवं प्रयाजसंनिधौ परिधिसंमार्गस्त्रिवारं विहितः, तत्सादृश्येनानूयाजसंधनिधाने ऽपि तथा प्राप्तौ, एवमन्यत्र द्विरवत्तं विहितं तथा स्विष्टकृत्यपि प्राप्तौ, तन्निवृत्त्यर्थं सकृत्त्वस्य वाच्यत्वादिति भावः ॥ ३७ ॥

कपिञ्जलानिति बहुवचनस्य त्रित्वपरत्वम्। अधि॰ ८।

बहुवचनेन सर्वप्राप्तेर्विकल्पः स्यात् ॥ ३८ ॥

कपिञ्जलानालभतइत्यत्र त्रयश्चत्वारः पञ्चेत्यनियता उत त्रय एवेति संशये पूर्वपक्षमाह। बहुवचनेनेति। स्पष्टार्थः ॥ ३८ ॥

दृष्टः प्रयोग इति चेत् ॥ ३९ ॥

ननु चतुष्ट्वादिकं न बहुवचनार्थः किं तु त्रित्वमेव। अत एव बहुवचने श्रुते न त्रित्वसंशयः किं तु चतुष्ट्वादीनामेवेति। यथा कपिञ्जलादिश्रवणे कपिञ्जलशब्दार्थे न विवदन्ते लोकाः कपोतो मयूरो वेति। किं कारणमिति चेदितरत्र प्रयोगाभावादेवेत्याशङ्कायामाह। दृष्टः प्रयोग इति। चतुरादिष्वपि चत्वारो ब्राह्मणा इति प्रयोगो दृष्टः कथं त्रित्वमात्रमर्थ इति भावः ॥ ३९ ॥

तथेह ॥ ४० ॥

दृष्टान्ते ऽपीमं दोषमतिदिशति। तथेति। यथा माणवके

Digitized by Google

सिंहशब्दप्रयोगः तथा कदा चिन्मयूरे ऽपि कपिञ्जलप्रयोगो दृश्यते ऽतः विकल्पेन मयूरालम्भो ऽपि स्यादिति भावः ॥ ४० ॥

भक्त्येति चेत् ॥ ४१ ॥

लाक्षणिकत्वान्मयूरालम्भप्राप्तिर्नेति परिहरति । भक्त्येति । भक्त्या लक्षणया ॥ ४१ ॥

तथेतरस्मिन् ॥ ४२ ॥

बहुत्वस्याप्यन्यत्र प्रयोगो लक्षणया भविष्यति तस्माद्बहुवचनस्य न त्रित्वादिकमर्थः किं तु बहुत्वं तस्य त्रित्वमारभ्य परार्धपर्यन्तेषु सत्त्वात् । तावतां प्राप्तौ समुच्चयेनानुष्ठानासंभवाद्विकल्प इति भावः ॥ ४२ ॥

प्रथमं वा नियम्येत कारणादतिक्रमः स्यात् ॥ ४३ ॥

अस्तु बहुत्वमर्थः तथा ऽपि न प्रथमं त्रीननुपादाय चत्वार उपादातुं शक्यन्ते । यतो बहूनां मध्ये त्रित्वं प्रथममुपस्थितं तत्परित्यागे मानाभाव इत्यभिप्रायेण सिद्धान्तमाह । प्रथममिति । उक्तवाक्ये प्रथमं त्रित्वं नियम्येत । कारणात् प्रमाणान्तराद् अतिक्रमः यथा सप्तदश प्राजापत्यानालभतइति ॥ ४३ ॥

तथा चान्यार्थदर्शनम् ॥ ४४ ॥

उक्तार्थे लिङ्गं साधकमाह । तथा चेति । तथा च केवलबहुवचनस्य त्रित्वपर्यवसाननियमात् । अन्यार्थे ऽप्यन्यत्र दर्शनम् । यथा कृष्णा याम्या अवलिप्ता रौद्रा नभोरूपा पार्जन्या ऐन्द्राग्नो दशम इति । अत्र एकत्र नियम एव ऐन्द्राग्ने दशमत्वं नियमेन घटते । अन्यथा पाक्षिकं स्यादिति भावः ॥ ४४ ॥

प्रकृत्या च पूर्ववत्तदासत्तेः ॥ ४५ ॥

सिद्धान्ते साधकान्तराण्यपि दर्शयति । प्रकृत्येति । प्रकृत्या अग्नीषोमीयं पशुमालभेतेत्यत्र एकत्वेन तदासत्तेः । तस्य त्रित्वस्यासत्तेः सन्निकृष्टत्वात् । किं च पूर्ववत् । पूर्वसूत्रवत् । लिङ्गान्तरं चास्ति गृहमेधीये ओदनानुद्धरतीति । तत्र प्रथमं त्रित्वसंख्याबोधकं वाक्ये निरूप-

Digitized by Google

पदं मध्यमस्येति श्रुतम् । अन्यत्र पञ्चानां मध्यमः अष्टानां मध्यम इति सोपपदं श्रूयते । इदमपि लिङ्गं ज्ञेयम् ॥ ४५ ॥

उत्तरा दोहयतीत्यत्र सर्वासां गवां दोहनविधानम् । अधि० ६ ।

उत्तरासु यावत्स्वमपूर्वत्वात् ॥ ४६ ॥

सान्नाय्ये श्रूयते । वाग्यतस्तिष्ठो दोहयित्वा विसृष्टवागनन्वारभ्योत्तरा दोहयतीति । किमयं विधिरनुवाद इति संशये पूर्वपक्षमाह उत्तरास्विति । उत्तरासु गोषु यावत्स्वं यावतीषु स्वत्वं तावतीषु, दोहो विधीयते इति शेषः । अपूर्वत्वादप्राप्तत्वात् ॥ ४६ ॥

यावत्स्वं वा ऽन्यविधानेनानुवादः स्यात् ॥ ४७ ॥

सिद्धान्तमाह । यावत्स्वमिति । यावत्स्वं पूर्वोक्तमनुवादः । अन्येन वाक्येन विधानेन ॥ ४७ ॥

साकल्यविधानात् ॥ ४८ ॥

केन विधानमत आह । साकल्येति । साकल्यविधानात् । नास्यैतां रात्रिं पयसा ऽग्निहोत्रं जुहोति कुमाराश्च न पयो लभेरन् इत्यनेन सकलगोदोहविधानात् ॥ ४८ ॥

बह्वर्थत्वाच्च ॥ ४९ ॥

ननु इदं वाक्यं न सकलगोदोहं विदधाति । लक्षणापत्तेः । कुमाराणां प्रतिषेधमात्रं करोतीत्यत आह । बह्विति । बह्वर्थत्वादित्यस्मात् प्राग्, लिङ्गस्येति शेषः । लिङ्गं च बहु दुग्धीन्द्राय देवेभ्य इति मन्त्रस्थं शत्यपेक्षं बहुत्वं वदन् अशेषगोदोहनमेव विधेयं द्रढयतीति भावः ॥ ४९ ॥

अग्निहोत्रे चाशेषवद्यवागूनियमः ॥ ५० ॥

लिङ्गान्तरमप्याह । अग्निहोत्रे चेति । नास्यैतां रात्रिं पयसा ऽग्निहोत्रं जुहोति यथा ऽन्यस्यै देवतायै प्रत्तमन्यस्यै देवतायै दद्यात्तादृक् तत्स्याद् यवाग्वा जुहुयादिति । अग्निहोत्रे यवागूनियमः अशेष-

वधिखिलगोदोहरूपमर्थं द्रढयति । अन्यथा ऽन्यस्यै देवतायै दत्तमित्या- द्यर्थवादासङ्गतेरिति भावः ॥ ५० ॥

इति व्याख्यातम् ॥ ५१ ॥

इत्यनेन सूत्रेण कुमारपयःप्रतिषेधवाक्यमपि व्याख्यातम् ॥ ५१ ॥

सर्वप्रापिणा ऽपि लिङ्गेन संयुज्य देवताभिसंयोगात् ॥ ५२ ॥

सर्वदोहनविधौ लिङ्गान्तरमप्याह । सर्वेति । संयुज्य वत्सेभ्यश्च एताः पुरा मनुष्येभ्यश्चाप्याययन्तीति वाक्येन एता गावः प्रथमं वत्समनु- ष्यार्थत्वेन निर्दिश्य पश्चाद्देवताभिसंयोगात् । देवेभ्य एवैना इन्द्राया- प्याययतीत्यनेन वत्सेभ्यो मनुष्येभ्य आप्याययन्त ताः सर्वा देवेभ्य आप्याययतीति लिङ्गं सर्वदोहविधौ स्पष्टमिति भावः ॥ ५२ ॥

आग्नेयादीनां प्रधानानां भेदे ऽप्याघारादीनामङ्गानां तन्त्रेणानुष्ठानम् । अधि० १० ।

प्रधानकर्मार्थत्वादङ्गानां तद्भेदात्कर्मभेदः प्रयोगे स्यात् ॥ ५३ ॥

दर्शपूर्णमासयोः आग्नेयादिप्रधानभेदेनाघाराद्यङ्गानामावृत्तिरुत तन्त्रमिति संशये उपोद्घातं समाप्याध्यायार्थतन्त्रविचारं कर्तुं पूर्वपक्ष- माह । प्रधानमिति । अङ्गानां प्रयोगे ऽनुष्ठाने कर्मभेदः अनुष्ठानस्या- वृत्तिः स्यात् । तद्भेदात्प्रधानभेदात् । प्रधानभेदे ऽनुष्ठानभेदः कुत इत्यत्र हेतुमाह । प्रधानकर्मार्थत्वात् ॥ ५३ ॥

क्रमकोपश्च यौगपद्ये स्यात् ॥ ५४ ॥

स्वमते ऽन्यदपि साधकमाह । क्रमेति । यौगपद्ये ऽङ्गानां तन्त्रा- नुष्ठाने क्रमकोपः विहितक्रमबाधः । चतुर्यागाव्यवहितोत्तरत्वं सर्वप्रधा- नानां यौगपद्ये मध्ये ऽग्नियागव्यवधानादुपांशुयागस्य क्रमकोप इति भावः ॥ ५४ ॥

तुल्यानां तु यौगपद्यमेकशब्दोपदेशात्स्याद्विशेषा- ग्रहणात् ॥ ५५ ॥

सिद्धान्तमाह । तुल्यानामिति । तुल्यानां देशतः कालतः कर्तृ-

Digitized by Google

तस्तुल्यानां त्रयाणां यौगपद्यं सह प्रयोगः स्यात् । कुतः, एकशब्देन दर्शशब्देन पौर्णमासशब्देनोपदेशात् । फलसंबन्धोपदेशात् । अङ्गानामपि विशेषाग्रहणाद् अयमङ्गकलापः किमाग्नेयस्योताग्नीषोमीयस्येति सर्वार्थत्वमतस्तन्त्रेणैवानुष्ठानम् ॥ ५५ ॥

ऐकार्थ्यादव्यवायः स्यात् ॥ ५६ ॥

क्रमकोपः स्यादित्युक्तं परिहरति । ऐकार्थ्यादिति । एकः अर्थो येषां ते एकार्थाः तेषां भावः ऐकार्थ्यं तस्मात् । दण्डचक्रादिवत्संभूय फलजनकत्वाद् न तेषां प्रयोगे क्रमः । कुतः क्रमकोपः । अतः सर्वेषामङ्गैरव्यवायः स्यात् ॥ ५६ ॥

तथा चान्यार्थदर्शनं कामुकायनः ॥ ५७ ॥

तथा चेति । तथा चाङ्गानां तन्त्रे सति अन्यदर्शनमन्यलिङ्गदर्शनं पूर्वोक्ताहुतिसंख्यादर्शनं लिङ्गं कामुकायनाचार्यो दर्शयति ॥ ५७ ॥

तन्न्यायत्वादशक्तेरानुपूर्व्यं स्यात्संस्कारस्य तदर्थत्वात् ॥ ५८ ॥

नन्वेवं वेदेन पुरोडाशे साङ्गारभस्माधूह्येत्यत्र सकृदनुष्ठानं स्यादत आह । तन्न्यायत्वादिति । सः संभूयकारिणां सह क्रियेति न्यायो यत्र तस्मात् । तेन हेतुना नात्र तन्त्रम् । अशक्तेः अङ्गारस्थापनं कार्यं पुरोडाशपाकः स चैकत्राङ्गारस्थापने ऽन्यत्र पाकाशक्तेः असमर्थत्वात् । किंत्वानुपूर्व्यं भेदेनैवानुष्ठानम् । नन्वदृष्टार्थमङ्गाराधिवासो ऽस्त्वत आह । संस्कारस्योक्तस्य तदर्थत्वात् । पाकार्थत्वात् । दृष्टसम्भवे ऽदृष्टकल्पनाया अन्याय्यत्वादिति भावः ॥ ५८ ॥

असंस्पृष्टो ऽपि तादर्थ्यात् ॥ ५९ ॥

पुनः पूर्वपक्षमुत्थापयति । असंस्पृष्टो ऽपीति । ननु येन प्रधानेन यः स्पृष्टः तत्समीपे यदनुष्ठीयते तत्तदङ्गमित्याघारादय आग्नेयाङ्गं स्विष्टकृदादयः अग्नीषोमीयाङ्गम् उपांशुयागस्य केनाप्यसंस्पर्शादनङ्ग

स्यादत आह । असंसृष्टो ऽपीति । *तादर्थ्यात् । बलवता प्रकरणेन सर्वार्थत्वात् । प्रत्येकमुपकारार्थमङ्गानामावृत्तिः कार्येति भावः ॥ ५९ ॥

विभवाद्वा प्रदीपवत् ॥ ६० ॥

सकृदनुष्ठानेनापि सर्वोपकारसंभवं दृष्टान्तेन दर्शयति । विभवादिति । विभवात्सामर्थ्यात् । सकृदनुष्ठितो ऽप्युपकारं जनयतीति पूरणीयम् । प्रदीपदृष्टान्तो व्याख्यातः पूर्वम् ॥ ६० ॥

अर्थात्तु लोके विधिः प्रतिप्रधानं स्यात् ॥ ६१ ॥

पूर्वपक्षी प्रदीपदृष्टान्तेन सिद्धमर्थं निवारयति । अर्थादिति । लोके प्रवृत्तिरर्थाद् फलस्य प्रत्यक्षाद् विधिः विधिप्राप्तं कर्म प्रतिप्रधानं स्यात् । उक्तो ऽयमर्थः सिद्धान्तेनैव, लोके कर्मार्थलक्षणमिति सूत्रेणेति भावः ॥ ६१ ॥

सकृदिज्यां कामुकायनः परिमाणविरोधात् ॥ ६२ ॥

सकृदिति सूत्रं पूर्वं वर्णितं कामुकायनाचार्यमतानुवादः । दोषपरिहारार्थं यच्च तन्मतं तस्योत्तरं द्व्यन्तरितपूर्वाधिकरणे पृथक्त्वाद्विधित इति सूत्रेण दत्तमिति पूरणीयम् ॥ ६२ ॥

विधेस्त्वितरार्थत्वात्सकृदिज्याश्रुतिव्यतिक्रमः स्यात् ॥ ६३ ॥

पूर्वपक्षमुपसंहरति । विधेरिति । विधेरङ्गकलापस्येतरार्थत्वात्प्रधानार्थत्वात्सकृदिज्या तन्त्रेणानुष्ठानं श्रुतिव्यतिक्रमः श्रुतेर्व्यतिक्रमो यत्रेति व्युत्पत्त्या शास्त्रविरुद्धं स्यात् ॥ ६३ ॥

विधिवत्प्रकरणाविभागे प्रयोगं बादरायणः ॥ ६४ ॥

सिद्धान्तमाह । विधिवदिति । तन्त्रेण प्रयोगं बादरायणः मनुते कुतः, प्रकरणाविभागात् । संभूयफलकारित्वेन सर्वेषामेकप्रकरणत्वाद्वि-

* तादर्थ्यादित्यस्य स्थाने "अयं भावः । तत्तत्सन्निधौ पठितस्य स्थानेनाङ्गत्वं वाच्यम् । ततो ऽपीति" पाठः पुस्तकान्तरे ।

Digitized by Google

धिवत् । यथा षड्यागविधयो ऽपि प्रयाजादीनितिकर्तव्यताकाङ्क्षया सङ्कृतानपूर्वविशेषेण गृह्णन्ति प्रकरणेन स्वस्वसर्वविधीन् बाधित्वा तथा तन्त्रेणानुष्ठानमपि संनिधिं बाधित्वा व्यवहितप्रधानेष्वप्युपकारं संपादयतीति सिद्धान्ताभिप्रायः ॥ ६४ ॥

क्व चिद्विधानाच्चेति चेत् ॥ ६५ ॥

एवं सति क्व चित्सकृदनुष्ठानविधानं व्यर्थम्, यथा सह बध्नन्ति सह पिबन्तीति पूर्वपक्ष्याशङ्कते । क्व चिदिति ॥ ६५ ॥

न विधेश्चोदितत्वात् ॥ ६६ ॥

सिद्धान्ती इमामाशङ्कां परिहरति । नेति । विधेः निर्वापविधेः पृथक् चोदितत्वात्तथा ऽत्र मा भवत्वेतदर्थं सहत्वविधानात् । तस्माद्देशकालकर्त्रैक्यवतां प्रधानानामङ्गानुष्ठानं तन्त्रेणेति सिद्धम् ॥ ६६ ॥

कृष्णग्रीवयोः प्रथमतृतीययोर्भेदेनानुष्ठानम् । अधि० ११ .

व्याख्यातं तुल्यानां यौगपद्यमगृह्यमाणविशेषाणाम् ॥ ६७ ॥

काम्यपशुकाण्डे श्रूयते । आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवं पुरोधायां स्पर्धमान इति । तत्राग्नेयद्वयस्य सह प्रदानमुत पृथगिति संशये पूर्वपक्षमाह । व्याख्यातमिति । यतः अगृह्यमाणविशेषाणां तुल्यानां यौगपद्यमुक्तं व्याख्यातमुक्तपूर्वाधिकरणइति, अतो ऽत्रापि यौगपद्यमिति पूरणीयम् ॥ ६७ ॥

भेदस्तु कालभेदात्स्याच्चोदनाव्यवायात्स्याद्विशिष्टानां विधिः प्रधानकालत्वात् ॥ ६८ ॥

सिद्धान्तमाह । भेद इति । भेदः प्रधानभेदः । कुतः, कालभेदात् । कालभेदे हेतुमाह । चोदनाव्यवायात् । सौम्यचोदनाव्यवहितत्वात् पाठक्रमेण त्रयाणां यागानां त्रिक्षणवृत्तित्वं क्लृप्तम् । तथा च कालभेदः सिद्ध इति भावः । इममेवाभिप्रायं विवृणोति । विशिष्टानां प्रथमादिक्षणविधियतः अतस्तस्यैव तत्तत्क्षणस्यैव प्रधानकालत्वात् ॥ ६८ ॥

तथा चान्यार्थदर्शनम् ॥ ६९ ॥

पाठक्रमविवचायां लिङ्गमप्याह । तथा चेति । अन्यस्मिन्वाक्ये तदर्थवादे अर्थदर्शनमुक्तार्थदर्शनमभितः सौम्यमाग्नेयौ भवत इति । अभितः पार्श्वद्वये ॥ ६९ ॥

विधिरिति चेन्न वर्तमानापदेशात् ॥ ७० ॥

एकैकपार्श्वे आग्नेयद्वयविधिपरत्वमाशङ्क्य निराकरोति । विधिरिति । वर्तमानापदेशाल्लट्श्रवणात् ॥ ७० ॥

इति जैमिनिसूत्रवृत्तौ एकादशाध्यायस्य प्रथमः पादः ॥ १ ॥

आग्नेयादीनां प्रधानानां तन्त्रम् । अधि० १ ।

एकदेशकालकर्तृत्वं मुख्यानामेकशब्दोपदेशात् ॥ १ ॥

पूर्वपादे केवलप्रधानार्थानां तन्त्रं सोपोद्घातं निरूपितम् । अस्मिन्पादे साङ्गप्रधानार्थानां तन्त्रं विचार्यते । दर्शपूर्णमासयोः समे दर्शपूर्णमासाभ्यां यजेत दर्शपूर्णमासयोश्चत्वार ऋत्विज इत्यादिना देशकर्त्रादि प्रतिपादितम् । इमे विधयः किं प्रत्येकमुत्पत्तिविधिशेषा उत प्रयोगविधिशेषा इति संशये सिद्धान्तमारभते । एकेति । मुख्यानां षण्णां प्रधानानामेको ऽभिन्नः देशकालादिः एषां तन्त्रम् । एकशब्दोपदेशात् । षण्णां समुदायवाचकदर्शपूर्णमासाभ्यामिति शब्देनैकेन देशादिविधिवाक्येषु निर्देशात् । इत्थं च यथा फलवाक्ये समुदायवाचकशब्देन समुदितानामेव फलजनकत्वं तथा ऽत्रापि समुदायमुद्दिश्य देशादिविधानादेक एव देशादिरिति भावः ॥ १ ॥

अविधिश्चेत्कर्मणामभिसंबन्धः प्रतीयेत लक्षणार्थाभिसंयोगाद्विधित्वाच्चेतरेषां प्रतिप्रधानं भावः स्यात् ॥ २ ॥

पूर्वपक्षमाह । अविधिश्चेदिति । तथा च प्रत्येकं कर्मणां प्रधानकर्मणामुद्देशेन देशाद्यविधिश्चेद् देशादीनामभिसंबन्धः अभेदेनाभिसंबन्धः प्रतीयेत देशाद्यैक्यं भवेदिति । तदेव न । किं तर्हि प्रत्येकविधिशेषा देशादय इति शेषः । कुतः, लक्षणार्थाभिसंयोगात् । दर्शपूर्णमासशब्देन लक्ष-

यथा लभ्यो यो ऽर्थः समुदायैकदेशः प्रत्येकमाग्नेयादयस्तैरन्वितत्वात्। समुदायवाचकस्यापि प्रत्येककर्मसु लक्षणां स्वीकृत्य प्रत्येकमन्वय इति भावः। लक्षणास्वीकारे बीजमाह। विधेयत्वाच्चेतरेषाम्। इतरेषां देशादीनामप्राप्तत्वेन विधेयत्वात्। अयं भावः। यतो देशादयो विधेयास्तत एवापरिशेषाद्दर्शपूर्णमासशब्देनाग्नेयादयो दर्शपूर्णमासशब्देनानूद्यन्त इति तेषु उद्देश्यत्वं क्लृप्तम्। तथा सत्युद्देश्यवृत्तिपरस्परसाहित्यविवक्षणे वाक्यं भिद्येत। आग्नेयादयः समे कार्यास्ते च पुनः परस्परसहिता इति वाक्यभेदभिया साहित्यविवक्षामपहाय लक्षितेषु तेषु प्रत्येकमेवान्वयः। फलवाक्ये तु षष्ठ्यां विधेयत्वात्पश्वेकत्ववद्विवक्षायामपि साहित्यस्य न वाक्यभेद इति। अतः देशादीनां प्रतिप्रधानं भावः देशादिसंबन्धः स्यात्॥ २॥

अङ्गानामपि समदेशादिनियमः। अधि॰ २।

अङ्गेषु च तदभावः प्रधानं प्रति निर्देशात् ॥ ३ ॥

एवं पूर्वपक्षे एतस्योत्तरं यदि त्वित्यादिना वक्ष्यमाणमिदानीमेवोच्येत तदा ऽयिमाधिकरणपूर्वपक्ष एव न संभवत्यतः देशादीनामङ्गैः साकं संबन्धो ऽस्ति न वेति चिन्ता मध्ये क्रियते। पूर्वपक्षमाह। अङ्गेष्विति। अङ्गेषु प्रयाजादिषु तदभावः देशाद्यनियमः प्रधानं प्रति प्रधानोद्देशेन विधानात्॥ ३॥

यदि तु कर्मणो विधिसंबन्धः स्यादैकशब्द्यात्प्रधानार्थाभिसंयोगात् ॥ ४ ॥

एवं मध्ये ऽङ्गविषये पूर्वपक्षान्तरम्। अविधिश्चेदित्यनेन कृतो यः पूर्वपक्षः तदुत्तरपक्षमाह। यदि त्विति। कर्मणः प्रत्येकमाग्नेयादिकर्मणः विधिसंबन्धः देशादिविधिसंबन्धः यदि स्यात्, तदा भवेदेवं, तदेव नेति पूरणीयम्। कुतः, ऐकशब्द्यात् समुदायवाचकैकशब्देन निर्देशात्। ननु ऐकशब्द्यगतिरविधिश्चेदिति सूत्रे दर्शितेत्यत आह। प्रधानार्थाभिसंयोगात्। प्रधानं स्वर्गः फलं यस्य व्यापारस्य स प्रधानार्थः प्रयोगस्तेन देशादीनामभिसंबन्धात्। अयं भावः। देशादीनामुद्देश्यतावच्छेदकं न परस्परसहितषड्यागत्वं साहित्यविवक्षायां वाक्यभेदस्य त्वयैव दर्शित-

Digitized by Google

स्यात् । न तावदाग्नेयत्वादिकमुद्देश्यभेदे वाक्यभेदात् । अतो येन व्यापा-
रगणेनानुष्ठितेन स्वर्गो भवति तं लक्षयित्वा तेन देशसंबन्धः । स च
व्यापारः संकल्पमारभ्य ब्राह्मणभोजनान्तः प्रयोगः । इत्थं च साङ्गप्रधा-
नप्रयोगे देशनियमः सिद्धः ॥ ४ ॥

तथा चान्यार्थदर्शनम् ॥ ५ ॥

उक्तार्थे साधकं दर्शयति । तथा चेति । उक्तरीत्या प्रयोगे देशा-
दीनामन्वये चेत्यर्थः । अन्यत्र यो ऽर्थस्तस्य दर्शनमुपपन्नम् । तथा हि ।
उशाणि ह वा व्रतानि घोराणि हवींषि यदमावास्यायां संभ्रियन्ते
आग्नेयं प्रथममैन्द्र उत्तरे इति । अत्र संभरणपौर्वापर्यं चैककालत्वे त्रया-
णामुपपन्नमिति भावः ॥ ५ ॥

श्रुतिश्चैषां प्रधानवत्कर्मश्रुतेः परार्थत्वात्कर्मणो ऽश्रुतित्वाच्च ॥ ६ ॥

साधकान्तरमाह । श्रुतिरिति । एषां देशादीनां श्रुतिः प्रधान-
वद् अनुवादकवत्प्रतीयते । ननु देशादिवाचकसमाख्यांशस्य विधेयत्वं
कुतो नेत्यत आह । कर्मश्रुतेः कर्मवाचकदर्शपूर्णमासश्रुतेः परार्थत्वात् ।
दर्शपूर्णमासाभ्यामिति तृतीयाश्रुत्या आभ्यां किं चित्कार्यमिति प्रती-
यते । अतः परार्थत्वं स्पष्टं यदर्थं तत्कर्मणः कार्यस्याश्रुतित्वात् । देशा-
दिकं प्रधानवत्प्रतीयते । तस्यापि प्राधान्यमनुपपन्नम् । प्राधान्ये ऽनुवा-
द्यत्वं नियतं प्राधान्यस्यानुवाद्यत्वव्याप्यत्वात् । अतः दर्शपूर्णमासाभ्यां
यजेतेत्यस्यैवानुवादकत्वं वाच्यं तेन चाग्नेयादिवाक्यैरुत्पन्नानां कर्मणा-
मनुवादे तृतीयान्तगुणभावानुवादासंभवः । न हि तत्र कर्मणां गुणभावः ।
उत्पत्तिमात्राख्यानात् । गुणभावावगमश्च फलवाक्यावगतप्रयोगविधा-
वेव । अतो ऽत्रापि तृतीयान्तानुवादः । देशादीनां प्रयोगाङ्गत्वमेव
ज्ञापयतीति निखिलसूत्रतात्पर्यं ज्ञेयम् ॥ ६ ॥

अङ्गानि तु विधानत्वात्प्रधानेनोपदिश्येरंस्तस्मात्स्यादेकदेशत्वम् ॥ ७ ॥

यश्चाङ्गैर्ष्वनियम इति मध्ये पूर्वपक्षः स्थितः तदुत्तरमाह । अङ्गानीति । विधानत्वात्फलवाक्येनैवेति शेषः । प्रधानेन सहाङ्गानि उपदिश्येरन् । यतः साहित्यं प्रधानेन तस्मादेकदेशत्वं स्यात् ॥ ७ ॥

द्रव्यदेवतं तथेति चेत् ॥ ८ ॥

पूर्वपक्षी प्रतिबन्दीमाह । द्रव्यदेवते इति । तथा तन्त्रं स्यादिति ॥ ८ ॥

न चोदनाविधिशेषत्वान्नियमार्थो विशेषः ॥ ९ ॥

सिद्धान्ती देशादीनां द्रव्यदेवताभ्यां वैषम्यं दर्शयति । न चोदनेति । विधिशेषत्वादुत्पत्तिविधिशेषत्वात् । नियमार्थो ऽस्ति । उत्पत्तिविधिर्यागस्वरूपं दर्शयति । यागस्य रूपे हि देवता द्रव्यं च । अतस्तच्छेषदेशादिश्च प्रयोगविध्यन्वित इति विशेष इति भावः ॥ ९ ॥

तेषु समवेतानां समवायात्तन्त्रमङ्गानि भेदस्तु तद्भेदात्कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात्तथा चान्यार्थदर्शनम् ॥ १० ॥

उक्तरीत्या देशादितः द्रव्यदेवतयोर्वैषम्यं प्रदर्श्य द्रव्यदेवतयोरङ्गसाधारण्ये दूषणमप्याह । तेष्विति । तेषु प्रधानयागेषु समवेतानां विहितानामङ्गेषु समवायात् । अङ्गानि तन्त्रं प्रधानाङ्गयागयोः इन्द्रसंबन्धिदधिपयोयागवत्तन्त्रेणानुष्ठानं स्यात् । साङ्गप्रधाने द्रव्यदेवतयोरैक्यादिति भावः । एवं परमते उद्भावितं दूषणं स्वमते नास्तीति दर्शयति । तद्भेदाद् द्रव्यदेवताभेदात् कर्मभेदः । स्वमते गुणात्कर्मभेदः प्रयोगे ऽनुष्ठाने ऽपि भेदः । ननु अनुष्ठानमङ्गाङ्गिनोरस्तु तन्त्रं किं बाधकमत आह । तेषां पश्वागानां प्रधानत्वात् । तैः सह तन्त्रेणाङ्गानुष्ठाने द्वयोरेव प्रधानत्वं स्यादिति भावः । तथा चाङ्गाङ्गिनोस्तन्त्रेणानुष्ठाने ऽन्यार्थदर्शनं चतुर्दश पौर्णमास्यामाहुतय इति दर्शनमुपपन्नम् ॥ १० ॥

दर्शपूर्णमासेष्टिप्रभृतिषु संघभेदेनाङ्गानां भेदेनानुष्ठानम् । अधि० ३ ।

इष्टिराजसूयचातुर्मास्येष्वैककर्म्यादङ्गानां तन्त्रभावः स्यात् ॥ ११ ॥

दर्शेष्टाः पौर्णमासेष्टाश्च राजसूये बार्हस्पत्यं चरुं निर्वपति ब्रह्मणो गृहे शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालं राजन्यस्य गृहे ऋषभो दक्षिणेति विहितानां चातुर्मास्ये वसन्ते वैश्वदेवेन यजेत वर्षासु वरुणप्रघासैर्यजेते-त्यादौ अङ्गानां तन्त्रं न वेति चिन्तायां पूर्वपक्षमाह । इष्टीति । एकं कर्म फलमेषामिति विग्रहेणैकफलजनकत्वादित्यर्थः । शेषं स्पष्टम् ॥ ११ ॥

कालभेदान्नेति चेत् ॥ १२ ॥

पूर्वपक्षमाक्षिपति । कालेति । अत्र कालवद्देशस्याप्युपलक्षक-त्वम् ॥ १२ ॥

नैकदेशत्वात्पशुवत् ॥ १३ ॥

आक्षेपं परिहरति । नेति । एकदेशत्वात् । यस्मिन्वाक्ये प्रधा-नानां फलसंबन्धविधानं तत्रैवाङ्गानां प्रधानोपकारकत्वेन विधानात् । तथा च समुदायोपकारस्य तन्त्रेणानुष्ठानेनाप्युपपत्तेरिति भावः । पशुवत् सवनीयपशौ वपया प्रातःसवने पुरोडाशेन माध्यन्दिने सवने अङ्गैस्तृती-यसवनइति तद्वचनेन प्रयोगविप्रकर्षमात्रं नाङ्गावृत्तिरिति भावः ॥ १३ ॥

अपि वा कर्मपृथक्त्वात्तेषां तन्त्रविधानात्साङ्गानामुपदेशः स्यात् ॥ १४ ॥

सिद्धान्तमाह । अपि वेति । कर्मणः दर्शप्रयोगस्य पौर्णमासप्र-योगस्य पृथक्त्वात् । न तन्त्रेणाङ्गानुष्ठानम् । प्रयोगपृथक्त्वे हेतुमाह । तेषां च तन्त्रविधानात् । दर्शयागत्रयस्य तथा पौर्णमासयागत्रयस्य च तन्त्रेण एकशब्देनानुवादं कृत्वा पुनः अमावास्यायाममावास्यया यजेत पौर्णमास्यां पौर्णमास्येति विधानात् । तस्मिन् तस्मिन् प्रयोगे साङ्गानां तत्तत्प्रधानानामुपदेशः स्यात् । अन्यथा पुनर्वाक्यद्वयेन पुनर्विधानं व्यर्थं स्यादिति भावः ॥ १४ ॥

Digitized by Google

तथा चान्यदर्शनम् ॥ १५ ॥

उक्तार्थे गमकं लिङ्गमाह । तथा चेति । तथा चाङ्गावृत्तिसिद्धौ चान्यस्य चतुर्दश पौर्णमास्यामाहुतय इत्यादिलिङ्गस्य दर्शनमुपपन्नम् ॥ १५ ॥

तदा ऽवयवेषु स्यात् ॥ १६ ॥

एवं दर्शपूर्णमासयोर्न्यायं दृढीकृत्य यदा सिद्धिस्तदा ऽवयवेषु चातुर्मास्यावयवेषु राजसूयावयवेषु इष्टिषु च स्यात् । देशकालभेदादिति शेषः ॥ १६ ॥

पशौ तु चोदनैकत्वात्तन्त्रस्य विप्रकर्षः ॥ १७ ॥

पशौ वैषम्यं दर्शयति । पशाविति । पशौ तन्त्रमङ्गानां दुक्तम् । कुतः, चोदनैकत्वात् । आग्नेयं सवनीयं पशुमुपाकरोतीतिचोदनैकत्वात् । अयं भावः । उक्तवाक्यं कर्मण उत्पादकमुत्पत्तिविधावङ्गानां न ग्रहणमिति दर्शितं प्राक् । प्रचारविधौ तु तत्तदवयवप्रधाने तत्तत्कालसंबन्धमात्रं विधीयते । पौर्णमास्यां पौर्णमास्येति वाक्यस्य न कालविधायकत्वं तेषामुत्पत्तिवाक्येष्वेव कालयोगादतः प्रयोगभेद एव तेन विधेयः । इह तु कालविषये चोदनैकत्वादिति । किं चोत्पत्तिवाक्यमाग्नेयं पशुमित्येकं वपाङ्गहोमावभ्यासरूपाविति प्रधानैक्यादङ्गावृत्तिशङ्कैव न । अतः पशौ तन्त्रस्यानुष्ठानस्य विप्रकर्षः ॥ १७ ॥

अध्वरकल्पायां त्रिषु संघेष्वङ्गानां भेदेनानुष्ठानम् । अधि० ४ ।

तथा स्यादध्वरकल्पायां विशेषस्यैककालत्वात् ॥ १८ ॥

अध्वरकल्पां प्रति निर्वपेदित्युक्त्वा ततः पुरा वाचः प्रवदितोर्निर्वपेदित्युक्त्वा ऽऽग्नावैष्णवमष्टादशकपालं निर्वपेत्प्रातःसवनस्य काले आग्नावैष्णवमेकादशकपालं निर्वपेन्माध्यन्दिनस्य सवनस्य काले आग्नावैष्णवं द्वादशकपालं निर्वपेत्तृतीयसवनस्य काले इति । अत्र कालभेदात्प्रयोगभेदोऽप्युत प्रयोगत्रयमिति संशये पूर्वपक्षमाह । तथेति । तथा पशुवदेकः प्रयोगः विशेषस्य निर्वापान्ताङ्गकलापस्यैककालत्वात् । अयं भावः । पुरा वाचः प्रवदितोर्निर्वपेदित्यत्र विशेषाश्रवणात्कालत्रयनिर्वापकालवि-

धिरयम् । त्रयाणां निर्वापाणां बागुदयात्प्राक्कर्तव्यत्वे प्राप्ते निर्वापत्रय-स्यापकर्षे तदन्तापकर्षः पञ्चमसिद्धः । अन्यन्वाधानादिनिर्वापान्तस्य तन्त्रानुष्ठाने सिद्धे उत्तराङ्गाणामपि तद्वदेव तन्त्रेणानुष्ठानमिति ॥ १८ ॥

इष्टिरिति चैकवच्छ्रुतिः ॥ १९ ॥

स्वमते साधकं लिङ्गं दर्शयति । इष्टिरिति । अध्वरकल्पेष्टिरित्ये-कवच्छ्रुतिः । एकवचनश्रुतिः प्रयोगैक्ये उपपन्ना ॥ १९ ॥

न वा कर्मपृथक्त्वात्तेषां च तन्त्रविधानात्साङ्गानामुपदेशः स्यात् ॥ २० ॥

सिद्धान्तमाह । न वेति । कर्मपृथक्त्वात् । अभ्यासेन कालरूपगुण-विशिष्टकर्मणां पृथक्त्वात् । तेषां प्रातर्मध्याह्नापराह्णयोस्तत्तन्त्रविधाना-त्साङ्गानामेव विधानमतः प्रयोगभेदः । अयं भावः । यद्यध्वरकल्पां निर्वपे-दित्युत्पत्तिवाक्यं तदा भवेत्प्रयोगविप्रकर्षः । तदेव न । आग्नावैष्णवादिवा-क्यैर्गुणविधौ प्राप्ते कर्मण्यनेकगुणविधाने वाक्यभेदात् । अतस्तेषामेव प्रत्येकं तत्तत्कालविशिष्टकर्मविधायकत्वात् कालभेदात्प्रयोगभेद इति भावः ॥ २० ॥

प्रथमस्य वा कालवचनम् ॥ २१ ॥

निर्वापत्रयस्यापकर्षेणैककालत्वं पूर्वपक्षे साधनं यदुक्तं तद्दूषयति । प्रथमस्येति । पुरा वाचः प्रवदितोर्निर्वपेदिति कालवचनं तत्प्रथमस्यैव निर्वापस्य । अयं भावः । प्रातःकालकर्तव्यप्रधाननिर्वापस्य प्रधानकालक-र्तव्यत्वेन प्रातःकालः प्राप्त एवेति तद्विशेषो नियम्यते । आपराह्णिकस्य निर्वापस्य प्रातःकालस्त्वत्यन्तमप्राप्तः तस्य विधानेऽपूर्वविधित्वमिति गौरवमिति भावः ॥ २१ ॥

फलैकत्वादिष्टिशब्दो यथाऽन्यत्र ॥ २२ ॥

एकवचनान्ततया निर्देशगतिं दर्शयति । फलैकत्वेति । त्रयाणां यागानामेकफलजनकत्वादेकवचनम् । यथा सर्वपृष्ठेष्टिर्मृगारेष्टिरिति-वत् ॥ २२ ॥

Digitized by Google

वसाहोमस्य तन्त्रेणानुष्ठानम् । अधि॰ ५ ।

वसाहोमस्तन्त्रमेकदेवतेषु स्यात्प्रधानस्यैककालत्वात् ॥ २३ ॥

सप्तदश प्राजापत्यान्पशूनालभतइति । अत्र वसाहोमः पृथक् तन्त्रेण वेति संदेहकारणाभावादेककालत्वात्तन्त्रमिति शिष्यस्य स्पष्टतया ज्ञानार्थं सिद्धान्तमेवाह । पूर्वपक्षे युक्त्यभावात् । सूत्रार्थः स्पष्टः ॥ २३ ॥

देवताभेदे वसाहोमानां भेदेनानुष्ठानम् । अधि ६ ।

कालभेदत्वाच्चावृत्तिर्देवताभेदे ॥ २४ ॥

देवताभेदे एकादशिन्यामर्धर्चेन वसाहोमं जुहोतीति होमकालः तत्तद्याज्याया अर्धर्चस्य भिन्नत्वेन तत्तत्पाठकालस्य भिन्नत्वादावृत्तिर्देवताभेदे वसाहोमस्येति सिद्धान्तसूत्रम् ॥ २४ ॥

यूपैकादशिन्यां तन्त्रेण यूपाहुत्यनुष्ठानम् । अधि॰ ७ ।

अन्ते यूपाहुतिस्तद्वत् ॥ २५ ॥

ज्योतिष्टोमे यूपैकादशिनीपक्षो ऽस्ति तत्र यूपस्यान्तिके ऽग्निं मथित्वा यूपाहुतिं जुहोतीति । अत्र तन्त्रमावृत्तिर्वा ऽऽहुतेरिति संशये पूर्वपक्षमाह । अन्तइति । अन्ते ऽन्तिके तद्वद् देवताभेदे वसाहोमवद् आवृत्तिः ॥ २५ ॥

इतरप्रतिषेधो वा ॥ २६ ॥

सिद्धान्तमाह । इतरेति । इतरस्याहवनीयस्य प्रतिषेधः फलम् । अयं भावः । अनेन वाक्येन यूपसमीपदेशो न विधीयते किं तु प्राग्वंशे मथितमग्निं गृहीत्वा यूपदेशगमनं श्रमसाध्यमिति समीपदेशे गत्वा मथनं न्यायप्राप्तमनूद्य मथनमात्रमाहवनीयस्य होमत्वावच्छेदेन प्राप्तस्य प्रतिषेधार्थं विधीयते । अतो देशः अशास्त्रीयः अतस्तन्निमित्ता नाहुत्यावृत्तिरिति । एतेनोत्तरसूत्रमपि व्याख्यातम् ॥ २६ ॥

अशास्त्रत्वाच्च देशानाम् ॥ २७ ॥

साङ्गस्यावभृथस्य अप्स्वनुष्ठानम् । अधि॰ ८ ।

अवभृथे प्रधाने ऽग्निविकारः स्याद् न हि तद्धेतुरग्निसंयोगः ॥ २८ ॥

Digitized by Google

अप्स्ववभृथेन प्रचरन्तीति ज्योतिष्टोमे श्रुतम् । अत्राप्सु प्रचारः प्रधानस्य वा ऽङ्गानामपीति संशये पूर्वपक्षमाह । अवभृथइति । प्रधाने प्रधानयागएवाग्निविकारः अग्निकार्यकारित्वमपां स्यात् । अत्र हेतुर्न हीति । तद्धेतुरङ्गानामग्निसंयोगहेतुः अग्निसंयोगः प्रधानाग्नि संयोगः । अङ्गानामग्निसंयोगे प्रधानस्याग्निसंयोगो न हेतुरिति फलितम् । यथा प्रकृतौ अङ्गानां दर्शादिकालयोगे प्रधानसंयोगो न हेतुः । किं तु अमावास्यायाममावास्यया यजेतेत्यादौ स्वर्गापूर्वसाधनक्रियाकलापलक्ष-कत्वममावास्याशब्दस्य अतः साङ्गप्रधानस्य श्रुत्यैव कालयोगो यथा तथा यदाहवनीये जुहोतीति वाक्येन होममात्रस्याहवनीयसंबन्धविधानाद् यावद्धोमानामाहवनीयसंयोगे तदपवादो यावदंशे तावदेवाप्स्विति भावः ॥ २८ ॥

द्रव्यदेवतवत् ॥ २९ ॥

अत्र दृष्टान्तेनाह । द्रव्येति । गतम् ॥ २९ ॥

साङ्गो वा प्रयोगवचनैकत्वात् ॥ ३० ॥

सिद्धान्तमाह । साङ्गो वेति । प्रयोगवचनस्य प्रयोगविधेरङ्गप्रधा-नसाधारणत्वात् । देशकालकर्त्रादीनां प्रयोगाङ्गत्वमिति दर्शितं प्राक् । अप्स्विति देशविधेः प्रयोगेणान्वयः । अतः साङ्गप्रधानस्याप्स्विति भावः ॥ ३० ॥

लिङ्गदर्शनाच्च ॥ ३१ ॥

अस्मिन्नर्थे लिङ्गमपि साधकमित्याह । लिङ्गेति । अप्सु तृणं प्रास्याघारमाघारयतीति लिङ्गं, यदि अप्स्वाघारो न स्यात्तर्हि तृणं प्रास्येति विधिर्व्यर्थः स्यादिति भावः ॥ ३१ ॥

शब्दविभागाच्च देवतानपनयः ॥ ३२ ॥

द्रव्यदेवतादृष्टान्ते वैषम्यं दर्शयति । शब्देति । शब्देनावभृथशब्दे-नाङ्गेभ्यः देवताविभागात् । द्रव्यदेवतयोः यागरूपस्यैवोत्पत्तावेवान्वया-दवभृथपदवाच्येनैवान्वितं नाङ्गेष्विति वैषम्यमिति भावः । देवतानपनयः अङ्गेषु देवतायोगः । अत्र देवतापदं द्रव्यस्याप्युपलक्षकं ज्ञेयम् ॥ ३२ ॥

Digitized by Google

उत्तरदक्षिणविहारयोर्भेदेनाङ्गानुष्ठानम् । अधि० ६ ।

दक्षिणेऽग्नौ वरुणप्रघासेषु देशभेदात्सर्वं विक्रियते ॥ ३३ ॥

उत्तरस्यां वेद्यामन्यानि हवींषि सादयतीति दक्षिणस्यां मारुतीमिति चातुर्मास्ये वरुणप्रघासे श्रुतम् । अत्र भेदेन दक्षिणविहारेऽङ्गानि कार्याणि उत तन्त्रमिति विचारे सिद्धान्तमाह । दक्षिणेऽग्नाविति । देशभेदात्सर्वमङ्गजातं विक्रियते आवर्तते ॥ ३३ ॥

अचोदनेति चेत् ॥ ३४ ॥

पूर्वपक्ष्याशङ्कते । अचोदनेति । फलं प्रति कर्मणः अचोदनाऽविधानमिति । अयं भावः । पूर्वमुत्पत्तिवाक्ये इतिकर्तव्यताकाङ्क्षा नास्ति किं तु फलवाक्ये एवेत्युक्तं प्राक् । नेदं फलसंबन्धबोधकम् । अत इतिकर्तव्यताकाङ्क्षाऽभावेऽङ्गप्राप्तिरेव नास्ति तस्य तन्त्रादिविचारो व्यर्थ इति ॥ ३४ ॥

स्यात्पौर्णमासीवत् ॥ ३५ ॥

अस्योत्तरमाह । स्यादिति । यथा पौर्णमास्यां पौर्णमास्या यजेतेत्यत्र फलसंबन्धविध्यभावेऽपि साङ्गानुष्ठानं तथा ॥ ३५ ॥

प्रयोगचोदनेति चेत् ॥ ३६

पूर्वपक्ष्याशङ्कते । प्रयोगेति । उत्त[illegible]वाक्ये प्रयोगविधिः साङ्गप्रधानं गृह्णातीति भावः ॥ ३६ ॥

तथेह ॥ ३७ ॥

उत्तरमाह । तथेहेति । स्पष्टम् ॥ ३७ ॥

आसादनमिति चेत् ॥ ३८ ॥

पौर्णमासीवाक्याद्वैषम्यमाशङ्कते पूर्वपक्षी । आसादनमिति । अयं भावः । पौर्णमासीवाक्ये यजतीति श्रू[illegible] । अतः प्रयोगविधिर्युक्तः । अत्रासादयतीति श्रूयते । अनेन प्रयोगवि[illegible] [illegible]ीति युक्तं न, किं तु अदृष्टार्थं आसादनमात्रविधिरिति ॥ [illegible]

नोत्तरेणैकवाक्यत्वात् ॥ ३९ ॥

उत्तरमाह । नेति । उत्तरेण, उत्तरस्यां वेद्यामन्यानि हवींषि सादयतीत्येतेन सह एकवाक्यत्वात् । तुल्ययोगक्षेमात् । उत्तरस्यामष्टहविसामासादनस्य यागार्थत्वाद् दक्षिणस्यामपि तदर्थमेव वाच्यं नादृष्टार्थमिति भावः ॥ ३९ ॥

अवाच्यत्वात् ॥ ४० ॥

ननु होम एवात्राश्रुतः कथं तथात्वमत आह । अवाच्यत्वादिति । होमस्यासादयतिधातुना ऽवाच्यत्वात् । लक्षणेति शेषः ॥ ४० ॥

आम्नायवचनं तद्वत् ॥ ४१ ॥

ननु लक्षणायां तात्पर्यग्राहकं किमत आह । आम्नायेति । आम्नायस्य वेदस्य वचनं यदेवाध्वर्युः करोति तत्प्रतिप्रस्थाता करोतीति तथा देवतायज्ञानिति दक्षिणे विहारे ऽपि तद्वदुत्तरविहारवद्यागं दर्शयति ॥ ४१ ॥

उत्तरदक्षिणविहारयोः कर्तृभेदः । अधि० १० ।

कर्तृभेदस्तथेति चेत् ॥ ४२ ॥

तत्रैव दक्षिणविहारे ऋत्विजो ऽन्ये उत तएवेति चिन्तायां पूर्वपक्षमाह । कर्त्रिति । कर्तृभेदः ऋत्विग्भेदः तथा ऽङ्गवत् ॥ ४२ ॥

न समवायात् ॥ ४३ ॥

सिद्धान्तमाह । नेति । वचनेनेति शेषः । तस्माच्चातुर्मास्यानां यज्ञक्रतूनां पञ्चर्त्विज इति कर्तृषु पञ्चत्वसमवायात् । ऋत्विगाधिक्यं नेति भावः ॥ ४३ ॥

लिङ्गदर्शनाच्च ॥ ४४ ॥

लिङ्गेति । प्रवयसमृषभं दक्षिणां ददातीति श्रूयते । अन्यत्र दक्षिणा न श्रूयते । अतो ऽप्येककर्तृकत्वम् ॥ ४४ ॥

वेदिसंयोगादिति चेत् ॥ ४५ ॥

पूर्वपक्ष्याशङ्कते । वेदीति । अन्तर्वेद्यन्यः पादो बहिर्वेद्यन्य इति होतुः श्रुतम् । इदं होतुरैक्ये वेदिद्वये कथं घटतइत्याक्षेपाभिप्रायः ॥ ४५ ॥

न देशमात्रत्वात् ॥ ४६ ॥

उत्तरमाह । न देशेति । देशमात्रत्वाद् देशविशेषविधिरूपत्वात् । यदि पादप्रक्षेपो वेदिसंस्कारो भवेत् तदा वेदेः प्रधानत्वात् प्रतिप्रधानमङ्गावृत्तिर्भवेत् । नैवम् । किं तर्हि होतुर्निगदपाठे देशविशेषो ऽङ्गत्वेन विधीयते । तस्य देशस्यान्यतरेणापि कार्यसिद्धेर्न तदर्थमन्यहोता संपादनाय इति भावः ॥ ४६ ॥

उत्तरदक्षिणविहारयोरापराग्निकहोमानां भेदेनानुष्ठानम् । अधि· ११ ।

एकाग्नित्वादपरेषु तन्त्रं स्यात् ॥ ४७ ॥

तत्रैव पत्नीसंयाजानां तन्त्रमुतावृत्तिरिति संशये पूर्वपक्षमाह । एकाग्नीति । गार्हपत्यरूपैकाग्नित्वाद् अपरेषु पत्नीसंयाजादिषु तन्त्रम् ॥ ४७ ॥

नाना वा कर्तृभेदात् ॥ ४८ ॥

सिद्धान्तमाह । नानेति । नाना आवृत्तिः कर्तृभेदात् । अध्वर्युप्रतिप्रस्थातृभेदात् ॥ ४८ ॥

वाजपेये ब्रह्मसाम्न्यालम्भस्य कर्मशेषप्रतिषेधार्थत्वम् । अधि· १२ ।

पर्यग्निकृतानामुत्सर्गे प्राजापत्यानां कर्मोत्सर्गः श्रुतिसामान्यादारण्यवत्तस्माद् ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात् ॥ ४९ ॥

वाजपेये प्राजापत्यपशून्प्रकृत्य श्रुतं, तान्पर्यग्निकृतानुत्सृजन्तीति ब्रह्मसाम्न्यालभतइति । किमयं कर्मशेषः परिसंख्यार्थः ब्रह्मसाम्नीति कर्मान्तरमुतालम्भनादीमां तत्संबन्धिनामेव कालान्तरे प्रतिप्रसवार्थमिति संशये पूर्वपक्षमाह । पर्यग्नीति । उत्सर्ग इत्येतल्लक्षणप्रदर्शनपरं, प्राजापत्यानां पशूनां संबन्धि यच्छेषमालम्भनादि तस्योत्सर्गो विधीयते । अश्वमेधे पर्यग्निकृतानारण्यानुत्सृजत्यहिंसायाइतिवत् । कुतः, श्रुति-

साम्यात् । उत्सृजतिधातुसाम्यात् । तस्माद्ब्रह्मसाम्नि चोदनापृथक्त्वं स्यात्कर्मान्तरं स्यात् ॥ ४९ ॥

संस्कारप्रतिषेधो वा वाक्यैकत्वे क्रतुसामान्यात् ॥ ५० ॥

सिद्धान्तमाह । संस्कारेति । संस्कारप्रतिषेधः । संस्कारकालमात्रप्रतिषेधः । पर्यग्निकरणोत्तरकालः शेषसंस्काराणामतिदेशः प्राप्तः । तन्मात्रप्रतिषेध इत्यर्थः । तस्मात्कालादुत्कृष्य ब्रह्मसामकालसंबन्धो विधीयते । कुतः, क्रतुसामान्याद् वाक्यैकत्वे सिद्धे ब्रह्मसाम्न्यालभतइत्यत्र द्रव्यदेवताऽश्रवणात् क्रतुसामान्यं पूर्वोत्तरयोरेकक्रतुत्वं सिद्धम् । सिद्धे च तस्मिन्नुभयोरेकवाक्यत्वं सिद्धम् । तस्मिंश्च सिद्धे उक्तो ऽर्थः सिद्ध इति भावः । ननु पूर्वकालनिषेधस्य ब्रह्मसामकालस्य च विधाने कथमेकवाक्यतेति चेन्न । ब्रह्मसामकालविधानेनार्थसिद्धस्य पूर्वकालनिषेधस्यानुवादरूपत्वात् ॥ ५० ॥

वपायां चानभिघारणस्य दर्शनात् ॥ ५१ ॥

उक्तार्थे लिङ्गमप्याह । वपायामिति । प्रयाजशेषेण हवींष्यभिघारयतीति प्रकृतितः प्राजापत्यवपाभिघारणं प्राप्तम् । अत्रालम्भस्योत्कृष्टत्वाद्वपायागो ऽप्युत्कृष्टः । प्रयाजानन्तरं सवनीयप्रचारे जुह्वां कृते प्रयाजशेषाभावादभिघारलोपे एवमर्थवादो ऽस्ति । ब्रह्म वै ब्रह्मसाम ब्रह्मसाम्न्यालभते तेनाभिघृता इति । अनभिघृतहविषः प्रकारान्तरेणाभिघारकार्यलाभप्रतिपादको ऽर्थवादः संगच्छते । भिन्नयागपक्षे प्रयाजानां पुनरनुष्ठेयत्वेन प्रयाजशेषेण वपाभिघारसंभवात्प्रकारान्तरेणाभिघारोपपादनप्रयासो व्यर्थ एव स्यादिति भावः ॥ ५१ ॥

अहीने उस्त्रामुत्सर्गस्य कर्मशेषप्रतिषेधार्थत्वम् । अधि० १३ ।

पञ्चशारदीयास्तथेति चेत् ॥ ५२ ॥

अस्ति पञ्चसंवत्सरसाध्यः पञ्चशारदीयनामको ऽहीनः क्रतुः । तत्र सप्तदशमारुतीरुपाकरोति सप्तदशोक्ष्ण इति । तत्र द्वितीयं वाक्यं तान्पर्यग्निकृतान् प्रोक्षितान् कृत्वा इतरा आलभन्ते इतरानुत्सृजन्तीति ।

स्त्रीव्यक्तीनामालम्भः पुंव्यक्तीनामुत्सर्ग इत्यर्थः। तदनन्तरं पञ्चमे संवत्सरे त्रींस्त्रीनेकैकस्मिन्नहन्यालभेरन् पञ्चोत्तमे ऽहनीति। अत्र यएव प्रथमे संवत्सरे पर्यग्निकृता उक्षाणः उत्सृष्टास्तेषामेव द्वितीयादिवत्सरेषु पर्यग्निकरणं पञ्चमे वत्सरे पञ्चसु सुत्यासु तेषामेवालम्भः उत ते भिन्ना इति संशये पूर्वपक्षमाह। पञ्चेति। तथा पूर्वाधिकरणसिद्धान्तवत्। कालप्रतिषेधमात्रं न तु शेषस्यात्यन्तनिवृत्तिरिति भावः॥ ५२॥

न चोदनैकवाक्यत्वात्॥ ५३॥

सिद्धान्तमाह। नेति। पञ्चमे संवत्सरे त्रींस्त्रीनिति कर्मान्तरमपूर्वम्। एकवाक्यत्वात्। अनेकगुणविशिष्टापूर्वकर्मविधाने एकवाक्यत्वात्। गुणविधित्वे त्रीनिति अन्वहमिति प्राप्तकर्मानुवादेन विधाने वाक्यभेदादिति भावः॥ ५३॥

संस्काराणां च दर्शनात्॥ ५४॥

साधकान्तरमाह। संस्कारेति। संस्काराणां पर्यग्निकरणप्रोक्षणादीनां पुनर्दर्शनात्। प्रथमसंवत्सरे कृतत्वेन पुनः पुनः पर्यग्निकरणश्रवणं व्यर्थमिति भावः॥ ५४॥

अभिषेचनीयदशपेययोर्भेदेन प्रयोगः। अधि॰ १४।

दशपेये क्रयप्रतिकर्षात्प्रतिकर्षस्ततः प्राचां तत्समानं तन्त्रं स्यात्॥ ५५॥

राजसूये, अभिषेचनीय इत्येकाहः। ततः संसृपसंज्ञकानि हवींषि। ततो दशपेय इत्येकाहः। अत्राभिषेचनीयदशपेयाङ्गानां तन्त्रमुत पृथगनुष्ठानमिति संशये पूर्वपक्षमाह। दशपेयेति। तन्त्रम्। कुतः, क्रयप्रतिकर्षात्। सह सोमं क्रीणातीति उत्तरक्रतौ विद्यमाने सोमे क्रयस्य पूर्वक्रतावपकर्षात्। ननु भवतु सोमक्रयापकर्षः तावता तन्त्रं कथमत आह। ततः प्राचां प्रतिकर्षः ततः सोमक्रयात्प्राचामपकर्षः सिद्धः। तदन्तापकर्षस्य पञ्चमे सिद्धत्वात्। अतः सोमक्रयप्राचीनानां तन्त्रं स्यात् पूर्वाङ्गाणां तन्त्रसिद्धावुपक्रमानुसारेणोत्तराङ्गाणामपि तन्त्रमिति भावः॥ ५५॥

समानवचनं तद्वत् ॥ ५६ ॥

साधकान्तरमाह । समानेति । समानवचनं समानो वा एष यज्ञो यद्दशपेयश्चाभिषेचनीयश्चेति यज्ञयोः समानवचनं तद्वत् । यत्कालिकाङ्गकलापको ऽभिषेचनीयस्तत्कालिकाङ्गकलापकत्वं दशपेये प्रतिपादयति । अतः परस्परसादृश्यमिति भावः ॥ ५६ ॥

अप्रतिकर्षो वा ऽर्थहेतुत्वात्सहत्वं विधीयते ॥ ५७ ॥

सिद्धान्तमाह । अप्रतीति । मुख्यक्रय इति शेषः । मुख्यक्रये प्रयोगाद्बहिः सोमविक्रेत्रा सह यः संवादः एतावद् द्रव्यं दास्ये त्वं सोममानयेति वादस्तस्मिन् तन्त्रं विधीयते । स एव मुख्यक्रयः । अर्थहेतुत्वात् तस्य वादस्य द्रव्यलाभहेतुत्वात् । प्रयोगान्तःपातिक्रयस्य धर्ममात्रसाधनत्वादमुख्यत्वम् । अतस्तदन्तप्रतिकर्षो न ॥ ५७ ॥

पूर्वस्मिंश्चावभृथस्य दर्शनात् ॥ ५८ ॥

उक्तार्थे लिङ्गमप्याह । पूर्वस्मिन्निति । पूर्वस्मिन् अभिषेचनीये ऽवभृथदर्शनात् । समानं वा एतद्यज्ञं छिन्दन्ति यदभिषेचनीयस्यावभृथ इति । यद्यङ्गानां तन्त्रं द्वयोरवभृथः दशपेयोत्तरं भवितव्यः । पूर्वमेव श्रवणं तन्त्राभावे लिङ्गमिति भावः ॥ ५८ ॥

दीक्षाणां चोत्तरस्य ॥ ५९ ॥

तथा सद्यो दीक्षयन्तीत्युत्तरस्य दशपेयस्य स्वातन्त्र्येण दशपेयदिने दीक्षाविधानं लिङ्गमाह । दीक्षेति । स्पष्टम् ॥ ५९ ॥

समानः कालसामान्यात् ॥ ६० ॥

समानं च तद्वदिति पूर्वपक्षस्योत्तरमाह । समान इति । कालसामान्यात् । क्रतुरूपं यत्कालसामान्यं स्थूलकालः तं गृहीत्वा समानशब्द उपपन्नः । अभिषेचनीयदशपेययोरेकस्मिन् क्रतावनुष्ठेयत्वेन साम्यमिति भावः ॥ ६० ॥

Digitized by Google

वारुण्या निष्कासेन तुषैश्चावभृथं यन्तीत्यस्य कर्मान्तरोपदेशत्वम् । अधि० १५ ।

निष्कासस्यावभृथे तदेकदेशत्वात्पशुवत्प्रदानविप्रकर्षः स्यात् ॥ ६१ ॥

वरुणप्रघासे श्रूयते, वारुण्या निष्कासेन तुषैश्चावभृथं यन्तीति । तत्र पशुयागवत् प्रधानविप्रकर्षः उत कर्मान्तरमिति संशये पूर्वपक्षमाह । निष्कासस्येति । निष्कासस्यामिक्षायागशेषस्य वारुण्यामिक्षैकदेशत्वादेकदेवत्वाच्च पशुवत्प्रधानविप्रकर्षः ॥ ६१ ॥

अपनयो वा प्रसिद्धेनाभिसंयोगात् ॥ ६२ ॥

सिद्धान्तमाह । अपनय इति । अपनयः पूर्वकर्मणः कर्मान्तरोपदेशः । प्रसिद्धेन कर्मनामत्वेन प्रसिद्धेनावभृथशब्देनाभिसंयोगान्निर्देशात् ॥ ६२ ॥

प्रतिपत्तिरिति चेन्न कर्मसंयोगात् ॥ ६३ ॥

प्रतिपत्तिकर्मेत्याशङ्क्य समाधत्ते । प्रतीति । कर्मसंयोगात् । निष्कासेनेति तृतीयया ऽवभृथे प्रधानकर्मसंयोगात् ॥ ६३ ॥

प्रायणीयनिष्कासे उदयनीयनिर्वापस्यार्थकर्मत्वम् । अधि० १६ ।

प्रायणीये च तद्वत् ॥ ६४ ॥

ज्योतिष्टोमे प्रायणीयस्य निष्कासउदयनीयमभिनिर्वपतीति । अत्र पूर्वपक्षमाह । प्रायणीयइति । तद्वत् । अवभृथवत् । यथा ऽवभृथधर्मकमपूर्वं कर्मैवमुदयनीयधर्मकमपूर्वं कर्मेति भावः ॥ ६४ ॥

प्रतिपत्तिर्वा ऽकर्मसंयोगात् ॥ ६५ ॥

अपरं पक्षमाह । प्रतिपत्तिरिति । प्रायणीयाशेषप्रतिपत्तिः उदयनीयानिर्वापः । कुतः, अकर्मसंयोगात् । निष्कासपदार्थस्य उदयनीयारूपं यत्कर्म तद्धित्वेन निर्वापेणान्वयात् । निर्वापेण निष्कासं कुर्यादित्युपयुक्तसंस्कार इति भावः ॥ ६५ ॥

अर्थकर्म वा शेषत्वाच्छ्रपणवत्तदर्थेन विधानात् ॥ ६६ ॥

सिद्धान्तमाह । अर्थेति । अर्थकर्म प्रधानकर्म निर्वापः । कुतः, शेषत्वात् । निर्वापं प्रति निष्कासस्य गुणत्वात् । तत्र हेतुमाह । तदर्थेन विधानात् । सः गुणः अर्थो यस्य शब्दस्य स तदर्थः । तेन सप्तम्या विधानात् । सप्तम्या अधिकरणकारकत्वेन गुणत्वं स्पष्टमित्यर्थः ॥ ६६ ॥

इति जैमिनिसूत्रवृत्तौ एकादशाध्यायस्य द्वितीयः पादः ॥ २ ॥

वेद्याद्यङ्गानां प्रधानकालान्यकालकर्तव्यत्वम् । अधि० १ ।

अङ्गानां मुख्यकालत्वाद्वचनादन्यकालत्वम् ॥ १ ॥

पूर्वस्मिन्पादे एककालानामङ्गानां तन्त्रं विचारितमस्मिन्पादे भिन्नकालानां तन्त्रं विचार्यते । अङ्गानामिति । अङ्गानां मुख्यकालत्वात् । मुख्यस्य प्रधानस्य यः कालस्तत्कालिकत्वात् । वचनेनान्यकालिकत्वमपि । यथा पूर्वेद्युरिध्माबर्हिः करोतीति । इदं सूत्रं केवलोपदेशार्थं, सिद्धत्वेन विचार्याभावात् ॥ १ ॥

आधानस्य तन्त्रेणानुष्ठानम् । अधि० २ ।

द्रव्यस्याकर्मकालनिष्पत्तेः प्रयोगः सर्वार्थः स्यात् स्वकालत्वात् ॥ २ ॥

वसन्ते ब्राह्मणो ऽग्निमादधीतेति । इदमाधानं सर्वक्रत्वङ्गमिति कृत्वाचिन्तया इष्टिपशुसोमादिषु आधानमावर्ततउत तन्त्रमिति संशये प्रतिक्रत्वावर्तते अङ्गत्वादिति पूर्वपक्षे सिद्धान्तमाह । द्रव्यस्येति । आधानप्रयोगः सर्वार्थः । स्वकालत्वात् । वसन्तादिरूपस्वकालविहितत्वात् । द्रव्यस्याधानसंस्कृतवह्नेः अकर्मकाले प्रधानकालभिन्नकाले निष्पत्तेः । उत्पन्नत्वात् । प्रधानकालो ऽन्य आधानकालो ऽन्य इति भावः ॥ २ ॥

अग्नीषोमीयादिषु यूपस्य तन्त्रेणानुष्ठानम् । अधि० ३ ।

यूपश्चाकर्मकालत्वात् ॥ ३ ॥

ज्योतिष्टोमे ऽग्नीषोमीयपशौ यूपो विहितः, दीक्षासु यूपं छिनत्तीति । अयं यूपः केवलाग्नीषोमीयार्थ उतानूबन्ध्यासवनीयपश्वर्थो ऽपीति संशये केवलाग्नीषोमीयार्थ इति पूर्वपक्षे सिद्धान्तमाह । यूप इति ।

Digitized by Google

यूपस्त्रयाणां तन्त्रमकर्मकालत्वात् । पाशुककर्मानुष्ठानकाले यूपस्यानुत्पत्तेः । अग्नीषोमीयतन्त्राद्बहिष्त्वचस्याग्नीषोमीयार्थमेवेति निर्णेतुमशक्यत्वादिति भावः* ॥ ३ ॥

यूपसंस्काराणां तन्त्रेणानुष्ठानम् । अधि॰ ४ ।

संस्कारास्त्वावर्तेरन्नर्थकालत्वात् ॥ ४ ॥

यूपसंस्काराणां प्रोक्षणाञ्जनादीनामावृत्तिर्न वेति संशये पूर्वपक्षमाह संस्कारा इति । संस्काराः प्रोक्षणादय आवर्तेरन् अर्थकालत्वात् । अर्थः पशुनियोजनं तत्काला एते संस्कारा अतः यस्य पशोर्नियोजनं तत्कालत्वे तदर्थमिति निर्णयो भवतीति भावः ॥ ४ ॥

तत्कालास्तु यूपकर्मत्वात्तस्य धर्मविधानात्सर्वार्थानां वचनादन्यकालत्वम् ॥ ५ ॥

सिद्धान्तमाह । तत्काला इति । तत्काला दीक्षाकालाः संस्काराः । कुतः, यूपकर्मत्वात् । यूपः कर्म कार्यं येषां तस्वात् । तत्र किं मानमत आह । तस्य यूपस्य धर्मत्वेन संस्कारविधानात् । अयं भावः । दीक्षासु यूपं छिनत्तीत्यत्र द्वितीयया प्रधानं यूपमुत्पादयेदिति । अत्र छेदनमात्रेण न यूपोत्पत्तिः किं तु यावत्संस्कारविशिष्टस्यैव यूपपदवाच्यत्वात् । अतः छेदनं यावत्संस्कारोपलक्षकम् । तथा च यावतां दीक्षाकालः सिद्ध इति भावः । एवं सर्वार्थानां सतां वचनादन्यकालत्वमन्यकाले ऽनुष्ठानमात्रत्वं यथा ऽऽग्निमारुतादूर्ध्वमनूयाजैश्चरन्तीतिवत् ॥ ५ ॥

सकृन्मानं च दर्शयति ॥ ६ ॥

सकृन्मानं यूपमानं सकृत्त्वातं दर्शयति श्रुतिः । त्रिवृता यूपं परिवीयाग्नेयं पशुमुपाकरोतीति श्रुतिः परिव्याणमारभ्योपक्रान्ता तत्पूर्वाणां तन्त्रं दर्शयतीति भावः ॥ ६ ॥

स्वरोः साधारण्यम् । अधि॰ ५ ।

स्वस्तत्रापवर्गः स्यादस्वकालत्वात् ॥ ७ ॥

* इत उत्तरम्, एक यूपं च दर्शयति, इति, सूत्रमधिकं भाष्ये दृश्यते ।

Digitized by Google

स्वरुः सर्वपशूनां तन्त्रमुत भेदेनेति चिन्तायां पूर्वपक्षमाह । स्वरुरिति । तन्त्रापवर्गः तन्त्रेणाग्नीषोमीयतन्त्रेणापवर्गः समाप्तिर्यस्य स इति विग्रहेणाग्नीषोमीयतन्त्रे समाप्ते स्वरुविसर्ग इत्यर्थः । कुतः, अस्वकालत्वात् । न विद्यते स्वस्य स्वरोः कालो यस्य तत्त्वात् । छेदनादिवत्प्रधानादन्यकालाभावात् । अयं भावः । स्वरुणा पशुमनक्तीति अञ्जनार्थः स्वरुः न यूपार्थः । तथा चाञ्जनकालएव तस्य विधानं न छेदनकालइति ॥ ७ ॥

साधारणो वा ऽनुनिष्पत्तिस्तस्य साधारणत्वात् ॥

सिद्धान्तमाह । साधारणो वेति । स्वरुस्त्रिषु साधारण एकः यतो यूपादनुनिष्पत्तिस्तस्य साधारणत्वादेकत्वात् ॥ ८ ॥

सोमान्ते च प्रतिपत्तिदर्शनात् ॥ ९ ॥

उक्तार्थे लिङ्गमाह । सोमान्तइति । सोमान्ते सवनत्रयान्ते स्वरोः प्रतिपत्तिदर्शनात् । संस्थिते सोमे प्रस्तरं स्वरुं च प्रहरतीति दर्शनात् । यदि भेदेन स्वरुः अग्नीषोमीयान्तएव प्रहरणं स्यादिति भावः ॥ ९ ॥

तत्कालो वा प्रस्तरवत् ॥ १० ॥

पूर्वपक्ष्याशङ्कते । तत्काल इति । यथा प्रस्तरस्य प्रहरणे सोमान्तः काल एवं स्वरोरपि तत्कालविधिरिति भावः ॥ १० ॥

न वोत्पत्तिवाक्यत्वात्प्रदेशात्प्रस्तरे तथा ॥ ११ ॥

इदं पक्षं दूषयति न वेति । प्रस्तरवच्च स्वरुप्रहरणमत्यन्तमप्राप्तमतो ऽत्रैवोत्पत्तिः । अतः स्वरुप्रहरणोत्पत्तिवाक्यत्वात् । ननु प्रस्तरे कालविधानं सिद्धान्ते कथमिति चेदत आह । प्रदेशाद् दर्शपूर्णमासप्रदेशात् प्रस्तरे प्राप्ते प्रस्तरप्रहरणे तथा कालविधानं प्रस्तरप्रहरणस्य प्रकृतौ सत्त्वेनात्रातिदेशप्राप्तौ कालमात्रविधानं युक्तमिति भावः ॥ ११ ॥

द्वादशाहे कण्डूयनविषाणाप्रासनस्यान्त्याहे एव कर्तव्यत्वम् । अधि० ६ ।

अहर्गणे विषाणाप्रासनं धर्मविप्रतिषेधादन्त्ये

Digitized by Google

प्रथमे ऽहनि वा विकल्पः स्यात् ॥ १२ ॥

ज्योतिष्टोमे नीतासु दक्षिणासु चात्वाले कृष्णविषाणां प्रास्यतीति। अयं द्वादशाहादावतिदेशेन प्राप्तस्तस्य प्रथमे ऽहनि चरमे ऽहनि वा विकल्प उत चरमे ऽहन्येवेति संशये पूर्वपक्षमाह। अहर्गणइति। अहर्गणे द्वादशरात्रादौ कृष्णविषाणाप्रासनं प्रथमे ऽन्त्ये वा ऽहनि धर्मविप्रतिषेधात्। पक्षद्वये कस्य चिद्धर्मस्य लोपात्। प्रथमे ऽहनि तस्य चात्वाले प्रक्षेपे द्वितीये ऽहनि माध्यन्दिने सवने दक्षिणानयनात्प्राक् कृष्णविषाणया कण्डूयते इति शास्त्रबाधः। चरमे ऽहनि प्रक्षेपे चरमात्प्रागहःसु दक्षिणानयनोत्तरं प्रकृतौ हस्तेन कण्डूयनं कृप्तमतिदेशप्राप्तं बाध्यते। अतो ऽत्रेच्छैव नियामिकेति भावः ॥ १२ ॥

पाणेस्त्वश्रुतिभूतत्वाद्विषाणानियमः स्यात्प्रातः सवनमध्यत्वाच्छिष्टे चाभिप्रवृत्तत्वात् ॥ १३ ॥

सिद्धान्तमाह। पाणेरिति। चरममाध्यन्दिनसवनपर्यन्तं कण्डूयने विषाणानियमः स्यात्। कुतः, प्रातःसवनमध्यत्वात्। अहर्गणसाध्यकृतौ प्रातःसवनानि मध्ये यस्य तत्त्वात्। प्रातःसवने विषाणाकण्डूयननियमेन प्रथमे ऽहनि विषाणात्यागे विषाणाकण्डूयनलोपापत्तेरिति भावः। ननु दक्षिणादानोत्तरं हस्तकण्डूयनं लुप्येत। अत्र इष्टापत्तिं कुर्वन्नाह। पाणेः पाणिकण्डूयनस्याश्रुतिभूतत्वात्। अशास्त्रत्वात्। रागप्राप्तत्वादिति यावत्। तल्लोपे नाङ्गलोप इति भावः। ननु दक्षिणादानोत्तरं हस्तकण्डूयनेन विधिहानिरित्यत आह। शिष्टे दक्षिणादानोत्तरं कालिकशेषे च विषाणानियमः स्यात्। शास्त्रस्य चरममाध्यन्दिनपर्यन्तमभिप्रवृत्तत्वात्। कृष्णविषाणाप्रासनपर्यन्तं तत्कण्डूयनस्य शास्त्रतात्पर्यादिति भावः ॥ १३ ॥

राजसूये ऽन्त्ये एव हविष्कृत्काले वाग्विसर्गः। अधि० ७।

वाग्विसर्गो हविष्कृता बीजभेदे तथा स्यात् ॥ १४ ॥

राजसूये नानाबीजेष्टिरग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणां सोमाय वनस्पतये श्यामाकं चरुमित्यादिना वि-

-हिता । प्रणीताकाले नियमितवाचः हविष्कृदेहीति काले विसर्गो विहितः । न हस्तकण्डूयनवदात्तेपलब्धः । अतः प्रथमेन चरमेण वा हविष्कृता वाग्विसर्ग इति पूर्वपक्षे सिद्धान्तमाह । वागिति । बीजभेदे नानाबीजेष्टौ तथा कृष्णविषाणाप्रासनवच्चरमहविष्कृतैव स्यात् । अत्रापि वाग्विसर्गो न विधीयते । तस्य रागप्राप्तत्वात् । किं तु गृहीतवाङ्नियमस्य मर्यादामात्रविधिरिति भावः ॥ १४ ॥

अग्नीषोमीये पौरोडाशिककालएव वाग्विसर्गः । अधि० ८ ।

पशौ च पुरोडाशे समानतन्त्रं भवेत् ॥ १५ ॥

अग्नीषोमीयपशौ पाशुकं पौरोडाशिकं चेति तन्त्रद्वयमस्ति । तत्रोभयत्र वाङ्नियमः हविष्कृदाह्वानं चास्तीति कृत्वाचिन्तया सिद्धान्तमाह । पशाविति । पुरोडाशे पशौ वाङ्नियमस्य तन्त्रं भवेत् । पौरोडाशिकतन्त्रपर्यन्तं वाङ्नियमः कार्य इति भावः ॥ १५ ॥

अग्निचयने ऽग्निविमोकस्य प्रधानापवर्गकालत्वम् । अधि० ९ ।

*अग्निसंयोगः सोमकाले तदर्थत्वात्संस्कृतकर्मणः परेषु साङ्गस्य तस्मात्सर्वापवर्गे विमोकः स्यात् ॥ १६ ॥

अग्नौ अग्निं युनज्मीति होमो योगः । इमं स्तनमिति होमो विमोकः । अयं विमोकः किं प्रधानान्ते स्यादुत साङ्गप्रधानान्तइति संशये पूर्वपक्षमाह । अग्निसंयोग इति । सोमकाले यो ऽग्निसंयोगः स साङ्गस्याङ्गसहितप्रधानस्य । कुतः, संस्कृतकर्मणः अनया ऽऽहुत्या संस्कृताग्नेः परेषु अग्निकर्मसु विशेषाश्रवणादिति शेषः । अमुककर्मार्थमिदमिति शेषानुपलब्धेः । किं च संस्कृतकर्मणः इति देहलीदीपन्यायेन तदर्थत्वादित्यनेनाप्यन्वेति । संस्कृतकर्मणः । तदर्थत्वात् साङ्गप्रधानार्थत्वात् । तस्माद्योगस्य साङ्गप्रधानार्थत्वाद् वह्नेः विमोकः सर्वापवर्गे साङ्गप्रधानसमाप्तौ स्यात् । यदर्थं योगः तत्समाप्तिं विना विमोकासंभवादिति भावः ॥ १६ ॥

प्रधानापवर्गे वा तदर्थत्वात् ॥ १७ ॥

---

* अत्र पूर्वपक्षसिद्धान्तयोः वार्त्तिकमते वैपरीत्यम् ।

सिद्धान्तमाह । प्रधानेति । तदर्थत्वात् । योगस्य केवलं प्रधानार्थत्वात् । पञ्चभिर्युनक्ति पाङ्क्तो यावानेव यज्ञस्तमालभतइति यज्ञप्राप्त्यर्थत्वात् । योगस्येति भावः ॥ १७ ॥

अवभृथे च तद्वत् प्रधानार्थस्य प्रतिषेधोऽपवृक्तार्थत्वात् ॥ १८ ॥

उक्तार्थे युक्त्यन्तरमाह । अवभृथइति । यदि यज्ञशब्दयुक्ते ऽपि साङ्गप्रधानार्थत्वस्वीकारे ऽवभृथे ऽपि तद्वत्पूर्वाधिकरणपूर्वपक्षवत् । होतुर्वरणं साङ्गप्रधानार्थं स्यात् । यज्ञशब्दयोगश्चैवं यद्भृता वषट् कुर्वन्ति यजमाने यज्ञस्याशीः प्रतितिष्ठन्तीति । न चेष्टापत्तिः । होतुर्वरणस्य साङ्गप्रधानार्थत्वे ऽवभृथेन होतारं वृणीतइति निषेधो ऽसङ्गतः स्यात् । स्वमते उपपत्तिमाह । प्रधानार्थस्य वरणस्यापवृक्तार्थत्वात् । निवृत्तकार्यत्वादवभृथे ऽतिदेशेन वरणप्राप्तौ निषेधः सफलः ॥ १८ ॥

अहर्गणे च प्रत्यहं स्यात्तदर्थत्वात् ॥ १९ ॥

सिद्धान्तमाह । अहर्गणइति । अहर्गणे द्वादशरात्रादौ योगविमोकयोस्तदर्थत्वात् । प्रधानार्थत्वात् । प्रत्यहं दर्शयति श्रुतिर्योगविमोकौ दर्शयति । स वा अहरहर्युनक्त्यहरहर्विमुञ्चतीति । सर्वार्थत्वे प्रथमं योगो ऽन्ते विमोकः स्यादिति भावः । एवं भाष्यसंमतः सूत्रार्थः । वार्तिकाभिमतस्तु विस्तरभयान्नेह लिख्यते । तन्त्ररत्नादाववगन्तव्यः ॥ १९ ॥

उपसत्कालस्य सुब्रह्मण्याह्वानस्य तन्त्रेणानुष्ठानम् । अधि० १० ।

सुब्रह्मण्या तु तन्त्रं दीक्षावदन्यकालत्वात् ॥ २० ॥

ज्योतिष्टोमे प्रवर्ग्यसंनिधौ सुब्रह्मण्याह्वानं विहितं तदहर्गणे ऽतिदेशेन प्राप्तं तद्भेदेनोत तन्त्रमिति संशये सुत्याभेदाद्भेद इति पूर्वपक्षे सिद्धान्तमाह । सुब्रह्मण्येति । प्रवर्ग्यकालीना सुब्रह्मण्या तन्त्रम् । दीक्षावदन्यकालत्वात् । यथा दीक्षणीयादिः सुत्याकालादन्यकालत्वात्तन्त्रं तथा ऽत्रापीति भावः ॥ २० ॥

सुत्याकालिकस्य सुब्रह्मण्याह्वानस्य भेदेनानुष्ठानम् । अधि० ११ ।

तत्काला त्वावर्तेत प्रयोगतो विशेषसंयोगात् ॥ २१ ॥

सुत्याकालीनसुब्रह्मण्याह्वानं तन्त्रेण भेदेन वेति संशये सिद्धान्तमाह । तत्कालेति । सुत्याकाला प्रयोगतः अद्य सुत्यामागच्छेति प्रयोगे विशेषेण अद्येति पदेन संयोगात् ॥ २१ ॥

अप्रयोगाङ्गमिति चेत् ॥ २२ ॥

पूर्वपक्षयाशङ्कते । अप्रेति । अद्येति प्रयोगाङ्गं नेति प्रकृतौ एका सुत्या तत्र सुत्यामागच्छेति प्रयोगे ऽपि तस्मिन्नहन्याह्वानं सिद्धमतः अद्येत्यनङ्गं सुत्यामागच्छेति विवक्षितार्थस्त्वबाधितः तन्त्रे ऽपीति भावः ॥ २२ ॥

स्यात्प्रयोगनिर्देशात्कर्तृभेदवत् ॥ २३ ॥

उत्तरमाह । स्यादिति । प्रयोगे निर्देशाद् अद्येत्यस्य कर्तृभेदवत् । अयंभावः । यथा वरुणप्रघासे आहवनीये मारुत्या अपि यागसंभवे ऽदृष्टार्थदक्षिणवेदिरूपदेशभेदात्कर्तृभेदः तथा ऽदृष्टार्थमुच्चारिते ऽद्येति तस्य तदहःसंबन्धित्वे दिनान्तरे ऽन्य इति ॥ २३ ॥

तद्भूतस्थानादग्निवदिति चेदपवर्गस्तदर्थत्वात् ॥ २४ ॥

पुनः प्रकारान्तरेणाशङ्क्य दूषयति । तद्भूतेति । तेन सकृदाह्वानेन भूतं संस्कृतं स्थानमधिष्ठानरूपा देवता तस्मादेकस्मिन्नहनि आह्वानेन संस्कृता देवता सर्वार्था सकृदाधानसंस्कृता अग्नेः सर्वार्थत्ववदिति भावः । दूषयति । तदपवर्गः तस्याह्वानस्यापवर्गः तद्दिनएव समाप्तिस्तदर्थत्वात् । यस्मिन् दिनआह्वानं तस्य तद्दिनकर्मार्थत्वात् । यथा ऽग्निसंमार्गादीनाम् ॥ २४ ॥

अग्निवदिति चेत् ॥ २५ ॥

तत्राग्निसंमार्गो ममाहवनीयाग्निदृष्टान्त इति तुल्यमिति शङ्कते । अग्नीति ॥ २५ ॥

Digitized by Google

न प्रयोग साधारण्यात् ॥ २६ ॥

आधानतुल्यं नेत्याह । नेति । प्रयोगसाधारण्यात् । प्रयोगान्तःपातित्वादस्याधानस्य न तथेति भावः ॥ २६ ॥

लिङ्गदर्शनाच्च ॥ २७ ॥

लिङ्गं च दर्शयति । लिङ्गेति । संस्थिते संस्थिते ऽहनि आग्नीध्रागारं प्रविश्य सुब्रह्मण्य सुब्रह्मण्यामाहूयेति संप्रेष्यतीति प्रतिदिनं प्रैषविधानमनुष्ठाने लिङ्गम् ॥ २७ ॥

तद्धि तथेति चेत् ॥ २८ ॥

पूर्वपक्षी तन्त्रसाधकं दृष्टान्तान्तरं दर्शयति । तदिति । तद् यूपाहुतिरूपं कर्म यथा एकादशिन्यां तन्त्रं तथेदमपि तन्त्रम् ॥ २८ ॥

नाशिष्टत्वादितरन्यायत्वात् ॥ २९ ॥

उत्तरमाह । नेति । अशिष्टत्वात् । अविहितत्वात् । यूपाहुतेः समोपदेशविधिर्न किं त्वाहवनीयप्रतिषेधमात्रमित्युक्तम् । इह सुत्याकालआह्वाने विहितवैषम्यमिति भावः । इतरन्यायत्वात् । एतद्विषयइतराग्निसंस्कारन्याय एव युक्त इति भावः ॥ २९ ॥

विध्येकत्वादिति चेत् ॥ ३० ॥

पूर्वपक्ष्यन्यदृष्टान्तमाह । विधीति । विधीनां विधिविहितवसतीवर्याद्विसंभरणादीनामेकत्वात्तथा ॥ ३० ॥

न कृत्स्नस्य पुनः प्रयोगात्प्रधानवत् ॥ ३१ ॥

उत्तरमाह । न कृत्स्नेति । न, वसतीवरीवत् । सोमाभिषवादिकृत्स्नस्य समग्रस्य पुनः प्रयोगात् । पुनरनुष्ठानात् । यथा प्रधानं पुनरनुष्ठीयते न तन्त्रं तथेदमपि । वसतीवरीसंभरणस्य सुत्याप्राग्दिनानुष्ठेयत्वाद्वितीयावत्तन्त्रं भिन्नकालत्वात् । अस्य प्रधानकालिकत्वाच्च तन्त्रमिति भावः ॥ ३१ ॥

Digitized by Google

देशपात्रर्त्विजामन्यप्रयोगे पूर्वदेशाद्यादानस्यैच्छिकत्वम् । अधि० १२ ।

लौकिकेषु याथाकामी संस्कारार्थालोपात् ॥ ३२ ॥

विहितसंस्कारेण जनितादृष्टरूपमलौकिकं यूपाहवनीयादि तद्भिन्नेषु लौकिकेषु ऋत्विगादिषु प्रतिप्रयोगं तएव ग्राह्या उतान्ये ऽपीच्छयेति संशये प्रस्तरादिवद्यूपादिवदन्यदिति पूर्वपक्षे सिद्धान्तमाह । लौकिकइति । याथाकामी इच्छेति । अन्ये वा संस्कारार्थालोपात् । संस्कारश्चार्थश्च संस्कारार्थौ तयोर्लोपः संस्कारार्थलोपस्तस्याभावः संस्कारार्थालोपस्तस्मात् । अयं भावः । लौकिकेषु देशकर्त्रादिषु पूर्वप्रयोगकृतस्य प्रयोगान्तरे उपजीव्यस्य संस्कारस्याभावेनान्यापादने ऽपि संस्कारलोपाभावात् । एवं दृष्टस्य प्रयोगनिर्वाहरूपार्थस्याप्यन्यग्रहणे लोपाभावादिच्छैव नियामिकेति ॥ ३२ ॥

पात्राणामाकर्मसमाप्ति धारणम् । अधि० १३ ।

यज्ञायुधानि धार्येरन् प्रतिपत्तिविधानादृजीषवत् ॥ ३३ ॥

यज्ञपात्राणां यावज्जीवं धारणमुत प्रतिप्रयोगमन्यानीति विचारे सिद्धान्तमाह । यज्ञेति । यज्ञायुधानि यज्ञपात्राणि । प्रतिपत्तिविधानात्, आहिताग्निमग्निभिर्दहन्ति यज्ञपात्रैश्चेति । ऋजीषं गतसाराः सोमावयवाः अहर्गणे यावद्दिनसंबन्धि धार्यते ऽवभृथसमये ऋजीषमप्सु प्रहरन्तीति प्रतिपत्तिसंस्कारार्थम् ॥ ३३ ॥

यजमानसंस्कारो वा तदर्थः श्रूयते तत्र याथाकामी तदर्थत्वात् ॥ ३४ ॥

पूर्वपक्षमाह । यजमानेति । यजमानस्याङ्गं पात्राणि न प्रतिपत्तिः तदर्थः यजमानार्थः । यजमानेत्यत्र द्वितीयया प्राधान्यस्य पात्रपदोत्तरतृतीयया चाङ्गत्वमिति भावः । नन्वस्तु यजमानार्थत्वं किमेतावतेत्याशङ्कायां यावज्जीवधारणाभावरूपं पूर्वसूत्राद्विपरीतं फलमाह । तत्र पात्रधारणे याथाकामी तदर्थत्वात् । यजमानार्थत्वात् । पूर्वप्रयोगपात्रत्यागे ऽपि चरमप्रयोगपात्रैर्यजमानसंस्कारसंभवादिति भावः ॥ ३४ ॥

Digitized by Google

मुख्यस्य धारणं वा मरणस्यानियतत्वात् ॥ ३५ ॥

सिद्धान्त्येकदेशिनो मतम् । पात्राणां यजमानार्थत्वमुररीकुर्वन्नाह । मुख्यस्येति । मुख्यस्य प्राथमिकयज्ञपात्रस्य धारणं, हेतुः स्पष्टः । पूर्वप्रयोगपात्रे त्यक्ते ऽग्रिमप्रयोगात्प्राग् यजमानमरणे पात्रसंस्कारासंभवादिति भावः ॥ ३५ ॥

यो वा यजनीये ऽहनि म्रियते सो ऽधिकृतः स्यादुपवेषवत् ॥ ३६ ॥

पक्षान्तरमुत्थापयति । यो वेति । न मुख्यधारणमन्तरा मृते नायं संस्कारः किं तु यजनीये ऽहनि यो मृतः स एवाधिकृतः । यथोपवेषेण कपालोपधाने साान्नाय्यवानेव शाखामूलस्योपवेषेणासन्नयतः शाखाऽभावादुपवेषाभावस्तथा ॥ ३६ ॥

न शास्त्रलक्षणत्वात् ॥ ३७ ॥

उपवेषाद्वैषम्यं दर्शयति । नेति । नायं दृष्टान्तः तस्योपवेषस्य शास्त्रलक्षणत्वात् । शास्त्रविहितत्वात् । तथा हि । सान्नाय्यार्था शाखा तन्मूलमुपवेषः । असन्नयतः शाखानिवृत्ताउपवेषो निवृत्तः । अत्रान्तरा मृतस्य पात्रधारणेन संस्कारसंभवेन न तन्निवर्तकं किञ्चिदस्तीति भावः ॥ ३७ ॥

उत्पत्तिर्वा प्रयोजकत्वादाशिरवत् ॥ ३८ ॥

सिद्धान्त्येकदेशी अन्तरा मृते पात्रसंस्कारं स्वीकृत्य धारणं विनैव तदुपपत्तिं प्रकारान्तरेणाह । उत्पत्तिरिति । अन्तरा मृतौ तत्कालपात्राणामुत्पत्तिः कार्या संस्कारे प्रयोजकत्वात् । यथा चतुर्पेये घृतव्रतो भवत इत्यनेन व्रतार्थं घृतविधानेन पयोनिवृत्त्या व्रतार्थदोहननिवृत्त्या, अभावे व्रतदुहो ऽन्यां यजमानस्य व्रतदुहामाशिरे दुहन्तीत्यत्र दधिरूपाशिरार्थं गौर्नवीनैवोपादीयते तद्वत् ॥ ३८ ॥

शब्दासामञ्जस्यमिति चेत् ॥ ३९ ॥

इमं पक्षं दूषयति । शब्देति । यज्ञपात्राणामङ्गत्वं श्रुतं, नवीने तत्कालसंपादिते यज्ञयोगाभावादसामञ्जस्यं ज्ञेयम् ॥ ३९ ॥

तथा ऽऽशिरे ॥ ४० ॥

इममेव दोषमाशिरे ऽतिदिशति । तथेति । तथा तुल्यः व्रतदुहः अभावेन बाधो ज्ञेयः ॥ ४० ॥

शास्त्रात्तु विप्रयोगस्तत्रैकद्रव्यचिकीर्षया कृतावथेहा-पूर्वार्थवद्भूतोपदेशः ॥ ४१ ॥

समाधत्ते । शास्त्रादिति । शास्त्रात् । घृतव्रतो भवत इति शास्त्रात् । विप्रयोगः शब्दासामञ्जस्यम् । तदेव दर्शयति । तत्र प्रकृतौ ज्योतिष्टोमे एकस्या गोर्यद्द्रव्यं पयः व्रते आशिरे चेति चिकीर्षया व्रतदुघामाशिरे दुहन्तीति श्रुतम् । तत्रातिदेशेन प्राप्तौ घृतव्रतेन पयोव्रतबाधादाशिरे नवीनगोसंपादनकृतादप्यथेह दाहे न पात्राणामतिदेशेन प्राप्तिः किं त्वपूर्वार्थवद् अपूर्वार्थविधिमत् । अतो भूतस्य यज्ञसंबन्धित्वेन क्लृप्तस्य उपदेशो विधिः ॥ ४१ ॥

पात्राणामाधानमारभ्य धारणम् । अधि० १४ ।

प्रकृत्यर्थत्वात्पौर्णमास्याः क्रियेरन् ॥ ४२ ॥

एवमेकदेशिमतमदूषयित्वैवावान्तरं चिन्त्यते । किं पात्राणि पौर्णमासीमारभ्य धार्याण्युताधानप्रभृतीति संशये पूर्वपक्षमाह । प्रकृतीति । प्रकृत्यर्थत्वादिमानि पात्राणि अनारभ्याधीतत्वात्प्रकृत्यर्थान्यतः पौर्णमासीमारभ्य धारणम् ॥ ४२ ॥

अग्न्याधेये वा ऽविप्रतिषेधात्तानि धारयेन्मरणस्यानिमित्तत्वात् ॥ ४३ ॥

सिद्धान्तमाह । अग्न्याधेयइति । अग्न्याधेये धारयेत् । अविप्रतिषेधाद् बाधकाभावात् । पौर्णमासीमारभ्य धारणे बाधकमाह । मरणस्यानिमित्तत्वात् । अनियतत्वात् । यद्यपि पौर्णमासार्थानि पात्राणि तथा ऽपि आधानानन्तरं पौर्णमास्याः प्राग् यजमानमरणे यजमानशरीरसंस्कारो न भवेदतः पवमानेष्ट्यामतिदेशतः प्राप्तानामेव तदारभ्य धारणमिति भावः ॥ ४३ ॥

प्रतिपत्तिर्वा ऽप्यन्येषाम् ॥ ४४ ॥

एवमन्तरा प्रक्रान्तां चिन्तां समाप्य यजमानसंस्कारार्थानि पात्राणि इत्येकदेशिमतं दूषयति । प्रतिपत्तिरिति । यथा ऽन्येषां सोमलिप्तपात्राणामवभृथेन सह नयः अप्सु प्रक्षेपः प्रतिपत्तिः एवं यजमानशरीरे प्रक्षेपः पात्राणां प्रतिपत्तिः संस्कारः । यजमानस्य दक्षिणे पाणौ जुहूं नासिकयोः स्रुवौ इत्यादौ पात्रवाचकपदोत्तरं द्वितीयाश्रवणात् । तथा ऽनयो ऽपि नानाकर्मसूपयुक्ताः प्रतिपादनार्हा इति तेषामपि प्रतिपत्तिरेव । आहिताग्निमग्निभिर्यज्ञपात्रैश्च दहन्तीत्यत्र तृतीयाश्रुत्या दाहे करणत्वमास्तां यजमानशरीरे निक्षेपस्तु प्रतिपत्तिरेव ॥ ४४ ॥

सर्वसोमानामुपरिष्टात् प्राजापत्यप्रचारः । अधि० १५ ।

उपरिष्टात्सोमानां प्राजापत्यैश्चरन्तीति सर्वेषामविशेषादबाध्यो हि प्रकृतिकालः ॥ ४५ ॥

वाजपेये प्राजापत्यपशून्प्रकृत्य श्रूयते । उपरिष्टात्सोमानां प्राजापत्यैश्चरन्तीति । तत्रैवं क्रमः । तृतीयसवने प्रथममार्भवः पवमानः ततो वैश्वदेवग्रहपर्यन्ताः शस्त्रवन्तः सोमाः । ततः शस्त्रसोमग्रहहोमः । ततो ऽग्निष्टोमसाम । तत उक्थ्यादयः सोमविकाराः । एवं क्रमे किमार्भवपवमानकाले प्राजापत्यप्रचारः उत शस्त्रवत्सोमान्ते उत विकारस्थाने उत सर्वान्त इति संशये सिद्धान्तरूपं चरमपक्षमाह । उपरिष्टादिति । सर्वेषां सोमानामुपरिष्टात्प्रवर्तन्ते । अविशेषात् । सोमानामित्यविशेषश्रवणात् । ननु प्रकृतौ आर्भवपवमानकालः पशुप्रचारे प्राप्तः । कथं तस्य बाध इत्यत आह । प्रकृतिकालः आर्भवपवमानकालः अबाध्यः अश्रुतः आनुमानिकः । ततो ऽपि बलवता उपरिष्टात्सोमानामिति प्रत्यक्षश्रुत्या बाध इति भावः ॥ ४५ ॥

अङ्गविपर्यासो विना वचनादिति चेत् ॥ ४६ ॥

ननु सर्वसोमान्ते ऽनुष्ठाने आग्निमारुतादूर्ध्वमनूयाजैश्चरन्तीति प्रकृत्य परिधीन् हारियोजनेन प्रचरन्तीति क्रमबाधो विना वचनमिति शङ्कते । अङ्गेति । स्पष्टम् । ४६ ॥

उत्कर्षः संयोगात्कालमात्रमितरत्र ॥ ४७ ॥

समाधत्ते । उत्कर्षे इति । अनूयाजपरिधिप्रहरणयोः पशुप्रचारोत्कर्षे उत्कर्षो न्याय्यः । कुतः, संयोगात् पशुप्रचारेण संयोगात् । पश्वर्थत्वादिति हृदयम् । नन्वाग्निमारुतादूर्ध्वमनूयाजैश्चरन्ति प्रहृत्य परिधीन् जुहोतीत्यनेनाग्निमारुतानूयाजयोर्हारियोजनपरिधिप्रहरणयोरङ्गत्वं प्रतीयते तस्य का गतिरत आह । कालमात्रमितरच्च । उक्तवाक्यद्वये दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेतिवत्कालमात्रविधिरिति भावः ॥ ४७ ॥

प्रकृतिकालासत्तेः शस्त्रवतामिति चेत् ॥ ४८ ॥

द्वितीयं पक्षमवतारयति । प्रकृतीति । शस्त्रवतामन्ते प्रचारः प्रकृतिकालालाभे ऽपि प्रकृतिकालासत्तेः ॥ ४८ ॥

न श्रुतिविप्रतिषेधात् ॥ ४९ ॥

दूषयति । नेति । श्रुतेः सोमान्ते इति श्रुतेः विप्रतिषेधाद् बाधात् । अविशेषश्रुतस्य शस्त्रवतामन्ते इति अर्थे शक्यार्थबाध इति भावः ॥ ४९ ॥

विकारस्थानइति चेत् ॥ ५० ॥

तृतीयं पक्षमुत्थापयति । विकारेति । विकारइति व्याख्यातम् ॥ ५० ॥

न चोदनापृथक्त्वात् ॥ ५१ ॥

दूषयति । नेति । चोदनापृथक्त्वात् । कर्मपृथक्त्वात् । अयं भावः । तृतीयपूर्वपक्षे युक्तिर्हि सोमः प्रकृतिः पशुप्रचारो वैकृतं कर्म प्रकृत्यन्ते वैकृतमिति । नैतद्युक्तम् । सोमयागपशुप्रचारयोः स्वातन्त्र्येण पृथक्त्वात् प्रकृतिविकृतिभावाभावाद् वैकृतानामन्तइति परिभाषैव न प्रवर्ततइति ॥ ५१ ॥

सवनीये पुरोडाशे देवतोत्कर्षः । अधि॰ १६ ।

उत्कर्षे सूक्तवाकस्य न सोमदेवतानामुत्कर्षः पश्वनङ्गत्वाद्यथा निष्कर्षे ऽनन्वयः ॥ ५२ ॥

आग्निमारुतादूर्ध्वमनूयाजैश्चरन्तीति पाशुकानूयाजोत्कर्षे तदङ्गुत्कर्षनियमेन सूक्तवाकस्याप्युत्कर्षो जातः । तस्मिन् सूक्तवाके सवनी-

Digitized by Google

यपुरोडाशानामपि कीर्तनमस्ति। भृज्यचिन्द्राय हरिवते धानाः पूषण्वते करम्भमित्यादि। तत्कीर्तनमुत्कृष्यते नेति संशये पूर्वपक्षमाह। उत्कर्षः इति। सोमदेवतानां सवनीयदेवतानां च उत्कर्षः। कुतः, तासां पश्वनङ्गत्वात्। यथा निष्कर्षे ऽनन्वयः पौर्णमासप्रयोगाङ्गभूताभ्यो दर्शदेवताभ्यो निष्कर्षे बहिर्भावे सति सूक्तवाके पौर्णमास्यां दर्शदेवताऽनन्वयो यथा तथा ॥ ५२ ॥

वाक्यसंयोगाद्वोत्कर्षः समानतन्त्रत्वादर्थलोपादनन्वयः ॥ ५३ ॥

सिद्धान्तमाह। वाक्यसंयोगादिति। सूक्तवाकवाक्ये तासामपि देवतानां संयोगात्। सवनीयपुरोडाशपशुप्रयोगयोर्मिलित्वा एकं सूक्तवाकवाक्यं पठितम्। भृज्यचिन्द्राय हरिवते धानाः पूषण्वते करम्भं सरस्वतीवते परिवापमयं यजमान इति। तथा इन्द्राय हरिवते धानाभिः पूषण्वते करम्भेण सरस्वतीवते परिवापेण सूपस्था अद्य देव इति च तन्मध्यपतितानामप्युत्कर्ष इति भावः। ननु दर्शपूर्णमासप्रयोगपठितानां सूक्तवाकदेवतानां कथं विभज्य पाठो ऽत आह। समानतन्त्रत्वात्। वेदे दर्शपूर्णमासप्रयोगपाठः समानतन्त्रेण कृतः। अत एकवाक्ये सर्वदेवतापाठः। तथा ऽप्यमावास्यायाममावास्यया पौर्णमास्यां पौर्णमास्येति प्रयोगद्वयस्य कालभेदेनानुष्ठाने अर्थलोपात्। अस्येष्टदेवतास्मरणरूपकार्यस्य लोपात्तत्प्रयोगे इतरानन्वयो युक्तः। इह तु सवनीये सूक्तवाक एव नास्ति यत्र पाठस्तत्रापि अनन्वये पाठवैयर्थ्यमिति भावः॥ ५३ ॥

इति जैमिनीयसूत्रवृत्तौ एकादशस्याध्यायस्य तृतीयः पादः ॥ ३ ॥

राजसूये आग्नावैष्णवादिके ऽङ्गानां भेदेनानुष्ठानम्। अधि० १।

चोदनैकत्वाद्राजसूये ऽनुक्तदेशकालानां समवायात्तन्त्रमङ्गानि ॥ १ ॥

अथ चतुर्थपादे ऽस्पष्टकर्तृभेदस्थले तन्त्रावापौ विचार्येते। पौष्णं चरुं श्यामो दक्षिणा वारुणं यवमयं चरुमश्वो दक्षिणेति। अत्राङ्गानां तन्त्रमुत भेद इति संशये पूर्वपक्षमाह। चोदनेति। अनुक्तदेशकालानां

Digitized by Google

समवायात्। परस्परसंहितानां फलजनकत्वात्। अत्र हेतुः चोदनैकत्वात्। राजसूयेन स्वाराज्यकाम इति समुदायनाम्ना दर्शपूर्णमासवत्फलसंबन्धबोधादिति भावः। अङ्गानि तन्त्रम्॥ १॥

प्रतिदक्षिणं वा कर्तृसंबन्धादिष्टिवदङ्गभूतत्वात्समुदायो हि तन्निर्वृत्त्या तदेकशब्दोपदेशः स्यात्॥ २॥

सिद्धान्तमाह। प्रतीति। प्रतिदक्षिणं कर्ता ऋत्विगन्यः संबध्यतेऽतस्तत्तद्दक्षिणाके यागे तत्तद्दक्षिणापरिक्रीतानामङ्गभूतत्वादिष्टिवत्। यथा दर्शेष्टौ पौर्णमासेष्टौ च कालभेदादङ्गावृत्तिस्तथा कर्तृभेदादावृत्तिरिति भावः। यत्तु चोदनैकत्वादिति पूर्वपक्षयुक्तिः तस्योत्तरमाह। समुदायः। इष्टिपशुसोमात्मको राजसूयपदवाच्यसमुदायः। तदेकत्वात् फलस्यैकत्वात्। तस्य फलस्य निर्वृत्त्या उत्पत्त्यभिप्रायेण विवक्षितः। अत एकशब्दस्य राजसूयशब्दोपदेशः पठनं, न प्रयोगैक्याभिप्रायेणेति भावः॥ २॥

तथा चान्यार्थदर्शनम्॥ ३॥

तथा च प्रयोगभेदसिद्धौ चान्यस्य प्रमाणान्तरस्य दर्शनमुपलब्धिः। आग्नावैष्णवमेकादशकपालं निर्वपेद् ऐन्द्रावैष्णवमेकादशकपालं वैष्णवं त्रिकपालं वामनो दक्षिणेत्येकं त्रिकम्। आग्नीषोमीयमेकादशकपालमिन्द्रासोमीयमेकादशकपालं सौम्यं चरुं बभ्रुर्दक्षिणेत्यपरं त्रिकम्। अतस्तत्सन्निधौ यत्पूर्वं त्रिसंयुक्तं वीरजननं यदुत्तरं पशुजननमिति प्रयोगभेदात्पूर्वोत्तरभाव उपपन्नः॥ ३॥

राजसूये कर्तुस्तन्त्रम्। अधि० २।

अनियमः स्यादिति चेत्॥ ४॥

राजसूये उपक्रमे यऋत्विजस्त एव समाप्तिपर्यन्तमित्यनियम उत नियम इति संशये पूर्वपक्षमाह। अनियम इति॥ ४॥

नोपदिष्टत्वात्॥ ५॥

पूर्वपक्षं दूषयति। नेति। उपदिष्टत्वात्। वरणवेलायां राजसूये ऋत्विजं वृणे इति ऋत्विजं प्रति श्रावितत्वात्। आरम्भे वृतानां समाप्तिपर्यन्तमावश्यकत्वात्॥ ५॥

लाघवापत्तिश्च ॥ ६ ॥

लाघवसंपत्तिश्च । प्रतिकर्म ऋत्विग्वरणात्सकृद्वरणं लघ्विति भावः ॥ ६ ॥

प्रयोजनैकत्वात् ॥ ७ ॥

ननु समुदाये दक्षिणाश्रवणाभावात्समुदायानतिः कथं सिध्येदत आह । प्रयोजनेति । आनतिरूपप्रयोजनस्यैकत्वात् । अवयवानत्या समुदायानतिः सिध्यति । न ह्यवयवादतिरिक्तः समुदाय इति भावः ॥ ७ ॥

विशेषार्था पुनः श्रुतिः ॥ ८ ॥

नन्वेवं सति ज्योतिष्टोमादिवत्समुदाये एव कुतो न श्रुतेत्यत आह । विशेषेति । विशेषार्था अदृष्टार्था तत्र तत्र पुनः श्रुतिः । अवयवे दक्षिणादानमपूर्वार्थमिति भावः ॥ ८ ॥

अवेष्टावङ्गानां भेदः । अधि० ३ ।

अवेष्टौ चैकतन्त्र्यं स्याल्लिङ्गदर्शनात् ॥ ९ ॥

राजसूये अवेष्टिनाम्नी पञ्चहविष्का इष्टिः पृथक् पृथक् पञ्चदक्षिणाका श्रुता । आग्नेन्द्रविश्वदेवमित्रावरुणबृहस्पतिदेवताका क्रमेण । तेषां पञ्चयागानां तन्त्रमङ्गानामुत भेद इति संशये पूर्वपक्षमाह । अवेष्टाविति । लिङ्गदर्शनात् । लिङ्गं, यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायेति । यदि पञ्चापीष्टयो भिन्नप्रयोगाः स्युस्तर्हि सर्वेषां प्रत्येकमेकहविष्कत्वाद् बार्हस्पत्यस्य मध्ये निधानमनुपपन्नमिति भावः ॥ ९ ॥

वचनात्कामसंयोगेन ॥ १० ॥

सिद्धान्तमाह । वचनादिति । कामसंयोगेन सहितवचनात् । एतया ऽन्नाद्यकामं याजयेदिति वचनात् सिद्धे राजसूयबहिर्भूतप्रयोगे तन्त्रमङ्गानां लिङ्गं तत्र चरितार्थमिति पूरणीयम् ॥ १० ॥

क्रत्वर्थायामिति चेन्न वर्णसंयोगात् ॥ ११ ॥

किं चिदाशङ्क्य दूषयति । क्रत्विति । क्रत्वर्थायामिष्टावेव लिङ्गं कुतो न निविशत इति शङ्का । समाधानं वर्णसंयोगात् । यदि ब्राह्मणो यजे-

र्तेति वर्णसंयोगाद् न क्रत्वर्थो दर्यमिष्टिः । तत्र राज्ञ एवाधिकाराद् इति भावः ॥ ११ ॥

पवमानेष्टिहविषां भेदेनानुष्ठानम् । अधि॰ ४ ।

पवमानहविःष्वैकतन्त्र्यं प्रयोगवचनैकत्वात् ॥ १२ ॥

आधाने श्रूयते । यः कामयेत वसीयान्स्यादिति सो ऽग्नये पवमानाय निरुप्य पावकशुचिभ्यां समानबर्हिषि निर्वपेदिति । किमासां तन्त्रमुत भेद इति संशये पूर्वपक्षमाह । पवमानेति । प्रयोगवचनैकत्वात् । अह्ना निरुप्याणीति वाक्यमेकं प्रयोगं बोधयत्यतः ॥ १२ ॥

लिङ्गदर्शनाच्च ॥ १३ ॥

समानबर्हिषीति लिङ्गमपि तन्त्रे गमकमित्याह । लिङ्गेति ॥ १३ ॥

वचनात्तु तन्त्रभेदः स्यात् ॥ १४ ॥

सिद्धान्तमाह । वचनादिति । तन्त्रभेदः । प्रथमस्य तन्त्रभेदः । वचनात् । अग्नये पवमानाय निरुप्येत्युक्त्वोत्तरयोः समानबर्हिष्ट्वेन तन्त्रवचनात् । अह्ना निरुप्याणीति एकदिनरूपकालविधायकं न त्वेकप्रयोगविधायकमिति भावः ॥ १४ ॥

सहत्वे नित्यानुवादः स्यात् ॥ १५ ॥

यच्चोक्तं समानबर्हिषीति तस्यान्यत्र चारितार्थ्यमाह । सहत्वइति । यो ब्रह्मवर्चसकामः स्यात्तस्य सर्वाणि हवींषि सह निरुप्याणीति ब्रह्मवर्चसकामप्रयोगस्योक्तवचनेन तन्त्रसिद्धौ तत्रोक्तलिङ्गस्य नित्यानुवादरूपत्वादिति भावः ॥ १५ ॥

द्वादशाहे दीक्षोपसत्सुत्यानां प्रत्येकं द्वादशदिनसाध्यत्वम् । अधि॰ ५ ।

द्वादशाहे तत्प्रकृतित्वादेकैकमहरपवृज्येत कर्मपृथक्त्वात् ॥ १६ ॥

द्वादशाहेन प्रजाकामं याजयेदित्यत्रैव द्वादश दीक्षा द्वादशोपसद इति श्रुतम् । तत्रैव द्वादशसुत्यानामपि प्रत्येकं द्वादश दीक्षा द्वादशोपसद इति त्रिंशद्दिनसाध्यो ऽयं याग उतैकैकस्मिन्नहनि प्रथमं दीक्षा तत एकोपसत् तत एका सुत्येति द्वादशरात्रसाध्यो याग उत प्रथमदिने

दीक्षात्रयमिति क्रमेण क्रमेण चतुर्दिनमध्ये द्वादशदीक्षास्तथोपसदश्च त्रिषु दिनेषु तथैव द्वादशसुत्याश्च त्रिषु दिनेष्विति द्वादशरात्रसाध्यो याग उत द्वादशदिने दीक्षा द्वादशदिने उपसदः द्वादशदिने सुत्येति षट्त्रिंशद्दिनसाध्य इति संशये प्रथमपक्षमाह। द्वादशाहइति। तत्रैकैकमिति प्राग्द्वादशदीक्षोपसत्कमिति पूरणीयम्। इत्थं चेदृशविशिष्टं प्रत्येकमहरपवृज्येत समाप्येत सः ज्योतिष्टोमः प्रकृतिर्यस्य तत्त्वात्। ननु द्वादशसुत्यासमुदाये ज्योतिष्टोमवत् सदीक्षत्वं सोपसत्त्वं चास्त्येव सकृदनुष्ठाने ऽप्यत आह। कर्मणां द्वादशदिवसेष्वनुष्ठीयमानानां सुत्याकर्मणां पृथक्त्वात्। न द्वादशरात्रसमुदायस्य ज्योतिष्टोमः प्रकृतिः किंतु प्रत्येकस्य तत्प्रकृतित्वादिति भावः॥ १६॥

अह्नां वा श्रुतत्वात्तत्र साङ्गं क्रियेत यथा माध्यन्दिने॥ १७॥

द्वितीयं पक्षमवतारयति। अह्नामिति। अह्नां द्वादशसंख्याविशिष्टदिवसानां श्रुतिभूतत्वात्। उत्पत्तिवाक्ये श्रुतत्वात्प्रथमपक्षे तद्बाधापत्त्या तत्प्रत्येकदिने साङ्गं दीक्षोपसत्सहितं क्रियेत माध्यन्दिने मरुद्भ्यः सांतपनेभ्यो मध्यन्दिने चरुमित्यत्राङ्गानामपि माध्यन्दिन एव कालस्तथाऽपि सुत्यारूपप्रधानकाल एवाङ्गानामिति भावः॥ १७॥

अपि वा फलकर्तृसंबन्धात्सहप्रयोगः स्यादाग्नेयाग्नीषोमीयवत्॥ १८॥

तृतीयं पक्षमुत्थापयति। अपि वेति। सह प्रयोगः अङ्गानां तन्त्रेणानुष्ठानम्। कुतः, फले प्रजारूपफले कर्तृषु च दक्षिणैक्येन समुदायेनैव संबन्धात् प्रत्येकमह्नां फलकर्तृभ्यां संबन्धाभावात्। यथा ऽग्नीषोमीयस्याग्नेयस्य चाङ्गानां तन्त्रमुक्तहेतुबलेन तथा ऽत्रापीति तन्त्रेणानुष्ठानमपि। इत्थं श्रूयमाणद्वादशाहसंपत्तये संशयप्रदर्शनवेलायां यथा दर्शितं तथा॥ १८॥

सांगकालश्रुतित्वाद्वा स्वस्थानानां विकारः स्यात्॥ १९॥

यच्चोक्तमङ्गानां तन्त्रमिति तदङ्गीकृत्यापि सिद्धान्तमाह । साङ्गेति । स्वस्थानानां विकारः वृद्धिः स्यात् । साङ्गस्य प्रधानस्य यः कालः तस्य श्रुतत्वात् । प्रकृतितः अतिदेशेनैकाहसाध्यदीक्षा तथा त्र्यहसाध्या उपसदः तथा एकाहसाध्या सुत्या च प्राप्ता । एवं सति द्वादशाहशब्दो ऽपि संज्ञारूपः सन् योगमंत्रयणार्थं ब्रुवन् दीक्षास्वपि तथोपसत्सु तथा सुत्यासु तुल्यं ब्रूते सर्वेषामपि द्वादशाहसंबन्धम् । अतस्त्रयाणामप्यविशेषे स्वस्वस्थानस्य वृद्धिं संपाद्यैव द्वादशाहशब्दयोगार्थः संपादनीय इति भावः ॥ १९ ॥

तदपेक्षं च द्वादशत्वम् ॥ २० ॥

द्वादशदीक्षा इत्यादावपि द्वादशत्वं दीक्षायां योगार्थापेक्षमेवेत्याह । तदपेक्षमिति ॥ २० ॥

दीक्षोपसदां च संख्या पृथक् पृथक् प्रत्यक्षसंयोगात् ॥ २१ ॥

ननु योगार्थः प्रधानएवोद्भिदादौ दृष्टः नाङ्गेष्वित्याशङ्क्य योगार्थे प्रधानएवाङ्गीकृत्य दीक्षोपसदां प्रत्येकं द्वादशाहसाध्यत्वमाह । दीक्षेति । द्वादशदीक्षा द्वादशोपसद इत्यनेन पृथक् पृथक् संख्यायाः प्रत्यक्षसंयोगात् । द्वादशरात्रपदयोगार्थः प्रधानएवास्तु इति भावः ॥ २१ ॥

तथा चान्यदर्शनम् ॥ २२ ॥

ननु द्वादश दीक्षा इति दीक्षाणामेव वृद्धिं ब्रूते न द्वादशस्वहःसु कर्तव्यमिति ब्रूते कथं द्वादशत्वं दीक्षाङ्गमित्यत आह । तथा चेति । तथा च दीक्षाङ्गमुपसदङ्गं च द्वादशत्वव्यवस्थितौ चान्यदर्शनं षड्त्रिंशदहो वा एष यद् द्वादशरात्र इति दर्शनमुपपन्नमिति शेषः ॥ २२ ॥

चोदनापृथक्त्वे त्वैकतन्त्र्यं समवेतानां कालसंयोगात् ॥ २३ ॥

यच्चोक्तमाग्नेयाग्नीषोमयोश्चोदनापृथक्त्वे ऽपि उत्पत्तिवाक्यभेदे ऽपि समवेतानां मिलितानामङ्गसहितप्रधानानां कालसंयोगाद् एककाल-

Digitized by Google

सम्बन्धविधानात् पौर्णमास्यां पौर्णमास्या साङ्गया यजेतेति वाक्येन विधानात् कालदेशकर्त्रैक्यात्तन्त्रम् । इह तु प्रधानकालविहितानां दीक्षादीनां वसतीवरीग्रहणान्तानाम् आधानवत्स्वकालस्य स्वातन्त्र्येणाविधानादेव तन्त्रमिति भावः ॥ २३ ॥

प्रधानैरपृथक्कालानामङ्गानां भेदेनानुष्ठानम् । अधि॰ ६ ।

भेदस्तु तद्भेदात्कर्मभेदः प्रयोगे स्यात्तेषां प्रधानशब्दत्वात् ॥ २४ ॥

अथ सवनीयपश्वादीनामपि दीक्षावत्तन्त्रतेति उत्सूत्रे पूर्वपक्षे सिद्धान्तमाह । भेद इति । यतस्तद्भेदात् प्रधानकालभेदाद् भेदः प्रधानभेदः अतः प्रयोगे तत्तत्प्रधानप्रयोगे ऽङ्गानामपि भेदः स्यात् । तेषां प्रधानशब्दत्वात् प्रधानविधिविधेयत्वात् । दीक्षादीनां प्रधानकालान्यकालत्वात् । तन्त्रं सवनीयपश्वादीनां तत्प्रधानकालिकत्वाद्यस्य प्रधानस्य काले ऽनुष्ठितः स तदर्थ एवेति भावः ॥ २४ ॥

तथा चान्यदर्शनम् ॥ २५ ॥

उक्तार्थे साधकान्तरमाह । तथा चेति । अन्यदर्शनं पत्नीसंयाजान्तानि अहानि सन्तिष्ठन्तइति दर्शनम् । यदि एकस्मिन्नेवाहनि सवनीयपशुः तदङ्गपत्नीसंयाजानामप्येकदिनसंबन्धित्वेन पत्नीसंयाजान्तत्वं सर्वेष्वहःसु श्रूयमाणं बाध्येतेति भावः ॥ २५ ॥

श्वः सुत्यावचनं च तद्वत् ॥ २६ ॥

अन्यलिङ्गमाह । श्व इति । श्वः सुत्यावचनम् । संस्थिते संस्थिते ऽहनि आग्नीध्रागारं प्रविश्य सुब्रह्मण्ये सुब्रह्मण्यामाह्वयेति प्रैषेणैकसुत्यासमाप्त्यनन्तरं तस्मिन्नेवाहनि सुब्रह्मण्यः श्वः सुत्या भवति । इन्द्रागच्छेति सुब्रह्मण्यावृत्तिरपि तद्वदुक्तार्थसाधकम् ॥ २६ ॥

पश्वतिरेकश्च ॥ २७ ॥

अपरं लिङ्गमाह । पश्वतिरेक इति । आग्नेयः कृष्णग्रीव इत्यादिना एकादशपशूनामेकैकस्मिन्नहनि अनुष्ठाने द्वादशाहनि अनुष्ठीयमा-

नपशोरित्थं श्रूयते, यः पशुरतिरिच्यते स ऐन्द्राग्न इति प्रत्यहमेकैकपश्व-नुष्ठानएव द्वादशदिनपशावतिरेकः संभवति । एकस्मिन् दिने सवनीयपशूनामनुष्ठाने द्वादशस्य पशोरतिरेक एव नास्तीति तत्कथनं विरुद्धमिति भावः ॥ २७ ॥

उपसत्काले सुब्रह्मण्याह्वानस्याविकारेण कर्तव्यत्वम् । अधि० ७ ।

सुत्याविवृद्धौ सुब्रह्मण्यायां सर्वेषामुपलक्षणं प्रकृत्यन्वयादावाहनवत् ॥ २८ ॥

प्रकृताविन्यहे सुत्यामागच्छ मघवन्निति ब्रूयादिति श्रुतम् । अचेतिशब्दः अहोवृत्तिसंख्यापरः इत्यहे इत्यस्यामुकदिवसे द्वितीयदिवसे तृतीयदिवसे सुत्यामागच्छेति वक्तव्यमिति तदर्थः । अयं द्वादशाहे ऽतिदेशप्राप्तः । तत्र प्रधानकालादन्यकालत्वात्तन्त्रेणानुष्ठानमित्युक्तं पूर्वपादे । तत्र तन्त्रेण क्रियमाणे सर्वेषामह्नां पृथक् पृथगुपलक्षणमुताविकारेण प्रयोग इति संशये पूर्वपक्षमाह । सुत्येति । सुत्याविवृद्धौ द्वादशाहादौ सुब्रह्मण्यायां तदाह्वानमन्त्रे सर्वेषामह्नां प्रत्येकमुपलक्षणं कार्यं त्रयोदशाहे चतुर्दशाहे इति । कुतः प्रकृतौ ज्योतिष्टोमे चतुरादिसंख्यानामहःस्वन्वयदर्शनात् । नन्वस्य मन्त्रस्य यक्ष्यमाणदेवतायाः स्मरणेन संस्कारः । स च मघवद्रूपदेवतैक्यात्सकृत्स्मरणेन संस्कृतस्य सर्वार्थत्वादहःशब्दस्याभ्यासे मानाभाव इत्याशङ्कायामाह । आवाहनवत् । आग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्णग्रीवमित्यत्र प्रथमतृतीयदेवतयोरैक्ये ऽपि यथा ऽऽवाहनमन्त्रस्यावृत्तिः कालभेदात्तथा ऽत्रापि दिनरूपकालभेदात्संस्कारावृत्तिरिति भावः ॥ २८ ॥

अपि वेन्द्राभिधानत्वात्सकृत्स्यादुपलक्षणम् ॥ २९ ॥

सिद्धान्तमाह । अपि वेति । इन्द्राभिधानत्वादिन्द्रवाचकत्वान्मन्त्रस्य न पूर्वोक्तरीत्योपलक्षितव्यः किं तु सकृद् अविकारेणैव प्रयोगः स्यात् । इन्द्ररूपदेवतैक्येन सकृत्संस्कृत इन्द्रः सर्वार्थो भविष्यतीति भावः ॥ २९ ॥

कालस्य लक्षणार्थत्वादविभागाच्च ॥ ३० ॥

Digitized by Google

ननु प्रकृतौ चतुरह इत्यनेन सुत्याविशेषो यथा ज्ञायते तथाऽत्रापि ज्ञानार्थमन्त्रे विकार आवश्यक इत्यत आह। कालस्येति। कालवाचकचतुरहादिशब्दस्य लक्षणार्थत्वात्। लक्षणाप्रतिपाद्यो यः सुत्यात्मकः कर्मविशेषः तत्कर्तृत्वात्। उपलक्षणं चतुरहादिपदानां कालरूपे स्वार्थे न तात्पर्यं किं तु सुत्यायाम्। तथा च तदर्थस्य चाबाधितत्वाद् अनूहेनैव प्रयोग इति सिद्धान्ताभिप्रायः। ननु देवतैक्ये सकृत्संस्कारस्वीकारे पूर्वोक्तावाहनमन्त्रस्याप्यावृत्तिर्न स्यात्। तत्रापि दैवतैक्यादतस्ततोऽत्र वैलक्षण्यं दर्शयति। अविभागाच्च। आग्नेयं कृष्णग्रीवमिति पूर्वोदाहृतयोराग्नेययागयोः विभागः सौम्ययागेन व्यवधानमस्ति इह तु सुत्याः सर्वा अपि केन चिदन्तरिता अतो विभागाद्वैलक्षण्यमिति भावः ॥ ३० ॥

वाजपेये प्राजापत्येषु शूलादीनां तन्त्रता। अधि० ८।

पशुगणे कुम्भीशूलवपाश्रपणीनां प्रभुत्वात्तन्त्रभावः स्यात् ॥ ३१ ॥

प्राजापत्यपशौ कुम्भ्यादीनां भेद उत तन्त्रमिति संशये भेद इति पूर्वपक्षे सिद्धान्तमाह। पशुगणइति। पशुगणे पशुसमुदाये कुम्भी पश्वङ्गश्रपणपात्रं शूलं हृदयशूलं हृदयकमलपाकसाधनीभूतस्तीक्ष्णाग्रो दारुविशेषः। वपाश्रपणी वपाया अग्नौ श्रपणपात्रम्। एषां तन्त्रभावः स्यात्। तन्त्रेऽपि कार्यसाधने प्रभुत्वात् क्षमत्वात् ॥ ३१ ॥

भिन्नदेवताकेष्वपि शूलादीनां तन्त्रता। अधि० ९।

भेदस्तु संदेहाद्देवतान्तरे स्यात् ॥ ३२ ॥

एकादशिनीषु देवताभेदेन यस्यै देवतायै उपाकृतः पशुः तस्या उद्देशेन तत्पशुप्रदानं न संभवत्येककुम्भ्यां श्रपणे सर्वावयवानामेकजातीयत्वात्। अतः कुम्भ्यादिभेद इति पूर्वपक्षमाह। भेद इति। व्याख्यातप्रायम् ॥ ३२ ॥

अर्थाद्वा लिङ्गकर्म स्यात् ॥ ३३ ॥

कुम्भ्यां प्रक्षेपवेलायां चिह्नकरणेन संदेहनिवारणसम्भवात् तत्रापि तेषां तन्त्रमिति सिद्धान्तमाह। अर्थादिति। अर्थात् संशयनिवृत्तिरूपकार्यसिद्धेः लिङ्ग कर्म चिह्नकर्म ॥ ३३ ॥

Digitized by Google

कुम्भ्या अपि तन्त्रता। अधि० १०।

अयाज्यत्वाद्वसानां भेदः स्यात्स्वयाज्या-प्रदानत्वात् ॥ ३४ ॥

वसायाश्चिन्नकरणासम्भवात्कुम्भीभेद इति पूर्वपक्षमाह। अयाज्य-त्वादिति। वसानां स्वयाज्याप्रदानत्वात्। स्वयाज्याया अर्धर्चे स्वपशु-वसाया होमस्य विहितत्वात्कुम्भीभेदमन्तरा ऽयाज्यत्वाद् वसानामुक्त-रीत्या होमकर्मत्वासम्भवाद्भेदः कुम्भीभेदः ॥ ३४ ॥

अपि वा प्रतिपत्तित्वात्तन्त्रं स्यात्स्वत्वस्या श्रुतिभूतत्वात् ॥ ३५ ॥

सिद्धान्तमाह। अपि वेति। वसाहोमस्य प्रतिपत्तिरूपत्वात्। यद्दैवताकः पशुः तस्यै तद्वसेत्यत्र प्रमाणाभाव इति भावः। ननु स्वया-ज्यार्धकाले स्वपशुवसाप्रतिपत्तिरपेक्षिता तद्वा कथमत आह। स्वत्वस्य स्वयाज्यार्धर्चइति स्वत्वस्य अश्रुतिभूतत्वात्। अर्धर्चे वसाहोमं जुहो-तीत्यत्राश्रुतत्वात् ॥ ३५ ॥

सकृदिति चेत् ॥ ३६ ॥

यस्याः कस्याश्चिद्याज्याया अर्धर्चे यस्य कस्य चित्पशोर्वसा-होमः सिद्धश्चेत्प्रथमार्धर्चएव सर्ववसाहोमः सकृत्स्यादित्याशङ्कते। सकृ-दिति ॥ ३६ ॥

न कालभेदात् ॥ ३७ ॥

अर्धर्चइति नाधिकरणे सप्तमी बाधात् किं तु निमित्तसप्तमी। तथा च निमित्तानामर्धर्चानां भिन्नकालत्वाद् निमित्तानां कालभेदेना-वृत्तौ नैमित्तिकानामावृत्तिरिति समाधत्ते। नेति ॥ ३७ ॥

भिन्नजातिषु पशुषु कुम्भ्या भेदः। अधि० ११।

जात्यन्तरे भेदः स्यात्पक्तिवैषम्यात् ॥ ३८ ॥

सौत्रामण्यां भिन्नजातिपशवः आश्विनं धूम्रमालभते सारस्वतं मेषमैन्द्रमृषभमिति। अत्रापि तन्त्रं कुम्भ्या इति पूर्वपक्षे सिद्धान्तमाह। जात्यन्तरइति। भेदः कुम्भीभेदः पक्तिवैषम्यात्। यावता कालेनानडुहो

ऽवयवाः पच्यन्ते तावता कालेनाजावयवा अतिशिथिला अवदानाक्षमा भवेयुरिति भावः ॥ ३८ ॥

वृद्धिदर्शनाच्च ॥ ३९ ॥

सौत्रामण्यां शूलैरवभृथं यन्तीति बहुवचनेन शूलवृद्धिदर्शनं लिङ्गं कुम्भीवृद्धावित्याह । वृद्धीति ॥ ३९ ॥

अश्वप्रतिग्रहेष्ट्यां प्रतिपुरोडाशं चतुष्कपालभेदः । अधि० १२ ।

कपालानि च कुम्भीवत्तुल्यसंख्यानाम् ॥ ४० ॥

यावतो ऽश्वान्प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान्निर्वपेदि- त्यत्र पूर्वपक्षमाह । कपालानीति । तुल्यसंख्यानां समसंख्याककपालकर्मणां कपालानि कुम्भीवत्तन्त्रं पुरोडाशसंख्यानुसारेण कपाले दैर्घ्यं संपाद्य चतुर्षु कपालेष्वेव बहूनामपि पाक इति भावः ॥ ४० ॥

प्रतिप्रधानं वा प्रकृतिवत् ॥ ४१ ॥

सिद्धान्तमाह । प्रतीति । प्रतिप्रधानं प्रतिपुरोडाशं भिन्नानि चतुष्कपालानि यथा प्रकृतौ आग्नेयो ऽष्टाकपालः अग्नीषोमीय एकादशकपालः तत्र भिन्नेषु श्रपणं तथा । अन्यथा तत्राप्यष्टौ कपालानि पुरोडाशद्वयस्थितियोग्यानि किंचिद्दीर्घाणि त्रीणि किंचिद्ध्रस्वान्येकपुरोडाशस्थितियोग्यानि स्युरिति भावः ॥ ४१ ॥

सर्वेषां चाभिप्रथनं स्यात् ॥ ४२ ॥

उक्तार्थे लिङ्गमपि दर्शयति । सर्वेषामिति । यावत्कपालं पुरोडाशं प्रथयतीति सर्वकपालमभिव्याप्य पुरोडाशं विस्तारयतीत्यर्थः । इदं च तन्त्रपक्षे न संभवतीति भावः ॥ ४२ ॥

व्रीह्यवहननादौ प्रतिप्रहारं मन्त्रस्यानावृत्तिः । अधि० १३ ।

एकद्रव्ये संस्काराणां व्याख्यातमेककर्मत्वम् ॥ ४३ ॥

व्रीहीनवहन्तीत्यनेन विहिते ऽवहनने अवरक्षो दिवः सपत्नं वध्यासमिति मन्त्रस्य प्रत्यवहननमावृत्तिरुत सकृदिति चिन्तायामवहननरूपक्रियाव्यक्तिभेदान्मन्त्रावृत्तिरिति पूर्वपक्षे सिद्धान्तमाह । एकेति । संस्कारा-

Digitized by Google

यां वितुषीभावपर्यन्तावहननव्यक्तिसंघस्यैकविधिविहितत्वेनैककर्मत्वमिति व्याख्यातं पञ्चमे । अतः कर्मैक्याच्च मन्त्रावृत्तिरिति भावः ॥ ४३ ॥

नानाबीजेष्टौ द्रव्यभेदेन संस्कारावृत्तौ मन्त्रावृत्तिः । अधि० १४ ।

द्रव्यान्तरे कृतार्थत्वात्तस्य पुनः प्रयोगान्मन्त्रस्य तद्गुणत्वात्पुनः प्रयोगः स्यात्तदर्थेन विधानात् ॥ ४४ ॥

यत्र व्रीहयः श्यामाका नीवाराश्चेति नानाबीजेष्टिः तत्राप्यवहननमन्त्रः सकृदिति पूर्वपक्षे सिद्धान्तमाह । द्रव्यान्तरइति । द्रव्यान्तरे मन्त्रस्य पुनः प्रयोगः स्यात् । प्रथमबीजे मन्त्रस्य कृतार्थत्वाद् बीजान्तरे तस्यावघातस्य पुनः प्रयोगान्मन्त्रस्य तत्प्रयोगे गुणत्वाच्च चोदकशास्त्रेण तदर्थेन तदर्थत्वेनापि विधानात् । द्रव्यभेदेन संस्कारावृत्तौ मन्त्रावृत्तिरिति भावः ॥ ४४ ॥

दर्शपूर्णमासादौ प्रतिनिर्वपणादि मन्त्रावृत्तिः । अधि० १५ ।

निर्वपणलवनास्तरणाज्यग्रहणेषु चैकद्रव्यवत्प्रयोजनैकत्वात् ॥ ४५ ॥

चतुरो मुष्टीन्निर्वपति त्रयुजो मुष्टीन् लुनाति त्रिधा तु पञ्चधा तु वा वेदीं स्तृणाति चतुर्जुहां गृह्णातीति । एषु क्रमेण, देवस्य त्वेति, बर्हिर्देवसदनं सोदामीति, ऊर्णम्रदसं त्वेति, शुक्रं त्वेति, मन्त्राः सकृत्पठनीया उतावृत्त्येति संशये पूर्वपक्षमाह । निर्वपणेति । एकद्रव्यवत् । व्रीहिमात्रावहननवत् सकृत्पाठः । मुष्टिचतुष्टयनिर्वापस्यापि वितुषीभावफलपर्यवदेकफलत्वात् ॥ ४५ ॥

द्रव्यान्तरवद्वा स्यात्तत्संस्कारात् ॥ ४६ ॥

सिद्धान्तमाह । द्रव्येति । द्रव्यान्तरवद् नानाबीजावहननवत् । संस्कार्यद्रव्यभेदेन मन्त्रेण स्मरणपूर्वकनिर्वापक्रियया पृथग्द्रव्याणां संस्कारस्यावश्यकत्वादिति भावः ॥ ४६ ॥

वेदिप्रोक्षणे प्रत्यावृत्ति मन्त्रानावृत्तिः । अधि० १६ ।

वेदिप्रोक्षणे मन्त्राभ्यासः कर्मणः पुनः प्रयोगात् ॥ ४७ ॥

Digitized by Google

वेदिरसीति मन्त्रेण त्रिर्वेदीं प्रोक्षतीत्यत्र मन्त्रावृत्तिः सकृद्वेति संशये पूर्वपक्षमाह । वेदीति । कर्मणः पुनः प्रयोगात् । प्रोक्षणक्रियां प्रत्यङ्गं मन्त्रः क्रिया प्रधानम् । इत्थं च प्रतिप्रधानमङ्गावृत्तिरिति भावः ॥ ४७ ॥

एकस्य वा गुणविधिर्द्रव्यैकत्वात्तस्मात्सकृत्प्रयोगः स्यात् ॥ ४८ ॥

सिद्धान्तमाह । एकस्येति । एकस्यैव कर्मणः त्रिरित्यनेनाभ्यासरूपगुणविधिः न क्रियाभेदः द्रव्यैकत्वात् । तस्मात्सकृत्प्रयोगः । प्रधानक्रियाभेदकप्रमाणाभावादिति भावः ॥ ४८ ॥

कण्डूयनमन्त्रस्य सकृत्प्रयोगः । अधि० १७ ।

कण्डूयने प्रत्यङ्गं कर्मभेदः स्यात् ॥ ४९ ॥

दीक्षितस्य कृष्णविषाणया कण्डूयनमन्त्रः कृष्णेत्येति तदा युगपदेव नानादेशकण्डूयनप्रसक्तौ मन्त्रावृत्तिर्न वेति संशये पूर्वपक्षमाह । कण्डूयने इति । स्पष्टम् ॥ ४९ ॥

अपि वा चोदनैककालमैककर्म्यं स्यात् ॥ ५० ॥

सिद्धान्तमाह । अपि वेति । न ह्यत्र कण्डूयनमङ्गसंस्कारार्थं चोद्यते रागप्राप्तकण्डूयने साधनमात्रं विवक्षितम् । फलं च तत्कालिकदुःखनिवृत्तिः । इत्थं च तत्कालिकदुःखनिवृत्तिजनककण्डूयनव्यक्तिभेदेऽपि अवहननवदेकफलत्वान्नावृत्तिर्मन्त्रस्येति भावः ॥ ५० ॥

ज्योतिष्टोमे स्वप्नादिषु मन्त्रानावृत्तिः । अधि० १८ ।

स्वप्ननदीतरणाभिवर्षणामेध्यप्रतिमन्त्रणेषु चैवम् ॥ ५१ ॥

दीक्षितस्य स्वप्ने त्वमग्ने व्रतपा इति, नदीतरणे देवीराप इति, तथाऽभिवृष्टो उन्दतीरिति, अमेध्यदर्शने बद्धं मन इति । एष्वपि पूर्वाधिकरणसिद्धान्तमतिदिशति । स्वप्नेति । प्रतिमन्त्रणेषु तत्तन्निमित्तमन्त्रपाठेषु ॥ ५१ ॥

दीक्षितस्य प्रयाणे मन्त्रानावृत्तिः । अधि० १९ ।

प्रयाणे त्वाऽर्थनिर्वृत्तेः ॥ ५२ ॥

Digitized by Google

तथा प्रयाणे भद्रादभिप्रेय इति मन्त्रः प्रयाणेन निष्पाद्यो यो ऽर्थः कार्यं तन्निर्वृत्तिः तत्सिद्धिः तावत्सकृदिति राद्धान्तः ॥ ५२ ॥

उपरवमन्त्रस्यावृत्तिः । अधि० २० ।

उपरवमन्त्रस्तन्त्रं स्याल्लोकवच्च बहुवचनात् ॥ ५३ ॥

रक्षोहणो वलगहनो वैष्णवान् खनामीति उपरवखननमन्त्रः । उपरवा नाम सोमाभिषवाधः सुषिररूपाश्चत्वारस्तत्र प्रत्युपरवं मन्त्र आवर्तते नेति संशये पूर्वपक्षमाह । उपरवेति । तन्त्रं सकृद् वैष्णवानिति बहुवचनात् । लोकवत् । लोके एवंतात्पर्यं बहुवचनं दृष्टं तथा ॥ ५३ ॥

न सन्निपातित्वादसन्निपातिकर्मणां विशेषाग्रहणे कालैकत्वात्सकृद्वचनम् ॥ ५४ ॥

सिद्धान्तमाह । नेति । न तन्त्रमुपरवमन्त्रस्य सन्निपातित्वात् । अनुष्ठेयक्रियास्मरणजनकत्वात् । ये मन्त्रा अर्थस्मरणद्वारा नादृष्टजनकाः किं तु साक्षाददृष्टार्थमेवोच्चारणं तत्र कालैक्ये एतदर्थमेवेति विशेषाग्रहणा-त्तन्त्रं भवतु प्रकृते तथात्वाभावाच्च तन्त्रमित्याह । असंनिपातिनां साक्षा-ददृष्टजनकानाम् । शेषं व्याख्यातम् । अयं भावः । उपरवा हविर्धाने खायन्त इत्युत्पत्तिवाक्ये बहुवचनादुपरवभेदसिद्धौ न सर्वेषां सकृत्खननेन सिद्धिः । अतः प्रत्युपरवं खननमपि भिन्नं तच्च खननं रक्षोहण इति मन्त्रेण स्मृत्वा कर्तव्यं यावदेव मन्त्रजनितं ज्ञानं तावदेव तत्क्रियाकरण-मेकवारमुच्चारणजनितं ज्ञानं तावत् स्यातुमतममत आवृत्तिरिति ॥ ५४ ॥

हविष्कृदादिमन्त्राणामावृत्तिः । अधि० २१ ।

हविष्कृदध्रिगुपुरोनुवाक्यामनोतस्यावृत्तिः कालभेदात् ॥ ५५ ॥

ज्योतिष्टोमे प्रतिसवनं सवनीयपुरोडाशास्तेषु प्रकृतितः हविष्कृ-दाह्वानं प्राप्तम् । एवं वाजपेये ये सवनीयपशुः प्राजापत्यपशवश्च तेषु अध्रिगुप्रैषः प्राप्तः । एवमाग्नेयं कृष्णग्रीवमालभेत सौम्यं बभ्रुमाग्नेयं कृष्ण-ग्रीवमित्यत्राग्नेयद्वये पुरोनुवाक्या च प्राप्ता । मनोतामन्त्रश्च । अमीषां

Digitized by Google

सकृत्प्रयोग उत भेदेनेति संशये न हि मन्त्रान्ते अनुष्ठेयं कर्म स्मृत्वा करणमत्रास्ति किं तु हविष्कृदध्रिगुप्रैषौ परप्रत्यायनार्थौ पुरोनुवाक्यामनोतामन्त्रौ केवलस्मरणजनने कृतार्थौ अतः पूर्ववैषम्यात्तन्त्रमिति पूर्वपक्षे सिद्धान्तमाह । हविष्कृदिति । कालभेदादिति सर्वसाधारणो हेतुः । हविष्कृन्मन्त्रे तत्तत्सवनकालभेदः । अध्रिगुमनोतामन्त्रे सवनीयसंबन्धिनि प्रातःसवनं प्राजापत्यसंबन्धिनि तृतीयसवनं पुरोनुवाक्यायामग्निमयागसंबन्धिन्यां सौम्ययागव्यवहितः काल इति भेदो द्रष्टव्यः ॥ ५५ ॥

अध्रिगोश्च विपर्यासात् ॥ ५६ ॥

अध्रिगुप्रैषे तन्त्रेण कृते दोषान्तरमपि तत्राह । अध्रिगोश्चेति । विपर्यासाद् विहितक्रमलोपात् । तथा हि । प्राजापत्यसंबन्धिनः अध्रिगोः प्राचीना ये पश्वालम्भनाप्रुतप्रत्याप्रुताजैदग्न्यादयः तेषां प्रातःसवने ऽनुष्ठाने पर्यग्निकरणान्ते उत्सर्गो विहितः स बाधितः । यदि तृतीयसवने क्रियते तदा ऽपि प्राजापत्याध्रिगोः पुरस्तात्कर्तव्यानां परस्तादिति क्रमलोपः अतः आवृत्तिः ॥ ५६ ॥

करिष्यद्वचनात् ॥ ५७ ॥

करिष्यदिति । करिष्यदुच्चारणाव्यवहितोत्तरक्षणे अनुष्ठापकं वचनं शब्दो यत्र तस्मात् । अध्रिगुमन्त्रे आरभध्वमित्यादिशब्दैरुच्चारणाव्यवहितोत्तरक्षणे कर्तव्यता प्रतीयते। प्रातःसवने ऽनुष्ठिते बहुकर्मणा व्यवहितमेवानुष्ठानं मन्त्रप्रतिपादितार्थस्येति तद्बाधो द्रष्टव्यः ॥ ५७ ॥

इति श्रीमज्जैमिनीयसूत्रवृत्तौ एकादशाध्यायस्य चतुर्थः पादः ॥ ४ ॥

संपूर्णोयमेकादशस्तन्त्राध्यायः* ॥ ११ ॥

---

* ऋतुशैलेन्दुसंख्याके शाके फाल्गुनमासके । सिते पक्षे दशम्यां श्रीविश्वनाथप्रसादतः ॥ १ ॥ रामेश्वरः प्राप्तमतिः तन्त्राध्यायस्य वृत्तिकाम् । विरच्य श्रीविश्वभर्तुश्चरणे ऽर्पितवानिमाम् ॥ २ ॥ भ्रमप्रमादापतितान् दोषान्वै गतमत्सराः । साधवश्चोद्धरिष्यन्ति श्लाघयिष्यन्ति वै गुणान् ॥ ३ ॥

इति त्रयः श्लोकाः श्रो॰ दा॰ मु॰ पु॰ उपलभ्यन्ते ।

Digitized by Google

अग्नीषोमीयप्रयाजादिभिः पुरोडाशस्योपकारः । अधि॰ १ ।

तन्त्रिसमवाये चोदनातः समानानामेकतन्त्रमतुल्येषु तु भेदो विधिक्रमतादर्थ्यात्तादर्थ्यं श्रुतिकालनिर्देशात् ॥ १ ॥

एकादशे ऽध्याये तन्त्रावापौ विचार्य तदुपजीव्य प्रसङ्गः द्वादशे विचार्यते । तन्त्रोपजीव्यत्वं प्रसङ्गस्येत्यम् । अनेकोद्देशेन सकृदनुष्ठानमनेकोपकारकमिति पूर्वाध्यायेन सिद्धे एकोद्देशेनानुष्ठितमप्यङ्गं देशकालकर्त्रैक्ये अनुद्देश्यमप्युपकरोति न वेतिसंशयनिवर्तकत्वात्प्रकृतचिन्तायास्तत्त्वं युक्तम् । तथा च तादृशसंशये पूर्वपक्षमाह । तन्त्रीति । तन्त्रं साधारणो धर्मः । साधारणो ऽङ्गकलाप इति यावत् । स येषां ते तन्त्रिणः । तेषां समवाये देशकालकर्त्रैक्ये चोदनातः विधिवाक्यात् समानानामेकानामेकविधिचोदितानामिति यावत् । यद्यपि समानशब्दस्तुल्यवाचको ऽन्यत्र तथा ऽप्यत्राभिन्नवाचकः । वह्निधूमयोः सामानाधिकरण्यमिति यावत् । एकतन्त्रमेकप्रयोगः अङ्गानां सकृदनुष्ठानमित्यर्थः । अतुल्येषु भिन्नविधिबोधितेषु भेदः अनुष्ठानभेदः अङ्गावृत्तिरिति यावत् । कुतः विधिप्रक्रमतादर्थ्यात् । विधिः अङ्गानामनुष्ठानं तस्य यः प्रक्रमः आरम्भः तस्य तादर्थ्यात् । अयं भावः । यथा पशुप्रयोग एकः तद्वत्पुरोडाशप्रयोग एकः । तत्र पशुप्रयोगः पशुप्रयोगापूर्वोपकारार्थत्वेन तदङ्गान् गृह्णाति पुरोडाशयागश्च तदङ्गान् । तदपूर्वोपकारकत्वेनारम्भवेलायां यदुपकारकत्वेन गृह्णाति तदर्थः तदङ्गानुष्ठानप्रयोगो नान्यार्थः । अतो न तन्त्रसंभवः पशुप्रयाजानां पुरोडाशप्रयाजानां चेति । ननु द्वयोः प्रयोगयोर्यदि कालभेदः स्यात्तदोपक्रमयोर्भेदात्तयोर्भिन्नार्थता सिध्येत् तत्रैव प्रमाणाभाव इत्यत आह । श्रुतिकालनिर्देशात् । श्रुत्या प्रयोगारम्भकालभेदस्य निर्देशात् । अग्नीषोमीयं प्रणीयाग्नीषोमीयतन्त्रं प्रक्रमयति, वपया प्रचर्य पुरोडाशतन्त्रं प्रक्रमयतीति वाक्याभ्याम् ॥ १ ॥

गुणकालविकाराच्च तन्त्रभेदः स्यात् ॥ २ ॥

उक्तार्थे हेत्वन्तरमप्याह । गुणेति । पाशुकप्रयाजगृहीताङ्गपुरोडा-

Digitized by Google

शप्रयोगगृहीताङ्गयोर्गुणकालभेदात् । तथा हि । पाशुकप्रयाजे एकादश-संख्या गुणः तिष्ठन्तं पशुं प्रयजतीति पशुजीवनकालः । तथाऽनूयाजे एका-दशसंख्या पृषदाज्यं द्रव्यम् । पौरोडाशिकेषु तु उभयत्र क्रमेण पञ्चत्व-त्रित्वसंख्या केवलाज्यं द्रव्यं वपायागोत्तरः काल इति भेदात्तन्त्रभेदः स्यात् ॥ २ ॥

तन्त्रमध्ये विधानाद्वा मुख्यतन्त्रेण सिद्धः स्यात्तन्त्रार्थस्याविशिष्टत्वात् ॥ ३ ॥

सिद्धान्तमाह । तन्त्रेति । मुख्यतन्त्रेण पशुप्रयोगेण पुरोडाशा-पूर्वोपकारसिद्धिः स्यात् । कुतः, तन्त्रमध्ये पाशुकतन्त्रमध्ये पुरोडाशस्य विधानात् । तन्त्रमध्ये विधानं कथं प्रसङ्गसाधकमत आह । तन्त्रार्थे-स्येति । तन्त्रस्याङ्गजातस्यार्थस्योपकारविशिष्टत्वाद् ऐक्यात् । अयं भावः । पुरोडाशयागेन पशूपकारं भावयेदित्युत्पत्तिवाक्यादवगते कथमिति व्या-पाराकाङ्क्षायामाष्टमिकन्यायेन द्रव्यदेवतासादृश्यादग्नीषोमीययागवदिति चोदकशास्त्रपरिकल्पने पश्चात्पुरोडाशप्रयोगविधिना ऽग्नीषोमीयाङ्गानां सकलानां पशुपुरोडाशयागसांनिध्यं संपादनीयं स्वोपकारार्थं ततः प्रागेव पशुप्रयोगविधिना प्रयाजानूयाजादीन् पशूपकारसिद्धये पशुयागसांनिध्यं संपादितं तत्सांनिध्ये तत्प्रयोगान्तःपातिपुरोडाशयागसांनिध्यमपि सिद्ध-मेव तेषामिति पाशुकप्रयोगविधिप्रापितसांनिध्यकान्यङ्गानि पुनः पुरोडा-शप्रयोगविधिः न गृह्णाति । यानि चाज्यभागादीनि पाशुकयागसमीपे कृतानि तान्येव तत्प्रयोगविधिर्गृह्णातीति न प्रयाजादीनामावृत्तिरिति ॥ ३ ॥

विकाराच्च न भेदः स्यादर्थस्याविकृतत्वात् ॥ ४ ॥

अथ यदुक्तं गुणकालभेदादावृत्तिरिति तत्रोत्तरमाह । विकारा-दिति । विकाराद् एकादशत्वपृषदाज्यरूपगुणविकाराद् न भेदः न प्रयोग-भेदः । प्रयाजादीनां नावृत्तिरिति फलितोऽर्थः । कुतः, अर्थस्याङ्गजनितो-पकारस्याविकृतत्वात् । प्रकृतौ पञ्चत्वादिविशिष्टे य उपकारः तस्यैव पशौ अतिदिष्टत्वेन फलांशे विकाराभावात् । अयं भावः । एकादश

Digitized by Google

प्रयाजान्यजतीत्यत्र प्रकृतितश्चोदकशास्त्रेण ये प्रयाजाः प्राप्तास्तान-नूद्यैकादशत्वादिरूपो गुणो विधीयते नापूर्वः गुणविशिष्टः । तथा सति नवचेष्टुपहोमन्यायेन प्राकृतवैकृतसमुच्चयापत्तेः । न चेष्टापत्तिः । वैश्वदेवे पर्वणि त्रिंशत्संपद्यन्त इत्याहुतिसंख्याकथनविरोधात् । प्राकृतानां तु प्रयाजादीनां स्वोपकारसहितानामतिदेशाद् द्वयोरुपकारो न भिन्नः । अतो गुणप्रयुक्ता पावृत्तिर्नेति । न च गुणानुग्रहाय प्रधानावृत्तिर्न्याय्येति फलितं तात्पर्यम् ॥ ४ ॥

एकेषां चाशक्यत्वात् ॥ ५ ॥

पुरोडाशचोदकशास्त्रप्रापितानां यावदङ्गानां मध्ये केषां चिद्वे-देनानुष्ठानं कर्तुमशक्यं यथा वेदेः अग्निविहरणस्य वेद्यन्तरे क्रियमाणे साङ्गप्रधानस्यानुष्ठाने देशकर्त्रैक्यनियमो भज्येत । प्रधानपशुयागवेदेः तद-ङ्गभूतपुरोडाशयागवेदेर्भिन्नत्वात् । अत उभयोर्वेदिरेकैवेत्यवश्यमभ्युपेयम् । तथा च तत्र प्रसङ्गसिद्धौ किमपराद्धं प्रयाजानुयाजैरित्यभिप्रायेणाह । एकेषामिति । एकेषां वेद्यादीनामुक्तयुक्त्या ऽऽवृत्तेरशक्यत्वात् ॥ ५ ॥

एकाग्निवच्च दर्शनम् ॥ ६ ॥

ननु साङ्गप्रधानानां देशैक्यं न्यायसिद्धं ततो ऽपि प्रबलेन चोद-कशास्त्रेण बाध्यतामत आह । एकेति । एकाग्निवत् । पशुयागपुरोडाश-यागयोरग्न्यभेदस्य दर्शनं प्रत्यक्षश्रुतिदर्शनं मध्ये ऽग्नेराज्याहुतीर्जुहोति पुरोडाशाहुतीः पश्वाहुतीश्चेति दर्शनम् । तथा च प्रयाजनस्य प्रसङ्गसिद्धि-र्गले पतिता । तथा च तत्र प्रसङ्गसिद्धावन्यत्रापि सिध्यतीतिभावः ॥ ६ ॥

पुरोडाशे आज्यभागयोः कर्तव्यत्वम् । अधि० २ ।

जैमिनेः परतन्त्रापत्तेः स्वतन्त्रप्रतिषेधः स्यात् ॥ ७ ॥

पशुपुरोडाशे आज्यभागो कर्तव्यौ नेति संशये पाशुकप्रयोगविधिना पौरोडाशिकचोदकबाधाद् आज्यभागप्रापकाभावाच कर्तव्याविति पूर्वपक्षे सिद्धान्तमाह । जैमिनेरिति । जैमिनेराचार्यस्य मते आज्यभागौ कर्तव्यौ परतन्त्रापत्तेः । परतन्त्रं पाशुकतन्त्रं तेनापत्तेः प्राप्तेः । प्रयाजादीनां तद्वि-

Digitized by Google

षये स्वतन्त्रस्य पुरोडाशतन्त्रस्य प्रयोगविधेः प्रतिषेधः स्यात् । यद्विषये आज्यभागादिविषये परस्याप्राप्तिः तत्र न बाध इति भावः ॥ ७ ॥

सोमे दार्शिकवेदेरकरणम् । अधि० ३ ।

नानार्थत्वात्सोमे दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात् ॥ ८ ॥

सोमिकवेदिनिर्माणानन्तरं ज्योतिष्टोमाङ्गभूतदर्शपूर्णमासप्रकृतिके कर्मणि तदङ्गवेद्यन्तरं कर्तव्यं न वेति संशये पूर्वपक्षमाह । नानेति । दर्शपूर्णमासप्रकृतीनां वेदिकर्म स्यात् । पृथग्वेदिः स्यादित्यर्थः । कुतः, नानार्थत्वात् । सोमिकदर्शपूर्णमासवेद्योः भिन्नफलत्वात् । सोमिकवेदेः प्रचारः फलमवदानग्रहणादिजातं प्रचार इति धूर्तस्वामिभाष्ये इतरा वेदिर्हविरासादनार्थेति नानार्थत्वात् ॥ ८ ॥

अकर्म वा कृतदूषा स्यात् ॥ ९ ॥

सिद्धान्तमाह । अकर्मेति । अकर्म वेद्यन्तरस्याकरणं यतः कृतदूषा सा क्रियमाणा सोमिक्या वेदेः दूषणरूपा स्यात् । दूषणरूपता चेत्थं, यत्कार्यं हविरासादनरूपं दार्शिकवेदेः तत्कार्याक्षमा सोमिकी वेदिरिति । न चेदं वास्तवं सोमिक्यां हविर्धारणक्षमत्वात् । प्रचारार्थाया अपि धारणस्य प्रसङ्गेन सिद्धे न वेद्यन्तरमिति भावः ॥ ९ ॥

सोमे दार्शिकैः स्रुवादिभिः पात्रैः सावनपश्वादिहोमः । अधि० ४ ।

पात्रेषु च प्रसङ्गः स्याद्धोमार्थत्वात् ॥ १० ॥

ज्योतिष्टोमे एकसुत्यादिने ग्रहचमसेषु गृहीतेषु दर्शपूर्णमासप्रकृतिकं कर्म सावनपुरोडाशादिरूपं तत्रजुहूपभृत्प्रभृतिपात्राणि सन्ति उत ग्रहचमसैरेव होम इति संशये पूर्वपक्षमाह । पात्रेष्विति । पात्रेषु होमसाधनपात्रेषु प्रसङ्गः ग्रहचमसैरेव होमसिद्धिः उभयोरपि होमार्थत्वाविशेषात् ॥ १० ॥

न्याय्यानि वा प्रयुक्तत्वादप्रयुक्ते प्रसङ्गः स्यात् ॥ ११ ॥

सिद्धान्तमाह । न्याय्यानीति । दर्शपूर्णमासपात्राणि होमे न्याय्यानि योग्यानि । कुतः, प्रयुक्तत्वात् तेषां परिग्रहात् । प्रयाजादिविष-

ष्यमाह । अप्रयुक्ते अपरिग्रहे प्रसङ्गः स्यात् । सोमिकतन्त्रात्प्राक् सावनतन्त्रं प्रक्रान्तम् । अथ यद्गृहीत्वा ऽऽज्यानि सोममासादयन्ति न यजमानं हन्तीति वाक्येनाज्यासादनान्तस्य प्राकृतस्य पूर्वं विहितत्वात् । तथा च प्राकृतजुह्वादीनां संनिहितत्वेन प्रसङ्गासंभवः । प्रयाजादिषु नेत्यम् । लोके ऽपि गमनप्रसङ्गे तदुपकाराय स्वयाने समवहिते न परकीयमपेक्षतइति भावः ॥ ११ ॥

शामित्रे पशुपुरोडाशश्रपणाभावः । अधि॰ ५ ।

शामित्रे च पशुपुरोडाशो न स्यादितरस्य प्रयुक्तत्वात् ॥ १२ ॥

पशुपुरोडाशश्रपणं शामित्रे उत गार्हपत्ये इति संशये शामित्रस्य हविःश्रपणहेतुत्वं क्लृप्तमिति पुरोडाशश्रपणे ऽप्यग्नेः प्रसङ्गसंभवात्तत्रैव श्रपणमिति पूर्वपक्षे सिद्धान्तमाह । शामित्रइति । सूत्रे पशुपुरोडाशशब्दः तच्छ्रपणपरः । तन्न स्याच्छामित्रे । इतरस्य गार्हपत्यस्य शामित्रात्प्राक् प्रयुक्तत्वात् सिद्धत्वात् ॥ १२ ॥

कौण्डपायिनामयने ऽग्निहोत्रद्रव्यस्य प्राजहिते श्रपणम् । अधि॰ ६ ।

श्रपणं चाग्निहोत्रस्य शालामुखीये न स्यात्प्राजहितस्य विद्यमानत्वात् ॥ १३ ॥

कुण्डपायिनामयने मासमग्निहोत्रं जुहोतीत्यत्र हविःश्रपणं शालामुखीये उत मुख्यगार्हपत्यइति संशये यतः प्रणयति स गार्हपत्य इत्यग्नीषोमप्रणयनोत्तरमाहवनीयस्य गार्हपत्यत्वेन चोदितत्वाच्छालामुखीये श्रपणमिति पूर्वपक्षे सिद्धान्तमाह । श्रपणमिति । प्राजहितस्य मुख्यगार्हपत्यस्य । शेषं स्पष्टम् । अयं भावः । शालामुखीये गार्हपत्यशब्दो गौणः मुख्ये संभवति गौणकल्पनमन्याय्यमिति ॥ १३ ॥

हविर्धानशकटाभ्यां मौषधद्रव्यकाणां पुरोडाशानां निर्वापः । अधि॰ ७ ।

हविर्धाने निर्वपणार्थं साधयेतां प्रयुक्तत्वात् ॥ १४ ॥

हविर्धानशकटप्रवर्त्यनन्तरं सवनीयादिपुरोडाशनिर्वापः तत्र कार्य उत शकटान्तरे इति संशये पूर्वपक्षमाह । हविर्धाने इति । हविर्धाने

Digitized by Google

सोमाधारभूते शकटे निर्वापार्थे सवनीयादिनिर्वापार्थे निर्वापरूपकार्यं साधयेतामुत्पादयेताम् । शेषं स्पष्टम् ॥ १४ ॥

असिद्धिर्वाऽन्यदेशत्वात्प्रधानवैगुण्यादवैगुण्ये प्रसङ्गः स्यात् ॥ १५ ॥

सिद्धान्तमाह । असिद्धिरिति । हविर्धानशकटयोर्निर्वापसाधनस्यासिद्धिः प्रधानवैगुण्यात् । प्रधानवैगुण्यं दर्शयति । अन्यदेशत्वात् । सोमशकटयोर्हविर्धानमण्डपे स्थितयोर्निर्वापदेशे गार्हपत्यपश्चाद्भागे नयने प्रधानस्य सोमयागस्य वैगुण्यं स्यादिति भावः । अतः अवैगुण्ये एव प्रसङ्गो युक्तः ॥ १५ ॥

अनसां च दर्शनात् ॥ १६ ॥

ननु यथा पशुपुरोडाशे चोदकप्राप्तः हविरासादनोत्तरकालः प्रयाजानुष्ठानस्य तं कालं बाधित्वा प्रसङ्ग आदृतः तथा गार्हपत्यपश्चाद्देशं बाधित्वा प्रसङ्गस्वीकारे बाधकाभावोऽत आह । अनसामिति । अनांसि प्रवर्तयन्तीति वाक्येन शकटबहुत्वं श्रूयते सोमाधारशकटयोर्द्वित्वेन बहुवचनानुपपत्त्या न प्रसङ्ग इति भावः ॥ १६ ॥

प्रायणीयादिषु दीक्षाजागरणस्याभावः । अधि० ८ ।

तद्युक्तं च कालभेदात् ॥ १७ ॥

दीक्षादिने रात्रौ जागरणं श्रुतं तथा दर्शपूर्णमासयोरौपवसथ्येऽहनि रात्रौ जागरणं श्रुतं प्रायणीयादिष्वतिदिष्टं तस्य दीक्षाजागरणेन प्रसङ्गसिद्धिरिति पूर्वपक्षे सिद्धान्तमाह । तदिति । तत् पृथग् जागरणं युक्तं कालभेदात्स्पष्टम् ॥ १७ ॥

विहारभेदे मन्त्रभेदः । अधि० ९ ।

मन्त्राश्च संनिपातित्वात् ॥ १८ ॥

वरुणप्रघासे मारुतीप्रचारार्थं प्रतिप्रस्थाताऽऽज्यानि गृह्णाति इतरार्थमध्वर्युः तत्राज्यग्रहणमन्त्राणां तन्त्रमुतावाप इति संशये तन्त्रमिति पूर्वपक्षे सिद्धान्तमाह । मन्त्रा इति । तथेति शेषः । पूर्वाधिकरणसिद्धान्त-

वदावृत्तिः । संनिपातित्वात् । मन्त्राणामर्थस्मरणद्वारा संनिपत्योपकारकत्वात् । मन्त्रे एह्वामीत्युत्तमपुरुषश्रुतार्थस्यान्त्रोपकारकत्वासंभवादिति भावः ॥ १८ ॥

दीक्षणीयादिषु अन्यन्वाधानस्याभावः । अधि० १० ।

धारणार्थत्वात्सोमे ऽन्यन्वाधानं न विद्यते ॥ १९ ॥

सोमे दीक्षणीयादिष्वग्न्यन्वाधानं नास्त्यस्ति वेति संशये सोमिकाद्दीक्षणीयादिसंबन्धिनः कालभेदाज्ज्ञागरवदस्ति दीक्षणीयादिष्वन्वाधानमिति पूर्वपक्षे सिद्धान्तमाह । धारणेति । सोमिकान्वाधानस्य समाप्तिपर्यन्तं धारणार्थत्वात् सोमे सोमसंबन्धिदीक्षणीयादिषु । शेषं स्पष्टम् ॥ १९ ॥

दीक्षणीयादिषु व्रतोपायनस्याभावः । अधि० ११ ।

तथा व्रतमुपेयत्वात् ॥ २० ॥

सोमिकव्रतेनैष्टिकव्रतस्य प्रसङ्गेन सिद्धिरिति पूर्वन्यायमतिदिशति । तथेति । उपेयत्वात् । अप्राप्तप्रापणमुपगमनं व्रतस्य परिगृहीतत्वेनाप्राप्तत्वाभावादिति भावः ॥ २० ॥

विप्रतिषेधाच्च ॥ २१ ॥

बाधकान्तरमाह । विप्रतीति । सोमिकव्रते परिगृहीते व्रतस्य वर्तमानत्वेन व्रतं चरिष्यामीति भविष्यदर्थो विप्रतिषिद्धो बाधितः स्यादतः ॥ २१ ॥

सत्यवदिति चेत् ॥ २२ ॥

प्रथमसूत्रे उपेयत्वादिति हेतुमाक्षिपति । सत्येति । सत्यं वदेति स्मृतिप्राप्तव्रतपरिग्रहे ऽपि पुनर्दर्शपूर्णमासप्रकरणे पुनरुच्यते सत्यं वदेति तद्वत्किं न स्यादिति भावः ॥ २२ ॥

न संयोगपृथक्त्वात् ॥ २३ ॥

वैषम्यदृष्टान्तं दर्शयति । नेति । संयोगपृथक्त्वात् संयोगः सम्यक्प्रयोगः संबन्धो यत्रेति व्युत्पत्त्या विधेयार्थसंबन्धाश्रयः उद्देश्यमर्थः ।

Digitized by Google

तस्य पृथक्त्वात् । स्मृतिः पुरुषमुद्दिश्यान्यश्च क्रत्वपूर्वमुद्दिश्येति पृथक्त्वं प्रकृते उभयमपि क्रत्वपूर्वमुद्दिश्येति ॥ २३ ॥

ऐष्टिकेषु अन्यन्वाधानानुष्ठानम् । अधि० १२ ।

ग्रहार्थं च पूर्वमिष्टेस्तदर्थत्वात् ॥ २४ ॥

सोमिकान्वाधानस्य धारणार्थत्वात्प्रसङ्ग इत्युक्तं दशमाधिकरणे । तत्र न केवलं धारणार्थमग्न्यन्वाधानं किं तु देवतापरिग्रहार्थमपि । यो वै देवताः पूर्वाः परिगृह्णाति स एनाः श्वो भूते यजतइति ताः पूर्वाः परिगृह्णातीति च लिङ्गात् । तथा च देवतापरिग्रहो न सिध्यति प्रसङ्गेनोभयोर्देवताभेदादित्याक्षेपे समाधानमाह । ग्रहार्थमिति । अन्वाधानं पूर्वं प्राथमिकं ग्रहार्थं देवतापरिग्रहार्थमपि आस्तां तथा ऽपि प्रसङ्गेन तस्यापि सिद्धिरिति पूरणीयम् । कथं सिद्धिरिति दर्शयति । इष्टेः दीक्षणीयेष्टेः तदर्थत्वात् देवतापरिग्रहार्थत्वात् । अयं भावः । आग्नावैष्णवमेकादशकपालं निर्वपति दीक्षिष्यमाणः दीक्षणीयेष्ट्युत्पत्तिवाक्यं, तदर्थवादश्चैवमग्निर्वै देवानामवमो विष्णुः परमः यदाग्नावैष्णवमेकादशकपालं निर्वपति देवता एवोभयतः परिगृह्य यजमानो ऽवरुन्धइति अर्थवादेनेष्ट्याः परिग्रहार्थत्वादिति ॥ २४ ॥

शेषवदिति चेत् ॥ २५ ॥

पूर्वपक्ष्याशङ्कते । शेषेति । शेषवत् । अङ्गदेवतावत् । ऐष्टिकमन्वाधानम् । अयं भावः । दीक्षणीयेष्टावन्वाधानमङ्गभूतैष्टिकदेवतापरिग्रहार्थं दीक्षणीयेष्ट्या च प्रधानदेवतापरिग्रह इति भिन्नार्थत्वाच्च प्रसङ्गसिद्धिरिति ॥ २५ ॥

न वैश्वदेवो हि ॥ २६ ॥

दूषयति । नेति । हि यस्मात्प्रधाने वैश्वदेवग्रहो ऽस्ति तत्र विश्वे देवा देवताः विश्वदेवपदवाच्यं देवतात्वावच्छिन्नसामान्यं देवतात्वावच्छिन्नान्तःपातिनामङ्गदेवतानामपि तद्ग्रहसंबन्धात्प्रधानग्रहमस्तीति भावः ॥ २६ ॥

स्याद्वा व्यपदेशात् ॥ २७ ॥

पूर्वपक्षयत्याशङ्कते । स्यादिति । व्यपदेशाद्भेदेन निर्देशाद् ऐष्टिकान्वाधानं स्यात् । अयं भावः । अग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वदेवैरित्यत्र वस्वाद्यपेक्षया विश्वेषां देवानां भेदेन निर्देशेन मरुदादिवद्विश्वदेवशब्दो ऽपि गणविशेषवाची । तथा चाङ्गदेवतानां तद्वाच्यत्वाभावात्तदर्थमैष्टिकमन्वाधानं स्यादिति ॥ २७ ॥

न गुणार्थत्वात् ॥ २८ ॥

दूषयति । नेति । गुणार्थत्वात् । स्तुत्यर्थत्वात् । अयं भावः । उक्तस्थले विश्वदेवशब्दो न भेदनिर्देशपरः किं तु बृहस्पतिस्तुतिपरः । स्तुतिश्चेत्थम् । अग्न्यादयो वरुणान्ताः सर्वदाप्येकदेशयुक्ताः । बृहस्पतिस्तु सकलदेवतायुक्त इति श्रेष्ठ इति ॥ २८ ॥

ऐष्टिकेषु पत्नीसंनहनाननुष्ठानम् । अधि० १३ ।

संनहनं वृत्तत्वात् ॥ २९ ॥

मेखलया यजमानं दीक्षयति योक्त्रेण पत्नीमिति सौमिकसंनहनेन प्रायणीयादिषु संनहनं प्रसङ्गेन सिध्यतीति सिद्धान्तरूपं सूत्रमाह । संनहनमिति । वृत्तत्वात्प्राकृतसंनहनात्प्राक् प्रवृत्तत्वात् । प्रयाजादिन्यायवैषम्यमन्वाधानादिन्यायवैषम्यं मत्कृतविहारव्याप्यां ज्ञेयं विस्तरभयान्नेह लिख्यते ॥ २९ ॥

ऐष्टिकेषु आरण्यभोजनाभावः । अधि० १४ ।

अन्यविधानादारण्यभोजनं न स्यादुभयं हि वृत्त्यर्थम् ॥ ३० ॥

पयो ब्राह्मणस्य व्रतमिति सौमिकं दर्शपूर्णमासयोः आरण्यस्याश्नातीति विहितं प्रायणीयादिषु अतिदेशप्राप्तं तस्य सौमिकेन प्रसङ्गसिद्धिरिति सिद्धान्तमाह । अन्येति । अन्यस्य पयसः वृत्त्यर्थं प्राणधारणार्थमेकेन चारितार्थ्यादिति भावः ॥ ३० ॥

ऐष्टिकेषु शेषभक्षाननुष्ठानम् । अधि० १५ ।

शेषभक्षास्तथेति चेन्नान्यार्थत्वात् ॥ ३१ ॥

इडाभक्षणादिनिवर्तनं न वेति संशये तस्यापि वृत्त्यर्थत्वाभिप्रायेण पूर्वपक्षमनूद्य दूषयति । शेषेति । तथा निवर्तते । अन्यार्थत्वात् । संस्कारार्थत्वात् । एतेन पूर्वाधिकरणवैषम्यं दर्शितं, हविःशेषान् भक्षयन्तीति द्वितीयया संस्कारार्थत्वावगमादिति भावः ॥ ३१ ॥

ऐष्टिकेषु अन्वाहार्यदानाभावः । अधि· १६ ।

भृतत्वाच्च परिक्रयः ॥ ३२ ॥

अन्वाहार्यदक्षिणा निवर्तते न वेति संशये सिद्धान्तमाह । भृतेति । परिक्रयः दर्शपूर्णमासपरिक्रयरूपो ऽन्वाहार्यः निवर्तते इति शेषः । भृतत्वात् । ज्योतिष्टोमदक्षिणया परिक्रीतत्वात् ॥ ३२ ॥

ऐष्टिकेषु शेषभक्षस्य संस्कारार्थतया कर्तव्यत्वम् । अधि· १७ ।

शेषभक्षास्तथेति चेत् ॥ ३३ ॥

शेषभक्षेष्वपि ऋत्विक्परिक्रयार्थत्वमाशङ्कते । शेषेति । तथा परिक्रयार्थाः ॥ ३३ ॥

न कर्मसंयोगात् ॥ ३४ ॥

दूषयति । नेति । कर्मसंयोगात् । कर्मवाचकद्वितीयाश्रवणात् ॥ ३४ ॥

ऐष्टिकेषु होतुर्वरणसद्भावः । अधि· १८ ।

प्रवृत्तवरणात्प्रतितन्त्रं वरणं होतुः क्रियते ॥ ३५ ॥

सोमे प्रथममग्निर्मे होतेति हौत्रवरणं क्रियते पश्चाद्दीक्षणीयादिषु प्रकृतितः अग्निर्देव इति मन्त्रेण प्राप्तं वरणमस्ति न वेति संशये वरणस्य ऋत्विगनुमतिप्रकाशनार्थत्वात्तस्यैकेन सिद्धत्वादपरं न कर्तव्यमिति पूर्वपक्षे सिद्धान्तमाह । प्रवृत्तेति । प्रतितन्त्रं प्रतीष्टि होतुर्वरणं क्रियते । कुतः, प्रवृत्तवरणात् । कर्मणि प्रवृत्त्यनन्तरं वरणात् । अयं भावः । यद्यग्निर्देव इत्यैष्टिकवरणमृत्विगनुमतिप्रकाशार्थं तर्हि कर्मणि प्रवृत्तेः पूर्वं स्यात् । इह तु कर्मप्रवृत्त्यनन्तरं मध्ये वरणमस्त्यतः अदृष्टार्थं तददृष्टं सौमिकेन न सिध्यत्यत आवृत्तिरिति ॥ ३५ ॥

Digitized by Google

अस्यापीति चेत् ॥ ३६ ॥

तर्हि भूपते भुवनपते इति ब्रह्मणो ऽपि वरणं कर्ममध्यएवा-
स्तीति तस्याप्यावृत्तिः स्यादिति शङ्कते । अस्येति ॥ ३६ ॥

न प्राक् नियमात्तदर्थं हि ॥ ३७ ॥

होतृवरणाद्ब्रह्मवरणे वैषम्यं दर्शयति । नेति । प्राक् क्रतुसंबन्धि-
ब्रह्मकर्तृकक्रियातः प्राग् नियमात् वरणात् । तदर्थं हि ब्रह्मानुमतिज्ञा-
नार्थं तद्वरणम् । अन्यकर्तृकक्रियायाः पूर्वं प्रवृत्तावपि ब्रह्मकर्तृकक्रिया वर-
णात्प्राग् न का ऽप्यस्तीति वैषम्यमिति भावः ॥ ३७ ॥

निर्दिष्टस्येति चेत् ॥ ३८ ॥

पौर्णमास्यां प्राग् न का ऽपि क्रिया तथा ऽप्यमावास्यायां पूर्व-
दिने वेदिपरिग्रहार्थमनुज्ञा ॐपरिगृह्णीतेतिरूपा ऽस्तीत्याशङ्कते ।
निर्दिष्टस्येति । निर्दिष्टस्य अमायां पूर्वद्युर्वेदिं करोतीति विहितस्य
परिग्रहानुज्ञारूपं यदङ्गं तस्य पूर्वं सत्त्वात्पूर्वसूत्रार्थो ऽसिद्ध इति
भावः ॥ ३८ ॥

नाश्रुतत्वात् ॥ ३९ ॥

आशङ्कां परिहरति । नेति । स्पष्टो ऽर्थः । पूर्वद्युर्वेदिकरणं श्रुतं न
परिग्रह इति भावः ॥ ३९ ॥

होतुस्तथेति चेत् ॥ ४० ॥

होतुरपि वरणात्प्राग् न कर्मेत्याशङ्कते । होतुरिति । स्पष्टो
ऽर्थः ॥ ४० ॥

न कर्मसंयोगात् ॥ ४१ ॥

होतुर्वरणात्प्राग अस्ति कर्मेत्याह । नेति । कर्मसंयोगात् ।
अग्रतः सामिधेनीरन्वाहेति कर्मविधानात् ॥ ४१ ॥

आतिथ्यायां बर्हिषः प्रतिकर्म प्रोक्षणाद्यभावः । अधि॰ १६ ।

यज्ञोत्पत्त्युपदेशे ऽनुष्ठितकर्मप्रयोगभेदात्
प्रतितन्त्रं क्रियते ॥ ४२ ॥

सोमे श्रुतं, यद्रातिथ्यायां बर्हिस्तदुपसदां तदग्नीषोमीयस्येति । अत्र बर्हिषा प्रोक्षणं बर्हिरसि स्रुग्भ्यस्त्वा स्वाहेति विहितम् । इदमुपसत्स्वग्नीषोमपशौ च कार्यं न वेति संशये पूर्वपक्षमाह । यज्ञोत्पत्तीति । यज्ञस्यातिथ्याख्यस्योप समीपदेशे ऽनुष्ठितं गृहीतं कर्म प्रोक्षणादि, तदर्थमिति शेषः ।

अत उपसदादेः प्रयोगस्य भिन्नत्वात् प्रतितन्त्रं प्रतिप्रयोगं यदुत्पत्तिविधिकथंभावगृहीतानि यान्यङ्गानि तानि तत्प्रयोगविधिर्गृह्णाति । अतस्तत्प्रोक्षणादि आतिथ्यार्थमेवेति भावः ॥ ४२ ॥

न वा कृतत्वात्तदुपदेशो हि ॥ ४३ ॥

सिद्धान्तमाह । न वेति । प्रतिप्रयोगं नावृत्तिः कृतत्वात् । यदि आतिथ्याद्युद्देशेन प्रोक्षणं तर्हि प्रधानावृत्त्या तदावृत्तिर्भवेत् । बर्हिषः संस्कारः स च न भिन्नः अतो नावृत्तिरिति भावः । इदमेव संक्षेपेणानुवदति । तदुपदेशो हि । तस्य बर्हिषः उद्देश्यत्वेनोपदेशः बर्हिः प्रोक्षतीति द्वितीयया निर्देशो हि यस्मात् ॥ ४३ ॥

आतिथ्यायां स्तरणमन्त्रस्यावृत्तिः । अधि० २० ।

देशपृथक्त्वान्मन्त्रो ऽप्यावर्तेत ॥ ४४ ॥

तत्रैवोर्णम्रदसं त्वेति स्तरणमन्त्रस्यापि प्रसङ्गेन सिद्धिरिति पूर्वपक्षे सिद्धान्तमाह । देशेति । शालामुखीयोत्तरवेदिपश्चाद्भागयोर्भिन्नत्वात् । शेषं स्पष्टम् ॥ ४४ ॥

बर्हिषो देशान्तरनयने संनहनहरणमन्त्रयोरप्रयोगः । अधि० २१ ।

संनहनहरणे तथेति चेत् ॥ ४५ ॥

तत्रैव पूषा ते ग्रन्थिमिति संनहनं, बृहस्पतेर्मूर्ध्ना हरामीति हरणम् । तौ मन्त्रौ आवर्तेते नेति चिन्तायां पूर्वपक्षमाह । संनेति । तथा स्तरणमन्त्रवत् । देशान्तरे नयनस्य संनहनस्य आवृत्तत्वादिति भावः ॥ ४५ ॥

नान्यार्थत्वात् ॥ ४६ ॥

सिद्धान्तमाह । नेति । अन्यार्थत्वात् । अयं भावः । न वेद्यां स्तरणाय ये संनहनहरणे तदर्थाविमौ मन्त्रौ किं तु दर्भदेशाच्छेदनं कृत्वा संनह्याहरणार्थौ तयोरेकत्वाचावृत्तिरिति ॥ ४६ ॥

इति श्रीजैमिनिसूत्रवृत्तौ द्वादशाध्यायस्य प्रथमः पादः ॥ १ ॥

विहाराग्नेर्वैदिककर्ममात्रार्थत्वम् अधि॰ १ ।

विहारो लौकिकानामर्थं साधयेत्प्रभुत्वात् ॥ १ ॥

पूर्वपादे तन्त्रमध्यवर्तिनः प्रसङ्गश्चिन्तितः । अस्मिन्पादे तन्त्रबहिर्भूतस्य प्रसङ्गश्चिन्त्यते । यश्चाधानेनोत्पन्नस्त्रेताऽग्निः स वैदिक एव नियुज्यते उत प्रावणस्थालीपाकादावपीति संशये पूर्वपक्षमाह । विहार इति । विहारः गार्हपत्याद्यग्निचयं प्रभुत्वात्समर्थत्वात् । अनेनाग्नेर्लिङ्गेन विनियोगः सूचितः । शेषं स्पष्टम् ॥ १ ॥

मांसपाकप्रतिषेधश्च तत् ॥ २ ॥

स्वमते साधकान्तरमाह । मांसेति । मांसं न पचेयुः तस्मिन्यत्पचेयुः क्रव्यादं कुर्युरिति मांसपाकनिषेधः तत्तस्मादुपपन्न इति शेषः । अयं भावः । निषेधो हि प्राप्तिपूर्वः वैदिकमांसस्य शामित्रे पाकविधानाच्च तत्प्राप्तिः । अतस्त्रेताग्नेर्लौकिककर्मण्यपि विनियोगकल्पने भोजनार्थं तण्डुलादिपाकवत्तत्र मांसपाकस्यापि प्रसक्तौ निषेधः संगत इति ॥ २ ॥

निर्देशाद्वा वैदिकानां स्यात् ॥ ३ ॥

सिद्धान्तमाह । निर्देशादिति । निर्देशात् त्रेताग्नेः गार्हपत्ये पत्नीः संयाजयन्ति दक्षिणाग्नौ फलीकरणहोमं करोति यदाहवनीये जुहोतीत्यादिप्रत्यक्षवाक्यैः कार्यनिर्देशात् । शेषं स्पष्टम् । तेनैव निराकाङ्क्षमिति भावः ॥ ३ ॥

सति चौपासनस्य दर्शनात् ॥ ४ ॥

साधकान्तरमाह । सतीति । सति विहारे सति च औपासनविधानं श्रूयते, यं कामयेत राष्ट्रमस्य प्रजायै स्यादिति तस्यौपासने

पशुमालभ्य जुहुयादिति राजसूयमध्ये कर्तव्यत्वेन श्रुतम्। यदि चेताग्निः लौकिके ऽपि कर्मणि तर्हि अस्य कर्मणः लौकिकस्य विहारएव संभवादौ-पासने विधानमनर्थकं स्यादिति भावः ॥ ४ ॥

अभावदर्शनाच्च ॥ ५ ॥

या च पूर्वपक्षे मांसपाकप्रतिषेधयुक्तिः तां परिहरति। अभावेति। चेताग्नौ पाकाभावदर्शनाच्चेत्यं कल्प्यते। विहितमांससंयोगादन्यमांस-संयोगो ऽत्र न कर्तव्य इति भावः ॥ ५ ॥

मांसपाको विहितप्रतिषेधः स्यादा
ऽऽहुतिसंयोगात् ॥ ६ ॥

प्रकारान्तरेण समाधानमाह। मांसेति। मांसपाकः मांसपाक-प्रतिषेधः विहितप्रतिषेधरूपः। वपाश्रपणमाहवनीये विहितं तत्प्रति-षेधरूपः। तथा च विकल्पे पर्यवसानमिति भावः। कुतः, आहुति-संयोगात् तस्मिन्नग्नौ न मांसं पचति यस्मिन्नाहुतीर्जुहोतीति निषेध-वाक्ये आहुत्याधाररूपे ऽग्नौ प्रतिषेधः यदाहवनीये जुहोतीत्याहवनी-यस्य तथात्वात् ॥ ६ ॥

वाक्यशेषो वा दक्षिणस्मिन्ननारभ्यविधानस्य ॥ ७ ॥

समाधानान्तरमाह। वाक्येति। दक्षिणस्मिन्दक्षिणे ऽग्नौ पत्नीव्रतं श्रपयतीति अनारभ्यविधानस्य वाक्यस्य शेषः। अयमभिप्रायः। यदा पत्न्या रोगादिनिमित्तमेव मांसव्रतं प्रसक्तं तत्र मांसस्यापि श्रपणं दक्षि-णाग्नौ प्राप्तं तथा सति मांसभिन्नं यत्पत्नीव्रतं तद्दक्षिणाग्नौ श्रपयतीति व्रतश्रपणवाक्यैकवाक्यतामापन्नं सन्निषेधार्थकं न किं तु पर्युदासार्थमिति। विधानस्येति समासघटकवाक्येनाभेदान्वयासंभवे ऽपि तद्घटितसमास आर्षः ॥ ७ ॥

सवनीयपशौ पशुपुरोडाशस्य कर्तव्यत्वम्। अधि० २।

सवनीये छिद्रापिधानार्थत्वात्पशुपुरोडाशो
न स्यादन्येषामेवमर्थत्वात् ॥ ८ ॥

सवनीयपशोरङ्गभूतः पुरोडाशयागः कार्यो न वेति संशये पूर्वपक्षमाह । सवनीयइति । छिद्रापिधानार्थत्वात् । वपानिष्कासने यच्छिद्रं तत्पिधानार्थत्वात्तदर्थत्वं च, पशोरेव छिद्रमपिदधातीत्यर्थवादसिद्धम् । अन्येषामनुसवनं पुरोडाशान्निर्वपतीति विहितानामेवमर्थत्वात् । तदर्थवादे ऽप्यपिहित्यादिति तत्कार्यस्यैवोक्तत्वात् । शेषं स्पष्टम् ॥ ८ ॥

क्रिया वा देवतार्थत्वात् ॥ ९ ॥

सिद्धान्तमाह । क्रिया वेति । क्रिया कर्तव्यः पुरोडाशः देवतार्थत्वात् । देवतासंस्कारार्थत्वात् । तदर्थत्वं यथा तथा दशमे प्रतिपादितम् ॥ ९ ॥

लिङ्गदर्शनाच्च ॥ १० ॥

अवश्यकर्तव्यत्वे लिङ्गमाह । लिङ्गेति । वपया प्रातःसवने चरन्ति पुरोडाशेन माध्यन्दिने सवनइति । यदि पुरोडाशो न स्यात्तर्हि प्रयोगविप्रकर्षविधानं निर्विषयं स्यादिति भावः ॥ १० ॥

सवनीयपुरोडाशे हविष्कृदाह्वानस्याभावः । अधि॰ ३ ।

हविष्कृत्सवनीयेषु न स्यात्प्रकृतौ यदि सर्वार्था पशुं प्रत्याहूता सा कुर्याद्धिद्यमानत्वात् ॥ ११ ॥

सवनीये पुरोडाशे हविष्कृदाह्वानमस्ति नेति चिन्तायां सिद्धान्तमाह । हविष्कृदिति । प्रकृतौ हविष्कृदाह्वानमोषधिद्रव्यएव न सान्नाय्ये । पशोः सान्नाय्यप्रकृतिकत्वेन तत्र हविष्कृदाह्वानमप्राप्तमतः प्रकृतौ सान्नाय्यौषधिद्रव्यसाधारणमाह्वानमिति कृत्वाचिन्तयेदमधिकरणमिति ज्ञापयितुं प्रकृतौ यदीत्युक्तम् । कृत्वाचिन्तायां पशौ आह्वानमस्ति तेनैव सवनीयपुरोडाशे सिद्धिरिति भावः ॥ ११ ॥

तृतीयसवने हविष्कृदाह्वानस्यापुनरावृत्तिः । अधि॰ ४ ।

पशौ तु संस्कृते विधानात्तार्तीयसवनकेषु स्यात्सौम्याश्विनयोश्चाप्रकृतार्थत्वात् ॥ १२ ॥

तृतीयसवने पश्वङ्गप्रचारात्प्राक् सवनीयनिर्वापः। पश्चात्सौम्यश्चरुराश्विनो द्विकपालश्च विहितः। चरुद्विकपालादौ हविष्कृदाह्वानमस्ति नेति संशये पूर्वपक्षमाह। पशाविति। तार्तीयसवनकेषु तृतीयसवनसंबन्धिषु पुरोडाशेषु सौम्याश्विनयोश्चाह्वानं भेदेन स्यात्। पशौ पश्वङ्गेषु संस्कृतेषु पक्केषु ततो विधानात्। अपवृत्तार्थत्वात् सवनीयपुरोडाशेषु गतार्थत्वात्। सवनीयपुरोडाशार्थमाहूता तस्य हविषः सिद्ध्यनन्तरं सा कृतार्था सती गृहकार्यार्थं गमिष्यति पुनराह्वानेन विना आगमनमनुपपन्नमिति भावः॥ १२॥

योगाद्वा यज्ञाय तद्विमोके विसर्गः स्यात्॥ १३॥

यदुक्तं गृहकर्मसु गमिष्यत्यत आह्वानं भेदेनेति। तत्र गृहकर्मसु गमनमयुक्तमित्यभिप्रायेण सिद्धान्तमाह। योगादिति। यज्ञाय योगात्। यज्ञे नियुक्तत्वात् कस्त्वा युनक्ति इति। स त्वा विमुञ्चत्विति व्रतविमोक एव विसर्गः गृहकार्यादिषु। तथा चान्यत्र गमनाभावात्तेनैवाह्वानेन सौम्यादिषु सिद्धिरिति भावः॥ १३॥

निशियज्ञे ऽमावास्यातन्त्रप्रयोगः। अधि॰ ५।

निशियज्ञे प्राकृतस्याप्रवृत्तिः स्यात्प्रत्यक्षशिष्टत्वात्॥ १४॥

काम्येष्टिकाण्डे श्रूयते, अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यं रक्षांसि सचेरन्निति। तथा निशि तायाममावास्यायां निर्वपेदिति। अस्या इष्टेर्दर्शमध्यपतितत्वाद् अमावास्यातन्त्रं प्रसज्यते नेति चिन्तायां पूर्वपक्षमाह। निशीति। निशियज्ञे उक्तेष्ट्यां प्राकृतस्य दर्शेष्टितन्त्रस्याप्रवृत्तिः। प्रत्यक्षशिष्टत्वात् कस्य चिदनङ्गत्वेन स्वातन्त्र्येण प्रत्यक्षं श्रुतत्वात्॥ १४॥

कालवाक्यभेदाच्च तन्त्रभेदः स्यात्॥ १५॥

साधकान्तरमाह। कालेति। कालवाक्यभेदाच्चेति कालभेदः काम्येष्टेरर्धरात्रः कालः दर्शेष्टेर्द्वितीयदिने दिवेति। वाक्यभेदात्।

उत्पत्तिवाक्ययोर्भिन्नदेशत्वात् । यच्च दर्शयागोत्पत्तिस्तत्र नेयमिष्टि-
स्त्वया किं तु काम्येष्टिकाण्डइति भावः । अतस्तन्त्रभेदः प्रयोग-
भेदः ॥ १५ ॥

वेद्युद्धननव्रतं विप्रतिषेधात्तदेव स्यात् ॥ १६ ॥

प्रयोगभेदे ऽपि न यावदङ्गानामावृत्तिः किं तु केषां चिदङ्गानामा-
वृत्तिरित्याह । वेदीति । वेदिखननं व्रतग्रहणं दार्शिकमेव स्यात् ।
विप्रतिषेधाद् दर्शार्थनिर्मितवेदेरत्र खनने तन्नाशेन दर्शो विगुणः स्यात् ।
व्रतस्य गृहीतस्य पुनर्ग्रहणासंभवात् ॥ १६

तन्त्रमध्ये विधानाद्वा तत्तन्त्रा सवनीयवत् ॥ १७ ॥

सिद्धान्तमाह । तन्त्रेति । सवनीयवत् सवनीयाः पुरोडाशाः न
तावत्पशुकर्मोद्देशेन विधीयन्ते केवलं पशुतन्त्रमध्ये विधानमात्रेण तन्त्रं
तथा । शेषं स्पष्टम् ॥ १७ ॥

वैगुण्यादिध्माबर्हिर्न साधयेदग्न्याधानं च यदि देवतार्थम् ॥ १८ ॥

सर्वेषां न तन्त्रं केषां चिदावृत्तिरित्याह । वैगुण्यादिति । इध्मा-
बर्ही रात्रोग्रयागोपकारं न साधयेत् । तथा ऽग्न्यन्वाधानमपि । देवता-
परिग्रहार्थत्वकल्पे वैगुण्यात् । दर्शार्थसंपादितेध्मेनाग्निसमिन्धनं प्रतिपदि
स्यात् । तदिन्धनं निशि पूर्वकाले रात्रोग्रस्योपकारं न साधयेत् । रात्रो-
ग्रयागो विगुणः स्याद् इति भावः । एवमन्यत्राप्यूह्यम् ॥ १८ ॥

विकृतिष्वप्यारम्भणीयानुष्ठानम् । अधि० ६ ।

आरम्भणीया विकृतौ न स्यात्प्रकृतिकालमध्यत्वात्कृता पुनस्तदर्थे न ॥ १९ ॥

सौर्यादियागेष्वारम्भणीया कार्या न वेति संशये पूर्वपक्षमाह ।
आरम्भणीयेति । प्रकृतिकालपातित्वात् । यावज्जीवं दर्शपूर्णमासाभ्यां
यजेतेति वाक्येन जीवनपरिमितः कालो ऽङ्गत्वेन विधीयते । एकस्मि-

Digitized by Google

न्काले ऽनुष्ठीयमानः प्रयोग एक एवेति तन्मध्यपातित्वात्सौर्यादीनां प्रयोगो ऽपि प्रकृतिकालएवेति कालैक्येनान्वारम्भणीयायाः प्रसङ्गेन सिद्धिरिति भावः। कृता यावज्जीवप्रयोगार्थं या कृता सैव पुनः तदर्थं सौर्याद्यर्थे ऽपि कृता न पुनरनुष्ठानम् ॥ १९ ॥

***सकृद्वा ऽऽरम्भसंयोगात् ॥ २० ॥**

पूर्वपक्षी प्रकारान्तरेणापि सकृदनुष्ठानं साधयति। सकृदिति। सकृदनुष्ठानमुक्तकर्मणः आरम्भसंयोगात्। आरप्स्यमान इति संयोगात्। दर्शपूर्णमासावारप्स्यमान एतामिष्टिं कुर्यादित्यत्रारप्स्यमान इत्यनेन पुरुषसंस्कारः प्रतीयते तया संस्कृतो ऽसावनुष्ठानमध्यपातिषु यावत्कर्मसु संस्कृत इति भावः ॥ २० ॥

स्याद्वा कालस्याशेषभूतत्वात् ॥ २१ ॥

द्वितीयपक्षस्य नवमे निरस्तत्वात् प्रथमपक्षं दूषयति। स्याद्वेति। अशेषभूतत्वाद् यावज्जीवकालस्यानङ्गत्वात्। कालविधिपक्षे काले लक्षणापत्तेः। निमित्तपरत्वादिति भावः। तथा च प्रतिपर्वं भिन्नप्रयोगत्वेन तन्त्रमध्यपाताभावान्न प्रसङ्ग इति स्थितम् ॥ २१ ॥

आरम्भविभागाच्च ॥ २२ ॥

प्रकारान्तरेणापि समाधानमाह। आरम्भेति। आरम्भविभागात्। दर्शपूर्णमासारम्भाङ्गमिति पूर्वं नवमे उक्तं दर्शपूर्णमासारम्भात्सौर्यारम्भस्य भिन्नत्वेन प्रधानभेदात्प्रतिप्रधानमङ्गावृत्तिरिति भावः ॥ २२ ॥

प्रधानानां धर्मविरोधे बहूनां धर्मानुष्ठानम्। अधि० ७।

विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्सधर्मत्वम् ॥ २३ ॥

पञ्चदशरात्रे सुत्याकालीनं सुब्रह्मण्याह्वानं चोदकशास्त्रेण प्राप्तं

* इदं, शाबरभाष्ये अत्रत्यपृथक्सूत्रत्वेन न दृश्यते किं तु "सकृद्वा ऽऽरम्भसंयोगादेकः पुनरारम्भो यावज्जीवप्रयोगात्" इतिनवमाध्यायप्रथमपादस्य पञ्चत्रिंशत्तमसूत्रघटकत्वेन।

तत्सकृदनुष्ठितं सर्वत्रोपकरोतीत्युक्तं प्राक्। द्वादशरात्रादिष्वेकैकस्यत्वात्म-सङ्गः कतमेनेति शङ्कानवकाशः। इह तु प्रथमाहः अग्निष्टुन्नामकः। तत्रा-ग्निष्टुन्नामकैकाहाद् नाम्ना प्रबलेनाग्नेयी सुब्रह्मण्या ऽतिदिष्टा इतरच-तुर्दशाहःसु सा ऽऽनुमानिकी ऐन्द्री सुब्रह्मण्या ऽतिदिष्टा। तथा सति प्रसङ्गेन सर्वोपकारसाधिका का वा सुब्रह्मण्या ग्राह्येति संशये वेदोपक्र-माधिकरणन्यायेनासंजातविरोधात् प्राथमिक्येवाग्नेयी सुब्रह्मण्या कार्या तयैव सर्वासां सुत्यानामुपकार इति पूर्वपक्षे सिद्धान्तमाह। विप्रतीति। विप्रतिषिद्धधर्माणामुक्तरीत्या विरुद्धधर्माणां मध्ये समवाये ऽन्यतरानुष्ठा-नप्रसक्तौ भूयसां सधर्मत्वं भूयःसु यो धर्मः स धर्मः। एकजातीयो यो धर्मः स स्यात्। अग्रिमसूत्रे लोकवदिति अत्राप्यपकृष्यते। यथा लोके दश दीपा एकत्र सन्ति एको दीपो ऽन्यत्र। गृहस्वामिना पुस्तकावलो-कनायान्यतरमध्ये यत्र रोचते तत्रोपविशेत्युक्ते प्रकाशबाहुल्याद् भूयोनु-ग्रहमेव करोति तद्वत्॥ २३॥

तुल्यसंख्याकानां धर्मविरोधे प्रथमस्यैव धर्मानुष्ठानम्। अधि॰ ८।

मुख्यं वा पूर्वचोदनाल्लोकवत्॥ २४॥

विप्रतिषिद्धधर्मौ यत्र तुल्यौ यथा ऽऽग्नावैष्णवमेकादशकपालं निर्वपेत्सरस्वत्याज्यभागेति। अत्राग्नावैष्णवे ऐन्द्राग्नतन्त्रं वृधन्वती-मन्त्रः। सरस्वत्या उपांशुयागतन्त्रं वार्त्रघ्नमन्त्रः। अत्र तुल्यत्वेनेच्छैवा-नुष्ठापिकेति पूर्वपक्षे सिद्धान्तमाह। मुख्यमिति। मुख्यं प्राथमिकं तन्त्रं पूर्वचोदनात्। आग्नावैष्णवस्य प्रथमं विधानात्। प्रथमविधिना प्रथमोप-स्थितप्रयोगानुष्ठाने तेनैव उत्तरस्य प्रसङ्गसिद्धिरिति भावः। अत्र मुख्य वेति वाकारस्वारस्याद् विप्रतिषिद्धेति सूत्रमस्यैवाधिकरणस्य पूर्वपक्ष-सूत्रम्। तथा च सूत्रद्वयं मिलित्वैकमधिकरणमिति केचित्। तद्दूषणं भाष्यवार्तिकादिषु स्पष्टम्। अधिकरणद्वयमेव युक्तम्॥ २४॥

अङ्गगुणविरोधे प्रधानगुणस्यैव बलवत्त्वम्। अधि॰ ६।

*अङ्गगुणविरोधे च तादर्थ्यात्॥ २५॥

* अतः पूर्वं, तथा चान्यार्थदर्शनम् इति सूत्रमधिकं भाष्ये दृश्यते।

य इष्ट्वा पशुना सोमेन वा यजेत सो ऽमावास्यायां पौर्णमास्यां वेत्यनेनेष्टित्वाद्दीक्षणीयायाः पर्वसंबन्धः । तथा सोमस्यापि पर्वसंबन्धः । तत्रैकादीक्षा तिस्र उपसद इति पक्षे द्वयोः पर्वसंबन्धो न संभवति । तदा कस्य बाध इति संशये पूर्वाधिकरणन्यायेन प्रथमोपस्थितत्वाद्दीक्षणीयागुण एवानुष्ठाह्य इति पूर्वपक्षे सिद्धान्तमाह । अङ्गेति । दीक्षणीयारूपाङ्गस्य प्रधानसोमयागगुणेन साकं विरोधे मुख्यत्वमपि त्यक्त्वा प्रधानगुण एव रक्षणीयः तादर्थ्यात् । अङ्गगुणस्यापि प्रधानसाद्गुण्यार्थत्वात् । अयं भावः । प्रधानसाद्गुण्याय ह्यङ्गानि । तानि स्वयं गुणानि सन्ति प्रधानाङ्गलोपं कर्तुं न समर्थाः । यथा भृत्यः स्वामी उभावप्यरण्ये गतौ चोरैः सर्वमपहृतमेकं वस्त्रं शिष्टं तत्परिधानं स्वामिनं कारयित्वा स्वयं कौपीनादिधारणं करोति तथा । लोकवदित्यत्राप्यनुवर्तते ॥ २५ ॥

परिधौ परिधियूपोभयधर्मानुष्ठानम् । अधि० १० ।

परिधिर्द्व्यर्थत्वादुभयधर्मा स्यात् ॥ २६ ॥

चातुर्मास्ये सपशुके परिधौ पशुं नियुञ्जीतेति श्रुतम् । अत्र यूपधर्माः परिधिधर्माश्च समुच्चिताः स्युः परिधियूपोभयकार्ययोरेकत्र विधानादित्यभिप्रायेणोत्तराधिकरणोत्थित्यर्थं सिद्धानुवादरूपं सिद्धान्तमाह । परिधिरिति ॥ २६ ॥

परिधौ विरोधियूपधर्माननुष्ठानम् । अधि० ११ ।

यौप्यस्तु विरोधे स्यान्मुख्यानन्तर्यात् ॥ २७ ॥

यत्र यूपपरिधिधर्मयोर्विरोधस्तत्र कस्य धर्मो ऽनुष्ठेय इति संशये पूर्वपक्षमाह । यौप्य इति । यौप्यः यूपधर्मः कर्तव्यः मुख्यानन्तर्यात् । यागनिर्वर्तकत्वात्पशुर्मुख्यः तस्यानन्तर्यं सामीप्यं यूपे ऽस्ति अतः । अपूर्वं प्रति साधनं यागः तत्साधनं पशुः तस्याङ्गं यूपः । अन्यत्र तु अपूर्वं प्रति साधनं यागः तत्साधनं पशुः तत्संस्कारसाधनमग्निः तत्संस्कारसाधनं परिधिरिति बहिरङ्गम् । अपूर्वस्य यूपापेक्षया परिधिर्विप्रकृष्ट इति भावः । अन्तरङ्गबहिरङ्गयोरन्तरङ्गं बलीय इति । ते च धर्मास्तक्षणाष्टाश्रीकर-

खनिखननादयः । तद्वत्काष्ठाग्नीकरणे परिधिधर्मेण सत्त्वत्वेन विरुध्येते एवमन्ये ऽप्यूह्याः ॥ २७ ॥

इतरो वा तस्य तत्र विधानात् ॥ २८ ॥

सिद्धान्तमाह । इतरो वेति । इतरः परिधिधर्मः कर्तव्यः तस्य पशुनियोजनस्य परिधौ विधानात् । परिधौ परिधित्वं संहत्य तस्मिन्पशुनियोजनं विध्यभिप्रेतम् । तच्च परिधित्वं सत्त्वत्वादिरूपमेव । तस्य तक्षणादिना नाशे परिधिभङ्ग एव स्यादिति भावः ॥ २८ ॥

उभयोश्चाङ्गसंयोगः ॥ २९ ॥

अन्तरङ्गेण दर्शितं प्राबल्यं परिहरति । उभयोरिति । उभयोः पक्षयोरङ्गेनैव संयोगो न प्रधानेन । कस्यापि प्रधानसंनिकृष्टत्वम् । अन्तरङ्गत्वं न श्रूयमाणविधिविरोधे प्रबलमिति भावः ॥ २९ ॥

सवनीयपशुपुरोडाशयोः पशोरेव तन्त्रित्वेन पाशुकतन्त्रस्यैवादानम् । अधि॰ १२ ।

पशुसवनीयेषु विकल्पः स्याद्वैकृतश्चेदुभयोरश्रुतिभूतत्वात् ॥ ३० ॥

प्रातःसवने आग्नेयं पशुमुपाकरोतीति सवनीयपशुः श्रुतः । तस्याङ्गकलापप्राप्तिश्चोदकादेव तथा ऽनुसवनं पुरोडाशान् निर्वपन्तीति विहितपुरोडाशयागस्याप्यङ्गकलापप्राप्तिश्चोदकादेव । तथा च द्वयोर्मध्ये तन्त्री कतम इति संशये यस्याङ्गकलापः प्रत्यक्षतया श्रूयते स तन्त्री तन्मध्ये श्रूयमाणस्य यागस्यानुष्ठानस्य पूर्वतन्त्राङ्गैः प्रसङ्गसिद्धिर्यथा पशुपुरोडाशे प्रयाजानाम् । इह त्वङ्गानामुभयत्र पाठाभावेन नियामकाभावादिच्छया एकतन्त्रं यस्य कस्य चिदनुष्ठानेनापरस्य प्रसङ्गसिद्धिरित्यभिप्रायेण पूर्वपक्षमाह । पश्विति । पशुसवनीयेषु पशुप्रयोगपुरोडाशप्रयोगयोर्विकल्पः । पञ्च प्रयाजा एकादश वा कार्या इति भावः । वैकृतश्चेच्च चोदकशास्त्रगृहीताङ्गकश्चेत् । अत्र चेदिति संशयद्योतको न । तयोर्वैकृतत्वेन निश्चयात् । किं तु शास्त्राणि चेत्प्रमाणानि यास्यन्त्येव परां गतिमिति शास्त्रेषु प्रामाण्यनिश्चये ऽपि प्रयोगात् । उभयोरश्रुतिभूतत्वात् । उभयाङ्गानामश्रवणात् ॥ ३० ॥

पाशुकं वा तस्य वैशेषिकाम्नानात्तदनर्थकं विकल्पे स्यात् ॥ ३१ ॥

सिद्धान्तमाह । पाशुकमिति । पाशुकमेव तन्त्रं कर्तव्यं न तु विकल्पः । तस्य पाशुकतन्त्रस्य वैशेषिकाम्नानात् । विशेषेण पाठात् । सूक्तवाके अग्नीषोमीयपशौ अग्निमद्येति प्रैषमन्त्रः आम्नातस्तस्य चोदकशास्त्रेण प्राप्तावपि प्रकृत्यपेक्षया मन्त्रः अयं सुतासुती यजमान इति विकृत्यविशेषरूपेण पठितो नित्यवच्छ्रुतश्च । विकल्पे तन्नित्यवच्छ्रवणमनर्थकं स्यात् । तस्मात्पशुरेव तन्त्री ॥ ३१ ॥

पशोश्च विप्रकर्षस्तन्त्रमध्ये विधानात् ॥ ३२ ॥

पशोरेव तन्त्रित्वे युक्त्यन्तरमाह । पशोरिति । विप्रकर्षः प्रयोगविप्रकर्षः । वपया प्रातःसवने पुरोडाशैर्माध्यन्दिने सवने अङ्गैस्तृतीयसवनइति श्रूयते । अतस्तत्तन्त्रमध्ये एव पुरोडाशयागस्तस्मादपि पाशुकमेव तन्त्रं नियतं चिरकालसाध्यप्रयोगमध्यपतितमल्पकालसाध्यमिति फलितम् ॥ ३२ ॥

समानतन्त्रयोः प्रकृतिविकृत्योः विकृतितन्त्रानुष्ठानम् । अधि० १३ ।

अपूर्वं च प्रकृतौ समानतन्त्रं चेदनित्यत्वादनर्थकं हि स्यात् ॥ ३३ ॥

नैमित्तिकीनां काम्यानामिष्टीनां प्रकृतेश्च संनिपाते कस्य तन्त्रमनुष्ठेयमिति संशये नित्यत्वात्प्राकृतमेव तन्त्रमिति पूर्वपक्षे सिद्धान्तमाह । अपूर्वमिति । अपूर्वं काम्यं नैमित्तिकं च समानतन्त्रं यदि नित्येन तन्त्रेण गतार्थं तर्हि काम्यतन्त्रस्याज्यं प्रोक्षणमाज्येन मार्जयन्त इत्यादीनामानर्थक्यमेव स्यात्तस्मात्तत्प्रसक्तौ तत्तन्त्रमेवानुष्ठेयं तदप्रसक्तौ नित्यतन्त्रम् ॥ ३३ ॥

आग्रयणे प्रसूनबर्हिषामेव ग्रहणम् । अधि० १४ ।

अधिकश्च गुणः साधारणे ऽविरोधात्कांस्यभोजिवदमुख्ये ऽपि ॥ ३४ ॥

आग्रयणे ऐन्द्राग्नं वैश्वदेवं द्यावापृथिव्यमिति क्रमेण हवींषि। तत्राद्ययोः पुष्पिता अपुष्पिता वा कुशा बर्हिः द्यावापृथिव्यं बर्हिः पुष्पितमेवेति नियमः। आग्रयणे ऽनियमो नियमो वेति संशये भूयोनुग्रहाय प्रथमोपस्थितत्वेन मुख्यत्वाच्चानियम एवेति पूर्वपक्षे सिद्धान्तमाह। अधिक इति। अमुख्ये ऽपि चरमोपस्थिते ऽपि अधिकः गुणः प्रसूनमेवेति नियमरूपः स साधारणे प्रसूनाप्रसूनसाधारणे ऐन्द्राग्नादौ कर्तव्यः अविरोधात्। ऐन्द्राग्नादावुभयथा ऽप्यङ्गलोपाभावेन विरोधाभावात्। कांस्यभोजिवत्। शिष्यस्य कांस्यपात्रभोजननियमः गुरूच्छिष्टपात्रभोजननियमश्च गुरोर्भोजनपात्रे ऽनियमः। तथा ऽपि अमुख्यशिष्यनियमानुरोधेन स्वस्य प्रत्यवायाभावात् कांस्यपात्रे भुङ्क्ते गुरुस्तथा ऽत्रापीति भावः॥ ३४॥

द्यावापृथिव्यादीनां सर्वेषामेव तन्त्रिता। अधि॰ १५।

तत्प्रवृत्त्या तु तन्त्रस्य नियमः स्याद्यथा पाशुकं सूक्तवाकेन॥ ३५॥

तत्रैवाग्रयणे ऐन्द्राग्नतन्त्रमुत द्यावापृथिव्यतन्त्रमिति संशये पूर्वपक्षमाह। तत्प्रवृत्तिरिति। तस्य प्रसूनबर्हिर्नियमस्य प्रवृत्त्या द्यावापृथिव्यतन्त्रस्य नियमः स्यात्। यथा ऽस्मिन्नेव पादे द्वादशाधिकरणे पाशुकसूक्तवाकमन्त्रप्रवृत्त्या पाशुकतन्त्रनियमस्तथा॥ ३५॥

न वा ऽविरोधात्॥ ३६॥

सिद्धान्तमाह। न वेति। दृष्टान्तवैषम्यमाह। अविरोधात्। अयं भावः। सूक्तवाके प्रैषमन्त्रः सवनीयस्य पशोः हविता देव्येति। सवनीयस्य पुरोडाशस्याग्निमग्नेति। उभे विरुद्धे अङ्गे। एकानुष्ठाने अपराङ्गस्य बाध एव द्वारलोपात्। इह तु ऐन्द्राग्नस्य प्रसूनबर्हिरङ्गं तथा द्यावापृथिव्यस्यापि इति अङ्गबाधभीत्यभाव इति॥ ३६॥

अशास्त्रलक्षणाच्च॥ ३७॥

अन्यदपि वैषम्यं दर्शयति। अशास्त्रेति। न विद्यते प्रत्यक्षशास्त्रं यस्य प्रसूनबर्हिषः स्वरूपस्य तदशास्त्रं तादृशलक्षणं स्वरूपं यस्य बर्हिषः

Digitized by Google

त्त्वाच्च । सूक्तवाकमन्त्रश्च सवनीयपशुसमीपे प्रत्यक्षपठितो वैकृतः प्रसूनबर्हिस्तु वैश्वदेवपर्वणि द्यावापृथिव्यैककपालादतिदेशप्राप्तः । स तद्बाधितुं नार्हतीति मुख्यत्वादैन्द्राग्नतन्त्रमेव तत्रेति ॥ ३१ ॥

इति जैमिनिसूत्रवृत्तौ द्वादशाध्यायस्य द्वितीयः पादः ॥ २ ॥

अष्टरात्रे वत्सत्वगहतवाससोः समुच्चयः । अधि० १ ।

विश्वजिति वत्सत्वग्नामधेयादितरथा तन्त्रभूयस्त्वादहतं स्यात् ॥ १ ॥

अस्मिन्पादे प्रसङ्गापवादश्चिन्त्यते । अस्त्यतिरात्रनामकः क्रतुः । तस्य प्रथममहर्विश्वजिन्नामकं षडहनामकानि षट् ततोऽभिजिन्नामकमेकम् । तत्र प्रथमेऽहनि एकाहरूपविश्वजिद्यागाद् नाम्ना परिधानसाधनं वत्सत्वगतिदिष्टं शेषेषु सप्तस्वहःसु ज्योतिष्टोमादहतं वासोऽतिदिष्टं चोदकेन । एवं सत्येकेनापरत्र प्रसङ्गसिद्धिर्भवति तत्र केन परिधानमिति संशये पूर्वपक्षमाह । विश्वेति । अष्टस्वप्यहःसु वत्सत्वङ्नामधेयाद् नाम्नाऽतिदेशात् । चोदकात्तस्य बलवत्त्वादितिभावः । इतरथा नामातिदेशाभावे अहतं स्यात् । भूयस्त्वादङ्गानाम् । एतेन भूयोनुग्रहाद्नामातिदेशस्य बलवत्त्वं सूचितम् ॥ १ ॥

अविरोधो वोपरिवासो वत्सत्वक् ॥ २ ॥

सिद्धान्तमाह । अविरोध इति । गुह्याच्छादनमहतं नाभेरूर्ध्वं प्रावरणार्थं वत्सत्वगिति विरोधाभावात्समुच्चय इति भावः ॥ २ ॥

अनुनिर्वाप्यपशुपुरोडाशानां पशुपुरोडाशस्यैव तन्त्रित्वम् । अधि० २ ।

अनुनिर्वाप्येषु भूयस्त्वेन तन्त्रनियमः स्यात् ॥ ३ ॥

अग्नौ श्रूयते, आग्नीषोमीयपशुपुरोडाशमनु अष्टौ देवसुवां हवींषि निर्वपतीति । तत्रानुशब्दस्वारस्यादष्टहविषां पशुपुरोडाशतन्त्रमध्यपातित्वं स्पष्टम् । तत्तन्त्रमध्यवृत्तित्वेऽपि भूयोनुग्रहायाष्टहविषां तन्त्रस्यानुष्ठानेन पशुपुरोडाशाङ्गानां प्रसङ्ग इत्यभिप्रायेण पूर्वपक्षमाह । अन्विति । स्पष्टम् ॥ ३ ॥

आगन्तुकत्वाद्वा स्वधर्मा स्या च्छ्रुतिविशेषादितरस्य च मुख्यत्वात् ॥ ४ ॥

सिद्धान्तमाह । आगन्तुकेति । अष्टानां हविषामागन्तुकत्वाद-मुख्यत्वात् । पशुपुरोडाशः स्वधर्मा स्यात् । पशुपुरोडाशे मुख्यत्वमुपपाद-यति । श्रुतिविशेषात् । अनुशब्दस्वारस्यात् । चैत्रमनुगतो मैत्र इत्यत्र चैत्रे मुख्यत्ववत् । इतरस्य पशुपुरोडाशस्य ॥ ४ ॥

स्वस्थानत्वाच्च ॥ ५ ॥

स्वेति । पशुपुरोडाशस्थानं वपाहोमानन्तरकालरूपो देशः तस्माच्च प्राबल्यम् ॥ ५ ॥

स्विष्टकृच्छ्रवणान्नेति चेत् ॥ ६ ॥

पूर्वपक्ष्याशङ्कते । स्विष्टकृदिति । अग्नीषोमीयस्य चैकादशकपा-लस्य देवसुवां च हविषामग्नये स्विष्टकृते समवद्यतीति वचनेन स्विष्ट-कृच्छ्रूयते । इदमनुनिर्वाप्यतन्त्रपक्षे घटते न पशुतन्त्रपक्षे ॥ ६ ॥

विकारः पवमानवत् ॥ ७ ॥

स्विष्टकृच्छ्रवणस्य गतिमाह । विकार इति । यथा ऽग्नये पव-मानो गुणः एवमग्निसोमादिदेवसूदेवतानां स्विष्टकृदिति गुणविधिरिति भावः ॥ ७ ॥

अविकारो वा प्रकृतिवच्चोदनां प्रति भावाच्च ॥ ८ ॥

विकारपक्षे वाक्यभेदभिया प्रकारान्तरमनुसरति । अविकार इति । अविकारः अस्विष्टकृच्छब्दकं कर्तव्यं प्रकृतिवत् । यथा प्रकृताव-भ्यादिशब्दास्तथा स्विष्टकृच्छब्दस्य का गतिरत आह । चोदनां प्रति भावाच्च । चोदनां प्रति विधिं प्रति भावात् सिद्धशब्देनानुवादात् । विध्युद्देश्यसमर्पणादिति फलितम् । यथा शरमयं बर्हिरित्यत्र बर्हिष्कार्य-मनूद्य तदुद्देशेन शरविधिस्तथा स्विष्टकृत्कार्यमुक्तहविष्कदेवताभिः साध-येदिति वाक्यगतिरिति भावः ॥ ८ ॥

Digitized by Google

दृष्टद्वारभेदाद् भिन्नोपकारकाणां गुणानां समुच्चयः । अधि॰ ३ ।

एककर्मणि शिष्टत्वाद्गुणानां सर्वकर्म स्यात् ॥ ९ ॥

यत्रैककर्मोद्देशेनानेके गुणा विधीयन्ते यथा ऋजुमाघारयति सन्ततमाघारयतीति, तत्र समुच्चय इति सिद्धान्तमाह । एकेति । एककर्मणि आघाररूपैककर्मणि शिष्टत्वाद्विधानाद् गुणानां सर्वकर्म सकलानुष्ठानम् ॥ ९ ॥

प्रयोजनैक्ये गुणानां विकल्पः । अधि॰ ४ ।

एकार्थास्तु विकल्पेरन् समुच्चये ह्यावृत्तिः स्यात् ॥ १० ॥

एककार्योद्देशेनैव यत्र साधनद्वयं विधीयते तत्र विकल्प इति सिद्धान्तमाह । एकार्था इति । एकार्था एककार्यजनका एतेषां विकल्पः । समुच्चये दोषमाह । समुच्चये अनेकद्रव्यप्रयुक्ता प्रधानावृत्तिः स्यात् ॥ १० ॥

अभ्यस्येतार्थवत्त्वादिति चेत् ॥ ११ ॥

पूर्वपक्षी आवृत्तौ इष्टापत्तिमाह । अभ्यस्येतेति । अर्थवत्त्वादपूर्वात्मकार्यवत्त्वात् ॥ ११ ॥

नाश्रुतित्वात् ॥ १२ ॥

दूषयति । नेति । अश्रुतित्वात् । न विद्यते श्रुतिर्यद्विषयिणी तत्त्वात् । अपूर्वसाधनत्वं विना शास्त्रं न सिध्यतीति भावः ॥ १२ ॥

सति चाभ्यासशास्त्रत्वात् ॥ १३ ॥

अभ्यासशास्त्रं यत्रास्ति तत्र युक्तो ऽभ्यास इत्याह । सतीति । अभ्यासशास्त्रे सति यथा उभे बृहद्रथंतरे भवत इति तस्याभ्यासशास्त्रत्वादभ्यस्येत् ॥ १३ ॥

विकल्पवच्च दर्शयति ॥ १४ ॥

श्रु विद्विकल्पो ऽपि स्पष्ट इत्याह । विकल्पेति । विकल्पयुक्तं प्रयोगं दर्शयति श्रुतिः बैल्वो वा खादिरो वा पालाशो वेति ॥ १४ ॥

कालान्तरे ऽर्थवत्त्वं स्यात् ॥ १५ ॥

विकल्पे ऽपि एकेन चारितार्थ्ये ऽपरवैयर्थ्यमत आह । कालेति । कालान्तरे प्रयोगान्तरे ऽप्यर्थवत्त्वं चारितार्थ्यम् ॥ १५ ॥

वैगुण्यसमाधानार्थानां प्रायश्चित्तानां विकल्पः । अधि॰ ५ ।

प्रायश्चित्तेषु चैकार्थ्यान्निष्पन्नेनाभिसंयोगस्तस्मा-त्सर्वस्य निर्घातः ॥ १६ ॥

यत्र पुरुषापराधेन क्रतुवैगुण्यं तत्परिहाराय प्रायश्चित्तं विधीयते । एकापराधनिमित्तमेव प्रायश्चित्तद्वयम् । तथा दर्शपौर्णमासलोपे ऽग्नये पथिकृते ऽष्टाकपालः वैश्वानरो द्वादशकपालस्तयोः समुच्चय इति पूर्वपक्षे सिद्धान्तमाह । प्रायश्चित्तेष्विति । निष्पन्नेनोत्पन्ननिमित्तेन दर्शादिलोपरूपेणाभिसंबन्धः उक्तप्रायश्चित्तेषु कृतः शास्त्रेणात एकदोषपरिहारजनकत्वरूपसंबन्धः शास्त्रेण बोधित इति भावः । तस्य सर्वस्य वैगुण्येषु निर्घातो नाश एकस्मादेव भवति तस्मादैकार्थ्यान्न समुच्चयः । क्रतुवैगुण्यस्यापि शास्त्रैकगम्यत्वेन तन्निर्घातस्यापि शास्त्रैकगम्यत्वादिति भावः ॥ १६ ॥

नैमित्तिकप्रायश्चित्तानां समुच्चयः । अधि॰ ६ ।

समुच्चयस्त्वदोषो ऽर्थेषु ॥ १७ ॥

यत्र यादृशनिमित्ते क्रतुवैगुण्यं पुरुषस्य प्रत्यवायो वा न श्रूयते किं तु कर्मकर्तव्यतामात्रं श्रूयते तादृशकर्मणां प्रयाजादिवदङ्गत्वमात्रावगमात्समुच्चय इति पूर्वाधिकरणापवादमात्रम् । अस्योदाहरणं शास्त्रदीपिकायां भिन्ने जुहोति स्कन्ने जुहोतीति । भाष्ये तु यस्याहुते ऽग्निहोत्रमहुतं सूर्यो ऽभ्युदेति अनुद्धृते ऽभ्युदियादिति उभयत्रापि भेदनस्कन्दनादिरूपनिमित्तभेदाद् द्वयोः समुच्चयस्य सिद्धत्वेनानेन सूत्रेणानुवादमात्रं कृतमिति बोध्यम् ॥ १७ ॥

कर्मकाले ऽनध्याये ऽपि मन्त्राणां प्रयोगः । अधि॰ ७ ।

मन्त्राणां कर्मसंयोगात्स्वधर्मेण प्रयोगः स्याद्धर्मस्य तन्निमित्तत्वात् ॥ १८ ॥

कर्माङ्गत्वेन विधीयमाना मन्त्रा अनध्याये पठनीया न वेति संशये पूर्वपक्षमाह । मन्त्राणामिति । कर्मसंयोगात्कर्मार्था ये मन्त्रास्तेषां मन्त्राणामपि स्वधर्मेणानध्यायभिन्नकालपठितत्वरूपेण धर्मेणैव प्रयोगः स्यात् । धर्मस्य स्वाध्याये पठितत्वरूपधर्मस्य तन्निमित्तत्वात् । पठननिमित्तत्वात् । पठननिमित्तत्वाद् यदा पठनं तदा स्वाध्याय इति नियम आवश्यक इति भावः ॥ १८ ॥

विद्यां प्रति विधानाद्वा सर्वकालं प्रयोगः स्यात्कर्मार्थत्वात्प्रयोगस्य ॥ १९ ॥

सिद्धान्तमाह । विद्यामिति । सर्वकालमनध्याये स्वाध्याये च । अनध्याये पाठनिषेधवाक्यं विद्यां प्रति विद्यार्थमपूर्वग्रहणार्थं तत्परं यतः । अपूर्वग्रहणाङ्गं स काल इति भावः । प्रयोगस्य प्रयोगसमये पाठस्य कर्मार्थत्वान्नात्र नियमः ॥ १९ ॥

कर्मणि प्रवचनस्वरेणैव मन्त्रोच्चारणम् । अधि० ८ ।

भाषास्वरोपदेशेषु ऐरवत्प्रवचनप्रतिषेधः स्यात् ॥ २० ॥

यो मन्त्रः अपूर्वग्रहणकाले एकेन स्वरेण युक्तः तस्य मन्त्रस्य विनियोगकाले ब्राह्मणवाक्ये ऽन्यः स्वरः श्रूयते । तत्र प्रयोगे केन स्वरेण पाठ इति संशये पूर्वपक्षमाह । भाषेति । ऐरवत् । यथोत्पत्तिसमये स्थितस्य गिरापदस्य ब्राह्मणवाक्यनिर्दिष्टेरापदेन बाधः तथा ऽत्रापि भाषास्वरोपदेशेषु उत्पत्तिसमये मन्त्राणां यः स्वरोपदेशस्तद्विषये इति निवृत्त्यन्वयि । अत्र सूत्रपाठपुस्तके भाष्यपुस्तके च स्वरोपदेशादिति पञ्चम्यन्तं दृश्यते तदा ऽपि पञ्चमी सप्तम्यर्थिका । मन्त्रोपदेशेष्विति भाष्ये विवरणात् । दृश्यते च शास्त्रदीपिकासोमनाथीयपुस्तकेषु सप्तम्यन्त एव पाठः । प्रवचनेन ब्राह्मणस्वरेण प्रतिषेधः निवृत्तिः स्यात् । ब्राह्मणस्वरेण मन्त्रोत्पत्तिकालिकस्वरबाध इति भावः ॥ २० ॥

मन्त्रोपदेशो वा न भाषिकस्य प्रायापत्तेर्भाषिकश्रुतिः ॥ २१ ॥

Digitized by Google

सिद्धान्तमाह । मन्त्रेति । भाषिके उत्पत्तिकाले श्रुतिर्यस्येति व्युत्पत्त्या उत्पत्तिकालिकस्वर एव कर्मकाले न ब्राह्मणस्वरः । प्रायापत्तेरुत्पत्तिकालिकस्वरबाधापत्तेः । ननु अयमर्थः कथं लब्धः तत्पदादिति चेच्छृणु । प्रपूर्वकायधातोः प्रकृष्टमयनमुत्पत्तिर्यस्येति व्युत्पत्त्या सम्यगुत्पन्नः भाषिकः स्वरः तस्य पुनः स्वबाधे लक्षणात् । तथा च लक्षितलक्षणायां तात्पर्यं बोध्यम् । ननु ब्राह्मणवचनेन गिरापदस्येव भाषिकस्वरबाधे न किं चिद्बाधकमत आह । मन्त्रोपदेशः ब्राह्मणवाक्येन मन्त्रेण वाङ्गत्वोपदेशः क्रियते न भाषिकस्य । स्वरोपदेशे ऽपि वाक्यभेदापत्तेरिति भावः ॥ २१ ॥

विकारः कारणाग्रहे ॥ २२ ॥

इरापदेन गिरापदबाधवैषम्यमाह । विकारेति । गिरापदस्थाने इरापदविकारः । अविकारे कारणाग्रहात् । उक्तरीत्या वाक्यभेदादिरूपं यदविकारकारणं तदभावात् । प्रकृते विकारकल्पने यथा वाक्यभेदस्तथा तत्र नेति भावः ॥ २२ ॥

भाषिकेणोपदिष्टानां भाषिकस्वरेणैवोच्चारणम् । अधि· ६ ।

तत्र्यायत्वाददृष्टे ऽप्येवम् ॥ २३ ॥

यत्र मन्त्रकाण्डे न पठितो मन्त्रः केवलब्राह्मणएव पठितः तत्र कथं पाठ इति संशये पूर्वपक्षमाह । तत्र्यायत्वात् । पूर्वन्यायेन । अदृष्टो ऽपि मन्त्रकाण्डे ऽदृष्टो ऽपि । एवं यज्ञकर्मण्यजपन्यूङ्खसामस्वितिव्याकरणशास्त्रप्राप्तस्वरेण पाठो न्याय्यः । न ब्राह्मणस्वरेण । पूर्ववन्मन्त्रमात्रविधायकत्वेन स्वरविधायकत्वाभावादिति भावः ॥ २३ ॥

तदुत्पत्तेर्वा प्रवचनलक्षणत्वात् ॥ २४ ॥

सिद्धान्तमाह । तदुत्पत्तेरिति । तस्मिन्ब्राह्मणे उत्पत्तिस्तस्मात् । तत्रैवोत्पन्नत्वेन यथा पाठः स एव स्वर इति भावः । ननु ब्राह्मणपठितस्य ब्राह्मणत्वमेव न मन्त्रत्वमित्याशङ्कायामाह । प्रवचनलक्षणत्वात् । प्रवचनस्य मन्त्रस्य लक्षणं द्वितीयोक्तं यस्य तस्मान्मन्त्रत्वमव्याहतमिति ॥ २४ ॥

पदार्थकरणमन्त्राणां पाठानन्तरमेव पदार्थानुष्ठानम् । अधि० १० ।

मन्त्राणां करणार्थत्वान्मन्त्रान्तेन कर्मादिसंनिपातः स्यात्सर्वस्य वचनार्थत्वात् ॥ २५ ॥

मन्त्राणां कर्मस्मारकत्वस्य प्रथमे क्लृप्तत्वेन यत्रेमामगृभ्णन्निति क्रियास्मारकं लिङ्गं तत्र तावतैव स्मृतत्वेन शेषपाठो व्यर्थ इति पूर्वपक्षे सिद्धान्तमाह । मन्त्राणामिति । करणार्थत्वात् । स्वार्थे ल्युट् । क्रियार्थत्वात् स्मृतिद्वारा मन्त्रान्तेन कर्मादिसंनिपातः संबन्धः कार्यः सर्वस्य वचनार्थत्वात् । लिङ्गकल्पितविध्यभिप्रेतत्वात् । अयं भावः । मन्त्राणां लिङ्गकल्पितविधिवाक्येन हि विनियोगः । अनेन मन्त्रेणेदं कर्म कर्तव्यमिति । तस्य यथा वैयर्थ्यभिया मन्त्रेणैव स्मर्तव्य इति विधितात्पर्यं कल्प्यते तथा निखिलमन्त्रेणापि स्मर्तव्यमिति कल्प्यते । अन्यथा शेषमन्त्रपाठवैयर्थ्यादिति ॥ २५ ॥

वसोर्धारायां पूर्ववन्मन्त्रान्ते कर्मसंनिपातः । अधि० ११ ।

संततवचनाद्धारायामादिसंयोगः ॥ २६ ॥

अग्नौ श्रूयते, संततां वसोर्धारां जुहोतीति । अत्रादिसंयोगोऽन्त्यसंयोगो वा कर्मण इति शङ्कायां पूर्वपक्षमाह । संततेति । संपूर्वकतनुधातोरेकीभूय विस्तारः द्वयोरत्यन्तसंयोगेन विस्तारः संयोगो द्वयोर्भविष्यति प्रकृते उभे मन्त्रक्रिये । अतो धारायां मन्त्राणामादिना क्रियासंयोगः ॥ २६ ॥

कर्मसंतानो वा नानाकर्मत्वादितरस्याशक्यत्वात् ॥ २७ ॥

सिद्धान्तमाह । कर्मेति । संतानः अत्यन्तसंयोगः न क्रियामन्त्रयोः किं तु क्रियाणामेव संतानः । ननु क्रिया त्वेका एकस्य संतानः कथमत आह । नानाकर्मत्वात् । द्वादश द्वादश जुहोतीति संख्यया अनेककर्मत्वात् । किं चेतरस्य क्रियामन्त्रयोः संतानकरणस्याशक्यत्वाच्च । क्रिया आशुतरविनाशिनी मन्त्रस्तु चिरस्थायी तुल्यकालयोरेव संतानसंभवादिति भावः ॥ २७ ॥

Digitized by Google

आघारेऽपि पूर्ववन्मन्त्रान्ते कर्मसंनिपातः । अधि॰ १२ ।

आघारे चेद्दीर्घधारत्वात् ॥ २८ ॥

दर्शपूर्णमासयोः संततमाघारयतीति श्रुतम् । तत्र कर्मणा एकत्वेन संयोगार्थमन्यत्र मन्त्रस्यैव ग्रहणमिति मन्त्रादिसंयोगः क्रियाया इति पूर्वपक्षे सिद्धान्तमाह । आघारइति । संततवचनस्य दीर्घधारापरत्वात् । तत्रापि मन्त्रान्तएवेति सिद्धम् ॥ २८ ॥

पूषा वाम् इत्याद्येककार्यार्थमन्त्राणां विकल्पः । अधि॰ १३ ।

मन्त्राणां संनिपातित्वादेकार्थानां विकल्पः स्यात् ॥ २९ ॥

यत्रैकजातीयक्रियास्मारकमन्त्राणामनेकेषां श्रवणं तत्र तस्यां क्रियायां मन्त्राणां विकल्प इति सिद्धान्तमाह । मन्त्राणामिति । संनिपातित्वात् स्मरणद्वारा संनिपत्योपकारकत्वात् तस्य स्मरणस्यैकेनैव संभवाद् एकार्थानां विकल्पः स्यात् ॥ २९ ॥

चतुर्भिरभिमादत्ते इत्यादौ मन्त्राणां समुच्चयः । अधि॰ १४ ।

संख्याविहितेषु समुच्चयोऽसंनिपातित्वात् ॥ ३० ॥

यत्रैकमेव मन्त्रचतुष्टयं मन्त्रकाण्डे ब्राह्मणवाक्ये तु चतुर्भिरभिमादत्तइति संख्यायुक्तं तत्र समुच्चय इति सिद्धान्तमाह । संख्येति । असंनिपातित्वात्कर्मणि स्मरणद्वारा हेतुत्वादाद्यानां त्रयाणां चरममन्त्रेणैव स्मरणसिद्धेर्विधिबलेनादृष्टार्थत्वादिति भावः ॥ ३० ॥

ब्राह्मणविहितानामुरु प्रथस्वेत्यादिमन्त्राणां विकल्पः । अधि॰ १५ ।

ब्राह्मणविहितेषु च संख्यावत्सर्वेषामुपदिष्टत्वात् ॥ ३१ ॥

उरु प्रथस्वेति पुरोडाशं प्रथयति उरु प्रथाह ते यज्ञपतिः प्रथतामिति पुरोडाशं प्रथयतीति ब्राह्मणवाक्येन पुरोडाशप्रथने मन्त्रद्वयं विहितमनयोः समुच्चयो विकल्पो वेति संशये पूर्वपक्षमाह । ब्राह्मणेति । संख्यावत् । पूर्वाधिकरणविषयसंख्यावत्सर्वेषां मन्त्रद्वयस्यापि ब्राह्मणवाक्येनोपदिष्टत्वाद्विहितत्वात् समुच्चय एव युक्तः ॥ ३१ ॥

याज्यावषट्कारयोश्च समुच्चयदर्शनम् ॥ ३२ ॥

दृष्टान्तान्तरमाह । याज्येति । याज्याया जुहोति वषट्कारेण जुहोतीतिवाक्यद्वयविहितयोरपि समुच्चयदर्शनं तद्वत् ॥ ३२ ॥

Digitized by Google

विकल्पो वा समुच्चयस्याश्रुतित्वात् ॥ ३३ ॥

सिद्धान्तमाह । विकल्प इति । अश्रुतित्वात् अश्रवणात् ॥ ३३ ॥

गुणार्थत्वादुपदेशस्य ॥ ३४ ॥

ननु तर्हि लिङ्गेनैव विनियोगसिद्धौ पुनर्विधानं व्यर्थं सत्समुच्चयं विधत्त इति विकल्पो नेत्यत आह । गुणेति । गुणार्थत्वात् स्तुतिरूपगुणार्थत्वात् । अर्थवादरूपं वाक्यद्वयमिति भावः । तदुक्तं, गुणार्थेन पुनः श्रुतिः, परिसंख्या, ऽर्थवादो वेति ॥ ३४ ॥

वषट्कारे नानार्थत्वात्समुच्चयः ॥ ३५ ॥

याज्यावषट्कारदृष्टान्ते वैषम्यं दर्शयति । वषडिति । नानार्थत्वात् । याज्यातो भिन्नकार्यत्वात् । याज्यया देवतास्मरणं वषट्कारेण प्रदानमिति ॥ ३५ ॥

हौत्राणां मन्त्राणां समुच्चयः । अधि॰ १६ ।

हौत्रास्तु विकल्पेरन्ननेकार्थत्वात् ॥ ३६ ॥

यत्र हौत्रे यूपायोच्छ्रीयमाणायानुब्रूहीति प्रैषानन्तरं होत्रा उच्छ्रयणलिङ्गकमन्त्रः पठनीयः । उच्छ्रयणलिङ्गक उच्छ्रयस्व वनस्पतइत्येकः । समिद्धस्येति द्वितीयः । ऊर्ध्वम् ऊषुण इति तृतीयः । ऊर्ध्वो न इति चतुर्थः । अमीषां विकल्पः समुच्चयो वेति संशये पूर्वपक्षमाह । हौत्रा इति । स्पष्टम् ॥ ३६ ॥

क्रियमाणानुवादित्वात् समुच्चयो वा हौत्राणाम् ॥ ३७ ॥

सिद्धान्तमाह । क्रियमाणेति । निर्वापादिमन्त्रवत् कर्तुः स्मारका नैते मन्त्राः किं तु अध्वर्युणा क्रियमाणमनुवदति होता अतो हौत्रे समुच्चय एव ॥ ३७ ॥

समुच्चयं च दर्शयति ॥ ३८ ॥

It may be argued that although no injunction in regard to *examination* can be held to exist, yet there may exist a Niyama restricting hearing to the Vedāntas which are the object-matter of examination; for, as a matter of fact, the study of books in the vulgar tongue has to be excluded. This argument is rejected, because the restriction of *hearing* to the Vedāntas is fully established by its proximity in this context[1] and, therefore, cannot be the object-matter of an injunction. And because owing to the mere power of the Niyama.—'He should study the Veda.'—which has its purpose in urging (the pupil) to a study of the meaning of the Veda, there would follow a knowledge of the meaning of the Veda, brought about by means of the Veda which was learnt through recitation, and terminating in a certain result, but *not* brought about *by any other means*; and since the meaning of Veda was thus attained, it would follow that the study of works in the vulgar tongue, does not obtain as a means in regard to Brahman, which is what the Veda makes known and what has to be known for the sake of final release.

Nor can it be admitted that in the Topic III. 4. 47. an injunction is held to exist in regard to hearing, silent meditation and profound meditation, which are denoted, in that context, by the terms *child-like* state, *learning,* and *condition of a sage,* respectively. For common experience suffices to prove that certitude as to the true purport of any matter is due to examination thereof, and that the perfected knowledge of a thing is due to silent meditation, which is the pondering of the arguments that

1 विचारविषयमन्वेषमाणस्य वेदान्तानां बुद्धिस्थत्वाद्वेदान्ता एव मया विचारणीया इतिबुद्धिरुत्पद्यते । Ṭī.

prove the existence of that thing, and to profound meditation, which consists in constant repetition of the knowledge thus gained. Hence no injunction in regard to these processes is necessary. And, further, (it is unnecessary) because the designation of these processes as *the objects of injunctions* is merely intended to assign special prominence to such activities by extolling them, as if the whole passage were of the kind technically termed Arthavāda i. e. laudatory of these quasi-injunctions.

This, then, is the conclusion of the matter:—there being no special injunction to *hearing*, a study of the Brahmakāṇḍa, i. e. Vedānta, is based on the general injunction to study Veda, on which injunction is also based the Karmakāṇḍa, i. e. Ritual Portion of the Veda.

Definition of Brahman.

In the Upaniṣad passage, which begins with the words—'That from which these beings are born &c.' a definition of Brahman as the matter of examination is given, to the effect that Brahman is the cause of the production and the subsistence and the destruction of the world. Here it may be argued that causality in regard to each of these would serve, singly, as a definition; for to nothing but Brahman does each of these forms of causality apply. Yes, replies the writer of the Kaumudī, this causality in regard to the world (इदं), has three definitions, each independent of the other; and for this reason in sūtra I. 2. 9. and elsewhere (I. 2. 18. and I. 4. 16), the fact of being the destroyer and the sustainer and the producer is declared, each singly, as a mark of Brahman.

Other writers hold that, inasmuch as both producing-function and sustaining-function belong alike to an efficient cause (निमित्तं), the destruction of the world *in*

Brahman was taught in Veda, in order to make it known that Brahman is the material cause (उपादानं) of the world. But here it might be argued that if Brahman is the material cause of the world, there must also be an efficient cause other than Brahman to produce and sustain the world; just as a potter is needed to produce the pot, and a ruler is needed for the stability of the kingdom. It is to meet such an objection, say these writers, that Brahman itself is declared in Veda to be the producer and sustainer of the world. Thus these writers hold that what we have here is but *one* definition which marks out Brahman the One without a second as that in regard to which efficient and material causality are not distinct (i.e. as being in itself both material and efficient cause).

Page 10.

Brahman as cause of All.

Brahman is Intelligence, the One without a second, unchanging (कूटस्थं). The causality belonging to Brahman as the material cause of the world is, therefore, not like the causality (declared in the Nyāya system as) belonging to ultimate atoms which form a new whole (i. e. one that now *begins* to exist, but did not previously exist) by conglomeration of parts (आरम्भकत्वं): nor is it like the causality of Prakṛti, (as held in the Sāṁkhya system) consisting in Prakṛti giving rise to a product by a modification of its own substance (परिणामित्वं). But it consists in Brahman undergoing merely *apparent change* (विवर्तमानत्वं) through Nescience into the various forms of the phenomenal world, viz., the subtile element, ether, and so on.

A material product (परिणामः) and a merely apparent product (विवर्तः) are discriminated in the following definitions. A material product is a changed condition

of its material cause and possesses the same kind of existence as its material cause (वस्तु). A merely apparent product is one that possesses an existence different in kind from that of its material cause.[1] Other definitions are these :—A material product is a changed condition possessing the same nature as its material cause. A merely apparent product is one that possesses a nature different from that of its material cause.[2] Or, again, a material product is one that is identical with its cause ; a merely apparent product is one which, though not indeed identical with its material cause, does not admit of being explained as something different from its cause.[3]

---

1. This pair of definitions is given in accordance with the सत्तात्रयवाद or view that there are three kinds of *existence*, viz. (*a*) पारमार्थिकी. the absolutely real existence of Brahman alone, (*b*) व्यावहारिकी, the relative or practical existence of the common world of sense and activity, (*c*) प्रातिभासिकी, the merely apparent existence of a thing presented by Nescience, e. g. of a snake thus presented in the place of, and imagined to be, a rope. Applying these definitions, the pot of clay is a material product of the clay its material cause and has 'the same kind of existence,' i. e. it exists only so long as the clay exists : the snake of the above example is a merely apparent product ; it does not continue to exist as long as the rope exists ; on the contrary, it ceases to exist as soon as the existence of the rope has been recognised.

2. The distinction as to 'kinds of existence' is merely a concession to the unphilosophic consciousness. The young Vedāntin has next to learn that the distinction between *practical* and *merely apparent* existence is untenable ; in other words, that all the world is a mere appearance of Brahman. This is the stand-point of the second pair of definitions.

3. Finally, he has to realize the most rigorous form of Vedānta doctrine, that termed मायावाद or अनिर्वचनीयतावाद according to which the very notion of cause, with duality as its implicate, is *inexplicable* and therefore *unreal*, मिथ्या. This is the position of the third pair of definitions.

Digitized by Google

But now arises the question as to the material cause of the world: Is the material cause absolute Brahman, or Brahman in the form of the Lord Īçvara, or Brahman in the form of the personal consciousness (जीवः)

The Absolute is the material cause of All.

Some of those who follow the Saṁkṣepaçārīraka hold that it is only the absolute Brahman (शुद्धं) that is the material cause of the world; for both in sūtra I. 1. 2 and in the Bhāṣya thereon, material causality is declared to be a characteristic of the Highest Brahman (ज्ञेयं ब्रह्म which is the supreme object of inquiry in the Upaniṣads, as distinguished from the कार्यं ब्रह्म or Brahman thought of under relations.) Accordingly, in such Veda-sentences as—'From the Self originated ether &c.' dealing with the cause of the universe, the words Self and so on, which denote the related Brahman (शबलं) attach by implication to the absolute Brahman.

The Lord Īçvara is the material cause.

On the other hand, the followers of the Vivaraṇa hold that the material cause is Brahman in the form only of the Lord Īçvara, i. e. as related to Māyā and possessing omniscience and other attributes; for this conclusion follows from the Veda-text—'From him who knows all, who perceives all, whose penance consists of knowledge, from him is born that Brahman, name, form and food' Hence also (continue these writers), in the Bhāṣya to I. 1. 20. and I. 2. 1, the fact of his being the Self of all things as following from the fact of his being the material cause of all, is mentioned as a characteristic of the Lord Īçvara and as one not possessed by the personal consciousness—which fact is declared in the texts—'He is Ṛk, he is Sāman, he is Uktha, Yajus, he is Brahman,' and—'From whom all

Page 11.

THE

TĀRKIKARAKṢĀ

AND

SĀRASAṀGRAHA

OF

VARADARĀJA

WITH THE GLOSSES

NIṢKAṆṬAKĀ

OF

MALLINĀTHA KOLĀCALA

AND

LAGHUDĪPIKĀ

OF

JÑĀNAPŪRṆA.

२ क—No. 11, Vol. XXI.—November, 1899. १९०६

Digitized by Google

E90

Digitized by Google

PREFATORY NOTICE.

Varadarāja's Tārkikarakṣā and commentary entitled Sārasaṁgraha were briefly noticed by Dr. R. G. Bhandarkar in the Report for 1883-84, p. 81. Further information is now appended. Varadarāja is silent in regard to himself. But he must have lived after Vācaspatimiçra and Udayanācārya to whom he constantly refers as authorities, and before Mādhavācārya by whom the Tārkikarakṣā is mentioned in the Sarvadarçanasaṁgraha. The two earlier Schoolmen were literary contemporaries. Vācaspatimiçra wrote his Nyāyasūcī in the year 976 A. D. (vide Bibliotheca Indica ed. Pandit Vindhyeçvarīprasāda Dvivedin, Librarian, Sanskrit College, Benares). Udayanācārya wrote his Lakṣaṇāvalī in 984-5 A. D. (vide Benares Sanskrit Series ed. P. Vindhyeçvarīprasāda Dvivedin). But Udayanācārya was probably much the younger man, as his Pariçuddhi is a commentary on Vācaspati's Tātparyaṭīkā. He may be supposed to have lived as late as 1050 A. D. This date would furnish the *terminus a quo* for the time of Varadarāja. The *terminus ad quem* would be about 1300 A. D., that is to say, fifty years roughly before the time of Mādhavācārya.

Possibly Varadarāja may have to be placed not later than the first half of the XII Century. This conjecture is based on the existence of a commentary on the Tārkikarakṣā entitled Laghudīpikā composed by Jñānapūrṇa. The Laghudipikā is not mentioned in the Catalogus Catalogorum ; nor has a notice of it been met with elsewhere. A copy of the work (on paper), transcribed in Samvat 1459, exists in the possession of P. Vindhyeçvarīprasāda (vide Appendix A.) Jñānapūrṇa mentions as his guru Viṣṇusvāmin, the son of Yajñeçvarahari, but gives no certain indication of his date. If Jñānapūrna be identified, conjecturally, with Jñānadeva who was the immediate successor of Viṣṇusvāmin the accepted founder of the Vallabhācārīs (vide Wilson's Religious Sects of the Hindus pp. 34 and 120), a nearer approach may be made to the date of Varadarāja. Viṣṇuswāmin is represented in the Bhaviṣyapurāṇa as preceding Nimbāditya and Madhvācārya (vide Appendix B.).

६१५

Digitized by Google

Madhvācārya is known to have lived during the first half of the XII Century. Viṣṇusvāmin may have preceded him by a few years only; for the word *prathamataḥ* of the Bhaviṣyapurāṇa does not necessarily imply any considerable interval of time. And Varadarāja may thus have been one of Viṣṇusvāmin's contemporaries.

We may be pretty sure that Viṣṇusvāmin did not live after 1300 A. D., as he is mentioned in the Sarvadarçanasaṁgraha; which fact in itself is an indirect confirmation of the account given of the Vaiṣṇava Schools in the Bhaviṣyapurāṇa So little seems to be known for certain about these earlier writers that the present conjectures may be just worth recording.

The Tārkikarakṣā, as its name implies, is a controversial treatise in defence of the Nyāya and Vaiçeṣika Systems. Aproppriating largely the labours of Vācaspatimiçra and Udayana, it attempts, in a concise and fairly easy manner, to make good the ground which these systems had lost in the Schools. It is divided into three chapters whose order of discussion adheres mainly to that of the original Nyāyasūtras. As might be expected, it discusses at some length such topics as the nature of true knowledge, and of the means whereby such knowledge may be attained and of the things that can be truly known and, as subservient to these, the nature of reasoning and logical fallacies and the rhetorical methods of debate. A fuller treatment of the work is reserved for the Introduction to the present edition.

The MS. materials employed are as follows:—

(1). MS. of Kārikā only, designated A.

(2). „ and Sārasaṁgraha designated B.

This MS. is dated Sam. 57, which must be read 1457; because this MS. and No. 7 below were evidently written by the same hand, the form and size of the letters and of the paper corresponding exactly.

(3). MS. of Kārikā and Sārasaṁgraha designated C.

This MS. was transcribed by Mādhavabhaṭṭa, son of Kṛṣṇabhaṭṭa in Sam 1661.

Digitized by Google

(4). Do. do. designated D.

Comprises 1st Pariccheda only: undated but old.

(5). Mallinātha's Niṣkaṇṭaka designated E.

Comprises 1st Pariccheda only.

(6). " " " F. "
Pariccheda only.

(7). Jñānapūrṇa's Laghudīpikā " G.

As the remaining chapters of the Niṣkaṇṭaka are not available, their place will be taken by those of the Laghudīpikā, and the first chapter of the latter work will be printed separately at the end of this edition.

A. V.

Appendix A.

लघुदीपिकाया आरम्भः ।

॥ ॐ नमो गणेशाय ॥

वन्दे मानससंफुल्लसरोजाननहंसगां ।
सरस्वतीं चतुर्वक्त्रां चन्द्ररेखावतंसकां ॥
न्यायरत्नाकरोत्था या विद्याश्रीरखिलार्थदा ।
तस्यास्तार्किकरक्षायाः करोमि पदचिन्तनं ॥
पुरा वरदराजेन न्यायशास्त्रार्थसंग्रहः ।
कृतः परस्वतो बुद्ध्वा पद्यानां दुर्ग्रहार्थतां ॥
तेनैव रचिता व्याख्या सा च शास्त्रपदं गता ।
ततस्तदर्थसिद्ध्यर्थं करोमि लघुदीपिकां ॥

Digitized by Google

पुस्तकस्य १५ पत्रे ।

एवं तार्किकरक्षायां ज्ञानपूर्णमुखोद्गता ।
प्रमेयस्य पदार्थस्य संपूर्णा लघुदीपिका ॥

ग्रन्थसमाप्तौ ।

सर्वैश्वर्यनिजावासं सर्वविद्यानिषेवितं ।
श्रीयज्ञेश्वरहरेः सूनुं श्रीविष्णुस्वामिगुरुं नुमः ॥

वरदराजीयटीका समाप्ता ॥ मंगलमस्तु ॥ संवत् १४५९ वर्षे वैशाष (ख) शु २ व्यासगोवर्द्धन एतेषाम् ।

व्यासकाह्न एतेषां ।

Appendix B.

भविष्यपुराणे भक्तिमाहात्म्ये २१ अध्याये ।

अतः परं त्वनुक्तानां पुराणे चरितं ब्रुवे ।
आसन् सिद्धान्तकर्तारश्चत्वारो वैष्णवा द्विजाः ॥
यैरयं पृथिवीमध्ये भक्तिमार्गो दृढीकृतः ।
विष्णुस्वामी प्रथमतो निम्बादित्यो द्वितीयकः ॥
मध्वाचार्यस्तृतीयस्तु तुर्यो रामानुजः स्मृतः ॥

Digitized by Google

ॐ नमः परमात्मने ।

तार्किकरक्षा ।

श्रीवरदराजकृता ।

तत्कृतन्यायसारसंग्रहाभिधव्याख्यासहिता ।

कोलाचलश्रीमल्लिनाथसूरिविरचित-
निष्कण्टकाव्याख्यानुगता ।

ॐ श्रीकृष्णाय नमः ।

नमामि परमात्मानं स्वतः सर्वार्थवेदिनम् ।
विद्यानामादिकर्तारं निमित्तं जगतामपि ॥

श्रीगणेशाय नमः ।

परस्परोपासकभावभाजौ कौचिद्दयालू कलये पुमांसौ ।
ययोरभूदेकतरः कलत्री भूकन्यया भूधरकन्ययाऽन्यः ॥ १ ॥

वाणीं काणभुजीमजीगणदवासासीच्च वैयासिकी-
मन्तस्तन्त्रमरंस्त पन्नगगवीगुम्फेषु चाजागरीत् ।
वाचामाकलयद्रहस्यमखिलं यश्चाक्षपादस्फुरां
लोकेऽभूद्यदुपज्ञमेव विदुषां सौजन्यजन्यं यशः ॥ २ ॥

श्रीमल्लिनाथकविरेष करोति टीकाम्
वाणीगणेशचरणाम्बुरुहावलम्बी ।
निःशेषकण्टकनिराकरणेन नाम्ना
निष्कण्टकां वरदराजनिबन्धनस्य ॥ ३ ॥

Digitized by Google

प्रारिप्सितस्य ग्रन्थस्य(१) प्रेक्षावदुपादित्साप्रयोजिकामभिमतफलसाधनतामभिधाय श्रोतृबुद्धिमनुकूलयन् वर्त्तिष्यमाणमेवाग्रे दर्शयति ।

इह खलु तत्रभवान् बालानुकम्पी वरदराजः सकलन्यायशास्त्ररहस्योपदिदिक्षया(२) स्वविरचिततार्किकरक्षाश्लोकव्याख्यानाय सारसंग्रहं नाम प्रकरणमारभमाणस्तदविघ्नपरिसमाप्तिसम्प्रदायाविच्छेदलक्षणफलकाम्यया विशिष्टामिष्टां च देवतामभिवादयते । नमामीति(३) । परमात्मानमिति परमः सर्वोत्कृष्टो जीवात्मभ्यो विशिष्टः तमात्मानमीश्वरमित्यर्थः । सन्महत्परमेत्यादिना समासः । परमत्वे हेतुमाह सर्वार्थवेदिनमिति । योगिसाधारण्यं परिहरति स्वत इति । नित्यसर्वज्ञतया स्वाभाविकमस्य सार्वज्ञ्यं न तु योगप्रसादासादितमिति भावः(४) तत्सद्भावे प्रमाणद्वयं सूचयति । विद्यानामिति । चतुर्दशविद्यानामपीति भावः । आदिकर्त्तारं सर्गादौ प्रणेतारं तथा जगतां जनिमतां निमित्तमादिकर्त्तारम् ईशानः सर्वविद्यानां तस्मात्तपस्तेपनाच्चत्वारो वेदा अजायन्त यतो वा इमानि भूतानि जायन्त इत्यादिश्रुतेरिति भावः । एतेन वैदिकः सन्दर्भः केनचित् प्रणीतः सन्दर्भत्वाद्रामायणवत् । तथाङ्कुरादिकं सर्वं सकर्तृकं कार्यत्वात् घटवदिति चानुमानद्वयादीश्वरसिद्धिरिति सिद्धम् । अत्रैव केवलव्यतिरेकिद्वयं चानुमाने स्वयं वक्ष्यति ।

(१) प्रारिप्सितग्रन्थस्य—पा॰ B पु॰ ।
(२) संक्षिप्य-इत्यधिकम् E पु॰ ।
(३) नमामि परमात्मानमिति—पा॰ E पु॰ ।
(४) नित्यसर्वज्ञतया स्वाभाविकी सर्वार्थवेदिता न तु योगप्रसादासादिततया सर्वार्थवेदित्वमिति भावः—पा॰ E पु॰ ।

Digitized by Google

(१)निःश्रेयसफलं प्राहुर्येषां तत्त्वावधारणम् ।
प्रमाणादिपदार्थास्ते लक्ष्यन्ते नातिविस्तरम् ॥१॥

येषां प्रमाणादिनिग्रहस्थानान्तानां षोडशपदार्थानां तत्त्वतोऽवधारणमात्यन्तिकदुःखविच्छेदलक्षण-

---

एतेन देवताया वैदिकत्वाद्विद्याकर्तृत्वाच्च वैशिष्ट्यमिष्टत्वं चोक्तमिति द्रष्टव्यम् । ननु यदभिधित्सितं तदभिधीयतां फले व्यक्तिर्भविष्यतीति न्यायात् किं मृषाग्रे(२) वक्ष्यमाणार्थप्रतिज्ञाडम्बरविलम्बैरित्याद्यश्लोकाक्षेपमाशङ्क्य समाधत्ते । प्रारिप्सितस्येति । प्रेक्षावतां धीमतामुपादित्सा स्वचिकीर्षा तत्र प्रयोजिकां हेतुभूतामित्यर्थः । प्रेक्षावत्प्रवृत्तेः प्रयोजनज्ञानाधीनत्वात् तज्ज्ञापनायाग्रे प्रतिज्ञा कार्येति भावः । यथाहुः कारिकायामाचार्याः ।

सर्वस्यापि हि शास्त्रस्य कर्मणो वाऽपिकस्य चित् ।
यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यत ॥ इति

ततस्तदर्थपरामर्शितामाह । येषां पदार्थानामिति । किं षण्णां नेत्याह । षोडशेति । दिक्संख्ये सञ्ज्ञायामिति समासः सप्तर्षिवत् अन्यथा बहुत्वाद्यसिद्धेः । यद्वा पूरणप्रत्ययान्तोऽयं षोडशशब्दः तेषां च प्रत्येकमेव षोडशसंख्यापूरकत्वात् सर्वे षोडशाः ते च ते पदार्थाश्चेति विग्रहः । ते च सूत्रोद्दिष्टा एवेति स्मारयति । प्रमाणादीति । तत्त्वा-

---

(१) अत्र प्रथमं "नमामि परमात्मान"मिति पद्यं A पुस्तके वर्तते तच्च टीकास्थं लेखकप्रमादाच्च सन्निविष्टम् यतो मल्लिनाथेन निष्कण्टकायां "तार्किकरक्षाश्लोकव्याख्यानाय सारसंग्रहं नाम प्रकरणमारभमाण" इत्याद्युक्त्वा "इष्टां देवतामभिवादयते । नमामि परमात्मानमिति" उक्तम् ।

(२) किं मुधाग्रे—पा· E पु· ।

निःश्रेयसफलत्वेनाक्षचरण(१)पक्षिलमुनिप्रभृतयो वर्ण-यन्ति । यथा प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसि-द्धान्तावयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छ-लजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगम इति(२) । तदिदानीं पदार्था लक्ष्यन्ते समानासमान-जातीयव्यवच्छेदकधर्मवत्तया प्रदर्श्यन्त इत्यर्थः । ननु

वधारणं याथात्म्येन निर्णयः । निश्चितं श्रेयो निःश्रेयसं मोक्षः । अचतुरादिना निपातनात् साधुः । तत्स्वरूपे वादि-विप्रतिपत्तेर्विवक्षितं लक्षणमाह । आत्यन्तिकेति । एत-च्चोपरि विवेचयिष्यते । प्राहुरित्यस्य प्रशब्दस्य सामर्थ्या-त्प्रतिपादनमर्थो नोक्तिमात्रमित्याह । वर्णयन्तीति । तस्य कर्त्राकाङ्क्षां पूरयति । अक्षचरणेति । अक्षचरणपक्षिलौ सूत्रभाष्यकारौ प्रभृतिशब्दाद्वार्त्तिककारादिसंग्रहः । तत्र सूत्रं संवादयति । यथा प्रमाणेत्यादि । प्रमाणं विना प्रमे-याद्यसिद्धेः । विषयं विना प्रमाणाप्रवृत्तेः । असन्दिग्ध-स्याप्रतिपित्सितत्वात् । सन्दिग्धस्यापि निःप्रयोजनस्याप्र-तिपित्सितत्वात् । प्रतिपत्तेश्च दृष्टान्तमुखत्वात् । अवय-वादिनियमस्य सिद्धान्तानुसारित्वात् । प्रमाकरणशरी-रनिर्वर्तकाङ्गत्वात् । प्रमाणानुग्राहकत्वात् । तत्फलत्वात् । तस्यापि कथासाध्यत्वे वादस्य तत्त्वनिर्णयफलत्वात् । जल्पस्योभयपक्षसाधनवत्त्वसाम्यात् । वितण्डायाः कथा-पारिशेष्यात् । निग्रहहेतुषु सर्वथा हेयत्वात् । दोषेष लघु-त्वात् फलत्वाच्चेति प्रमाणादिपदार्थोद्देशक्रमः । यत्तदोः

---

(१) अक्षपाद–पा· C पु ।

(२) न्यायस्यादिमं सूत्र–मित्यधिकं C पु· ।

चिरन्तननिबन्धनानि तत्र तत्र विद्यन्ते तान्येव शि-
ष्येभ्यो व्याक्रियन्तां किमनेनापूर्वनिर्माण(१)क्लेशेनेत्यत
उक्तम् । नातिविस्तरमिति । अतिविततगहनगम्भीरै-
स्तैरलसप्रायाः शिष्या न व्युत्पादयितुं शक्यन्त इत्यर्थ-
वानेवायमारम्भः । शब्दमात्रस्यैवेह(२) प्रपञ्चो निषि-
ध्यते नार्थस्येति विस्तरशब्दं प्रयुञ्जानस्याशयः(३) ॥ १ ॥

सामानाधिकरण्येनोत्तरार्द्धं योजयति । तदिदानीमिति ।
लक्ष्यन्ते इति लक्षेर्दर्शनार्थत्वात् तस्य चोपलब्धिपर्यायस्यो-
द्देशादित्रये ऽपि सम्भवात् त्रयस्यापि कर्त्तव्यत्वाच्चार्थस-
न्देहे लक्षणपरत्वेन व्याचष्टे । लक्ष्यन्ते समानेति । अत्रो-
द्देशस्य सौत्रस्यैव स्थितत्वात् परीक्षायास्तु लक्षणशेष-
त्वादाहत्य तस्यैव तत्त्वावधारणहेतुत्वात् प्राधान्येन लक्ष-
णतः प्रदर्शनं लक्षेरर्थ इति भावः । नातिविस्तरमिति
न वक्तव्यं विस्तरेऽपि सप्रयोजने प्रवृत्तिसिद्धेरित्याश-
ङ्क्यान्यथासिद्धिमूलानारम्भशङ्कोत्तरत्वेनावतारयति ।
ननु चिरन्तनेति । निबन्धनानि सूत्रभाष्यवार्त्तिकप्रभृती-
नीत्यर्थः । एतावता कथमारम्भसिद्धिरत आह । अति
वितत्तेति । विततं विस्तृतं टीकादि । गहनमकृत्स्नार्थतया
साकाङ्क्षप्रकरणान्तरं गम्भीरं गुर्वर्थं सूत्रभाष्यादि । अति-
शब्दः प्रत्येकं सम्बन्धनीयः । नन्वस्यापि सङ्क्षेपादकृ-
त्स्नार्थतादोषः इत्यत आह । शब्दमात्रस्यैवेति । प्रथने वा-
यशब्द इति तन्मात्रे विस्तरशब्दानुशासनादिति भावः ।

(१) ग्रन्थसन्दर्भनिर्माण—पा॰ C पु॰ ।
(२) मात्रस्यैवात्र—पा॰ B पु॰ ।
(३) भावः—पा॰ B पु॰ ।

Digitized by Google

प्रमाणाधीनसिद्धित्वात् इतरपदार्थानां प्राधान्येन[1] प्रथमोद्दिष्टं प्रमाणं लक्षयति तावत्[2] ॥

तत्र प्रमाणं प्रमया व्याप्तं प्रमितिसाधनम् ।
प्रमाश्रयो वा तद्व्याप्तो यथार्थानुभवः प्रमा ॥ २ ॥

(प्रमया वक्ष्यमाणलक्षणया अयोगव्यवच्छेदेन सम्बन्धः प्रामाण्यम् । यथाहुः नैयायिकाः । प्रमायोगव्यवच्छेदसम्बन्धः प्रामाण्यम् । तद्वत्प्रमाणम् । प्रमाणसम्बन्धश्चाश्रयत्वेन करणत्वेन च विवक्षितः । तेन न केवलं साधनमेव प्रमाणम् अपि त्वाश्रयोऽपी-

अतिशब्दाच्छब्दविस्तरस्यापि स्तोकशोङ्गीकारान्नास्त्यवैशद्यदोषोऽपीत्यभिसन्धिरनुसन्धेयः । एतेन पदार्थतत्त्वं विषयः । तत्त्वज्ञानं प्रयोजनम् । [3]साध्यसाधनभावः सम्बन्धः । मुमुक्षुरधिकारीत्यनुबन्धचतुष्टयसम्भवादिह प्रेक्षावतां प्रवृत्तिलाभ इति सिद्धम् ॥ १ ॥

अथोत्तरश्लोके प्रथमतः प्रमाणलक्षणे हेतुमाह । प्रथमोद्दिष्टमिति । सूत्र इति शेषः । सौत्रे प्रथमोद्देशे हेतुमाह । प्रमाणाधीनेति । तत्र तेषां पदार्थानां मध्ये इत्यर्थः । इह श्लोके वाशब्दात् प्रमाव्याप्तपदावृत्त्या च साधनमाश्रयो वान्यतरत्प्रमाव्याप्तं प्रमाणमिति व्रीहियववद्वैकल्पिको विकल्पः प्रतीयते । तदसत् । उभयप्रामाण्यवादिनामन्यतराव्याप्तेरपसिद्धान्ताच्चेत्याशङ्क्य साधनमाश्रयश्चेति द्वयमपि प्रमाव्याप्तं प्रमाणं वाशब्दश्चार्थः ।

(१) प्रधानत्वेन–पा· B पु· ।
(२) तावदिति–C पु· नास्ति ।
(३) एतेन–इत्यधिकं F पु· ।

त्येतावत्प्रदर्शनायोक्तम् । अयोगव्यवच्छेदेनेति । साधनत्वेन प्रमासम्बन्धेनाभिनिवेष्टव्यम् । असम्बन्धनिवृत्तिमात्रेण प्रामाण्यमित्येतावदुक्तं भवति ।)(१)

साधनाश्रययोरन्यतरत्वे सति प्रमाव्याप्तं प्रमाणम् । ततश्चेश्वरस्यापि प्रमाश्रयतया प्रामाण्यसिद्धेर्नाव्याप्तिरिति भावः । न च प्रमाश्रयैरनीश्वरात्मभिः प्रमाकरणैश्च यादृच्छिकसंवादिलिङ्गविभ्रमादिभिरतिव्याप्तिः । तेषां प्रमासम्बन्धे नियमाभावात् । न तर्हीन्द्रियलिङ्गशब्दाः प्रमाणं भवेयुः तेषामपि नियमाभावादिति चेत् । माभूवन् । न हि वयं तेषां प्रामा-

प्रमाव्याप्तपदावृत्तिश्च प्रत्येकं विशेषणार्थेति मत्वा व्याचष्टे । साधनाश्रययोरिति । साधनाश्रययोरन्यतरत्वं नाम तदुभयव्यतिरिक्तत्वानधिकरणत्वम् । एवं चानुगतार्थलाभान्नान्यतरशब्दार्थखण्डनावकाशः । अत्राश्रयपदोपादानस्य फलमाह । ततश्चेति । साधनपदस्य तु स्फुटमेव करणव्याप्तिः फलमिति भावः । शेषमतिव्याप्तिनिरासार्थमित्याह । न चेति । लिङ्गविभ्रमो वाष्पादिः । आदिशब्दाद्भ्रान्तादिवाक्यानां गवयादौ महिषादिसादृश्यस्य च संग्रहः । कुतो नातिव्याप्तिरित्याशङ्क्य प्रमाव्याप्त्यभावादित्याह । तेषामिति । हन्तैकं सन्धित्सतोऽपरं प्रच्यवते यतोऽतिव्याप्तिं प्रतिक्षिपन्तमव्याप्तिरास्कन्दतीति शङ्कते । न तर्हीति । अव्याप्तौ हेतुमाह । तेषामपीति । तेषामौदासीन्यस्यापि सम्भवादिति भावः । इष्टापत्त्या परिहरति । माभू-

(१) ( ) एतन्मध्यस्थः B पु॰ नास्ति ।

Digitized by Google

ण्यमभ्युपगच्छामः । इन्द्रियार्थसन्निकर्षविशेषस्य लिङ्ग-परामर्शादेश्च प्रामाण्याभ्युपगमात् । ते च प्रमां न व्यभिचरन्तीति नाव्याप्तिः । एवं प्रमासम्बन्धे ऽपि प्रमेयस्य व्यभिचाराह्न प्रामाण्यप्रसङ्गः । किमर्थं तर्हि साधनमाश्रयो वेति विशेषणम् व्याप्त्युपादानादेव प्रमेयादिव्यावृत्तिसिद्धेरिति चेत् सत्यम् । तयोरेव प्रमाव्याप्तिः सम्भवतीत्येतावता तदुपादानम् न तु लक्षणशरीरानुप्रवेशेन सुखादिप्रमेयव्यावर्त्तनेन वा तदनुप्रवेश इति(१) न वैयर्थ्यम् ।

यथार्थानुभवः प्रमा । यथार्थानुभव इति प्रमा-

वन्निति । किं तर्हि प्रमाणमत आह । इन्द्रियार्थेति । सन्निकर्षविशेषस्यालोकादिसहकारिसाकल्यमेव विशेषः । लिङ्गपरामर्शस्तृतीयः प्रत्ययः आदिशब्दाच्च गृहीतसङ्गतिकशब्दविशेषसादृश्यविशेषयोः संग्रहः । न चैवमव्याप्तेरवकाश इत्याह । ते चेति । नापि प्रमेये ऽतिव्याप्तिः व्याप्त्यभावादेवेत्याह । एवमिति । तर्हि व्यावृत्त्यभावात् साधनाश्रयग्रहणं व्यर्थमिति शङ्कते । किमर्थमिति । प्रौढवादेनाङ्गीकृत्योत्तरमाह । सत्यमिति । प्रमाव्याप्तमित्येतावदेव लक्षणं शेषं तूदाहरणार्थमिति भावः । अथवा वास्तवपरिहारमाह । सुखादीति । सुखदुःखयोरनुभूतैकसत्त्वेन प्रमाव्याप्तत्वमिति भावः । किं चेश्वरप्रमया नित्यसर्वार्थगोचरया प्रमेयमात्रस्यापि प्रमाव्याप्तेस्तन्निरासेनार्थवत्त्वं द्रष्टव्यम् ।

ननु प्रमाणलक्षणप्रस्तावे प्रमालक्षणमसङ्गतमित्या-

---

(१) तदुपादानं स्यादिति पा॰ C पु॰ ।

Digitized by Google

लक्षणम् । तत्र यथार्थेत्ययथार्थविषयाः पीतशङ्खादिविभ्रमा व्युदस्यन्ते तत एव तर्कसंशययोरपि व्यवच्छेदसिद्धिः । तर्कस्याहार्यलिङ्गजनितत्वेनारोपितविषयत्वस्याग्रे समर्थयिष्यमाणत्वात् । विरुद्धानियतकोटिद्वयावलम्बिनश्च संशयस्य तादृशविषयासम्भवेनायथार्थत्वात् । अनुभव इति स्मृतेर्निरासः । किमिदमनु-

---

शङ्क्य प्रकृतोपयोगान्न दोष इत्यभिप्रेत्याह । यथार्थानुभव इति । तत्राद्यविशेषणस्य व्यावर्त्यमाह । यथार्थेति । अयथार्थविषयत्वं तु तेषां बाधदर्शनादिति भावः । तस्यैव व्यावर्त्यान्तरमाह । तत एवेति । अयथार्थविषयत्वादेवेत्यर्थः । ननु तर्कस्य व्याप्तलिङ्गसमुत्थस्य प्रमाणाङ्गभावेन प्रमितिजनकस्य कथमयाथार्थ्यमित्याशङ्क्य बाधादित्याह । तर्कस्येति । व्याप्तलिङ्गस्याप्यारोपितत्वाद्दोषमूलारोपवद्बुद्धिमूलारोपेऽपि विषयापहारस्य तुल्यत्वादयाथार्थ्यं तथात्वेऽप्यनिष्टप्रसञ्जनद्वारा साध्याभावशङ्कोच्छेदकत्वात् प्रमाणाङ्गत्वं चेति भावः । तर्हि संशयो नायथार्थः तद्विषयस्य विभ्रमवन्नेदमिति बाधादर्शनादित्याशङ्क्याह । विरुद्धेति । यस्य ज्ञानस्य यावद्विषयः तस्य तथैव सत्त्वे तद्यथार्थं नान्यथेति स्थितिः । संशयस्य हि विरुद्धानियतकोटिद्वयात्मा विषयः । तस्य च तादृशस्यानन्तरमेव नियतैककोटिग्राहिणा तदुपमर्दकज्ञानेन बाधादसम्भवादयथार्थमित्यर्थः । तदुक्तं शालिकायां पूर्वपक्षे ।

स्थाणुर्वा पुरुषो वेति सन्देहो योऽपि जायते ।
अभावात् तादृशार्थस्य स यथार्थः कथं भवेत् ॥ इति ।

अथानुभवपदव्यावर्त्यमाह । अनुभव इति । तद्धेस्याः

भवत्वं नाम । प्रत्युत्पन्नासाधारणकारणप्रसूतप्रत्ययत्वं वा(१) तदविदूरप्राक्कालोत्पत्तिनियतासाधारणकारण-प्रसूतप्रत्ययत्वं वा । स्मृतेस्त्वसाधारणकारणं संस्कारः । तस्य तदुत्पादने तात्कालिकत्वनियमाभावान्न

स्मृतेर्भेदकं वाच्यम् । अन्यथा तद्व्यावर्तकत्वासम्भवादिति पृच्छति । किमिदमनुभवत्वं नामेति । कारणवैलक्षण्यं तावद्भेदकमाह । प्रत्युत्पन्नेति । प्रत्युत्पन्नं प्रत्यग्रजातम् । ननु स्मृतावपि समानमेतत् तत्कारणसंस्कारस्यापि स्वोत्पत्तिकाले प्रत्यग्रत्वादित्याशङ्क्य एतदेव निर्ब्रूते । तदविदूरेति । तस्य कार्यभूतस्य योऽविदूरः प्राक्कालसन्निहितपूर्वक्षणः तत्रोत्पत्त्या नियतव्याप्तं तत्कालैकजन्यमित्यर्थः । स्मृत्यसमवायिकारणात्ममनःसंयोगनिरासार्थमसाधारणेत्युक्तम् । घटादिव्यभिचारवारणार्थं प्रत्ययपदं स्वोत्पत्तिसन्निहितपूर्वक्षणजन्यासाधारणकारणोत्थज्ञानत्वमनुभवत्वमित्यर्थः । स्मृतेरेतद्व्यतिरेकमभिव्यक्तुं तत्कारणं चाह । स्मृतेस्त्विति । संस्कारमात्रजन्यं ज्ञानं स्मृतिरित्यर्थः । मात्रपदेन प्रत्यभिज्ञादिव्युदासः । तत्र सन्निकर्षप्राधान्यात् । यथाहुः । अथ ग्रहणस्मरणयोः कियती सामग्री । अधिकार्थसन्निकर्षो ग्रहणस्य संस्कारमात्रसनिकर्षः स्मरणस्येति । ननु प्रत्युत्पन्नसंस्कारोत्थस्मृतावतिव्याप्तिरित्याशङ्क्य तन्निरासार्थमेव नियतपदमित्याह । तस्येति । एतेनानुभवत्वं नामौपाधिकं सामान्यमित्युक्तम् । सम्प्रति मुख्यमेवास्तु ज्ञानत्वव्याप्यमित्याह । ज्ञानत्वेति । प्रमाऽप्रमावृत्तिज्ञानत्वसाक्षाद्व्याप्यसामान्यमनुभवत्वं पूर्वोक्तस्यैव व्यवस्था-

(१) प्रत्युत्पन्नेत्यादि नास्ति B पु॰ ।

तत्र प्रसक्तिः । ज्ञानत्वावान्तरजातिभेदो वा अनुभवत्वम् । स्मृतिव्यतिरिक्तज्ञानत्वं वेति ॥ २ ॥

साधनमाश्रयो वेत्युक्तमेवार्थं विषयविशेषव्यवस्थया प्रपञ्चयति ॥

नित्यानित्यतया द्वेधा प्रमा नित्यप्रमाश्रयः ।
प्रमाणमितरस्यास्तु करणस्य प्रमाणता ॥ ३ ॥

एवं च नित्यप्रमाश्रयत्वादीश्वरस्यापि प्रतितन्त्रसिद्धान्तसिद्धं प्रामाण्यमपि लक्षितं भवति । तदुक्तम् । आप्तप्रामाण्यादिति । तन्मे प्रमाणं शिव

पकमिति भावः । प्रमेतिस्मृतित्वसंशयत्वादिव्युदासः । अप्रमेति प्रमात्वादिनिरासः(१) । शेषं सत्तागुणत्वज्ञानत्वनिरासाय । साक्षात्पदेन परोक्षत्वादिव्यावृत्तिः । अथ रूढिर्वा गुरुमतवदित्याह । स्मृतिव्यतिरिक्तज्ञानत्वं वेति । न च स्मृतिरप्यनुभवव्यतिरिक्तेत्यन्योन्याश्रयता । स्मृतेः पूर्वज्ञानजसंस्कारमात्रजन्यत्वेन लक्षणे तदनपेक्षणादिति ॥ २ ॥

उत्तरश्लोकं पूर्वापौनरुक्त्येनावतारयति । साधनमाश्रयो वेति ।

नित्यप्रमाया आश्रय एव प्रमाणं तस्याः करणासम्भवात् । अनित्यायास्तु करणमेव प्रमाणम् । सम्भवेऽप्याश्रयस्य प्रमाव्याप्त्यभावादिति भावः । नित्यप्रमाश्रयप्रामाण्यकथनफलमाह । एवं चेति । तदलक्षणे सिद्धान्तविरोधं सूचयति । प्रतितन्त्रसिद्धान्तसिद्धमिति । स्वतन्त्रमात्रसिद्धमित्यर्थः । तत्र सूत्रसंवादमाह । तदुक्तमिति । मन्त्रायुर्वेद-

(१) व्युदासः—पा॰ E पु॰ ।

इति च । अत्र प्रमासाधकतमं प्रमाणमित्यादीनि न्यायविदां लक्षणवचनानि लौकिकप्रमाणमात्रपराणि । अत एव हि प्रमातुरेवेश्वरस्य प्रमाविनाभावेन प्रामाण्यमुपपादयन्त आहुः ।

मितिः सम्यक्परिच्छित्तिस्तद्वत्ता च प्रमातृता ।

प्रामाण्यवत्तत्प्रामाण्यमाप्तप्रामाण्यादिति सूत्रे वेदप्रामाण्यं प्रतीश्वरप्रामाण्यस्याप्तप्रामाण्यादिति हेतुत्वेन सिद्धवदुपादानात् सिद्धमीश्वरप्रामाण्यमित्यर्थः । उदयनसंवादं चाह । तन्मे प्रमाणमिति । परोक्तलक्षणानां गतिमाहात्रेति । अकरणत्वेऽप्याश्रयत्वादेव प्रामाण्यमीश्वरस्य प्रमाव्याप्तेरित्यौदयनाचार्यवचनं संवादित्वेनावतारयति । अत एवेति । करणप्रामाण्यनियमाभावादेवेत्यर्थः । प्रमाश्रयत्वेनैवास्य प्रामाण्यं न तु लौकिकवत् करणत्वेनेत्याह । प्रमातुरेवेति । अकरणत्वे कथं प्रामाण्यमत आह । प्रमाविनाभावेनेति । अत्र संवादः । तदयोगव्यवच्छेदः प्रामाण्यमिति । तस्याः प्रमाया अयोगोऽसम्बन्धः तद्व्यवच्छेदः प्रमाव्याप्तिरिति यावत् । तदेव प्रामाण्यं तच्चेश्वरस्यापि सम्भवत्येवेति भावः ॥

नन्वीश्वरस्य कुतः प्रमाव्याप्तिः तज्ज्ञानस्याकार्यस्याफलत्वेनाप्रमात्वादित्याशङ्क्य प्रमाणलक्षणमाह । मितिः सम्यक्परिच्छित्तिरिति । अकार्यत्वेऽपि सम्यगनुभूतित्वादीश्वरज्ञानं प्रमेति भावः । तथापि नेश्वरः प्रमाता नित्यप्रमां प्रति चाकर्तृत्वादित्याशङ्क्य प्रमातृलक्षणमाह । तद्वत्ता चेति । प्रमासमवायित्वं प्रमातृत्वं न तु कर्तृत्वमितीश्वरोऽपि प्रमातेति भावः । तर्हि नेश्वरः प्रमाणम् प्रमातृत्वकरणत्वयोर्विरोधादित्याशङ्क्य प्रमाव्याप्तं प्रमाणमिति

Digitized by Google

तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥ इति[1] ॥ ३ ॥

अथ स्फुटतरानल्पदोषतया तेषां स्वरूपव्याक्रियैव निराक्रियेति मन्वानः प्रावादुकानां प्रमाणलक्षणा[2]न्युपन्यस्यति ।

अविसंवादिविज्ञानं प्रमाणमिति सौगताः ।
अनुभूतिः प्रमाणं सा स्मृतेरन्येति केचन ॥ ४ ॥
अज्ञातचरतत्त्वार्थनिश्चायकमथापरे[3] ।
प्रमेयव्याप्यमपरे प्रमाणमिति मन्वते ॥ ५ ॥
प्रमानियतसामग्रीं प्रमाणं केचिदूचिरे ॥

नो मतं न तु तत्करणमिति अतो न विरोध इत्याह । तदयोगेति । प्रमाश्रयत्वात् प्रमातृत्वं प्रमाव्याप्तत्वात् प्रमाणत्वं च । न चानयोर्विरोधः करणत्वेन प्रामाण्यं तु लौकिकविषये न च तत्राश्रयत्वमिति न कुत्रापि विरोधवार्तेति भावः । न चेन्द्रियलिङ्गादिचतुष्करणकोटिष्वनन्तर्भावादीश्वरस्य पञ्चमप्रमाणत्वप्रसङ्गः साक्षात्कारिप्रमाव्याप्तत्वेन प्रत्यक्षान्तर्भावादिति ॥ ३ ॥

अथ यदेतदविसंवादिविज्ञानमित्यादिना सार्द्धश्लोकद्वयेन परेषां लक्षणपञ्चकमुपन्यस्तं तदप्यप्रतिषिद्धत्वादनुमतमिति शङ्कां शमयंस्तदवतारयति । अथेति । प्रावादुकाः प्रवक्तारः वदतेः पूर्वादुपसंख्यानादुकञ्प्रत्ययः । अन्येषामपि दृश्यत इति पूर्वस्य दीर्घः ॥

अज्ञातचरोऽज्ञातपूर्वः । भूतपूर्वे चरट् इति ।

---

(१) न्यायकुसुमाञ्जलौ ४ स्तवके ५ कारिका ।

(२) लक्षणवचना—पा॰ C पु॰ ।

(३) अगृहीततथाभूतगोचरामपरे धियम्—पा॰ A पु॰ ।

Digitized by Google

तथागतमतानुवर्त्तिनो ह्यविसंवादिविज्ञानं प्रमाणम् अविसंवादश्चार्थक्रियास्थितिरिति लक्षयन्ति । तथाहुः ।

प्रमाणमविसंवादिज्ञानमर्थक्रियास्थितिः ।

अविसंवादनमिति । तदसत् । भूतभविष्यद्विषयेष्वनुमानेष्वव्याप्तेः । न ह्यसतोर्भूतभविष्यतोः काचिदर्थक्रिया नामास्ति(१) । स्मृतिज्ञानसविकल्पकज्ञानाभ्यां चातिव्याप्तेः । न हि ततः प्रवृत्तो विसंवाद्यते । विकल्पस्य(२) चाविसंवादानङ्गीकारे निर्विकल्पकस्यापि तन्न स्यात् । तद्द्वारकत्वात् तत्संवादनस्य ।

अविसंवादिविज्ञानमित्यत्रार्थं क्रियाध्याहारेण व्याचष्टे । तथागतेति । नन्वविसंवादिविशेषणमनर्थकं सर्वस्यापि विज्ञानस्य विज्ञानत्वे विसंवादाभावादित्याशङ्क्यार्थद्वारको विसंवादो दृष्टो न स्वरूपप्रतिबन्धन इत्यभिप्रेत्याह । अविसंवादश्चेति । अर्थक्रियासमर्थविषयत्वमविसंवादित्वमित्यर्थः । अत्र सौगतवाक्यं संवादयति । तथाहुरिति । तदेतद्दूषयति । तदसदिति । अव्याप्तिं तावदाह । भूतेति । कुत इत्याशङ्क्य त्वदुक्ताविसंवादासम्भवादित्याह । न हीति । अतिव्याप्तिं चाह स्मृतीति । तदेव स्फोरयति । न होति । अभिमतविषयं स्मृत्वा विकल्प्य वा प्रवृत्तस्य विसंवादाभावादित्यर्थः । विकल्पस्याविसंवादानङ्गीकारेऽतिव्याप्तिरित्याशङ्क्याह । विकल्पस्येति । तदविसंवादनं कुतो न स्यादित्यत्राह । तद्द्वारकत्वादिति । सविकल्पकावि-

---

(१) अर्थक्रियास्थितिर्नामास्ति—पा० C पु० ।

(२) सविकल्पकस्य च—पा० C पु० ।

न च शुक्तिकारजतादिविकल्पनिदर्शनेन तस्य विसंवादः साधयितुं शक्यते । पक्षादिग्राहिभिरेव विकल्पैः सकललैङ्गिकविकल्पैश्चानैकान्त्यात् । तन्मिथ्यात्वे चाश्रयाद्यसिद्धिः प्रसज्येत । अनुमानप्रामाण्यमप्युत्सन्नसंकथमापद्येत । एतेनार्थजत्वमर्थविषयत्वमपि(१) अविसंवाद इति निरस्तम् । विकल्पस्यापि तथाभावेन प्रामाण्यप्रसङ्गात् । अथैवं मनुषे स्वलक्षणप्रभवनि-

संवादनप्रमाणकत्वान्निर्विकल्पकाविसंवादनस्येत्यर्थः । विमतो विकल्पो विकल्पत्वाद् विसंवादी शुक्तिरजतविकल्पवदित्यनुमानं स्यादित्याशङ्क्याह । न चेति । कुत इत्यत आह । पक्षादीति । पक्षहेतुदृष्टान्तग्राहिविकल्पप्रामाण्ये तत्रैव विकल्पत्वहेतोरनैकान्तिकत्वं तदप्रामाण्ये हेत्वाद्यसिद्धिः स्यादित्यर्थः । किं चेत्थं प्रलपतो बौद्धस्य मूर्द्धनि भगवता बुद्धेनापि दुर्द्धर्षो महानयं वज्रपातः कृत इत्याह । अनुमानेति । विकल्पत्वाविशेषादिति भावः । उक्तदोषं पक्षान्तरे ऽप्यतिदिशति । एतेनेति । अर्थक्रियास्थितिलक्षणाविसंवादस्य विकल्पे ऽतिव्याप्तिकथनेनेत्यर्थः । साक्षात्स्वलक्षणप्रभवत्वमर्थजत्वम् अनारोपितार्थत्वमर्थविषयत्वमिति विवेकः । कथमन्यनिरासादन्यनिरास इत्याशङ्क्य दोषसाम्यादित्याह । विकल्पस्यापीति । विकल्पस्य प्रामाण्यप्रसङ्गमाह । तथाभावेनेति । अर्थजत्वेनार्थविषयत्वेन चेत्यर्थः । अन्यथा प्रवृत्तिसंवादौ न स्यातामिति भावः । ननु भ्रान्त्यैव प्रवृत्तिः अर्थक्रियासंवादस्तु यादृच्छिक इत्यप्रमाणमेव विकल्प इति नातिव्याप्तिरिति शङ्कते । अथैवमित्यादिना । अप्रामा-

(१) अर्थविषयत्वं वा-पा॰ B पु॰ ।

र्विकल्पकजन्मा तदारोपितार्थप्रतिभासश्च विकल्पः स्वलक्षणो पुरुषं प्रवर्तयति संवादयति च मणिप्रभाविषयमणिविकल्पन्यायेन परम्परयार्थप्रतिबन्धात्[१] न त्वाहत्यार्थजत्वमर्थविषयत्वं वाऽस्यास्तीत्यप्रामाण्यमेवेति । तर्हि तत एवाप्रामाण्यमनुमानस्यापि स्यात्[२] । अथ वह्निस्वलक्षणाद्धूमस्वलक्षणं तस्मादनुभवः तस्माद्धूमविकल्पः ततो दहनविकल्प इति परम्परयार्थजत्वेनानुमानप्रामाण्यमभ्युपगम्येत । तर्हि

ण्यमित्यन्तेन । अप्रामाण्ये कारणमाह । न त्वाहत्येति । साक्षादर्थजत्वार्थविषयत्वयोरभावं व्यनक्ति । स्वलक्षणप्रभवनिर्विकल्पकजन्मेति । अर्थजप्रसूतोऽयं न तु स्वयमर्थज इत्यर्थः । नन्वनर्थजत्वे ऽनर्थविषयत्वे वा कथमर्थावभासः तस्याप्यपह्नवे वा कथमस्मादर्थे प्रवृत्तिः संवादश्चेत्यत आह । तदारोपितार्थप्रतिभासश्चेति । नन्वारोपितार्थावभासात् प्रवृत्तिरस्तु शुक्तिरूप्यादिविकल्पवत् संवादस्तु कथमत आह । मणिप्रभेति । यथा मणिप्रभायां मणिबुद्धेर्भ्रान्तत्वे ऽपि मणिप्रभवप्रभाविषयतया परम्परया याथार्थ्यसम्बन्धादर्थक्रियासंवादो यादृच्छिको दृष्टः तथा विकल्पस्याप्यर्थजप्रत्यक्षप्रसूतेः पारम्पर्येणार्थसम्बन्धनियमादर्थक्रियासंवाद इत्यर्थः । तर्ह्यानुमानिकविकल्पेऽव्याप्तिरित्याह । तर्हीति । तत एवाहत्यार्थजत्वाभावादेव अनुमानस्यानुमानिकविकल्पस्येत्यर्थः । अनुमानप्रतिबन्दिमोचनमाशङ्कते । अथेति । अनुभवः प्रत्यक्षनिर्विकल्पकमिति यावत् ।

(१) अर्थसम्बन्धात्—पा· C पु·

(२) तर्ह्यनुमानस्यापि प्रामाण्यं न स्यात्—पा· C पु· ।

तत एव विकल्पस्मृत्योरपि प्रामाण्यमभ्युपगच्छ । तत्रापि पारम्पर्यस्य सुवचत्वात् । एतेन बाधविरहोऽविसंवाद इति च प्रत्युक्तम् । न चावस्तुभूतसामान्यविषयत्वादप्रामाण्यं विकल्पस्य । अनुमानस्यापि तथाभावप्रसङ्गात् । ततश्चैतन्निरस्तम् । यथाहुः ।

विकल्पोऽवस्तुनिर्भासादसंवादादुपप्लवः । इति ।

तथा ।

तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः ।
व्यावृत्तमिव निस्तत्त्वं परीक्षानङ्गभावतः ॥ इति ।

तर्ह्यव्याप्तिं परिहरतः पुनः सैवातिव्याप्तिरावर्त्तते इत्यहो कष्टमायुष्मतः स्वभ्रादभ्रमध्ये प्रवेश इत्याह । तर्हीति । तत एव पारम्पर्येणार्थजत्वादेवेत्यर्थः । तत्र विकल्पस्यार्थजनिर्विकल्पकोत्थत्वादर्थजत्वम् । स्मृतेस्तु तादृग्विकल्पाहितसंस्कारप्रभवत्वादिति पारम्पर्येणार्थजत्वस्य सुवचत्वादित्यर्थः । अबाध्यत्वमविसंवादनमिति पक्षान्तरमाशङ्क्याह । एतेनेति । विकल्पेऽतिव्याप्तिकथनेनेत्यर्थः । विकल्पस्यापि बाध्यत्वान्नातिव्याप्तिरित्याशङ्क्य किं तस्य बाध्यत्वमलीकसामान्यगोचरत्वात् । अशब्दात्मकस्यार्थस्य शब्दात्मकत्वेनावभासनाद्वेति द्वेधा विकल्प्याद्यं दूषयति । न चेति । कुत इत्याशङ्क्याबाध्यत्वस्यानुमानाव्याप्तेरित्याह । अनुमानस्यापीति । अनुमानस्यापि सामान्यगोचरत्वाविशेषादप्रामाण्यप्रसक्तेन सामान्यालीकत्वं युक्तमिति भावः । एतेन परेषां प्रलापाः परास्ता इत्याह । ततश्चेति । सामान्यालीकत्वायोगादित्यर्थः ॥

विकल्पः सविकल्पकम् उपप्लवो भ्रान्तिः कुतः अव-

अनुमानेन समानयोगक्षेमत्वाद्विकल्पस्य । न चाशब्दात्मकस्यार्थस्य शब्दात्मनावभासान्मिथ्यात्वं विकल्पस्य । न हि घटोऽयमित्यस्यायमर्थो घटशब्दोऽयमिति किं तु घटशब्दवाच्योऽयमिति । यथाहुः ।

स्तुनस्तुच्छस्य निर्भासात् तत्र वा स्वतश्चो हेतुः असंवादादिति । तस्यां विकल्पसंविदि बाह्यं विज्ञानातिरिक्तमिव एकमिव वस्तुनः परमाणुपुञ्जानतिरेके ऽप्यतिरिक्तमेकमाश्रितं स्थूलमिव तथा अन्यतो व्यावृत्तमिव व्यावर्त्तकसामान्यालीकत्वे ऽपि तत्कृतव्यावृत्तिविशिष्टमिव यद्रूपमाकारो भाति तन्निस्तत्त्वं तुच्छम् । कुतः परीक्षानङ्गभावतः विचारासहत्वादित्येतत्सर्वं पूर्वोक्तानुमानाप्रामाण्यप्रसङ्गादपास्तमित्यर्थः । द्वितीयं दूषयति । न चाशब्दात्मकस्येति । कुत इत्याशङ्क्य उक्तहेत्वसिद्धेरित्याह । न हीति । घटोऽयमिति घटशब्दवाच्यत्वावभासोऽयं न तु तत्तादात्म्यावभासः सामानाधिकरण्यनिर्देशसाम्यात्तु तादात्म्यावभासभ्रमो भवताम् । अन्यथाक्षादिशब्दश्रवणाद्देवनाद्यनेकार्थेष्वेकत्वावभासः घटादिमूर्तार्थेष्वमूर्तत्वावभासः यजेतेत्यादितिङन्तार्थेषु साध्यरूपेषु सिद्धरूपतावभासश्च स्यात् । सर्वस्यापि शब्दस्य निष्पन्नरूपत्वाविशेषादिति भावः ।

माभूत् तादात्म्यावभासः तथापि सञ्ज्ञायाः स्मर्यमाणविशेषणतया(१) पारोक्ष्यात् तद्विशिष्टसञ्ज्ञिविकल्पस्यापि पारोक्ष्यापत्तौ प्रत्यक्षत्वबाधः(२) स्यादिति शङ्कां वृद्धसंवादमुखेन परिहरति । यथाहुः सञ्ज्ञा हीत्यादि । यद्यपि प्रति-

---

(१) घटशब्दवाच्योऽयमिति निर्विकल्पकज्ञाने वाच्यदर्शनाद्वाचकस्मृतिः ।

(२) घटस्य यत् प्रत्यक्षत्वं तस्य बाधः स्यादित्यर्थः ।

सञ्ज्ञा हि स्मर्यमाणापि प्रत्यक्षत्वं न बाधते ।
सञ्ज्ञिनः सा तटस्था हि न रूपाच्छादनक्षमा ॥ इति ।
(इति बौद्धवादप्रकरणम्) ।(१)

प्राभाकरास्तु अनुभूतिः प्रमाणम् । स्मृतिव्य-

सम्बन्धिसञ्ज्ञिनिर्विकल्पकोद्बोधितसंस्कारोत्थस्मृतिपथप-थिकतया परोक्षैव सञ्ज्ञा तथापि सञ्ज्ञिनो घटादेर्विकल्प्य-मानस्य(२) प्रत्यक्षत्वं न बाधते परोक्षतां नापादयतीत्यर्थः । पराकृत इत्याशङ्क्य तदशक्तेरित्याह । न रूपाच्छादनक्षमेति । सञ्ज्ञिनः प्रत्यक्षत्वतिरोधानाशक्तेरित्यर्थः । अशक्तौ हेतु-माह । सा तटस्था हीति । हि यस्मात् सा सञ्ज्ञा तटस्था स्मृति-द्वारा इन्द्रियस्य स्वसम्प्रयुक्तसञ्ज्ञिविकल्पजनने सहकारि-त्वेन सन्निहिता न तु समबलत्वेनेति यावत् । अन्यथा स्मृतिसम्प्रयोगयोस्तुल्यबलत्वे मिश्रकार्योत्पत्तौ परोक्षत्वा-परोक्षत्वसङ्करप्रसङ्गः । तस्मात् पूर्वकालतास्मृतिः प्रत्य-भिज्ञायामिव सञ्ज्ञास्मृतिरपीन्द्रियसहकारितया न सञ्ज्ञि-विकल्पे प्रत्यक्षतां बाधते । यथा सुरभि चन्दनमित्यादौ घ्राणजन्या गन्धबुद्धिरिन्द्रियान्तरसहकारिणी गन्धविशि-ष्टचन्दनविकल्पस्य चाक्षुषत्वं स्पार्शनत्वं वा न विरुन्धेत् तद्वदिति सुष्ठूक्तं तटस्थेति ।

अथ प्राभाकरीयं प्रमाणसामान्यलक्षणं दूषयितुमु-पन्यस्यति । प्राभाकरास्त्विति । अनुभूतिः प्रमाणमित्यत्र भावसाधनोऽयं प्रमाणशब्दः । येयमिन्द्रियलिङ्गादिजन्या संवित् सानुभूतिरनुभवः । सा सर्वा प्रमाणं प्रमिति-

---

(१) ( ) एतन्मध्यस्थो नास्ति B पु॰ ।

(२) सविकल्पविषयस्य ।

तिरिक्ता[1] संविदनुभूतिः । स्मृतिश्च संस्कारमात्रजं ज्ञानमिति वर्णयन्ति । यथाहुः ।

प्रमाणमनुभूतिः सा स्मृतेरन्या स्मृतिः पुनः ।
पूर्वविज्ञानसंस्कारमात्रजं ज्ञानमुच्यते ॥ इति ।

तत्र तावत् प्रमाणलक्षणे प्रथमाध्याये वेदाप्रामाण्यवादिनो बौद्धादीन् प्रति वेदवाक्यजनितस्य ज्ञानस्य स्वतः प्रामाण्यं प्रसाध्येदानीं स्मृतिव्यव-

---

रित्यर्थः । तस्याश्च हानादिव्यवहारानुगुणत्वात् स एव फलम् । यदा त्विन्द्रियतत्सन्निकर्षादेः प्रमाणत्वं विवक्षितं तदा प्रमाणशब्दः करणसाधनः अनुभूतिः फलमिति च द्रष्टव्यम् । तदुक्तं शालिकायां प्रमाणफलविभागप्रस्तावे ।

मानत्वे संविदो भाव्यं हानादानादिकं फलम्[2] ।
ज्ञानस्य तु फलं सैव व्यवहारोपयोगिनी ॥ इति ।

ज्ञानस्य ज्ञानकरणस्येन्द्रियादेरित्यर्थः । न च स्मृतावतिव्याप्तिरित्याह । स्मृतीति स्मृतिव्यतिरेकज्ञापनाय । तामपि लक्षयति । स्मृतिश्चेति । संस्कारपदेनेन्द्रियलिङ्गादिजन्यज्ञानव्यवच्छेदः मात्रपदेन त्ववधारणार्थेन प्रत्यभिज्ञाव्यावृत्तिः । तत्र सम्प्रयोगस्यापि करणत्वादिति ।

अत्र शालिकासंवादमाह । यथाहुरिति । तदेतत्तुरगाधिरूढस्य तुरगविस्मरणम् यद्वेदप्रामाण्यसाधने प्रवृत्तस्य मीमांसागुरोस्तत्प्रमाद इति सोपहासं परिहरति ।

तत्र तावदिति । तावच्छब्द एष्यद्दोषसूचनार्थः । कथं तत्प्रमाद इत्याशङ्क्य स्वोक्तप्रमाणलक्षणस्य प्रकृतवेदवा-

---

(१) स्मृतेरन्या च-पा· B पु· ।
(२) संविदो मानत्वे हानादानादिकं फलं भाव्यमित्यन्वयः ।

च्छेदेनानुभूतित्वलक्षणं प्रामाण्यं प्रसाध्यत इति मह-दिदं व्याख्यानकौशलमायुष्मताम् । किं च स्मृति-ज्ञानानामात्मस्वात्मनोरभिमतं प्रामाण्यं न सिध्येत् स्मृतीनां स्मृतिव्यतिरिक्तत्वासम्भवेनाननुभूतित्वात् । त्रितयप्रकाशरूपायास्तस्या वेद्यांश एव संस्कारजनि-तत्वेन स्मृतित्वं न त्वंशान्तरयोरिति चेत् न तयोः

क्याव्याप्त्यनवेक्षणादित्याह । प्रमाणेत्यादि । वाक्यजन्यस्य ज्ञानस्यानुभूतित्वेन प्रामाण्यं तज्जनकवाक्यस्यातल्लक्षण-त्वादप्रामाण्यं दुर्वारमिति भावः । तावच्छब्दसूचितं दूष-णान्तरं च प्रस्तौति । किं चेति । द्विविधं हि विज्ञानं ग्रहणं स्मरणं च तदुभयमपि पात्रप्रदीप इवात्मानमाश्रयतया स्वात्मानं स्वप्रकाशत्वेन विषयतया बाह्यं चावभासयती-ति त्रिपुटीप्रत्यक्षतामाचक्षते गुरवः । तत्रात्मस्वात्मांशयो-रुभयं प्रमाणं प्रत्यक्षं च वेद्यांशे स्मरणमप्रमाणमप्रत्यक्षं च । ग्रहणं तु पञ्चविधमपि(१) प्रमाणमेव तद्यथायथं प्रत्यक्षमप्र-त्यक्षं चेति मन्यन्ते । तत्र स्मार्तयोरात्मस्वात्मांशयोः प्रमा-णाभिमतयोरनुभूतित्वलक्षणमव्याप्तमित्याह । स्मृतिज्ञा-नानामिति । असिद्धौ कारणमाह । स्मृतीनामिति । आत्म-स्वात्मांशयोरपीति शेषः । स्मृतिप्रयोजकसंस्कारजत्वा-भावेन स्मृतित्वाभावादात्मस्वात्मांशयोः स्मृतिव्यतिरि-क्तत्वं व्याप्तमिति शङ्कते । त्रितयेति । तत्रापि तत्प्रयोज-कसम्भवादव्याप्तिस्तदवस्थेति परिहरति । न तयोरिति । नन्वस्त्येव कारणान्तरं तयोस्तत्रैव(२) यदन्यदात्ममनःसंयो-

---

(१) प्रत्यक्षादीनि चत्वारि अर्थापत्तिश्चेति पञ्चविधम् ।

(२) तयोरात्मस्वात्मांशावभासयोः तत्रैव स्मृतौ ।

संस्कारजनितत्वाभावे कारणान्तरं वाच्यम् । न हि सर्वसंविदां विषयप्रकाशांशकारणव्यतिरेकेण कारणान्तरं दृष्टमिष्टं वा । यथोक्तं प्राभाकरतन्त्रसागरपारदृश्वना शालिकानाथेन ।

सर्वविज्ञानहेतूत्था मितौ मातरि च प्रमा ।
साक्षात्कर्तृत्वसामान्यात् प्रत्यक्षत्वेन सम्मता ॥ इति ।

गादिकमित्याशङ्क्याह । न हीति । स्मृत्यादिषड्विधज्ञानेष्वपि संस्कारसम्प्रयोगादिविशेषयोगिन्यात्ममनःसंयोगादिसामग्री हि विषयप्रकाशांशे कारणं सैवात्मस्वात्मांशयोरपि कारणं वाच्यम् । अन्यथा सामग्र्यैकदेशानामंशतो विरुद्धानेकजाति(१)मद्विज्ञानजनकत्वे घटादिकार्येष्वपि तथाभावप्रसङ्ग(२) इत्यर्थः । अन्यथा प्रमाणविरोधस्वाभ्युपगमविरोधौ स्यातामित्याशयेनाह । दृष्टमिष्टं वेति । उक्तः प्रमाणविरोधः ।

स्वाभ्युपगमं दर्शयति । यथोक्तमिति । मेये त्विन्द्रिययोगोत्थेत्युक्त्वोच्यते । सर्वेत्यादि । येयं जगति ग्रहणस्मरणात्मिका संवित् सा सर्वापि मितौ स्वात्मांशे मातर्यात्मांशे च सर्वैः समग्रैरेव विज्ञानहेतुभिः संस्कारसम्प्रयोगादिभिरुत्थिता न तु सामग्र्यैकदेशेनेत्यर्थः । सा च प्रमा प्रमाणमेव किं च यथा मेयांशं साक्षात्कुर्वन्ती प्रत्यक्षा भवति एवमात्मस्वात्मांशयोरपि साक्षात्कर्तृत्वसाम्यात् प्रत्यक्षा च किं तु मेयमात्रंशयोस्तदतिरिक्ता मित्यंशे तु मितेरव्यतिरिक्तेति विशेष इति शालिकार्थः । तस्मादा-

---

(१) स्मृतित्वग्रहणत्वादि ।

(२) कुत्रचिद् घटत्वं कुत्रचिदन्यत् ।

Digitized by Google

एतेन स्वोत्पत्तौ संविदन्तरानपेक्षत्वमनुभूतित्वमित्यपास्तम् । पूर्वोक्तसकलदोषानतिवृत्तेः । अपि च सविकल्पकप्रत्यक्षस्यानुमानादीनां च संविदन्तरापेक्षोत्पत्तित्वेनाननुभूतित्वात्[1] तत्प्रामाण्यं न स्यात् । स्वसमानविषयसंविदन्तरानपेक्षत्वमभिमत-

---

त्मस्वात्मांशयोरपि स्मृतेः संस्कारजत्वाविशेषात् तत्रानुभूतित्वमव्याप्तमिति सिद्धम् । एवं परेषां कण्ठोक्तमनुभूतिलक्षणं निरस्य सम्प्रति सम्भावितानि लक्षणान्तराण्यपि निरसिष्यन् स्वोत्पत्तौ संविदन्तरानपेक्षा संविदनुभूतिरिति पक्षं तावदतिदेशेन निरस्यति । एतेनेति । कण्ठोक्तलक्षणनिरासेनेत्यर्थः । अत्रापि स्वोत्पत्तावित्यादिविशेषणात् स्मृतिव्यावृत्तिः । कुतो निरस्तमित्याशङ्क्य पूर्ववद्वेदवाक्येषु विशेष्याव्याप्तेः स्मार्त्तयोरात्मस्वात्मांशयोर्विशेषणाव्याप्तेश्चेत्याशयेनाह । पूर्वोक्तेति । अन्यत्रापि विशेषणाव्याप्तिं समुच्चिनोति । अपि चेति । निर्विकल्पकलिङ्गशब्दसदृशवस्त्वनुपपद्यमानार्थज्ञानसापेक्षत्वात् निर्विकल्पकव्यतिरिक्तप्रत्यक्षादिप्रमितिपञ्चकस्यापि अप्रामाण्यप्रसङ्ग इत्यर्थः । अनन्तरोक्तदोषनिरासाय लक्षणं विशिनष्टि । स्वसमानेति । स्वोत्पत्तावित्येव सविकल्पकादीनां निर्विकल्पकादिसापेक्षत्वेऽपि तत्समान[2]विषयत्वाभावान्न तेष्वव्याप्तिः । स्मृतिस्तु स्वोत्पत्तौ स्वसमानविषयपूर्वानुभवसापेक्षत्वान्न तत्रातिव्याप्तिश्चेत्याशङ्कितुराशयः । तथापि लैङ्गिकशाब्दयोरव्याप्तिर्विमर्शेऽतिव्याप्तिश्च

---

(१) अननुभूतित्वे—पा॰ B पु॰ ।
(२) तेन निर्विकल्पकादिना समानम् ।

Digitized by Google

मिति चेत् । तर्हि व्याप्तिग्राहकप्रमाणानधिकविषयमनुमानमित्यभ्युपगमात् शाब्दस्य स्वसमानविषयविमर्शापेक्षत्वाङ्गीकाराच्च तयोरनुभूतित्वं न स्यात् स्याच्च विमर्शस्येत्यात्मीय एव बाणो भवन्तं प्रहरति । अथार्थपरिच्छेदलक्षणे स्वकार्ये स्वसमानविष-

---

स्यातामिति परिहरति । तर्हीति । व्याप्तिग्राहकं प्रमाणं नाम यत्रेदं तत्रेदमिति लिङ्गलिङ्गिनोर्निरुपाधिकसम्बन्धग्राहकं प्रत्यक्षादि । तदुक्तम् ।

यः कश्चिद्येन यस्येह सम्बन्धो निरुपाधिकः ।
प्रत्यक्षादिप्रमासिद्धः स तस्य गमको मतः ॥ इति ।

विमर्शस्तु शब्दप्रमाणानुग्राहकस्तर्करूपः स्मृतिविशेषः । नन्वस्य स्मृतित्वे कथं स्वोत्पत्तौ स्वसमानविषयसंविदन्तरानपेक्षत्वं तथात्वे वा कथं स्मृतित्वमतस्तत्रातिव्याप्तिवाचो युक्तिर्नातीव युक्तिमतीति चेत् सत्यम् तस्य सापेक्षत्वे ऽपि स्मृतिप्रमोषवदनुभूतविषयत्वाभिमानाभावादनपेक्षत्ववाचो युक्तिः शब्दानुमानयोः स्वसमानविषयविमर्शादिसापेक्षत्वाभ्युपगमलक्षणं स्वचेष्टितमेव स्वस्य बाधकं जातमित्याशयेनाह । आत्मीय एवेति । अथ शाब्दलैङ्गिकयोः स्वोत्पत्तौ विमर्शादिसापेक्षत्वे ऽपि स्वकार्ये तदभावात्तथा विशेषणे व्यापकं लक्षणमिति शङ्कते । अथेति । तच्च स्वकार्यमर्थपरिच्छेदोर्थव्यवहारश्चेति द्वयमस्ति । तत्र तावदाद्यावलम्बेनाह । अर्थपरिच्छेदेति । किं परिच्छित्तिः परिच्छेद इति भावसाधनोऽयं शब्द उत परिच्छिद्यते ऽनेनेति परिच्छेद इति करणसाधनो वेति द्वेधा विकल्प्याद्ये इन्द्रियलिङ्गादिकरणफलस्य संविदः स्वातिरिक्तपरिच्छेदाभावात्

यसंविदन्तरानपेक्षत्वमिति चेत् न स्वव्यतिरेकेण स्वकार्यस्य परिच्छेदान्तरस्याभावात् । भावे वा स्मृतिरपि तथा स्यात् । तस्या अपि स्वोत्पत्तावेव परापेक्षा नार्थपरिच्छेदे । अर्थव्यवहारः संवित्कार्य इत्यभ्युपगमे ऽपि तथा शब्दानुमानयोरिव स्मृतेरपि वेद्यव्यवहारहेतुत्वे पारतन्त्र्याभावात् । भावे वा स्मृतेरात्मस्वात्मनोरपि तथाभावेनानुभूतित्वं न स्यात् । तयोरंशयोः सर्वसंवित्साधारणत्वेन परानपेक्षत्वमिति

स्वस्यैव स्वकार्यत्वे आत्माश्रयणाल्लक्षणमसम्भवि स्यादित्याशङ्क्याह [१)] । न स्वेति । द्वितीये स्मृतावतिव्याप्तिरित्याह । भावे वेति । कुत इत्यत आह । तस्या अपीति । अर्थपरिच्छेद इति । हेयत्वादिज्ञानरूपकार्य इत्यर्थः । व्यवहारपक्षावलम्बे ऽप्ययमेव दोष इत्याह । अर्थेति । अत्रापि व्यवहारशब्दो भावार्थः करणार्थो वेति विकल्प्याद्ये पूर्ववदात्माश्रयस्य[२)] स्फुटत्वाद् द्वितीये स्मृतावतिव्याप्तिमतिदिशति । तथेति । कथं तथेत्यत आह । शब्देति । यथा शाब्दलैङ्गिकयोरुत्पत्तावेव संविदन्तरापेक्षा नार्थव्यवहारकार्ये तद्वत्स्मृतेरपीति तत्रातिव्याप्तिरित्यर्थः । अथातिव्याप्तिपरिहाराय स्मृतेर्वेद्यव्यवहारे ऽपि सापेक्षत्वमुच्येत तर्हि आत्मस्वात्मांशयोरपि तथात्वात् तयोरव्याप्तिः स्यादित्यहो कष्टमेकं सन्धित्सतोऽपरं प्रच्यवत इत्याह । भावे वेति । अथात्मस्वात्मांशयोः सकलसापेक्षज्ञानसाधारणत्वेनानपेक्षत्वान्न

(१) इत्याशयेनाह–पा० E पु० ।

(२) इन्द्रियलिङ्गादिकरणफलस्य संविदः स्वातिरिक्तस्वकार्यार्थव्यवहाराभावात् स्वस्यैवार्थव्यवहारत्वे आत्माश्रयः ।

चेत् न अंशान्तरस्यापि साधारणत्वात् । न चात्मस्वात्मव्यवहारसमर्थत्वेन जातायाः संविदो वेद्यव्यवहारसामर्थ्यं हेत्वन्तरेण पश्चाद्भवतीति वाच्यम् । कार्यगतशक्तीनां कार्यकारणादेव कार्येण सहोत्पत्तेः । अन्यथा विरम्यव्यापारप्रसङ्गात् । न च बुद्धिशब्दकर्मणामनावृत्तानां विरम्यव्यापार उपपद्यते । स्वसमा-

तयोरव्याप्तिरिति शङ्कते तयोरिति । तर्हि वेद्यांशस्यापि तथात्वात् तत्रातिव्याप्तिरिति सेयमुभयतः पाशारज्जुरायुष्मत इति परिहरति । नेति । न त्वात्मस्वात्मव्यवहारजनने सहजशक्तियुक्तत्वात् तत्रानपेक्षैव संविद् वेद्यव्यवहारजनने त्वागन्तुकशक्तिकत्वात् तत्र तत्संविदन्तरसापेक्षेति न कुत्राप्यव्याप्तिरतिव्याप्तिर्वेति शङ्कामनूद्य शकलयति । न चेति । कुतो न वाच्यमित्याशङ्क्य स्वस्वाकाराधेय(१)शक्तीनां सर्वसंविदामागन्तुकशक्त्ययोगाद्वेद्यांशेऽपि स्मृतेरनपेक्षत्वेनातिव्याप्तिरित्याह । कार्येति । आगन्तुकशक्तिवादेऽनिष्टमाह । अन्यथेति । सहजागन्तुकशक्तिकार्ययोः क्रमेण करणं विरम्यव्यापारः । इष्टापत्तिं परिहरति । न चेति । ननु वीणादिशब्दस्य क्रमिकानेकज्ञानजनकत्वात् तज्ज्ञानस्य च क्रमिकानेकसुखव्यक्तिजनकत्वात् कर्मणश्चेष्टादेः क्रमिकानेकाकाशादिदेशसंयोगविभागजनकत्वाच्चास्त्येव शब्दबुद्धिकर्मणां च विरम्यव्यापार इत्याशङ्क्याह । अनावृत्तानामिति । असन्तन्यमानानामित्यर्थः । तथा च तेषामेकसन्तानवर्त्तिनामनेकेषामेव क्रमकारित्वं न त्वेकस्यैव विरम्यव्यापृतिरिति भावः । लक्षणा-

(१) स्वस्वलक्षणाधेय—पा॰ E पु॰ ।

THE

LAKṢAṆĀVALĪ

OF

UDAYANĀCĀRYA

WITH THE

COMMENTARY

NYĀYAMUKTĀVALĪ

OF

ÇEṢAÇĀRṆGADHARA.

२ क—No. 11, Vol. XXI.—November, 1899.

Digitized by Google

Digitized by Google

उदयनाचार्यविरचिता

लक्षणावली ।

प्रणम्य पार्वतीनाथं नित्यविज्ञानमीश्वरम् ।
द्रव्यादिसर्वमेयानां करिष्ये लक्षणावलीम् ॥

शेषशार्ङ्गधरविरचिता

न्यायमुक्तावली ।

श्रीमद्द्वारकाधिपतये गोपालाय नमः । श्रीहयग्रीवाय नमः ।

श्रीशेषभैरवगुरुचरणाभ्यां नमः । श्रीः ॥

आनन्दरूपमुन्मीलन्नीलनीरजलोचनम् ।
वन्दामहे भवध्वान्तध्वंसिनं रुक्मिणीपतिम् ॥

हृद्यस्वादितमदिरावैभवमाद्यद्दृढिलोचनां बालाम् ।
बालारुणकरभासुरवसनां कमलासनां वन्दे ॥

विपक्षाक्षेपसत्पक्षपरिक्षेपपुरन्दरान् ।
नमस्यामो गुरून्न्यायसहस्रकिरणान् वयम् ॥

शिष्टाचारानुमितकर्तव्यताकं चिकीर्षितप्रकरणपरिसमाप्तिप्रचयपरिपन्थिविघ्नविघातकं नमस्कारलक्षणं मङ्गलमाचरितं दर्शयति । प्रणम्येति । इह यद्यपि बहुलं विप्रतिपत्तीरुद्भाव्य साधकबाधकप्रमाणे अभिधीयेते तथापि इदमत्र निपुणतरं निरूपयतु भवान् ।

कर्मनिर्मितवैचित्र्यमनीशं यदि गीयते ।
जगत् ततो जगत्कर्तृकथापि प्रथते कथम् ॥

Digitized by Google

भवेदेतदेवं यद्यचेतनप्रवृत्तेः चेतनाधिष्ठानपूर्वकत्वेन नियमे प्रयोजकान्तरमुपलभ्येत न त्वेतदस्ति योग्यस्यानुपलम्भबाधितत्वात् । अयोग्यप्रयोजकशङ्कायाः शङ्क्यमानप्रयोजकप्रतिक्षेपकत्वेनैव दूरापास्तत्वात् । निरुपाधिकस्य च साध्यपरित्यागे स्वभावपरित्यागप्रसङ्गात् । यदि चानधिष्ठितमेव प्रवर्तेत अचैतन्यं न स्यात् । न चाचेतनस्य चेतनाधिष्ठानमन्तरेणाप्रवृत्तौ त्रैकालिकव्यभिचाराभावस्य विमर्शशीलेनापि भवता निर्णेतुमशक्यत्वाद्व्यभिचारशङ्कायां प्रतिबन्धासिद्धिराशङ्कनीया । भाविशङ्काबाधकवैधुर्यस्य विमर्शशीलेनापि भवता निर्णेतुमशक्यत्वात् । तथा च कथं प्रतिबन्धासिद्धिः । भाविबाधकाभावानिर्णयेन व्यभिचारशङ्काया एवानुदयादिति यत्किञ्चिदेतत् विस्तरस्त्वन्यत्र ।

अभिधेयः पदार्थः । स द्विविधः । भावाभावभेदात् । तत्र नञर्थविषयत्वरहितप्रत्ययविषयो भावः । स च षोढा द्रव्यादिभेदेन । तत्रानित्यद्रव्यगुणकर्मसामान्यविशेषाः समवेताः । नित्यद्रव्यसमवायाभावाः समवेतत्वरहिताः । द्रव्यगुणकर्माणि समवेतवन्ति । सामान्यविशेषसमवायाभावाः समवेतरहिताः ।

अभिधेय इति स्वरूपसङ्कीर्तनं न तु लक्षणम् । अभिधेयत्वस्य केवलान्वयित्वेन लक्षणत्वानुपपत्तेः । लक्षणत्वे वा केवलान्वयित्वानुपपत्तिः । केवलव्यतिरेकी हेतुविशेषो लक्षणमिति स्वत एवाभिधानात् । धर्मिस्वरूपज्ञापकत्वस्यापि प्रयोजनस्य सत्त्वात् लक्षणत्वमिति केचित् ।

कश्चायं भावो नाम विधिविषयो वा निषेधाविषयो वा । प्रथमे ऽपि यद्यस्तीतिधीविषयत्वं विधिविषयत्वं तर्ह्यभावो ऽस्तीत्यस्तिप्रत्ययविषयत्वादभावस्यापि भावत्वापत्तिः । न चैतदभिलाभमात्रं[1] भावे ऽपि तथात्वप्रसङ्गात् । अबाधात्तत्प्रमात्वं नात्रापि दण्डवारितमिति सन्तोष्टव्यम् । अथानञ्पूर्वकप्रयोगविषयत्वम् । तन्न । प्रलयविनाशादिषु व्यभिचारात् । नापि द्वितीयः । इहाभावो नास्तीतिनिषेधविषयत्वेनासम्भवित्वादित्याशङ्क्यानाकलितपराभिसन्धेरियं वाचो युक्तिरित्याह । नञर्थेति । न च नञर्थानिरुक्तिः प्रस्तावे निरूपयिष्यमाणत्वात् ।

तत्र गुणात्यन्ताभावानधिकरणं द्रव्यम् ।

द्रव्यलक्षणमाह । तत्रेति । उत्पन्नं द्रव्यं क्षणमगुणं तिष्ठतीत्यङ्गीकारे समुत्पत्त्यनन्तरक्षणे द्रव्यतया विवक्षितस्य घटादेर्घटादिकार्यतया घटादिगुणानां कार्यकारणभावस्य नियतपौर्वापर्यरूपत्वात् समसमयमेवानुत्पत्तेरुत्पत्त्यनन्तरं लब्धस्वरूपेण घटादिना जन्यत्वात् गुणप्रागभावाधिष्ठानस्य गुणवत्त्वाभावात् लक्ष्यद्रव्यैकदेशे लक्षणावृत्तिलक्षणाव्याप्तिः स्यात् तां परिहर्तुमत्यन्ताभावानधिकरणत्वमुक्तम् । ननूत्पन्नं द्रव्यं क्षणमगुणं तिष्ठतीत्युक्तावुत्पत्त्यनन्तरक्षणस्य द्रव्यविशेषणत्वोपलक्षणत्वपक्षयोः प्रथमे समवायाभावव्यतिरिक्तवस्तुविशेषणविशेष्यभावस्य सम्बन्धान्तरपुरःसरत्वस्यास्मत्पक्षे ऽवश्याश्रयणीयत्वात् सम्बन्धनिरूपणे कार्ये क्षणद्रव्ययोश्च निरूप्यमाणे सम्बन्धे परस्परासमवेतत्वात् तयोः समवायसम्बन्धाभावात्

(१) अभिलापमात्रमिति सम्भाव्यते ।

संयोगेऽवश्योद्भाव्ये द्वितीयेऽप्यसम्बन्धस्यानुपलक्षकत्वात् सम्बन्धे निरूप्ये प्राचीनवैपरीत्या संयोगेऽवश्योद्भाव्ये क्षणसंयोगलक्षणगुणाधिकरणत्वात् तस्य तत्र कुतोऽव्याप्तिरिति चेत् उदारान्तःकरणोऽसि यदालोच्यापि कार्यकारणभावहानिं न व्यथसे इत्यलमव्याप्तिपरिहारगवेषणया। यस्त्वत्र तत्त्वप्रदीपिकाकारेणोत्पत्त्यनन्तरक्षणे अव्याप्तिमुद्भाव्य गुणवत्त्वात्यन्ताभावानधिकरणत्वे च परिहारमाशङ्क्योत्पत्त्यनन्तरक्षणविशिष्टे कदाचिदपि गुणानुदयात् पुनरव्याप्तेः तदवस्थत्वान्नैवमिति परिहृतम्। तत् कलशपुरःसरप्रासादनिर्माणतुल्यम्। तत्र यस्मिन् विशिष्टेऽव्याप्तिरुद्भाव्यते तत् किमिदं विशिष्टं नाम। किं युष्मत्सिद्धं पदार्थान्तरम्। उतास्माकीनमेकबुद्ध्यारूढविशेषणविशेष्यतत्सम्बन्धस्वरूपानतिरिक्तं विवक्षितम्। प्रथमे तावदनङ्गीकारपराहतिरेव। द्वितीये चैवंविधस्यालक्ष्यत्वादेव नाव्याप्तिः। न ह्यस्माभिरपि क्षणतत्सम्बन्धसहितस्य स्वरूपस्य द्रव्यत्वमङ्गीक्रियते शुद्धस्य तथात्वात् तत्र चाव्याप्तिपरिहारस्योक्तत्वात्। यदपि तत्त्वप्रदीपिकाकारेण प्रजगल्भे गुणवत्त्वात्यन्ताभाव एकोऽनेको वा एकश्चेत्तर्हि स्वस्य स्वाधिकरणत्वे स्वाश्रयदोषः प्रादुःष्यादिति गुणवत्त्वात्यन्ताभावोऽपि गुणवत्त्वात्यन्ताभावानधिकरणतयैवाङ्गीकार्यो भवद्भिरिति हा हन्त स्वपोषितमेव द्रव्यलक्षणम्। अनेकश्चेत्तदपि सर्वगुणवत्त्वात्यन्ताभावानधिकरणत्वं कियद्गुणवत्त्वात्यन्ताभावानधिकरणत्वं वा द्रव्यलक्षणं न द्वयमपि गुणवत्त्वात्यन्ताभावस्य स्वानधिकरणत्वेन सर्वगुणवत्त्वात्यन्ताभावानधिकरणत्वकियद्गुणवत्त्वात्यन्ताभावानधिकरणत्वलक्षणलक्षणयोगित्वादतिव्याप्तिरिति। तदपि न चेतसि चमत्कारमाधत्ते। सर्वपदेन दूषयिता किं समुदायं विवक्षति उत प्रतिप्रतीकं

गुणवत्त्वात्यन्ताभावात्। आद्योऽस्मदङ्गीकृतः। द्वितीये दोषकलामपि न कलयामहे। गुणवत्त्वात्यन्ताभावे तदतिरिक्तगुणवत्त्वात्यन्ताभाववृत्तेरभ्युपगमात् प्रतिप्रतीकापेक्षानधिकरणत्वाभावात्। अस्तु वैकत्वपक्षविवक्षा तथापि न नः किञ्चिदपचीयते। गुणवत्त्वात्यन्ताभावस्य स्वानधिकरणत्वानभ्युपगमात्। न चैवमात्माश्रयदोषापत्तिः शङ्कनीया। उत्पत्तिज्ञप्त्योरप्रतिबन्धात्। अन्यथा केवलान्वयिभङ्गप्रसङ्गात्। नन्वेवमपि गुणवत्त्वात्यन्ताभावानधिकरणत्वस्य गुणवत्त्वात्यन्ताभावात्यन्ताभावरूपत्वात् तस्य चाभावस्य हि योऽभावो भाव एव विशिष्यत इति न्यायेन गुणवत्त्वातिरिक्तत्वाभावात् सैवाव्याप्तिः स्यादिति चेत्। न। तस्य गुणवत्त्वातिरिक्तत्वाभ्युपगमात्। अतिरिक्तत्वाभिधानं न युक्तिमत् तत्त्वे तन्नियतत्वस्यैव वक्तव्यत्वात् पुनरव्याप्तिरिति चेत्। मैवं वोचः। गुणप्रागभावाधिकरणे गुणवत्त्वात्यन्ताभावानधिकरणत्वसत्त्वे ऽपि गुणवत्त्वाभावेन तन्नियतत्वानुपपत्तेरिति सर्वं सुस्थम्।

शिष्यव्युत्पादनाय लक्षणान्तरमाह। **मूर्त्तत्वरहितसमवेतसमवेतत्वरहितमूर्त्तत्वरहितामूर्त्तत्वरहितसमवेतजातिमद्वेति।** नन्वत्र मूर्त्तत्वरहिते यत् समवेतं तत्र समवेतत्वरहितत्वं विवक्षितं मूर्त्तत्वरहितं यत् समवेतं तत्र वा। नाद्यः। कर्मण्यतिव्याप्तेः। तस्या असिद्धावस्यासिद्धिरिति चेत्। न। कर्म कर्मवृत्तिघटव्यावृत्तत्वरहितकर्मवृत्तिगुणवृत्तित्वरहितजातिमत् जातिमत्त्वात् गगनवदिति जातिसिद्धौ तत्सिद्धेः। ननु गगननिष्ठाया जातेः कर्मवृत्तिघटव्यावृत्तत्वरहितत्वं किं कर्मवृत्तित्वे सत्यपि घटव्यावृत्तत्वरहितत्वाद्वा भवेत् घटव्यावृत्तत्वे सत्यपि

कर्मवृत्तित्वरहितत्वाद्वा भवेत्। तत्र प्रथमे तावत् न सा सत्ता गुणवृत्तित्वरहितपदेन तस्या निरस्तत्वात्। तत्र विशिष्टव्यावृत्तिः कर्मावृत्तित्वेनेति चेत्। न। कर्मवर्तिन्याः कर्मव्यावृत्तत्वानुपपत्तेः कर्मव्यावृत्तत्वेनापि तस्या निरस्तत्वाच्च। द्रव्यत्वमपि न सा तस्याः कर्मावृत्तित्वात् जात्यन्तरस्य शङ्कितुमप्यशक्यत्वादित्यप्रसिद्धविशेषणत्वात्। नापि द्वितीयः। घटकर्मानिष्ठगगननिष्ठजात्यसिद्धौ दृष्टान्तस्य साध्यविकलत्वादिति चेत्। न। कर्मावृत्तिघटव्यावृत्तत्वरहितद्रव्यत्वजात्या साध्यप्रसिद्धेः एवं गुणेषु गुणत्वेन साध्यप्रसिद्धिर्द्रष्टव्या। नापि द्वितीयः। गुणे कर्मणि चातिव्याप्तेः कथं मूर्त्तत्वरहितामूर्त्तत्वरहितसमवेतसत्तावत्त्वेनेति ब्रूमः। गुणकर्मसमवेतजातौ विशेषणं निरवकाशमिति चेत्। न। जात्याद्यवृत्तित्वेन सावकाशत्वात्। अत्रोच्यते।

अमूर्त्ते समवेतं यत्तत्राभावो विवक्ष्यते।
न च कर्मण्यतिव्याप्तिः तज्जातौ मानहानितः॥

मूर्त्तत्वरहिते यत् समवेतं तत्समवेतत्वरहितत्वस्याभ्युपेतत्वात्। न च कर्मण्यतिव्याप्तिः गुणनिष्ठत्वरहितघटनिष्ठाया जातेः कर्मनिष्ठत्वे मानाभावात्। न चोक्तं मानं कर्म गुणावृत्तिघटनिष्ठजातिरहितं द्रव्यत्वानधिकरणत्वात् सम्मतवदितिसत्प्रतिपक्षग्रस्तत्वात्। न च केवलान्वयित्वेन सत्प्रतिपक्षत्वासम्भवः। केवलान्वयित्वस्यैवात्रासम्भवात्। दशश्लोकीविडम्बने तदनिरुक्तेरुक्तत्वाच्च।

अमूर्त्तं समवेतं यत्तत्र वा तन्निषिध्यते।
न गुणादावतिव्याप्तिर्व्यवच्छित्तेर्विशेषणात्॥

मूर्त्तत्वरहितं यत् समवेतं तत्र वा समवेतत्वं प्रतिषिध्यते। न च गुणादावतिव्याप्तिः। अमूर्त्तसमवे-

तमात्रनिष्ठात्यन्ताभावप्रतियोगित्वस्य मूर्त्तत्वरहितसमवेतसमवेतत्वरहितशब्दार्थत्वेन तयोर्व्यवच्छिन्नत्वादिति सर्वं सुस्थम् । गुणत्वेन गुणादावतिव्याप्तिपरिहारार्थं अमूर्त्तत्वरहितसमवेतपदम् । एवमपि सत्तया तत्रैवातिव्याप्तिस्तदर्थं प्रथमम् । मूर्त्तत्वरहितविशेषणं तु न लक्षणशरीरानुप्रवेशि व्यावर्त्त्याभावात् । ननु पृथिवीत्वादीनामपि लक्षणत्वप्रसक्तावव्याप्तिः । न । तद्योगिनोऽपि द्रव्यत्वात् न तु तद्योगिन एव एवंविधद्रव्यत्वस्यापि सम्भवात् न च लक्षणे सामान्यशब्दः क्वापि विनाबाधं विशेषपरो भवति ।

गन्धासमवेतगगनारविन्दसमवेतजातिमद्द्रव्यमिति द्रव्यलक्षणं निगदव्याख्यातम् । अरविन्दविशेषणं तु न लक्षणशरीरानुप्रवेशि व्यावर्त्त्याभावात् ।

समवेतसमवेतसमवेतं वा इति । समवेतं समवेतं यत्र तत् समवेतसमवेतं समवेतसमवेतं समवेतं यत्र तत् समवेतसमवेतसमवेतमिति द्रष्टव्यम् । नन्वनुपपन्नमेतत् गुणादावतिव्याप्तेः तस्य समवेतवत्सामान्यसमवायित्वात् अस्ति हि सामान्यलक्षणस्य द्रव्यत्वानधिकरणत्वे सति समवायान्यभावत्वेन समवेतत्वम् । अर्थस्यैव समवेतवत्त्वं नानर्थस्येति चेत् । न । तस्य तदसमवायित्वे तल्लक्षणस्य तत्त्वानुपपत्तिः सामान्यस्वरूपव्याघातश्चासमवायित्वे वा नियमानुपपत्तिः । अभावः स इति चेत् कोऽसाविति निरुच्य वक्तव्यम् । ध्वंसप्रागभावयोरन्यतरः स इति चेत् । न । तन्नित्यत्वेनैव तयोरपहस्तितत्वात् । अस्तु तर्हि अन्योन्याभाव इति चेत् । नैतदपि साधीयः ।

Digitized by Google

तत्र वृत्त्यवृत्तिभ्यां व्याघातात् अत्यन्ताभावत्वाभ्युपगमे नोक्तो दोष इति चेत्। सत्यमेतत्। तत्समानाधिकरणत्वस्यापरस्यैव सम्भवात्। तथाहि।

जात्यत्यन्ताभाववत्त्वं जातित्वे चेत् प्रयोजकम्।
जात्यत्यन्ताभाव एव जातित्वं ते प्रसज्यते॥
नैव जातेर्लक्षणं हि जातिमत्त्वेन सम्मतम्।
स्वात्यन्ताभाववत्यां स जातौ तादृश इष्यते॥
जात्यत्यन्ताभाववत्त्वं नान्यथा लक्षणं भवेत्।
स्वात्यन्ताभावसामानाधिकरण्यं ततो भवेत्॥

अधिकव्याप्तेश्च। भावोऽप्यसमवेत एवेति चेत्। न। नित्यद्रव्यसमवाययोरन्यतरत्वप्रसङ्गात्। ओमिति ब्रुवतस्तल्लक्षणत्वानुपपत्तिर्बाधिका। प्रथमे ऽसम्भवित्वं द्वितीये ऽतिव्यापकत्वमित्यस्त्वेतत्। अत्रोच्यते।

लक्षणं यद्यजन्यं स्यात् सर्वाभावः कथं भवेत्।
अथ जन्यत्वमिष्येतातद्वृत्तित्वं(१) कथं भवेत्॥

जातिलक्षणस्याजन्यभावत्वे प्रलयो न स्यात्। तथाहि नित्यानेकसमवेतत्वं जातिलक्षणमिष्यते। तत् यदि नित्यं भवेत् घटादिभाव एव भवेत् न हि घटाद्यभावे घटत्वादीनामनेकसमवेतत्वमुपपद्यते तथा च कथं प्रलयः सिद्ध्येदिति तत्सत्त्वे वा तदजन्यत्वं न स्यात् न हि नित्यस्यासत्त्वमुपपद्यते नित्यत्वव्याघातात्। अथ जातिलक्षणं जन्यमित्युच्येत जातिसमवेतत्वं न स्यात् जातेः कार्यानाश्रयत्वात् कार्याश्रयत्वोपपत्तौ जातित्वं न स्यात् तदसमवाये च कथं जातेः समवेतवत्त्वम्। कोऽसौ पदार्थेष्विति चेत् औपाधिकं सामान्यमिति ब्रूमः। अभाव एवेति केचित्।

(१) अथ जन्यत्वमिष्येत तद्वृत्तित्वमिति सम्भाव्यते।

न च प्रागुक्तो दोषः । जात्यभाववत्वस्यानङ्गीकृतत्वात् । कस्तर्हि प्रतियोगी न कश्चित् कस्तर्हि अनयोः सम्बन्ध इति चेत् विशेषणविशेष्यभाव एवेति गृहाण । तथापि प्रलयदशायामेवाव्याप्तिः परिहर्तुं शक्येति(१) चेत् नित्यानेकसमवेतत्वात्यन्ताभावानधिकरणत्वादिति मूकीभव । सत्यमेवमतिव्याप्तिपरिहारः स्यादतिव्याप्तिरेव तु दुरभिधाना । समवेतं समवेतं यत्र तत्समवेतं यत्रेति हि लक्षणार्थो वर्णितः । न चासौ युज्यते समवेतशब्दयोरर्थभेदाभावेन सामानाधिकरण्यानुपपत्तेः समवेतशब्दस्य सप्तमीतत्पुरुषेण समवेतसमवेतशब्देन बहुव्रीहिरप्यशक्याश्रयणः घटसमवेते रूपे समवेतं रूपत्वं रूपे समवेतमित्यतिव्याप्तेरिति । तन्न । यत्समवेते समवेतं यत्र समवेत(२)मिति निरुच्य समवेतस्वसमवेतसमवेतत्वस्य लक्षणस्याभ्युपगमात् ।

तच्च नवधा भिद्यते पृथिव्यादिभेदेन ।

द्रव्यलक्षणमभिधायेदानीं तन्नियममाह । तच्चेति । शब्दस्य द्रव्यान्तरत्वान्नायं नियम इति चेत् । न । तत्र मानाभावात् । श्रोत्रं नित्यद्रव्यग्राहकं निरवयवेन्द्रियत्वात् मनोवदित्यस्ति मानमिति चेत् । न । मूर्त्तेन्द्रियत्वेन सोपाधित्वात् । श्रोत्रमात्मत्वानधिकरणाजन्यद्रव्यग्राहकं न भवति निरवयवेन्द्रियत्वात् मनोवदिति विपर्ययव्याप्तत्वेन विरुद्धत्वाच्च । शब्दो द्रव्यं मूर्त्तप्रत्यक्षानाश्रितत्वे सति प्रत्यक्षत्वात् आत्मवदिति चेत् । न । अश्रौत्रत्वेन सोपाधिकत्वात् । शब्दो द्रव्यं न भवति श्रोत्रग्राह्यत्वात् शब्दत्ववदिति सत्प्रतिपक्षत्वाच्च । आत्मत्वेनानैकान्तिकत्वमिति

(१) न शक्येति सम्भाव्यते ।

(२) यत्समवेते समवेतं समवेतमिति सम्भाव्यते ।

Digitized by Google

चेत् । तन्न । मूर्त्तानाश्रितत्वप्रत्यक्षानाश्रितत्वयोरभिधानात् । अस्तु तर्हि मूर्त्तपदानर्थक्यमिति चेत् । न । वायुस्पर्शव्यभिचारनिवृत्त्यर्थत्वात् । अपि च जन्यद्रव्यतायां सावयवानित्यत्वे स्याताम् । जन्यद्रव्यतायामपि[१] चेत् मूर्त्तत्वमणुतयैन्द्रियकत्वं न स्यात् अमूर्त्तत्वमपि न श्रोत्रप्रत्यक्षत्वानुपपत्तेरेव । नन्वात्मनोऽमूर्त्तद्रव्यत्वेऽपि मनोवेद्यत्वमिव श्रोत्रप्रत्यक्षत्वमस्याविरुद्धम् । अपरथा नात्मा मानसप्रत्यक्षः अमूर्त्तद्रव्यत्वादाकाशवदित्यपि स्यात् । नैतत् । सम्बन्धासम्भवात् न ह्यर्थासम्बन्धमिन्द्रियमर्थं गृह्णातीति दृष्टचरम् । कुतोऽसम्बन्ध इति चेत् नित्यद्रव्यतया समवायासम्भवात् अजसंयोगस्तु नेष्यते । नन्वजानां संयोगो नेष्यते उताजः संयोगः । नाद्यः । अपसिद्धान्तप्रसङ्गात् । न द्वितीयः । आकाशमात्मसंयोगि द्रव्यत्वात् घटवदितिप्रमाणसिद्धतया तस्यावश्याभ्युपेयत्वात् । उच्यते । अजः संयोगो नेष्यत इति । न चायं प्रमाणसिद्धतयाशक्यापह्नव इति वाच्यम् । मूर्त्तत्वोपाधिग्रस्ततया तत्प्रामाण्यस्यैवानभ्युपगमात् । नन्वात्मसंयोगित्वस्यात्मनिष्ठसंयोगाधिकरणत्वसाधने बाधात् आत्मनिष्ठस्वसंयोगाधिकरणत्वसाधने साध्यविकलो दृष्टान्तः आत्मसंयोगित्वसिद्धेः पूर्वमात्मनि स्वसंयोगित्वस्याप्रसिद्धत्वेन अप्रसिद्धविशेषणता च दुर्वारा । आकाशं नैतदात्मसंयोगाधिकरणं विभुत्वात् एतदात्मवत् आत्मा वा नाकाशसंयोगाधिकरणं विभुत्वादाकाशवदिति सत्प्रतिपक्षग्रस्तत्वाच्च आकाशेन सह संयोगस्याप्रतिषिध्यमानत्वा[२]न्न साध्यविकलो दृष्टान्तः न चा-

(१) अजन्यद्रव्यतायामपीति सम्भाव्यते ।

(२) अत्रादर्शपुस्तके कतिपयपदानि पतितानीति सम्भाव्यते ।

Digitized by Google

काशाभिन्नत्वमुपाधिः रूपादौ साध्याव्याप्तेः अपि चैवं वदता विभागोऽपि स्वीकर्तव्यः द्रव्यत्वहेतोरविशिष्टत्वात् सोऽप्यस्त्विति चेत् कथं तर्हि न संयोगाजन्यव्याघात इति मूकीभव विस्तरस्त्वन्यत्रेत्युपरम्यते । अस्तु तर्हि तमसो द्रव्यत्वं तथाहि ।

अस्ति तावत् तमो नीलमिति धीर्न च साप्रमा ।
प्रमात्वे बाधकाभावात् पीते नीलप्रतीतिवत् ॥ १ ॥
क्षितिर्न विषयस्तस्याः सति तेजोविरोधिनि ।
नियतं जायमानत्वात् तेजोभावप्रतीतिवत् ॥ २ ॥
अबादिविषया सेति वचनं न मनोहरम् ।
सम्यङ्नीलप्रतीतित्वान्नीले नीलप्रतीतिवत् ॥ ३ ॥
न चाविषयता युक्ता धीत्वाद्रूपादिबुद्धिवत् ।
गुणादिविषयत्वं तु शङ्कितुं नैव शक्यते ॥ ४ ॥
तस्मात्तदाश्रयो द्रव्यमिति तावत् प्रतीयते ।
तदाश्रयत्वादेवं यत्तदेवं सम्मतं यथा ॥ ५ ॥

स्यादेतत् यदि नीलधीरबाधिता स्यात् तदेव तु असिद्धं तमसो नीलत्वे नीलरूपाश्रयत्वे वा आलोकानपेक्षचक्षुर्ग्राह्यतैव न सिद्ध्येदिति चेत् तत् किमालोकसापेक्षचक्षुर्ग्राह्यता नीलत्वे नीलरूपाश्रयत्वे वा प्रयोजिकेति मन्यसे ओमिति ब्रुवन् किं विषयातिरिक्तालोकापेक्षचक्षुर्ग्राह्यत्वं प्रयोजकमुत विषयभूतालोकापेक्षचक्षुर्ग्राह्यत्वमाहोस्विदन्यदेवेति विकल्प्य प्रष्टव्यः । प्रथमे ऽप्यालोकग्रहे चक्षुरालोकान्तरमपेक्षते न वा प्रथमे कथमालोकाभावश्चाक्षुषः आलोकसत्त्वे स एव नास्तीति धर्म्यभावादेवाचाक्षुषत्वम् । असत्त्वे सहकारिवैधुर्यादचाक्षुषत्वमिति दुरुत्तरं व्यसनम् । कथमालोकस्य तद्ग्रहे सहकारित्वमिति चेत् यद्ग्रहे हि

यदपेक्षं चक्षुस्तदभावग्रहे ऽपि तदपेक्षत इति भवद्भिरेवाभिधानात् नापेक्षत इति पक्षे कथमालोकस्यापि चाक्षुषत्वमिति विविच्य वक्तव्यम्। एवमेव चेत् तमसैव किमपराद्धमिति यत्किञ्चिदेतत् । नापि द्वितीयः । अलोकव्यतिरिक्तचाक्षुषाणामचाक्षुषत्वप्रसङ्गात् । अथ घटादिग्रहे विषयव्यतिरिक्तमालोकमपेक्षते आलोकग्रह एव नातिरिक्तं केवलस्यैव तत्र सामर्थ्यादिति मन्यसे । तन्न । नियामकाभावात् तस्यापि रूपिमहत्तया घटादिवद्विषयातिरिक्तालोकापेक्षचक्षुर्ग्राह्यताया एव वक्तव्यत्वाच्च । न चात्र तदन्यत्वं प्रयोजकमिति वाच्यम् । आलोकाभावे नियमासिद्धेः । विषमव्याप्तिरेवायमित्युक्ते ऽपि न निस्तारः । तमस्तोमावृतानां सुवर्णादीनामतिरिक्तालोकापेक्षचक्षुर्ग्राह्याणां तदन्यत्वानवगमात्। अथापि स्यात् सामर्थ्यभेदः अत्रापि किं न स्यात्। बाधादिति चेत्। न । तस्योभयत्रापि समानत्वात् । अथ द्रव्यत्वे ऽद्रव्यं यदि तर्हि रूपवतो मूर्त्तिनान्तरीयकतया निरवयवद्रव्यस्य परमाणुतयैन्द्रियकत्वं न स्यात् नाप्यनेकद्रव्यं स्पर्शरहितत्वेन अनारब्धत्वात् मनोवत् ततः कथं द्रव्यत्वमपि द्रव्यत्वे रूपवत्त्वं चेति मन्यसे। तन्न। रूपवतोऽपि गगनादेर्भाट्टैरमूर्त्तत्वाभ्युपगमात्। तस्यापि रूपवत्त्वे बाधकं वक्ष्यत इति चेत्। न। तदपि तेन न निरस्यत इति कुतोऽवगतम् । अस्तु वानेकद्रव्यत्वम्। स्पर्शरहितद्रव्यत्वान्न तदुत्पद्यत इति चेत्। न। स्पर्शरहितस्यापि घटादेरुत्पत्तिदर्शनात्। न च ते स्पर्शवन्त एवोत्पद्यन्त इति साम्प्रतम्। क्षणमगुणं तिष्ठतीत्यभ्युपगमविरोधात्। अथ स्पर्शरहितद्रव्यत्वान्न तदुत्पद्यत इति यदि ब्रूयां तदा स्यादेवैष दोषः न त्वेवं ब्रवीमि अपि तु स्पर्शरहितद्रव्यत्वान्न तदवयवास्तदारम्भका इति मन्यसे। तन्न।

धर्मिग्राहकबोध्यत्वं सिद्धास्ते धर्मिणो यदि ।
धर्मित्वं यद्यसिद्धानामाश्रयासिद्धिरुद्भटा ॥ १ ॥
परसिद्धस्य धर्मित्वमङ्गीकर्तुं न शक्यते ।
एवमन्यतरासिद्धेर्लोप एव प्रसज्यते ॥ २ ॥
किं च
परसिद्धिः प्रमाणं चेत् तया बाधः प्रसज्यते ।
यदि सा न प्रमाणं स्यादाश्रयासिद्धिरेव ते ॥ ३ ॥
किञ्च रूपितया स्पर्शो यदा तत्रानुमीयते ।
तदापि साधनासिद्धिरिति सर्वं समञ्जसम् ॥ ४ ॥
तस्मान्नवत्वनियमो नैव सिद्धिमुपाश्नुते ।
तमसो दशमत्वस्य संसिद्धेर्मानयुक्तितः ॥ ५ ॥

अत्राभिधीयते । कथमिह तमसो द्रव्यत्वमभिधीयते तत्र मानाभावात् । न चाबाधितनीलधीविषयत्वं मानम् । आलोकानपेक्षचक्षुर्ग्राह्यत्वस्यैव बाधकत्वात् । न चात्र विकल्पावकाशः विषयातिरिक्तत्वानतिरिक्तत्वयोरन्यतरत्वस्याभ्युपेतत्वात् सर्वथालोकापेक्षाया दुर्वारत्वात् । न चाग्रेऽन्यथापि तदपेक्षा सम्भाविनीति स्वरूपासिद्धिरेव पर्यवस्येत् । न चालोकाभावस्य तद्व्यञ्जकत्वाङ्गीकारात् आलोकानपेक्षचक्षुर्ग्राह्यतेति साम्प्रतम् । तस्य तद्व्यञ्जनीयत्वे मानाभावात् रूपवच्चाक्षुषत्वेनालोकापेक्षचक्षुर्ग्राह्यताया एव वक्तव्यत्वाच्च । न चैवमालोकेऽपि विषयातिरिक्तालोकापेक्षचक्षुर्ग्राह्यत्वमनुमातुं शक्यं गौरवात् । अपि च तमसोऽजन्यत्वं जन्यत्वं वाभ्युपेयेत न प्रथमः अप्रत्यक्षतापत्तेः रूपवदजन्यत्वस्य अप्रत्यक्षत्वेन व्यभिचारानुपलब्धेः । अजन्यरूपवतोऽपि गगनादेः प्रत्यक्षत्वान्नैवमिति चेत् । न । अजन्यरूपवत्त्वे प्रत्यक्षत्वानुपपत्तेः । अजन्यरूपवतो-

ऽपि प्रत्यक्षत्वे को दोष इति चेत्। न। रूपवत्त्वे विभुत्वानुपपत्तेः रूपवच्चाक्षुषत्वे वाजन्यत्वानुपपत्तेः। न च वियदधिकरणन्यायेन जन्यत्वमेवास्त्विति साम्प्रतम्। प्रस्तावे निराकरिष्यमाणत्वात् व्यभिचाराभावे निरनुयोज्यानुयोगप्रसङ्गाच्च। नापि द्वितीयः। स्पर्शरहितद्रव्यत्वात्। न च विशेष्यवैयर्थ्यम्। रूपादिव्यभिचारपरिहारार्थत्वात्। न चैवमपि घटादौ व्यभिचारः(१)। द्रव्यत्वे सति स्पर्शात्यन्ताभावाधिकरणत्वस्य हेतुत्वात्। न च रूपवत्त्वेन स्पर्शवत्त्वानुमानात् स्पर्शरहितद्रव्यत्वमसिद्धमिति वाच्यम्। रूपवत्त्वे मानाभावात्। तर्कसङ्ग्रहकारास्तु मनस्त्वं स्पर्शवदवृत्तिवेगवदवृत्तिजातेरन्यत् जातित्वात् गोत्ववदिति तमसो द्रव्यत्वे प्रमाणमाहुः। तदप्रमाणम्। स्पर्शवदमूर्त्तान्यतरवृत्तिजातित्वोपाधिग्रस्तत्वात्। न च गगनादौ साध्याव्याप्तिरिति साम्प्रतम्। जातित्वविशेषणावच्छिन्नसाध्यव्याप्तेरिष्टत्वात्। न चेतरोपाधितुल्यन्यायत्वे सत्यप्यवच्छिन्नसाध्यव्यापकत्वादयमनुपाधिरिति शक्यं वक्तुम्। अपरथा सर्वत्रोपाधिविलयप्रसङ्गात्(२)। मनस्त्वं स्पर्शवदवृत्तिवेगवदवृत्तिजात्यन्यजातिर्न भवति स्पर्शवदमूर्त्तान्यतरवृत्तिजातित्वरहितत्वात् यत् स्पर्शवदमूर्त्तान्यतरवृत्तिजातित्वरहितं तत् स्पर्शवदवृत्तिवेगवदवृत्तिजात्यन्य-

---

(१) तथा च स्पर्शरहितत्वस्योत्पत्तिक्षणावच्छेदेन घटादौ सत्त्वात् व्यभिचार इति भावः। स्पर्शात्यन्ताभावेति। स्पर्शात्यन्ताभावस्य निरवच्छिन्नाधिकरणताया विवक्षितत्वादित्यर्थः।

(२) तथा च धूमवान् वह्नेरित्यादौ आर्द्रेन्धनसंयोगादेः प्रभामण्डलादौ साध्याव्यापकतया अनुपाधित्वप्रसङ्गेन तत्रापि किञ्चिद्विशिष्टसाध्यव्यापकत्वस्यावश्यं वाच्यत्वात् एवं स श्यामो मित्रातनयत्वादित्यादावपीति भावः।

जातिर्न भवति यथा गगनादि । या पुनः स्पर्शवद्वृत्तिवेग-वद्वृत्तिजात्यन्यजातिः न सा स्पर्शवदमूर्त्तान्यतरवृत्ति-जातित्वरहिता यथा गोत्वादिजातिरित्यन्वयव्यतिरेकिणा सत्प्रतिपक्षत्वाच्च । मनस्त्वमस्पर्शवद्वृत्तित्वरहितामूर्त्तत्व-रहितवृत्तित्वरहितेच्छ्या एव मनस्त्वान्यजातिमदाश्रयव्या-वृत्तजातेरन्यज्जातित्वाद् गोत्ववदिति विपर्ययव्याप्तत्वेन विरुद्धत्वाच्च । अत्र च मनस्त्वे मनस्त्वान्यजातिमदाश्र-यव्यावृत्तजात्यन्यत्वमेवंविधजात्यन्यत्वेनैवेति नियमस्य साध्यमानत्वान्नानेवंविधसत्ताद्यन्यत्वेन नियमासिद्धिरा-शङ्कनीया नापि मनस्त्वान्यत्वेन गोत्वे न च सत्तान्यत्व इव तमस्त्वान्यत्वेऽपि नियमोऽर्थवान् भवितुमर्हति तस्यै-तादृक्केनावयोरसम्प्रतिपन्नत्वात् । अनेवंविधसत्तादेस्तु जा-तिमदाश्रयव्यावृत्तविशेषणेन व्युदस्तत्वात् । अत्र च विशे-षणविशेष्यान्यतरव्यतिरेकेण साध्यपर्यवसानमवगन्त-व्यम् । उभयव्यतिरेकस्तु न सम्भवत्येवेत्यलं दूषणगवे-षणया ।

चक्षुः प्रकाशनाजन्यरूपवद्वीक्षणक्षमम् ।
रूपिग्राहीन्द्रियत्वेन यथैव स्पर्शनेन्द्रियम् ॥ १ ॥
इति यच्चित्सुखाचार्यैरुक्तं तन्न मनोहरम् ।
अरूपीन्द्रियता तत्र यतः साध्यप्रयोजिका ॥ २ ॥

न च रूपवद्ग्राहकत्वं व्यतिरेके प्रयोजकमिति साम्प्र-तम् । उपाधिप्रतिरोधौ तु क्व नामातीवदुर्वचाविति न्या-येन प्राक्तनस्यैवोपाधेरेतद्विपर्यये ऽपि वक्तुं शक्यत्वात् । न चात्मादिषु साध्याव्याप्तिः । रूपीन्द्रियत्वरहितत्वस्यारूपी-न्द्रियत्वशब्दार्थत्वात् । यदपि तत्त्वप्रदीपिकाकारैर्वैयर्थ्यो-पाधिग्रस्ततया तमोऽवयवा नारम्भकाः स्पर्शरहितत्वा-

न्मनोवदिति न मानमित्युक्तम्(१) । तदपि न । किमत्र द्रव्यसमवायिकारणत्वनिषेधं साध्यार्थमभिप्रेत्योपाधेरुद्भावनम् । अजनकत्वमात्रं वा । न प्रथमः । अदृष्टादिषु साध्यसत्त्वे ऽपि उपाधेरदर्शनात् । न द्वितीयः । साध्योपाधिनियमे निदर्शनाभावाद् यस्य कस्यापि यत्किञ्चिज्जनकत्वात् । मास्तूपाधिः प्राचीनदोषानुषङ्गस्तु स्यादेवेति चेत् । न स्यात् । तमसोऽवयवत्वेन शङ्क्यमानानां धर्मित्वाभ्युपगमेनोक्तदोषानुषक्तेरेवोक्तदोषानुषङ्गप्रसङ्गात् शङ्क्यमानासत्त्वे कथमाश्रयासिद्धमनुमितमुदयमासादयेदिति चेत् शङ्क्यमानासत्त्वे ऽनुपयुक्तत्वेमानुमानानुदयस्यास्माभिरप्यङ्गीकारात् साधनीयस्य शङ्क्यमानाभावस्य भवतैवाभ्युपगतत्वात् । शङ्क्यमानसत्त्वे धर्मिग्राहकप्रमाणबाध इति चेत् । न । शङ्क्यमानसाधकत्वेन भवता शङ्क्यमानस्यास्माभिः प्रमाणत्वानङ्गीकारात् । अस्तु वा एवमारम्भप्रतिषेधः स्पर्शवत्त्वात्यन्ताभावाधिकरणं द्रव्यारम्भकं न भवति स्पर्शवत्त्वात्यन्ताभावाधिकरणत्वान्मनोवदिति । तदेवं साधकमानाभावान्न तमसो द्रव्यत्वमिति सिद्धम् । तथाप्यद्रव्यत्वे किं मानमिति चेत् तमो द्रव्यं न भवति द्रव्यत्वसमानाधिकरणद्रव्यत्वावान्तरजातिरहितत्वे सति चाक्षुषत्वाद् रूपवदिति स्थित एव साधने साध-

(१) तत्त्वप्रदीपिकायामेवंप्रकारेण वैयर्थ्योपाधिर्दत्तः । न हि शरीरतया विषयतया इन्द्रियतया वा मनआरब्धद्रव्यस्य भोगसाधनता सम्भावनीया पार्थिवादिचतुर्विधशरीरानन्तर्भूतस्येन्द्रियानाश्रयस्य शरीरतया भोगसाधनतानुपपत्तेः न च विषयतया रूपस्पर्शशून्यारब्धस्य तद्रहितत्वेन विषयत्वायोगात् नापीन्द्रियतया मनस एवेन्द्रियत्वात् तदारब्धेन्द्रियान्तरस्वीकारवैयर्थ्यात् न च शरीरेन्द्रियविषयानन्तर्भूतस्य कार्यद्रव्यस्य भोगसाधनत्वं परैरङ्गीक्रियत इत्यादि ।

नान्तरमाह । तमो द्रव्यं न भवति आलोकनि-रपेक्षचक्षुर्ग्राह्यत्वादालोकाभाववदिति । तमो द्र-व्यमालोकनिरपेक्षचक्षुर्ग्राह्यत्वादालोकवदिति सत्प्रतिप-क्षत्वमिति चेत् । न । दृष्टान्तस्य साधनविकलत्वादा-लोकस्य विषयालोकतदवयवालोकसापेक्षचक्षुर्वेद्यत्वात् । आलोकाकरणकचाक्षुषप्रत्ययविषयत्वं हेतुस्तच्चालोके ऽस्ति विषयालोकस्य कर्मत्वेन करणत्वासम्भवादिति चेत् । न । विषयालोकावयवानां तत्र करणत्वसम्भवात् । विष-यालोकस्यापि संयोगावान्तरव्यापारस्य करणत्वसम्भ-वाच्चेति केचित् । तन्न । आलोकाभावस्याचाक्षुषत्वप्रस-ङ्गात् प्रतियोगिव्यतिरिक्तप्रतियोगिग्राहककारणकलापस्या-भावग्रहणकारणत्वेन वृद्धैरभ्युपगमात् । न चासावत्र सम्भवति सामग्रीमध्यपातिन आलोकस्यैवात्रासम्भवात् सत्त्वे वा नाभावग्रह इति प्रागुक्तस्यैवात्रानुसन्धीयमान-त्वादिति यत्किञ्चिदेतत् । तमोगुणेषु व्यभिचार इति तु वयम् । भवन्मते तमोगुणानामप्यालोकनिरपेक्षचक्षुर्ग्राह्य-त्वादालोकाभावे व्यभिचाराच्चेत्यलमतिविस्तरेण ।

तमःशब्दवाच्यत्वेन विप्रतिपत्तिविषय-तया पक्षत्वमालोकाभावशब्दवाच्यतया सम्प्र-तिपत्तिविषयतया साध्ययोगित्वेन सपक्षत्व-मिति न पक्षसपक्षयोरैक्यदोषः । तमःशब्दो द्रव्यवाचको न भवति आलोकशब्दान्यत्वे सति आलोकनिरपेक्षचक्षुर्ग्राह्यवाचित्वादालोकाभा-वशब्दवत् ।

Digitized by Google

तमःपदेनालोकाभावविवक्षायां सिद्धसाधनं पक्षसपक्षयोरभेदापत्तिश्च स्यादतिरिक्तविवक्षायां च बाध इति चेत्। मैवं वोचः। आलोकाभावतदतिरिक्तत्वसन्देहविषयस्यैव धर्मित्वेनोपादानादालोकाभावशब्दवाच्यतया सम्प्रतिपत्तिविषयस्य च सपक्षत्वेनोपादानान्नैष दोष इति परिहरति। **तमःशब्दवाच्यतयेति**। न चात्र नीरूपत्वानीलरूपत्वादय उपाधयः। साधनव्यापकत्वात्। नीरूपत्वानीलत्वादिसाधने प्रत्यक्षबाध इति चेत्। न। रूपवत्त्वनीलत्वादेः प्रत्यक्षेणानवगमादालोकनिरपेक्षचक्षुषा रूपादिसाक्षात्काराजननात् अन्यथा महान्धकारे कृष्णरूपानुभवप्रसङ्गादिति।

तत्र गन्धात्यन्ताभावरहिता पृथिवी।

पृथिवीं निरूपयितुमुपक्रमते। **तत्रेति**। अव्याप्तिपरिहारायात्यन्ताभावरहितेति विशेषणम्। सलिलादावपि तदुपलब्ध्यातिव्याप्तेर्नेदं लक्षणमिति तर्कसङ्ग्रहकारा मन्यन्ते। तन्न विचक्षणपरीक्षाक्षममीक्षामहे। पृथिवीसम्बन्धादेवान्यत्र तदुपलब्ध्युपपत्तेः। नियामकाभावान्नैवमिति चेत्। न। कुसुमादिसन्निकर्षाभावे तदनुपलब्धेरेव नियामकत्वात्। सलिलाद्यवयवासन्निकर्षे कुसुमादावपि कदाचित्तदनुपलब्धेर्वैपरीत्यमेव किं न स्यादिति चेत्। न। तदानीमपि तत्र गन्धस्योपलभ्यमानत्वात्। तर्हि तदानीमपि भूतान्तरसंसर्गस्तत्रास्तीति न पृथिवीमात्रस्य गन्धवत्त्वमिति चेत्। न। तदानीमपि तत्र भूतान्तरसंसर्गोऽस्तीत्यत्र मानाभावात्। गन्धोपलब्धिरेव प्रमाणमिति चेत्। मैवं वोचः। गन्धोपलब्धेर्भूतान्तरसम्बन्धनिबन्धनत्वेन जातुचिन्नियमानभ्युपगमात्। अपि च

Digitized by Google

यद्भूतान्तरसम्पर्कात् पृथिव्यां गन्धोपलब्धिरित्यभिधीयते तत्र गन्धोपलब्धेर्भूतान्तरसम्पर्कमन्तरेणैव भवताभ्युपेतत्वाद् गन्धोपलब्धेर्व्यभिचारापत्तेः तत्परिहाराय तत्रापि भूतान्तरसम्पर्केऽभिधीयमाने गन्धोपलब्धेस्तदुपाधिकत्वानुपपत्तिप्रसङ्गादेवं क्वचिदनुपरमेऽनवस्थापत्तेः क्वचिदुपरमे च व्यभिचारापत्तेः भूतान्तरस्य च गन्धवत्त्वे तत्प्रकृतिकेन्द्रियस्य गन्धवदिन्द्रियत्वेन घ्राणवद्गन्धग्राहकत्वप्रसङ्गाच्च । पृथिव्यां स्वाभाविकगन्धानभ्युपगमवादिनं प्रति साधनशून्यं निदर्शनमिति चेत् । न । बहिरिन्द्रियत्वेन ग्राह्यजातीयविशेषगुणवत्त्वात् तत्सिद्धेः । स्पर्शवदिन्द्रियत्वेन घ्राणस्य स्वग्राह्यविशेषगुणसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वानुमानादपि स्वाभाविकगन्धसिद्धेर्दुर्वारत्वाच्च । व्यापकानुपलब्धेश्च न भूतान्तरगुणत्वम् । वज्रादिगतवदनुद्भूतत्वादनुपलम्भ इति चेत् । न । अकठिनोद्भूतस्पर्शवद्वृत्तिगन्धत्वेनानुद्भूतत्वानुपपत्तेः । अनभिव्यक्तत्वात् कुङ्कुमगन्धवत् पूर्वं न भासते चम्पकादिसम्भेदे तु भासत इति चेत् । न । व्यञ्जकगन्धातिरिक्तगन्धानवभासात् चन्दनगन्धीत्यौपाधिकत्वेन प्रतीतेश्च । गन्धत्वं पृथिवीगुणमात्रवृत्ति पाकजगुणमात्रवृत्तित्वात् पाकजविशेषगुणत्ववदिति पृथिवीगुणमात्रवृत्तित्वानुमानादपि नातिव्याप्तिः । पिठरपाकप्रक्रियावादिनां हेतोरसिद्धिरिति चेत् । न । तस्या एवासिद्धेः । गन्धत्वं पृथिवीतदितरगुणवृत्ति गन्धवृत्तित्वाद् गुणत्ववदिति सत्प्रतिपक्षत्वमिति चेत् । न । एतद्गन्धान्यत्वास्यन्ताभावेनानैकान्तिकत्वाद् गन्धत्वाधिकवृत्तित्वोपाधिग्रस्तत्वाच्च । पाकजविशेषगुणत्वे साध्याव्याप्तिरिति चेत् । न । विषमव्याप्तिकत्वेन तत्त्वादिति सर्वं सुस्थम् ।

Digitized by Google

करकासमवेतवाजिविषाणासमवेतजातिमती वा ।

लक्षणान्तरमाह । **करकेति । वाजिविषाणासमवेतेति** । वाजिनि विषाणे च समवेतेत्यर्थः ।

सा द्विविधा नित्यानित्यभेदात् । नित्यः परमाणुरनित्या कार्यरूपा ।

अनवस्थाप्रसङ्गः स्याद् यदि जन्यैव सा भवेत् ।
एकस्य कस्यचिच्चेत् स्यादन्त्यस्यावयवस्य च ॥
विनिवृत्तिः प्रसज्येत कार्यद्रव्यमनाश्रयम् ।
इति नित्यैव सा चेत् स्यात् तर्हि स्यादप्रमाणिका ॥
द्रव्यान्तरं प्रसज्येत कार्यं गन्धाश्रयं च ते ।
एवं हृदि निधायैवं द्विधेति परिकीर्तितम् ॥

सा द्विविधेत्यादिना ।

पृथिवीत्वं नित्यवृत्ति घटपटवृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः ।

नित्यसत्त्वे मानमाह । **पृथिवीत्वमिति** । पृथिवीत्वमनित्यमात्रवृत्ति पृथिवीमात्रवृत्तित्वात् पटत्ववदिति न नित्यपृथिवीसिद्धिरिति तर्कसङ्ग्रहकारा मन्यन्ते । तदपरे न क्षमन्ते । द्रव्यत्वसाक्षाद्व्याप्यजातित्वाभावोपाधिग्रस्तत्वात् । सुमेरुसर्षपादीनां मानभेदानुपपत्तिप्रसङ्गाच्च सर्षपावयवैरेव वा जगति व्याप्ते मेर्ववयवानामनवकाशप्रसङ्गाच्च । पृथिवीत्वं नित्यानित्यवृत्ति कृत्स्नपृथिवीवृत्तित्वात् सत्तावदिति सत्प्रतिपक्षग्रस्तत्वाच्च । ब्रह्मवादिमते साध्यविकलो दृष्टान्त इति चेत् तत् किमिदानीं नित्यस-

नास्तीत्येवाभ्युपगच्छसि ओमिति ब्रुवतो ब्रह्मवादितापरित्यागे शून्यवादितैव पर्यवस्येत्। अस्तु तर्हि वस्तुस्वरूपमेव सत्त्वं जातित्वे मानाभावादिति चेत्। न। सत्सदित्यनुवृत्तप्रत्ययस्यैव मानत्वात् स्वरूपस्य चाननुवृत्तत्वेनानुवृत्तप्रत्ययाजनकत्वात्। जात्यादाविव सर्वत्र सत्सदिति प्रत्ययः स्वरूपनिबन्धन एवेति चेत्। न। बाधकबलेन तत्र तथा व्यवस्थापनादन्यथा सर्वजातिविलयापत्तेः। अनुमानं तु द्रव्यगुणकर्माण्येकसामान्यवन्ति सामान्यवत्त्वात् सम्मतवदिति। अनित्यसमवेतगुणकर्मणी द्रव्यनिष्ठजातिमती अनित्यसमवेतत्वाद् गोवदिति वा। यद्वा घटो घटनिष्ठजातिमत्समवायिकारणं समवायिकारणत्वाद् घटावयववत्। यद्वा घटो घटनिष्ठव्यावृत्तत्वरहितजातिमान् जातिमत्त्वात् पटवत्। यद्वा अयं घट एतन्निष्ठव्यावृत्तत्वरहितजातिमान् जातिमत्त्वात् पटवदिति नवीनाः। वृद्धमतेन तु घटो घटनिष्ठजातिमद्व्यावृत्तत्वरहितजातिव्यावृत्तजातिमान् जातिमत्त्वादयमेतन्निष्ठजातिमद्व्यावृत्तत्वरहितजात्यादिव्यावृत्तजातिमान् जातिमत्त्वाद् घटवदिति प्रयोक्तव्यम्।

न च पक्षासिद्धिः। घटो गगनवृत्तित्वरहितपटवृत्तिजातिमान् घटपटव्यतिरेकित्वरहितत्वात् पटवदिति पृथिवीत्वसिद्धिः।

अस्तु तर्हि पृथिवीत्वासिद्धावाश्रयासिद्धिरिति चेद् द्रव्यत्वं रसावृत्तिघटपटवृत्तिजातेरन्यज्जातित्वाद् गोत्ववदिति मानसिद्धत्वात्। प्रमाणान्तरमाह। घट इति। घटपटव्यतिरेकित्वरहितत्वं तु घटव्यतिरिक्तत्वे सति पटव्यतिरिक्तत्वात्यन्ताभाववत्त्वमिति न दूषणावकाशः।

न च सत्तासिद्धिः गगनं द्रव्यत्वेतरजातिमद् भूतत्वाद् घटवदित्यनुमानात् सत्तासिद्धिः ।

दृष्टान्तासिद्धिमाशङ्क्याह । गगनमिति । तदेतत् प्रष्टव्यम् । विभुत्वजात्या कथं न सिद्धसाधनतेति । विभुत्वं न जातिरिति चेत् । न । गोत्वादिना तुल्यन्यायत्वात् । जातिबाधकान्नैवमिति चेत् । न । तदनभिधानात् । न च बाधकान्तरमस्ति ततः प्रागुक्तमेव मानमनुसन्धेयम् ।

न च द्रव्यत्वासिद्धिः । गगनादि रूपावृत्तिजातिमद् गुणवत्त्वाद् घटवदिति द्रव्यत्वसिद्धिः ।

द्रव्यत्वासिद्धावप्रसिद्धविशेषणत्वमाशङ्क्याह । गगनादीति । अत्र च करका रूपानिष्ठघटनिष्ठजातिमती स्पर्शाधिकरणत्वात् पटवदित्यपि द्रष्टव्यम् । निर्गन्धस्पर्शवतां पक्षतुल्यत्वान्न तत्र व्यभिचारः शङ्कनीयः उक्तनीतेरत्रापि सुलभत्वात् ।

अथवैवं प्रयोक्तव्यमरूपत्वेनासमाश्रया (१) ।
असमानाधिकरणेत्यर्थः ।
अरूप्यसमवेतत्वरहितत्वेन सम्मता ॥
या जातिराश्रयस्तस्याः कुम्भ इत्यभिधीयते ।
कुतः कुम्भानिलान्यत्ववैधुर्यादनिलो यथा ॥ इति ।

---

(१) प्रयोक्तव्यं रूपत्वेनासमाश्रया-इति सङ्कुच्छते ।

अथ स नित्यत्रसरेणुरेव किं न स्यात् । न स्यात् । तत्र मानाभावात् । त्रसरेणुर्नित्यो महत्त्वोत्कर्षापकर्षशून्यत्वाद् गगनवदिति चेत् । न । महत्त्वापकर्षशून्यत्वस्यैव प्रयोजकत्वे व्यभिचाराभावात् महत्त्वापकर्षाधिकरणत्वेन सत्प्रतिपक्षत्वाच्च । वल्लभाचार्यास्तु त्रसरेणुर्भगवान् चाक्षुषद्रव्यत्वात् पटवदित्यनित्यत्वे प्रमाणमाहुः । वादीन्द्रास्तु त्रसरेणुः सावयवावयवो महत्त्वे सति चाक्षुषत्वात् पटवदित्याहुः । न चात्र महत्समवेतत्वमुपाधिः अयं घट एतदन्यमहत्समवेतत्वरहितसावयवावयवान्यः कार्यत्वात् पटवदिति सिद्धे महत्समवेतत्वरहितसावयवावयवे साध्याव्यापकत्वात् । न च महत्त्वासिद्ध्यासिद्धता शङ्कनीया अचाक्षुषद्रव्यत्वापत्तेः । स्मृतिरपि चात्र भवति ।

जालान्तरगते भानौ यत् सूक्ष्मं दृश्यते रजः ।
प्रथमं तत् प्रमाणानां त्रसरेणुं प्रचक्षते ॥
त्रसरेणुस्तु विज्ञेयो ह्यष्टौ ये परमाणवः ।
परमाणुः परं सूक्ष्मं त्रसरेणुर्महद्रजः ॥ इति वा ।

अणोरणीयस्त्वप्रतिपादकादागमादपि परमाणुसिद्धिरवसेयेत्यलं विस्तरेण ।

कार्यं त्रिविधं शरीरादिभेदेन ।

कार्यत्रैविध्यमाह । कार्यमिति । यत्त्वत्र कल्पतरुणा प्रजगल्भे यत्त्वत्र नैयायिकाः शरीरस्य पाञ्चभौतिकत्वमसहमानाः प्राहुः यदि देहः पञ्चभूतसमवायिकारणकः स्यात् तर्हि द्रव्यं न स्यात् तद्बहुत्ववत् यदि च प्रत्यक्षाप्रत्यक्षसमवायिकारणकः स्यात् प्रत्यक्षो न स्याद् वायुवनस्पतिसंयोगवत् तस्मान्न देहः पञ्चभूतसमवायिकारणकः द्रव्यत्वादाकाशवत् । नापि प्रत्यक्षाप्रत्यक्षसमवायिकारणकः प्रत्य-

Digitized by Google

क्षत्वात् पटवत् । तोयाद्यारब्धत्वे तोयत्वादिजातिसङ्करप्रसङ्गश्चेति । तन्न । त्र्यणुकादेरपि प्रत्यक्षत्वादिहेतोरप्रत्यक्षसमवायिकारणत्वाभावानुमानापातात् । जातिसङ्करश्च न दूषणम् । अथान्योन्यपरिहारेण भिन्नव्यक्तिनिवेशिनोः सामान्ययोः समावेशे गोत्वाश्वत्वयोरप्यसमाविष्टत्वनिश्चयाभावप्रसङ्गादुच्छिद्येत तदेतज्जातीयकथा तथा चाप्तवचनावसिततुरगभावे तुरगत्वात् स गौर्नेत्याद्यनुमानपूर्वकव्यवहारविलोपप्रसङ्ग इति मन्यसे । तदप्यसत् । परस्परव्यभिचारिण्योऽपि पृथिवीत्वादिजातय एव कियत्स्वेव देहादिषु समाविशन्ति नान्यत्र नान्यांश्चेत्यभ्युपगमेन व्यवस्थोपपत्तेः । अपि चैवं वदतः प्रमाणार्थ एवं सम्पद्यते पृथिवीत्वजलत्वे नैकत्र समाविशतः परस्परव्यभिचारित्वाद् गोत्वाश्वत्ववदिति । तत्र परस्परेति पृथिवीत्वसलिलत्वविवक्षायां साधनविकलो दृष्टान्तः न हि गोत्वाश्वत्वे पृथिवीत्वं परिहरतः । गोत्वाश्वत्वविवक्षायामविशेषेण यत्किञ्चित्परस्परविवक्षायां च हेतोरनैकान्तिकता गुणत्वरूपत्वयोर्गोत्वाश्वत्वे त्यजतोर्यत्किञ्चित्परस्परात्मकस्तम्भकुम्भौ परिहरतोरप्येकत्र समावेशात् ।

तस्मात् प्रसिद्धिसामर्थ्याद्बाधकस्यानिरूपणात् ।
पञ्चभूतमयः कायः श्रुतितोऽपि प्रमीयताम् ॥

श्रूयते हि पृथिवीमय इत्यादि । अनुमानमपि देवदत्तशरीरमेतज्जनकत्वे सत्यनुदकत्वातेजस्त्वावायुत्वानाकाशत्वात्यन्ताभाववत्समवायिकारणं शरीरत्वाद् यज्ञदत्तशरीरवत् । यद्यपि यज्ञदत्तशरीरमनुदकत्वादिमत्पृथिवीसमवायिकारणकं परेषां सिद्धं तथापि देवदत्तशरीरजनकत्वे सत्यनुदकत्वादिमज्जन्यं न भवति तस्य देवद-

त्तशरीरजनकत्वाभावेन तद्विशिष्टानुदकत्वादिमत्त्वरहितत्वादतो न साध्यविकलता शङ्कनीया । एतज्जनकत्वे सत्यनुदकत्वादिमत्त्वरहितजन्यत्वमेतज्जनकत्वरहितजन्यत्वाद्वा अनुदकत्वादिमत्त्वरहितजन्यत्वाद्वा तत्राद्यो व्याघातान्नैव युज्यते द्वितीयस्तु सिद्धन् उदकत्वादिमज्जन्यमन्तर्भाव्यैव सिद्ध्यतीति पाञ्चभौतिकत्वसिद्धिरिति । तदेतद् बालविभीषिकामात्रमिति न्यायतत्त्वविदः प्राहुः । तथाहि यदिदं पाञ्चभौतिकत्वसाधकत्वेनोपन्यस्तं तत् तावद् देवदत्तशरीरान्यकार्यत्वोपाधिग्रस्ततया नोदयमासादयति न च पक्षेतरत्वादनुपाधित्वमाशङ्कनीयम् । व्यावर्त्यस्य गगनादेर्विपक्षस्य सत्त्वात् । देवदत्तशरीरमेतज्जनकत्वे सति उदकत्वतेजस्त्ववायुत्वाकाशत्वात्यन्ताभाववज्जन्यं शरीरत्वाद् यज्ञदत्तशरीरवदिति विपर्ययव्याप्तत्वेन विरुद्धत्वाच्च । न चोदकत्वाद्यत्यन्ताभाववज्जन्यत्वं यज्ञदत्तशरीरस्य परेषामसिद्धमित्यसिद्धसाध्यं निदर्शनमिति माशङ्कनीयम् । एतज्जनकत्वरहितजन्यत्वेन साध्यप्रसिद्धेः ।

न जातिसङ्करो दोष इति रिक्तं वचो यतः ।
गोत्वाश्वत्वसमावेशस्तदा केन निवार्यते ॥
तयोरपि समावेशः स्वीकर्तुं नैव शक्यते ।
तथा सति तयोरैक्यं कथङ्कारं निषिध्यते ॥
व्यवहारेऽपि किं भेदो नेष्यते चिरजीविना ।
तथा कथाधिकारः स्यात् कथमद्वैतवादिनः ॥
तद्व्यक्त्यसमावेशात् समावेशो न चेत्तयोः ।
भूत्वादेरपि तस्मात् स्यादसमाविष्टता मम ॥

चित्ररूपवदेतत् स्यादिति चेत् । न । वैषम्यात् तत्र हि अवयविनो नीरूपत्वे चाक्षुषत्वं न स्यान्नीलपीतादि-

नानाव्याप्यवृत्तिरूपादिमत्त्वे ऽनुपलम्भविरोधः अव्याप्यवृत्तित्वे च व्याप्यवृत्तिजातीयताविरोधः विरुद्धजातीयैकरूपवत्त्वे सङ्करप्रसङ्गः ततो विजातीयानां रूपाणां जनकत्वमध्यक्षसिद्धम्। अत्र त्वेकैकारभ्यविजातीयं द्रव्यं नाध्यक्षसिद्धमतो गुणविरोधाद् विजातीयानारम्भः(१) सिद्ध एवेति गृहाण। नन्वध्यक्षाभावे ऽपि पृथिवीत्वं जलोपादेयवृत्ति पृथिवीनिष्ठात्यन्ताभावाप्रतियोगित्वाद् द्रव्यत्ववदित्यनुमानं स्यादिति चेत्। न स्यात्। जलाणुपृथिव्यन्यतरत्वे ऽनैकान्तिकत्वात् प्रसिद्धजलोपादेयवृत्तित्वसाधने बाधादप्रसिद्धजलोपादेयवृत्तित्वसाधने चाप्रसिद्धविशेषणत्वात्। अपृथिवीवृत्तित्वेन सोपाधिकत्वाच्च। पृथिवीसमवेतं द्रव्यं न निर्गन्धसमवेतं गन्धवत्त्वात् पृथिवीमात्रारभ्यद्व्यणुकवदिति सत्प्रतिपक्षत्वाच्च। न दृष्टान्तासिद्धिः। विजातीयैरारम्भे ऽपि सजातीयैरारम्भस्येष्टत्वात्। यत्तु कैश्चिदभिहितं पृथिवीत्वं जलोपादानवृत्ति जलावृत्तिधर्मत्वाद् वायुत्ववदिति। तत्र जलोपादानशब्देन जलमभिधीयते पृथिवी वा प्रथमे साध्यावैशिष्ट्यं द्वितीये व्याघात इत्युपेक्ष्यम्। अथ सङ्कीर्णत्वादजातित्वमेव किं न स्यादिति मन्यसे। तन्न। अस्ति तावत् प्रतिगन्धवतां समवायिकारणत्वम्। न चैतदुपलब्धपूर्वभावानां व्यक्तीनामेव भवितुमर्हति सति भावमात्रस्याहेतुत्वात्मकत्वात्। अन्यथा रासभादेरपि पटादिकारणतापत्तेः। अपि तु सत्येव भावः स च कतिपयव्यक्त्युपग्रहमन्तरा न घटत इति तदुपग्राहको जातिविशेषः स्वीकर्तव्य एव स एव च पृथिवीत्वम्। एवमप्त्वादिजातिसाधनं द्रष्टव्यमित्यास्तां

(१) टिप्पण्यां बुद्धेत्यधिकः पाठः।

विस्तरेण । योऽपि च त्र्यणुकादेः प्रत्यक्षत्वहेतुना प्रत्यक्षसमवायिकारणकत्वप्रसङ्गोऽभिहितः । सोऽपि न युक्तः । शब्दादावनैकान्तिकत्वात् तेषामपि पक्षत्वे कालातीतताप्रसङ्गात् तदाश्रयाणामरूपिद्रव्यतया बाह्येन्द्रियाप्रत्यक्षतयैव सिद्धेः आत्मन्यनैकान्तिकत्वाच्च । यत् पुनः परस्परशब्दार्थविकल्पनेन दूषणमभिहितं तत् तादृशप्रमाणार्थानभ्युपगमादेव निरस्तम् । कस्तर्हि भवतः प्रमाणार्थोऽभिमत इति चेच्छ्रूयतामवधानेन । भूत्वं नाप्त्वैकार्थसमवेतं तद्व्यापकत्वरहितत्वे सति तद्व्यभिचारिजातित्वाद् गोत्ववत् । जलाणुपृथिव्यन्यतरत्वे व्यभिचारो माभूदिति जातिग्रहणम् । द्रव्यत्वे व्यभिचारो माभूदिति विशेषणोपादानम् । तद्व्यभिचारित्वं च न तद्वन्निष्ठात्यन्ताभावप्रतियोगित्वमपि तु तदत्यन्ताभाववद्वृत्तित्वमिति न साध्यावैशिष्ट्यमाशङ्कनीयम् । यद्वा पृथिवीत्वमप्त्वाधिकरणनिष्ठात्यन्ताभावप्रतियोगि अप्त्वाव्याप्यजातित्वाद् गोत्ववत् । अप्त्वं वा पृथिवीत्ववन्निष्ठात्यन्ताभावप्रतियोगि पृथिवीत्वाव्याप्यजातित्वाद् गोत्ववत् । व्याप्यव्यापकभावस्य भेदाधिष्ठानत्वेनाप्त्वादेरप्यप्त्वाद्यव्याप्यत्वादनैकान्तिको हेतुरिति चेत् । न । अप्त्वादिमन्निष्ठात्यन्ताभावाप्रतियोगित्वस्याप्त्वादिव्याप्यत्वस्याप्त्वादावपि विद्यमानत्वात् । पृथिवीत्वमव्याप्यं यस्या इत्यनेनाकारेण द्वितीयानुमाने साधनशून्यता निदर्शनगता परिहरणीयेत्यलमतिपाडया ।

तस्मात् प्रसिद्धसामर्थ्याद् बाधकस्य निरूपणात् ।
त्वत्प्रमाणस्य दुष्टत्वान्न देहः पाञ्चभौतिकः ॥

शरीरलक्षणं दर्शयति । भोगायतनमन्त्यावयवि शरीरम् । तत्र न तावद् भोगायतनत्वं भोगाश्रय-

त्वमसम्भवित्वादात्मन्यतिव्यापकत्वाच्च । नापि भोगसाधनत्वं जनकत्वं स्यादात्मादावतिव्यापकत्वात् करणत्वस्य च मनस्यतिव्यापकत्वात् । असमवायिकारणानुरोधेन विभुकार्यविशेषगुणानां देशनियमाच्छरीरे ऽसम्भवाच्च । यदवच्छिन्नात्मनि भोगः तदायतनमिति चेत् । न । मनस्यतिव्यापकत्वादसमवायिकारणानुरोधेन विभुकार्यविशेषगुणानां देशनियमस्योदयनादिभिः स्वीकारादात्ममात्राश्रयस्य भोगस्य शरीरतदवच्छेदयोर्भोगानाश्रयत्वेन शरीरावच्छिन्नात्माश्रयत्वेनासम्भवित्वाच्च । शिरश्चरणादावतिव्यापकत्वाच्च शिरसि मे सुखं पादे मे वेदनेत्याद्यनुभवबलेन शिरःपादावच्छिन्नेऽप्यात्मनि भवद्भिर्भोगस्वीकारात् । अत्यन्तावयवित्वे सतीति विशेषणाददोष इति चेत् । न । अत्यन्तावयवित्वस्यैव निर्वक्तुमशक्यत्वात् । द्रव्यानारम्भकं कार्यद्रव्यमत्यन्तावयवीति चेत् । न । पटादावव्याप्तेः न च पटो न द्रव्यारम्भक इति वाच्यम् । पटद्वयारब्धरज्जुद्रव्यस्याध्यक्षत एव सिद्धेः । उच्यते । ज्ञानजनकात्मसंयोगाश्रयत्वं भोगायतनत्वमत्यन्तावयवित्वविशेषणोपादानान्नात्मादावतिव्याप्तिः । तथाप्यात्मसंयोग्ययं घटादिरिति विशिष्टज्ञानजनकविशेषणीभूतात्मसंयोगाश्रये ऽन्त्यावयविनि घटादावतिव्याप्तिस्तदवस्थैवेति चेत् । मैवम् । आत्मसंयोगविषयत्वरहितज्ञानस्यैव ज्ञानपदेनोपादानात् । द्रव्याजनककार्यद्रव्यत्वं चान्त्यावयवित्वम् । न च पटादावव्याप्तिः घटपटव्यतिरेकित्वरहितत्वेन घटवत् तत्र तत्प्रतिषेधात् । न च घटपटव्यतिरेकित्वरहितत्वेन पटवद् घटे ऽपि द्रव्यजनकत्वं साधयितुं शक्यम् । जनितद्रव्यस्य योग्यत्वे योग्यानुपलम्भविरोधः । न चायोग्यं तत् । प्रत्यक्षसमवायिकारणक-

द्रव्यत्वेन तत्प्रतिषेधात् । न चैवंसाधने ऽनुभवविरोधः परस्परसंयोगित्वातिरिक्तानवभासनादिति सर्वं सुस्थम् ।

त्वचः समस्तावयवैः संयोगी मूर्त्त उच्यते ।
त्वचासंयुक्तदेशेन विकलः करणाद् बहिः ॥
व्याप्त्या त्वगिन्द्रियसंयोगाश्रय इत्यर्थः ।
एतद्वा कायलक्ष्मेति वादिवागीश्वरो जगौ ॥

तद् द्विविधं योनिजमयोनिजं चेति । शेषे प्रमाणं नास्तीति चेत् । न । अहं मदीययोनिजान्यपार्थिवशरीरवान् संसारित्वाच्चैत्रवत् । यद्वा पृथिवीत्वमयोनिजशरीरवृत्ति द्रवत्वसमानाधिकरणद्रव्यत्वावान्तरजातित्वादप्त्ववदिति । श्रुतिरपि चात्र भवति हिरण्यगर्भः समवर्त्तताग्रे भूतस्य जातः पतिरेक आसीदित्यादिका । स्मर्यते च । अयोनिजशरीराणि भवन्त्यद्भुतकर्मणामिति ।

शरीरसंयुक्तमपरोक्षप्रतीतिसाधनमतीन्द्रियमिन्द्रियम् । ज्ञानकरणाजन्यत्वरहितज्ञानत्वमपरोक्षत्वम् ।

इन्द्रियलक्षणं साक्षात् प्रतीतिकरणमित्येव नाधिकं व्यावर्त्याभावाद् द्वितयमेव प्रतीतिकरणं लिङ्गमिन्द्रियं च लिङ्गं च साक्षात्पदेन निरस्तमिति । वादीशस्तु साधनशब्दस्य कारणवाचित्वमभ्युपगम्य निर्विकल्पकजनकशरीरसंयोगाधिकरणत्वे सति योगजधर्माजन्यजन्यसाक्षात्काराविषयत्वे सति शरीरत्वानधिकरणमिन्द्रियमिति यथाश्रुतमेवैतद्व्याचक्षते । तत्रेतरेतराश्रयत्वं परिहर्तुमतीन्द्रियत्वलक्षणमाह । अतीन्द्रियत्वमज्ञातसाधकत्व-

Digitized by Google

(१)मिति । योगजधर्माद्यजन्यजन्यसाक्षात्काराविषयत्वमिति वा द्रष्टव्यम् ।

प्रतीयमानतया भोगसाधनं विषयः ।

इति पृथिवीप्रकरणम् ।

पर्यवसिता पृथिवी ॥

पृथिवीवृत्तित्वरहितहिमकरकावृत्तिजातिमज्जलम् । तन्नित्यानित्यभेदाद् द्विविधम् । जलत्वं नित्यवृत्ति हिमकरकावृत्तिजातित्वात् सत्तावदिति तत्सिद्धिः । करका गगनवृत्तित्वरहितहिमवृत्तिजातिमती स्नेहाधिकरणत्वाद्धिमवदिति करकायां तत्सिद्धिः । अनित्यं त्रिविधं शरीरादिभेदेन । शरीरं वरुणलोके । जलपरमाणवः पारम्पर्येण शरीरारम्भकाः इन्द्रियारम्भकत्वात् पार्थिवपरमाणुवत् । इन्द्रियारम्भकत्वं तु रसनस्याप्यत्वात् सिद्धम् । रसनमाप्यं रूपादिषु पञ्चसु मध्ये रसस्यैवाभिव्यञ्जकत्वात् सक्तुरसाभिव्यञ्जकसलिलवदिति । रसनसिद्धिस्तु रसोपलब्धिः करणसाध्या अपरोक्षप्रतीतित्वाद् रूपोपलब्धिवदिति । विषयस्तु सरित्समुद्रादिर्हिमकरकादिः । न च करकायाः काठिन्यात् पार्थिवत्वमाशङ्कनीयम् । अनन्तरमेव स्वभावापगमादिति । इत्यप्प्रकरणम् ।

(१) अतीन्द्रियत्वं नामाज्ञातसाधनत्वमिति मुद्रितलक्षणावल्यां पाठः ।

Digitized by Google

Digitized by Google

PK
101
.P2
n.s.
v.21

Pandit
(1899)

657473

657473

Digitized by Google

UNIVERSITY OF CHICAGO
108 539 541

Digitized by Google